६२२८

१९६-रत्न

बृहद्गार्गिकेय

६२२८ · पत्र
२५९

ॐश्रीगणेशायनमः ॥ आचाररत्नाकरस्यसूचीपत्रम् पत्रपृष्ठपंक्त्यात्मकम् ॥

१

आचाररत्नाकरस्यसूचीपत्रम् ॥

आचाररत्नाकरस्य सूचीपत्रम् ॥

आचाररत्नाकरस्य सूचीपत्रम्

३
3

आचाररत्नाकरस्य सूचीपत्रम्

आचाररत्नाकरस्य सूचीपत्रम् ॥

४

आचाररत्नाकरस्य सूचीपत्रम् ॥

शिव

५
5

आचाररत्नाकरस्यसूचीपत्रम् ॥

आचाररत्नाकरस्य सूचीपत्रम्॥

६

6

आचाररत्नाकरस्य सूचीपत्रम् ॥

आचाररत्नाकरस्य सूचीपत्रम्

आचाररत्नाकरस्य सूचीपत्रम्

आचाररत्नाकरस्य सूचीपत्रम्॥

आचाररत्नाकरस्य सूचीपत्रं॥

९

9

२४३	१	१०	श्राद्धे मांसभोजननिषेधः
२४३	१	११	मत्स्यमांसभक्षणे दोषः
२४३	१	१२	गृहस्थस्य मांसत्यागमहिमावर्णनं
२४३	२	१	मांसत्यागे शतान्यमेधसमं फलं
२४३	२	२	हिरण्यदानादेरपि मांसाभक्षणे विशेषः
२४३	२	४	यदि सर्वदा मांसत्यागे असमर्थः स्यात्तदा पर्वसु अयनयोस्त्वन्ते
२४३	२	७	अथ पशुहिंसाविधिः
२४३	२	८	आहर्त्रादीनां घातकानां वर्णनं
२४४	२	३	कलौ श्राद्धे मांसनिषेधः
२४४	२	४	ब्राह्मणादीनां मद्यान्नादिविधानं
२४४	२	९	प्राणिहिंसां विना मांसानुत्पत्तिः
२४४	२	११	हिंसायां वैद्विधनियमवर्णनम्

२४५	१	१	पक्वान्नशुद्धिनिरूपणम्
२४५	१	४	मक्षिकाकेशादिदूषितान्नस्य शुद्धिः
२४५	१	८	मक्षिकादिभिर्दूषितमन्नं हिरण्यतोयैः संस्पृश्य भोज्यमाह
२४५	२	१	गवाघ्राताद्यन्नेषु भस्मप्रक्षेपेण शुद्धिः
२४५	२	११	काकैः श्वभिर्दुष्टस्यान्नस्य शुद्धिः
२४५	२	१२	देवयात्राविवाहादिषु काकादिभिः स्पृष्टस्यान्नस्य न दोषः
२४६	१	३	इतिहासपुराणानां श्रवणादिनिरूपणम्

२४६	१	८	ब्राह्मणातिरिक्तमुखात्कथाश्रवणे दोषवर्णनम्
२४६	१	९	कथाश्रवणप्रकारनिरूपणम्
२४६	१	१०	पुराणादिश्रवणफलम्
२४६	१	११	भारतश्रवणमाहात्म्यमुक्तम्
२४६	२	२	भागवतश्रवणमाहात्म्यम्
२४६	२	७	रामायणश्रवणमाहात्म्यम्
२४६	२	१२	वासुदेवकथाश्रवणमाहात्म्यम्
२४७	१	४	विष्णुकथाऽश्रवणे दोषनिरूपणम्
२४७	१	११	सायंसन्ध्यानिरूपणम्
२४७	१	१२	ध्रुवदर्शनम्
२४७	२	५	साग्नेः सायंहोमविधिः

आचाररत्नाकरस्य सूचीपत्रम्

दोषु

[illegible]

ॐश्रीगणेशायनमः श्रीसरस्वत्यैनमः ॥ अथधर्मार्थकाममोक्षाणांचतुर्विधपुरुषार्थकारणांधर्मसाध्यत्वाद्धर्मस्य
चसदाचारमूलत्वादादौसदाचारोनिरूप्यते । नाथधर्मप्रशंसामाहमनुः । विद्यारूपंधनंशौर्यंकुलीनत्वमरोगता ।
राज्यंस्वर्गश्चमोक्षश्चसर्वंधर्मादवाप्यते १ श्रुतिस्मृत्युदितंकर्मसम्यगनुतिष्ठंश्चमानवः । इहकीर्त्तिमवाप्नोतिप्रेत्यचानुत्त
मांगतिं २ सर्वंहिसमवेक्ष्येदंनिखिलंज्ञानचक्षुषा । स्मृतिप्रामाण्यतोविद्याद्यत्स्वधर्मनिवेशनं ३ नामुत्रहिसहा
यार्थंपितामातानुतिष्ठतः । नपुत्रदारानज्ञातिर्धर्मस्तिष्ठतिकेवलः ४ तस्माद्धर्मंसहायार्थंनित्यंसंचिनुयाच्छनैः ।५
शनैरितिपदमाश्रमपीडाभावपरम् । तथाचभारते । यस्यनोत्क्रामतिमतिर्धर्ममार्गानुसारिणी । तमाहुःपुण्यकर्माण
मशोच्यमिहबांधवैः कृतार्थत्वादशोच्यमित्यर्थः । पुनरपितत्रैवोक्तम् । सोपानभूतंस्वर्गस्यमानुष्यंप्राप्यदुर्लभम्
तथात्मानंसमादध्याद्भ्रश्येतनयथापुनः । ऊर्ध्वबाहुर्विरौम्येषनचकश्चिच्छृणोतिमे । धर्मादर्थश्चकामश्चसकि
मर्थंनसेव्यते । नार्थलोभान्नचस्नेहान्नक्रोधान्नचमत्सरात् । नकामान्नभयाद्वापिधर्मंप्राज्ञःपरित्यजेत् पुनस्तत्रैव
नजातुकामान्नभयान्नलोभाद्धर्मंजह्याज्जीवितस्यापिहेतोः । धर्मोनित्यःसुखदुःखेत्वनित्येजीवोनित्योहेतुरस्यत्वनि
त्यः । जीवोपाधेरविद्याया अनित्यत्वादित्यर्थः । तथा देवर्षिमनयोनागागंधर्वागुह्यकास्तथा । धार्मिकंपूजयंत्ये
हनधनाढ्यंनकामिनं । किंधनेनविपन्नस्ययद्दैवैर्हिविलुप्यते । परोधर्मःकृतोयस्तुमृतमप्यनुगच्छति अनुगच्छ
ति परत्रापिजीवसंबद्धस्तिष्ठतीत्यर्थः । अर्थहीनोपिधर्मात्मास्वर्गंगच्छतिमानवः । अर्थवान्धर्महीनोपिनरकंप्रतिपद्यते

महाभारते । धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः । तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत् ॥ स्कांदे एक
एव हि जायेत प्रलीयेत तथैककः । एकः सुकृतमश्नीयादेको दुष्कृतमुग्नरः ॥ मृतं शरीरमुत्सृज्य काष्ठलो
ष्ठसमं क्षितौ । विमुखा बांधवा यांति धर्मस्तमनुगच्छति ॥ यस्यां रात्र्यां व्यतीतायां न किंचिच्छुभमाचरेत् ।
तमेव वंध्यं दिवसमिति विद्याद्विचक्षणः ॥ सुकृतमश्नीयादिति शुभादृष्टजन्यभोगभाग्भवतीत्यर्थः ।
एवमुत्तरत्रापि रात्रिपदमहोरात्रपरं । दिवसमित्युपसंहारात् । अत्रापवादमाह योगियाज्ञवल्क्यः । कर्मणा
मनसा वाचा यत्नाद्धर्मं समाचरेत् । अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न हि ॥ मनुरपि । परित्यजेदर्थ
कामौ धर्मपीडाकरौ ततः । धर्ममप्यसुखोदर्कं लोकविद्विष्टमेव च । असुखोदर्कं संभाव्यमानासुखम् ।
लोकविद्विष्टं लोकनिंदितं मधुपर्के गवालंभादि । एवं चापवर्गाद्युपयोगित्वात्सर्वैरपि धर्म उपासनीयः ।
नन्वपवर्गं प्रति ज्ञानस्यैव हेतुत्वमुक्तं तदेव विदित्वातिमृत्युमेतीत्यादिश्रुतेरिति चेन्न । ज्ञानस्यापवर्गं प्र
ति सन्निपत्योपकारकतया प्रतिपादनपरत्वात् । यागादिकर्मणा सत्वशुद्धिद्वारा आत्मज्ञानोत्पादकत्वात् ।
अस्त्वेवं तथापि मोक्षो धर्मप्रयोज्यः । को धर्मः । किं तस्य लक्षणमिति चेदुच्यते । वेदप्रतिपाद्यः प्रयोजन
वदर्थो धर्मः । स च यागादिः । यजेत स्वर्गकाम इत्यादिवाक्येन स्वर्गमुद्दिश्य पुरुषं प्रति विधानात् ।

द्विविधो धर्मः । श्रौतः स्मार्तश्च तत्राग्न्याधानादिरूर्वको यो वेदप्रत्यक्षवेदमूलो दर्शपूर्णमासादिः
श्रौतः । अनुमितपरोक्षशाखामूलः शौचाचमनादिः स्मार्तः ।
अभ्युदयनिःश्रेयससाधनत्वेन धारयतीति धर्मः
एवं कुर्वन्तं लोका वदन्त्ययं धार्मिकः स धर्मः ।

नचचोदनालक्षणोऽर्थो धर्म्म इति सौत्रलक्षणात तल्लक्षणविरोध इति वाच्यं चोदनापदस्य वेदमात्रपरत्वात।
सचधर्मस्त्रिविधः। नित्यनैमित्तिककाम्यभेदात। तत्रनित्यः सन्ध्योपासनादिः। नैमित्तिक उपराग
इ हि २= स्नानादिः। काम्यः कारीरीयागादिः। ननु किमिदं नित्यत्वं नाम। अकरणे प्रत्यवायजनकत्वमिति चेन्न।
उपरागस्नानादि नैमित्तिकेऽतिप्रसंगात। अथ नियतकालकर्तव्यतया विहितत्वं नित्यत्वं। अनियतका
लनिमित्तोपादानेन विहितत्वं नैमित्तिकत्वमिति चेन्न। राहूपरागादिरूपनियतकालविहितस्नानादे
रपि एकादश्यादिवन्नित्यत्वप्रसंगात। अथोपरागो न नियतः। एकादशी तिथिः पंचदश्येव नियता इति
चेन्न एकादश्यपि वृद्धिक्षयवशात्कदाचिदतिरिक्तापि भवति एवं च नित्यताविनियोजकलिंगेन वि
हितत्वं नित्यत्वं। अहरहः सन्ध्यामुपासीतेत्यादीनि च लिंगानि संग्रहकारेण संगृहीतानि। नित्यं
इत्यु ९ सदा यावदायुर्न कदाचिदतिक्रमेत। अतिक्रमे दोषः श्रुतेरत्यागचोदना। फलाश्रुतेर्वीप्सया च
तन्नित्यमिति कीर्तितमिति। नचैवं ज्योतिष्टोमेन वसंते यजेतेत्यादीनामपि वीप्साश्रवणान्नित्यत्वप्रसंग
दोष इति वाच्यम्। इष्टत्वात। ननु कामनाश्रवणात्काम्यमेतत्कथं नित्यं स्यात नित्यमफलं भवति केवल
मकरणे प्रत्यवायपरिपाकायैवानुष्ठीयते इति चेन्न। नित्यानामपि सन्ध्योपासनादीनां फलश्रवणात।

2

तथाहि । सन्ध्यामुपासते ये तु सततं संशितव्रताः । विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनमित्यतः । प्रत्यवाय
परिहारस्यापि फलस्य संभवादकरणे प्रत्यवायश्रवणात् । ईप्सिततमत्वाच्चोभयरूपमप्यविरुद्धम् । न चैवं नित्यका
म्यविवेकानुपपत्तिः फलवत्त्वाविशेषेपि अकरणप्रत्यवायपरिहाराय मुख्यफललाभाय चानुष्ठानं
प्रसज्येतेति वाच्यं । एकस्य तूभयार्थत्वे संयोगपृथक्त्वमिति जैमिनीयन्यायेन सकृत्प्रयुक्तस्यैव नित्यस्योभय
फलनिर्वाहकत्वात् । खादिरो यूपो भवति खादिरं वीर्यकामस्य कुर्यादिति श्रुतौ विक्रमार्थत्वेन पुरुषार्थत्वेन
च श्रुतस्य खादिरस्योभयार्थत्वं यथा । एवं च वीप्सादिलिंगरहितस्य यस्याकरणे प्रत्यवायस्तन्नैमित्तिक
मित्यर्थसिद्धम् । तच्च नित्यं काम्यं चेति द्विविधम् । ऐहिकफलामुष्मिकफलभेदात् । तत्रैहिकं फलं पुत्रेष्ट्या
दिकम् । आमुष्मिकफलमपि द्विविधम् । स्वर्गापवर्गरूपफलभेदात् । तत्राद्यमग्निहोत्रादिकं । द्वितीयम
श्वमेधादि । तत्त्वज्ञानार्थतया निष्कामतयानुष्ठितस्य सत्त्वशुद्धिहेतुतया तत्त्वज्ञानापवर्गद्वारहेतुत्वमस्त्ये
व । तदेवं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेत्यादिश्रुतेः । तथा च पाद्मे ।
तत्रापि धर्मो द्विविधः प्रवृत्तो हि निवर्तकः । अर्थानुसारिणः पुंसः प्रवृत्तो धर्म उच्यते । अर्थानर्थदृशः पुं
सोऽभक्तस्य च हरौ तथा । निवृत्तः प्रोच्यते सद्भिरधिकारव्यवस्थया । एक एव हि धर्मोपि फलेच्छानिच्छया यतः ।

ऐहिकफलहेतुत्वा
दैहिवात्वं

तत्र सकामकर्मणि कामनाविशिष्टैवाधिकारी इतरयोश्च सकामो निष्कामश्च ॥ प्रकरणे प्रत्य
वायश्रवणात् तत्राधिकारी मदीयमिदं कर्मेति कर्मणि सामर्थ्यज्ञानवान् सकामकर्म
णि सर्वांगोपसंहारेणैवाधिकारचोदनादंगानुष्ठानसमर्थस्यैव प्रधानानुष्ठानेऽधि
कृतत्वात् उक्तंच जैमिनिना श्रौतात्तदंगात्कर्मणो फलावश्यंभावनियमात् खङ्गादी
नामाज्यावेक्षणविष्णुपदक्रमणप्राग्वंशार्थज्ञानासंभवान्नाधिकारः नित्येषु फलेषु वि
धिपरिपालनस्यैवोद्देश्यत्वादंगानुरोधेन प्रधानवाधस्यान्याय्यत्वादकरणे प्रत्यवाय
वा ४८ श्रुतेश्च न सर्वांगोपसंहारेणाधिकारः यदाह वौधायनः यथाकथंचिन्नित्यानि शक्त्य
वस्थानुरूपतः येन केनापि नित्यानि नैव कार्याणि लोपयेदिति एवं स्वर्गकामत्वादिना
विशेषेणाधिकारश्रवणेऽपि देवानामनधिकारः तेषामुत्तमत्वात् धर्मानुष्ठाने प्रयो
जनाभावात् देवा वै सत्रमासत । अग्निर्वा कामयत । अन्नादो देवानां स्यामित्यादिवचनं
अर्थवादपरम् भाविसंज्ञामनुष्याणामेव कामे केषां विनिर्दिष्टाद्वा यत्तु स्वोद्देशेन देवानां
द्रव्यत्यागायोगान्नाधिकार इति केचित्तन्न मीमांसकानां लज्जाजनकत्वात् मीमांसकम

ते देवतायां मंत्रमयत्वात्तदुद्देशेन त्यागे विरोधाभावात् ॥
तिरश्चामपि दुष्करणत्वेन नाधिकार इति दिक् ॥

3

२

ननु पशूनामपि धर्मेऽधिकारः श्रूयते गावो वा सत्रमासत तां शृंगाः सती शृंगाणि नो जायंतामिति कामेन तासां दश मासान्निषण्णा आसन् शृंगाण्यजायंत ता उदतिष्ठन्नराल्मेति अथ यासां नाजायंत ताः संवत्सरमाप्त्वोदतिष्ठन्नराल्मेति श्रुत्यातिरश्चां गवां सत्रे नुष्ठातृत्वाविधानात् । अत्रोच्यते । कामितार्थसिद्धिं प्राप्ताः इत्यर्थः । नायं दोषः अस्याः श्रुतेरर्थवादत्वात्

४ तत्राचारप्रशंसामाह मनुः । श्रुतिस्मृतिसदाचारस्वस्य च प्रियमात्मनः ॥ सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतम् । श्रूयते गुरुमुखाद्यासा श्रुतिः । ऋग्वेदादिः । स्मर्यते वेदार्थो यया सा स्मृतिः । मन्वादिप्रणीतं धर्मशास्त्रम् । सदाचारः शिष्टाचारः । शिष्टत्वं च वेदप्रामाण्याभ्युपगंतृत्वम् । स्वस्य चात्मनो यत्प्रियम् । यदाह भगवान्कात्यायनः । अष्टवर्षं ब्राह्मणमुपनयेद्गर्भाष्टमे वा । व्रीहिभिर्यवैर्वेत्यादिश्रुतेश्च । एतेन वैदिकानेकधर्म्मधीसंस्कृतात्मनामात्मतुष्टेः प्रमाणत्वं सिद्धं धर्म्मप्रसिद्धये इति मदीक्रममपि संगच्छते । सम्यक्संकल्पजः कामः सम्यक्संकल्पाज्जातः कामः सर्वशास्त्राविरुद्धो यथाम यां भोजन व्यतिरेके गोदकेन पातव्यमिदं धर्ममूलं धर्मे प्रमाणम् । मनुरप्याह । वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां । आचारश्चैव साधूनामात्मनस्तुष्टिरेव च । साधूनां शिष्टानाम् । एकस्मिन्नर्थे परस्परविरोधे वस्तुनो द्वैरूप्यासंभवेनान्यतरबाधकस्यावश्यकत्वात् । किं केन बाधनीयमित्याकांक्षायामाह व्यासः । श्रुतिस्मृतिपुराणानां विरोधो यत्र दृश्यते । तत्र श्रौतं प्रमाणं स्यात्तयोर्द्वैधे स्मृतिर्वरा । तयोर्नाम स्मृतिपुराणयोर्विरोधे स्मृतिर्बलीयसी । चिंतामणौ । स्मृतिस्तत्र योर्विरोधे स्मृतेर्बलीयस्त्वस्य निश्चिततरणस्वामूलत्वात् । स्मृतीनां तरर्थसाम्ये तत्परत्वपर्यवसानात् । यदाह मनुः । स्मृतिद्वैधं तु यत्र स्यात्तत्र धर्म्मावुभौ स्मृतौ । उभावपि हि तौ धर्मौ

सत्रे वै संवत्सरमुपयंत्यथ यं त्वेवं विद्वांसः संवत्सरमुपयंत्य ध्रुवं त्वेवं तदृद्धिकामस्य संवत्सरसत्रे विधातुं प्रथमतो गोसत्रं वै संवत्सर इति प्रशंसा कृता । तां संभावयितुं गावो वा इत्यादि पठितं न चैतस्यार्थवादस्य यद्वेद किं तिरश्चां हि मंत्रोच्चारणे कर्मानुष्ठाने च सामर्थ्याभावः प्रत्यक्षसिद्धः । श्रूयंते रेच श्रूयते रेषां पशूनां विन्मनुरवदं दितपादिवत्सावयेता तां यर्थवर्णयितुं शक्यं प्रत्यक्षेण श्रुत्यंतरेण च विरुद्धत्वात् । पशूनां विवेकाभावं दर्शयति । [illegible] स्वार्थे तात्पर्यं । गोशब्देन गवाभिमानिदेवतानां विवक्षितत्वात् मशनापिपासे एवाभिज्ञानावि ज्ञातं वदंति न विज्ञातं पश्यंति न विदुः स्वस्तनमिति पशूनां विवेकाभावं दर्शयति । अत एवाभिमानिव्यपदेशस्त्विति सूत्रे सर्वेषां मृदादिवस्तूनां श्रुतिमूलत्वे नाभिमानिदेवताः प्रतिपाद [illegible] पूर्वं सर्वथामनुष्यमात्राधिकारकं [illegible] त्वमिति संक्षेपः । १ ॥ वं० १

सम्यगुक्तो मनीषिभिः। विनिगमनाविरहादुभयविकल्पे विरोधे विकल्पः। अत एव गोतमः। तुल्यबलविरोधो विकल्पः। एवं स्मृत्याचारयोर्विरोधे विकल्प एव। श्रुतिस्मृत्योर्विरोधे तु उपजीव्यत्वेनाधिकबलत्वाच्छ्रुत्या स्मृतिर्बाध्यते। यदाह लौगाक्षिः। श्रुतिस्मृत्योर्विरोधे तु श्रुतिरेव बलीयसी। अविरोधे सदा कार्यं स्मार्तं वैदिकवत् सदा। स्मृत्योः परस्परविरोधे तु श्रुतिमूलया अमूलाया बाधः। एवमाचारस्थलेपि समूलो निर्मूलं बाधते। स्मृत्याचारयोर्विरोधे स्मृत्याचारो बाध्यते। तस्य ह्यन्तरितप्रामाण्याभावात्। अन्यस्मृतीनां मनुविरोधे तु मनुस्मृतिरेव बलीयसी। यद्वै किंचिन्मनुरवदत्तद्भेषजं मातीदिति। वेदेन तत्प्रामाण्यस्योपपादितत्वात्। यथा। यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः। स धर्मोभिहितो वेदे सर्वज्ञानमयो हि सः। स्मृतिलौकिकवाक्ययोर्विरोधे च स्मृतिरेव बलीयस्त्वमुक्तं चतुर्विंशतिमते। स्मृते वेदविरोधे तु परित्यागो यथा भवेत्। तथैव लौकिकं वाक्यं स्मृतेर्बाधात्परित्यजेत्। ज्योतिषागमयोर्विरोधे आगमोक्तं बलवत्। यदाह बौधायनः। यस्मिन्नंशे विरोधोस्ति ज्योतिषोक्तागमोक्तयोः। ज्योतिषोक्तं परित्यज्य धर्मशास्त्रं समाचरेदिति। स्मृतिद्वैधे तु विषयः कल्पनीयः पृथक्पृथक्। स्मृत्योर्विरोधे बालवान्न्यायस्तु व्यवहारतः।

४ यथोक्तकोधर्म्मः । धर्म्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः । स्मृतिपुराणसहित इत्यर्थः । भारतेपि ।
पुराणो मानवो धर्म्मः सांगो वेदश्चिकित्सितम् । आज्ञासिद्धानि चत्वारि न हंतव्यानि हेतुभिः । पुनस्तत्रैव
आचारः प्रथमो धर्म्म इति वेदविदो विदुः । न ह्यनाचारिणं लोकाः प्रवदंति मनीषिणः । पुनस्तत्रैव ।
आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः । आचारादक्षयं धर्म्ममाचारो हंत्यलक्षणम् । अत्र धर्म्मा
चारयोर्जन्यजनकभावलक्षणः संबंधः । अक्षयमप्रतिहतम् । अलक्षणमित्यशुभसूचकमंगचिह्नम् ।
तथाच सर्वत्र ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदंतकः । स्वर्णहारी तु कुनखी दुश्चर्मा गुरुतल्पगः ॥ इति पापलक्षणेः ६
पराशरोप्याह । आचारस्त्वं श्रुतिशास्त्रतत्त्वं आचारशाखास्तु तदुक्तकृत्यम् । आचारपर्णानि च पञ्चयो
गा आचारपुष्पाणि यशोधनानि । आचारवृक्षस्य फलं नाकः तस्मात्सुरत्वादरसश्च मुक्तिः । तस्मादनं
तफलदं तु तत्त्वमाचारमेवार्थश्रयेत्प्रयत्नात् । याज्ञवल्क्यः । आचारहीनं न पुनंति वेदा यद्यप्यधीताः सह
षड्भिरंगैः । छंदांस्येनं मृत्युकाले त्यजंति नीडं शकुंता इव जातपक्षाः । तत्रांगानि पाणिनीयशिक्षायामु
क्तानि । शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः । छंदो विचितिरित्येव षडंगो वेद उच्यते तथा च

पराशरेणाह। आचारवंतो मनुजा लभंते आयुश्च वित्तं च सुतांश्च सौख्यं। धर्मं तथा शाश्वतमीशलोकमत्रापि विद्वज्जनपूज्यतां च ५

अत्र कैमुतकन्यायो द्रष्टव्यः २

व्यासः। विहिताकरणाद्यच्च निषिद्धाचरणात्तथा। नानानरकजं पुंसां हीनयोनौ च जन्म दम्। पुरा
णांतरेपि। दुराचारो हि पुरुषो लोके भवति निंदितः। दुःखभागी च सततं व्याधितोऽल्पायुरेव च। नारदीये।
हरिभक्तिरतो वापि हरिध्यानरतोपि वा। भ्रष्टो यः स्वयमाचारात्पतितः सोभिधीयते। पराशरोप्याह।
चतुर्णामपि वर्णानामाचारो धर्मपालनं। आचारभ्रष्टदेहानां भवेद्धर्मः पराङ्मुखः। षट्कर्माभिरतो
नित्यं देवतातिथिपूजकः। हुतशेषं तु भुंजानो ब्राह्मणो नावसीदति। गायत्रीमात्रसारोपि वरं विप्रः सुयंत्रि
तः। नायंत्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी। सुयंत्रितः सदाचारयुक्तः। पुनः स एव। आचाराद्विच्युतो विप्रो
न वेदफलमश्नुते। आचारेण हि संयुक्तो संपूर्णफलभाग्भवेत्। एवमाचारतो दृष्ट्वा धर्मस्य मुनयो गतिं।
धर्मस्य तपसो मूलमाचारं जगृहुः परम्। स्कांदेपि। अनभ्यासेन वेदानामाचारस्यातिलंघनात्। आल
स्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति। विहिताचारेण श्रीविष्णुरपि तुष्यति। विष्णुपुराणे। वर्णा
श्रमाचारवता पुरुषेण परः पुमान्। विष्णुराराध्यते पंथा नान्यस्तत्तोषकारणमिति। विहितानुष्ठानेनेश्व
रः परितुष्यंस्तमनुगृह्णातीत्यर्थः। इत्यन्वयव्यतिरेकाभ्यामाचारस्यावश्यकार्यत्वं निरूप्येदानीं सदाचार
लक्षणमाह। तत्र विष्णुपुराणम्। साधवः क्षीणदोषाः स्युः सच्छब्दः साधुवाचकः। तेषामाचरणं यत्तु सदाचारः स उच्यते।

५ स्वांदे । रागद्वेषविनिर्मुक्तैर्विद्वद्भिर्यदनुष्ठितः । सदाचारः स विज्ञेयो धर्ममूलं मनीषिभिः । रागद्वेषविनि
र्मुक्तैरिति निरुपाधिकतयानुष्ठीयमानश्चाचारः सदाचारो ज्ञेयः । अन्यथा पराशरादिकृतकैवर्त्तकन्याग
5 मनादेरपि सदाचारत्वापत्तेः । स्पष्टं चैतद्विष्णुस्मृतौ । श्रुतिस्मृत्युदितो यश्च साधुभिर्यश्च सेवितः । तमा
चारं निषेवेत धर्मकामो जितेन्द्रियः ॥ यत्तु वेदविरुद्धधर्माणामपि स्वस्वदेशव्यवस्थया प्रामाण्यमिच्छं
ति पठंति च नो शास्त्रदृष्ट्याविदुषा कदाचिदुल्लंघनीयाः कुलदेशधर्माः । मूलं हि तेषां च्युतवेदशाखा
मर्हन्न धर्मः स्मृतिभंगदोषात् । अन्यच्च । येषां परंपराप्राप्ताः पूर्वजैरप्यनुष्ठिताः । त एव ते पुराचारे न
अनेक दुष्टा नेतरे पुनरिति । तन्मंदं । स्मृत्यंतरविरोधात् । तदेवाह बृहस्पतिः । यस्य देशस्य यो धर्मः प्रवृत्तः
सार्वकालिकः । श्रुतिस्मृत्यविरोधेन देशधर्मः स उच्यते । देवलोऽपि । यस्मिन्देशे य आचारो न्यायदृष्ट
स्तु कल्पितः । तस्मिन्नेव स कर्त्तव्यो देशाचारः स्मृतो हि सः । मनुरपि । यस्मिन्देशे य आचारः पारंपर्यक्र
मागतः । श्रुतिस्मृत्यविरोधेन सदाचारः स उच्यते । गोतमेन स्पष्टमुक्तं । देशजातिकुलधर्माश्चाम्नायै
रविरुद्धाः प्रमाणम् । कात्यायनोप्याह । अप्रवृत्तं कृतं यत्र श्रुतिस्मृत्यनुमोदितं । नान्यथा तत्तु नः कार्यं
न्यायोपेतं विवर्जयेत् । तेनानुपलभ्यमूलानां श्रुत्यादिविरुद्धानां रागाद्येकनिबंधनानां मातुलकन्यापरि

णय मत्स्यभक्षणमदिरापानादीनां स्वस्वदेशाचारत्वेन धर्म्मत्वमित्युक्तं भवति। परं त्वियानेव विशेषः।
तत्तद्देशेषु तत्कारणे दृष्टार्थविधानाभावः। यत्तु बृहस्पतिः। प्रतिलोमप्रसूतानां तथा दुर्गनिवासिनां।
च २ देशजातिकुलानां ये धर्म्माः प्राक्प्रवर्त्तिताः। तथैव ते पालनीयाः प्रजाः प्रक्षुभ्यतेऽन्यथा। जनापरक्तिर्भवति
बलं कोशश्च नश्यति। तदुह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः। मध्यदेशे कर्मकराः शिल्पिनश्च गवाशिनः।
मत्स्यादाश्च नराः पूर्वे व्यभिचाररताः स्त्रियः। उत्तरे मद्यपा नार्यः स्पृश्या नृणां रजस्वलाः। देवराः प्रतिगृह्णं
6 ति भ्रातृजायाममर्तृकां। अनेन कर्मणा नैते प्रायश्चित्तदमार्हकाः। विहिताकरणान्नित्यं प्रतिषिद्धनिषेवणात्।
तेन प्रायश्चित्तदमा इति नैते प्रायश्चित्तं कर्त्तव्यम्। तत्तत्प्रायश्चित्तापनेयत्वान्न च दण्डनीयाः। प्रजालोभेन च लो
केशनाशाद्विहिताकरणान्नित्यापत्यादिविहितस्य वर्णाश्रमादिकर्मणोऽसकृदापद्व्यतिरेकेणानुष्ठानात्।
एवं प्रतिषिद्धस्य मत्स्यभक्षणादेः सततमनुष्ठानाच्च। अथाचाराद्यनुष्ठानार्थं देशमाह मनुः। सरस्वतीदृषद्व
त्योर्देवनद्योर्यदन्तरं। तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते। यस्मिन्देशे य आचारः पारम्पर्यक्रमागतः। वर्णानां सान्त
रालानां स सदाचारः स उच्यते। सान्तरालानां सानुलोमजादीनां। पुनः स एव। कुरुक्षेत्रं च मत्स्याश्च पाञ्चालाः
शूरसेनजाः। एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः। एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चरित्रं

६ शिष्टैरनुष्ठियमानः सर्वएव मानवाः । तथा । यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत । इति तद्देशस्य धर्म
प्रधानत्वेनानुष्ठानयोग्यताप्रशस्तत्वादिति । प्राशस्त्यमात्रमनेन द्योत्यते । न च तद्देशभवो धर्म एव नान्यदेश
भव इति । न च्यासति लोभादिमूलोपेतद्देशाचारो धर्मः स्यात् । स्मृत्यादिमूलोपपन्नदेशीयाचारो धर्मः
स्यादिति । तेन सदाचारविकल्पे स्वदेशीयो ग्राह्यः । तदसंभवे कुरुक्षेत्रादिदेशशिष्टाचारो ग्राह्यः । ननु
स्मृत्याचारयोर्धर्मे प्रामाण्यमुक्तं । तदर्थं च श्रुतिमूलकत्वमेषां भ्रान्त्यादिमूलकत्वमेवेति विचारयितव्यम् ।
तत्र । प्रायेणानृतवादित्वात्पुंसां भ्रान्त्यादिसंभवात् । चोदनानुपलब्धेश्च श्रद्धामात्रात्प्रमाणता । अप्रमार्थः ।
संभवद्भ्रमविप्रलंभेषु पुरुषेषु न तावन्निर्विचिकित्समेव प्रामाण्यमध्यवसानम् । अतश्चाननुष्ठानात्फलतोऽ
प्रामाण्यमेव । किंच नैषां प्रत्यक्षादिमूलत्वेन प्रामाण्यं तेषां धर्माधर्मयोरप्रवृत्तेः । न स्वातंत्र्येण वेदव
त्प्रामाण्यं पौरुषेयत्वात् । न चोदनामूलत्वेन तदनुपलंभात् । न चानुपलभ्यमानाश्चोदनास्तत्प्रमेयं प्रति
पादयंति न चासां प्रत्यक्षेणोपलंभसंभवः अनुच्चारिमाणत्वात् । उच्चारिमाणत्वे स्मृतिप्रणयनवैयर्थ्यम् ।
प्राक्पठिता अपि संप्रति पुरुषलयादुत्सन्ना इति चेन्न विकल्पासहत्वात् । यो ह्युत्सन्नां चोदनां वदति स व
क्तव्यः । किमेका काचिच्छाखा स्मार्तश्रुतिसंघातात्मिका पूर्वमासीत् सा चेदानीमध्येतृलयादुत्सन्नेति क

लभ्यते। किंवा बह्वीषु शाखास्वितस्ततः श्रुतयः स्मृतिमूलभूताः पठिताः संप्रत्युत्सन्ना इति तत्र सहस्रं साम
शाखाः। एकशतमध्वर्युशाखाः। एकविंशतिशाखं बाह्वृच्यमित्यादिशाखापरिमाणस्यापरं परयापि सर्वलोक
स्मरणान्नातोधिका शाखाः संभावयितुं शक्यन्ते। नापि पठ्यमानानामत्यंताविहिताध्येतृकाणां मध्ये कासां
चिच्चोदनानामुत्सादसंभवः। नच संप्रत्यपि पठ्यन्ते। एवं विप्रकीर्णासु शाखास्वितस्ततः स्मृतिमूलभूताः
श्रुतय इति युक्तम्। स्मृतिप्रणयनवैयर्थ्यादित्युक्तम्। नतावदिदानीमतीतकाले वा पठिताः श्रुतयः स्मृती
नां मूलं। नापि नित्यानुमेयाः ग्रंथपरंपराम्नायात्। याहि चोदना न कथंचिदुच्चार्यते तस्याः सर्वपुरुषप्र
त्यक्षादिप्रसराभावात् दुर्लभतरमस्तित्वं। ननु स्मृतिलक्षणलिंगवशेनानुमानं प्रवर्त्स्यत्येव सर्वेषां लिंगादि
कल्पनास्विव श्रुतिषु विषम उपन्यासः। लिंगादयो हि सर्वपुरुषप्रत्यक्षविषयाः श्रुतिमंतरेणानुपपद्यमानाः।
युक्तं यत्तस्यां निश्चयमादधति। स्मृतिवाक्यरचनात् पौरुषेयी परार्थविषयोपलभ्यते तद्विषयमेव स्वचयि
तुर्ज्ञानं कल्पयति। अष्टकाकर्तव्यताविषयं च स्मृतिवाक्यमिति नूनमयमष्टकाकर्तव्यतां वेदेत्येतावन्मात्रमयं क
ल्पयते। न स्मृतिस्वरूपं। नापि श्रुतिज्ञानं। एवमर्थज्ञाने स्मृतिकारस्य कल्पिते पश्चात् ज्ञानलिंगात् ज्ञेयभूता
र्थानुमानं न श्रुतिकल्पनं। एवं स्मृतिकारस्यापि स्मृत्यंतरलिंगादर्थ एवानुमानमिति निःप्रामाणिका श्रुतिकल्पना

स्यात्। अथोच्यते न खलु परकीयेन ज्ञानेन ऽरस्तेवार्थनिर्णयः। मूलानुसंधानसापेक्षत्वात्। तत्रय
दिस्मृतिकारस्यार्थविषयज्ञानमूलमनुसंदधानः स्मृत्यंतरमेव संभावयेत्। तदपि ज्ञानस्यैव लिंगं नार्थ
स्य। एवं ततः पूर्वतरमपि स्मरणं ज्ञानस्यैव लिंगं नार्थस्येति। न क्वचिदप्यर्थनिश्चयो लैंगिको लभ्यत
इति श्रुतिरेव कल्पयितव्या। यद्येवं श्रुतावपि तुल्यमेवैतत्। स्मृतिकारस्य मूलतया श्रुतिज्ञानमेव प्र
थमं कल्प्यते न श्रुतिसद्भावः। श्रुतिविषयेण तु ज्ञानेन ज्ञेयमूतश्रुतिनिर्णयः। परज्ञानेन च तद्विष
यश्रुतिनिश्चयो मूलानुसंधानसापेक्षः। मूलं च स्मृतिकारस्य स्मृत्यंतरमेव। तदपि चार्थज्ञा
नद्वारेण श्रुतिज्ञानस्यैव लिंगं न श्रुतिसद्भावस्येति। न क्वचित्कस्यचिदपि श्रुतिसद्भावनिश्चयो लैंगि
को लभ्यते। लिंगादीनि तु श्रुतिसद्भावं कल्पयंतीत्यतो विशेषः। तेन यदि परकीयेन ज्ञानेन प्रागेवार्थ
निश्चयः ततोऽर्थस्मरणपरंपरयार्थस्यैवानुमानान्न श्रुतिसिद्धिः। अथ स्मृत्यंतरमेव मूलं स्यात्।
अंधपरंपरयाच रूपनिश्चयस्तदा स्यात्। चैत्यवंदनादीनामपि बुद्धवाक्यपरंपरया धर्मानुमानं स्यात्।
अथ मूलश्रुत्यनुसंधानापेक्षं ततोऽयथैव वयं मानवीयात्स्मरणान्मनोरर्थविषयं च ज्ञानमात्रं कल्प
यित्वा श्रुतिसद्भावमनिश्चित्य तन्निश्चयाय मनोः श्रुतिसद्भावमूलं प्रमाणं मृगयामहे तथा मनुर

पन्नस्य सोपन्नस्येति न श्रुतिसद्भावसिद्धिः। एवमुभयथापि श्रुतिर्नित्यानुमेया न सिद्ध्यतीति न तन्मूल
त्वेन प्रामाण्यं स्मृतीनां। अतः श्रद्धामात्रविजृंभितं स्मृतिप्रामाण्यमिति प्राप्तेऽभिधीयते। वैदिकैः स्मर्य
माणत्वात्तत्प [illegible] रिग्रहदार्ढ्यतः। संभाव्यवेदमूलत्वात् स्मृतीनां वेदमूलता।। यएव हि वेदस्यै
व धर्ममूलता नान्यस्येति आस्थितामन्वादयस्तेषामष्टकादिषु धर्मत्वस्मरणं न कथंचिदुपपद्यते न यदि
वेदमूलता। तथा वैदिकानामेवाविगीतपरंपरया परिग्रहो वैदिकत्वस्मरणं चैव शिष्टानां नासति वेदमू
लत्वेवकल्पते। संभवति च तत्त्रैवर्णिकानां वेदसंयोग इति तन्मूलत्वमेवाध्यवसीयते। कथमनुच्चरिता
नां मूलत्वोपपत्तिरितिचेत्। उच्चार्यंत एव स्मृतिमूलभूताः श्रुतयः संप्रत्यपि विप्रकीर्णाः काश्चित्क्वचित्
कस्यांचिच्छाखायां विप्रकीर्णत्वाच्छाखांतराध्यायिभिः शाखांतरगतानामनुपलंभात्तादर्थ्येनार्थवन्निबं
धनमुपलंभेपि वा मंदधीभिरनुपसंहरणीयानामुपसंहारफलं स्मृतिप्रणयनमिति न वैयर्थ्यमतः
स्मृतयः प्रमाणमिति सिद्धम्।। श्रुतिविरुद्धायाः स्मृतेस्तदर्थानुष्ठानलक्षणमप्रामाण्यम्।
तथा च जैमिनिसूत्रम्। विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्। अस्यार्थः। अप्रामाण्यं विरुद्धा
नामशक्यार्थविधानतः। औदुंबरीं न शक्नोति सर्वां वेष्टयितुं स्पृशन्। वेष्टितां वापि संस्पृष्टमतोऽन्योन्य

८ विरोधतः। प्रमेयापहृतेरेव बाधः स्यादुद्गिरेशेत्यवत्। यथा उदुंबरीं सर्वां वेष्टयितव्येति स्मृतिः। उदुंबरीं
8 स्पृष्ट्वा उद्गायेदित्यनया श्रुत्याविरुद्धत्वादप्रमाणम्। क्वचिद्धेतुदर्शनादपि स्मृतेरप्रामाण्यम्॥ तथा
च जैमिनिसूत्रम्। हेतुदर्शनाच्च। वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णातीत्यादिकमुदाहरणम्। तत्र मा
णमप्रमाणं वेति विचारः कल्पसामान्यात्प्रत्यक्षश्रुतिविरोधाभावात्प्रामाण्यमिति प्राप्ते उच्यते।
न दृष्टे हेतौ हेत्वंतरानुमानं प्रक्रमते। दृष्टश्चात्र लोभ एव हेतुरिति। तत एव स्मृत्युपपत्तेर्नात्यंतापरिदृष्ट
वैदिकवचनकल्पनोपपत्तिः। अतः श्रुतिविरुद्धं दृष्टकारणं च स्मरणमप्रमाणं मतोऽन्यत्प्रमाणमिति॥
कल्प ८ एवं स्मृत्यागमानामपि श्रुत्युपजीवकत्वेनैव परतः प्रामाण्यम्। एवं ब्राह्माद्यष्टादशपुराणानामपि श्रुत्युप
जीवकत्वेनैव परतः प्रामाण्यम्। तथैव पाणिन्यादिव्याकरणस्यापि श्रुतिमूलकत्वेनैव प्रामाण्यम्।
शाक्यादिप्रणीतस्मृतयस्त्वप्रमाणम्। अवैदिकैः स्मर्यमाणत्वाद्वेदविरुद्धत्वाच्च। वेदस्य तु परमाप्त
प्रणीतत्वेन प्रामाण्यमिति नैयायिकादयः। तच्चाह गौतमः। मंत्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्य
माप्तप्रामाण्यादिति। नित्यानिर्दोषत्वेन स्वत एव प्रामाण्यं वेदस्येति मीमांसकाः। अत एवाह व्यासः।
दोषाः संति न संतीति पौरुषेयेषु युज्यते। वेदे वक्तुरभावाच्च दोषशंकैव नास्त्यतः। इति [illegible] वेदे सर्वदा पुरु
पु।

त्रिषेषा २ अपौरुषेयत्वंच २

षानुप्रवेशाभावेन दोषशंकासमुदायाभावात्स्वत एव प्रामाण्यं वेदस्य । अथ को वेद इति चेदुच्यते । अपौरुषे
यं वाक्यं वेदः । स च विधिर्मंत्रनामधेयार्थवादभेदात्पंचविधः । शिष्याचार्यपरंपराप्रस्तावे स्पष्टीकृतं बृहदारण्य
कश्रुतौ । तत्रादि परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नम इति । ननु शिष्याचार्यवाचकशब्दाभा
वे कुतो व्यवस्थेति चेदुच्यते । तत्र श्रुतौ प्रथमांतः शिष्यः । पंचम्यंत आचार्यः । परमेष्ठि ब्रह्मशब्दयोरेकार्थ
त्वात्पुनरुक्तिरतआह । परमेष्ठी विराट् ब्रह्मणो हिरण्यगर्भात् । ततः परमाचार्यपरंपरा वास्ति । यत्पुनर्ब्रह्मेत
न्नित्यं स्वयंभूः तस्मै ब्रह्मणे स्वयंभुवे नमः । कुतस्तर्हि ब्रह्मणो वेदप्राप्तिरुच्यते स्वयं प्रतिभातवेदो हिरण्य
गर्भो नाचार्यांतरमपेक्षते ईश्वरानुगृहीतस्य तस्य बुद्धावाविर्भूताद्वेदादेव विद्यालाभसंभवात् । कुतस्तर्हि
उच्यते ८ वेदो जायते । परस्यैव ब्रह्मणो वेदरूपेणावस्थानात् । तस्य नित्यत्वान्न हेत्वपेक्षेत्यर्थः । यस्य महतो भूतस्य
६९ निःश्वसितो यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वेत्यादिश्रुतेश्च । निःश्वसितशब्देन प्रयत्नाभाव [redacted] इत्यर्थः
तत्र सर्वकर्मोपयोगिनीं परिभाषामाह । कर्मप्रदीपे । यत्रोपदिश्यते कर्म कर्तुरंगं न तूच्यते । दक्षिणस्तत्र विज्ञेयः कर्म
णां पारगः करः । यत्र दिङ्नियमो नस्याज्जपहोमादिकर्मसु । तिस्रस्तत्र दिशः प्रोक्ता ऐंद्री सौम्यापराजिता इति । तिष्ठितन्त्रे गौतमः ।
रात्रावुदङ्मुखः कुर्याद्दैवं कार्यं सदैव हि । शिवार्चनं सदाप्येवं शुचिः कुर्यादुदङ्मुखः । सदादिवारात्रौ च । तत्रैव तंत्रांतरे ।

९ यत्रैव भानुस्तु वियत्युदेति प्राचीति तां वेदविदो वदंति । ततोपरां पूजकपूज्ययोश्च सदा गमज्ञाः प्रवदंति तां तु । अत्र पूज्यपूज
कांतः प्राची प्रागमोक्तपूजायामेव तत्परिभाषायामुक्तत्वात् । अन्यत्र तु सूर्योदयोपलक्षितैव । छंदोगपरिशिष्टे । आसी
न ऊर्ध्वः प्रह्वो वा नियमो यत्र नेदृशः । तदासीनेन कर्त्तव्यं न प्रह्वेन न तिष्ठता । उपवीतशिखाबंधनयोः पुरुषार्थत्वं क्र
त्वर्थत्वं चोक्तं तत्रैव । सदोपवीतिना भाव्यं सदा बद्धशिखेन च । विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् । मार्कंडेयपुराणे ।
शिरः स्नातश्च कुर्वीत दैवं पित्र्यमथापि वा । धर्मप्रकाशे योगियाज्ञवल्क्यः । आर्षं छंदश्च दैवत्यं विनियोगं तथैव च । वेदित
व्यं प्रयत्नेन ब्राह्मणेन विशेषतः । अविदित्वा तु यः कुर्याद्याजनाध्यापनं जपं । होममंतर्जलादीनि तस्य चाल्पफलं भवेत् ।
तत्रैवापस्तम्बः । तस्माद्धोमित्युदाहृत्य यज्ञदानतपः क्रियाः । प्रवर्त्तंते विधानोक्ताः सततं ब्रह्मवादिनां । त्रिमात्रस्तु
प्रयोक्तव्यः कर्मारंभेषु सर्वशः । तिस्रः सार्द्धाश्च कर्त्तव्या मात्रास्तत्त्वार्थचिंतकैः । बुधः । न्यायागतेन द्रव्येण कर्माणि
मै कुर्यादिति । स्नानस्य क्रत्वर्थं छांदोग्योपनिषदि । यदेव विद्यया करोति श्रद्धया तदेव वीर्यवत्तरं भवतीति उद्गी
थोपासनाप्रकरणे धीते नाप्यनेन यथा स्नानस्य सर्वकर्मांगत्वं भवति । तथा निरुक्ताध्ययनवादे शाध्यायनिः ।
दानमाचमनं होमं भोजनं देवतार्चनं । प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणं । आसनारूढपादो वा जान्वोर्वा
जंघयोस्तथा । कृतावसक्थिको यस्तु प्रौढपादः स उच्यते । कर्मप्रदीपे । पित्र्यमंत्रानुद्रवणे आत्मालंभेऽधवेक्षणे ।
न्यायमाह
जैमिनिरपि । अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा ब्राह्मणस्य प्रतिग्रहादिना क्षत्रियस्य विजयादिना वैश्यस्य कृष्यादिना शूद्रस्य सेवादिना

अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे । मार्जारमूषकस्पर्शे आक्रुष्टे क्रोधसंभवे । निमित्तेष्वेषु सर्वत्र कर्म कुर्वन्नपः स्पृशेत् ।
कर्मप्रदीपे । तथा च तैलयंत्रेषु शब्दो यावत्प्रवर्तते । तावत्कर्म न कर्तव्यं शूद्रांत्यपतितस्य च । मार्कंडेयः । संकल्पं च यथा
कुर्यात्स्नानदानव्रतादिके । अन्यथा पुण्यकर्माणि निष्फलानि भवंति च । यथायथावदित्यर्थः । ब्राह्मे । ब्रह्मण्या
धाय कर्माणि निःसंगः कामवर्जितः । प्रसन्नेनैव मनसा कुर्वाणो याति तत्पदं । यत्करोषि यदश्नासि यज्जुहोषि ददा
सि यत् । यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति भगवद्गीतासु स्मृतम् । कर्मणामीश्वरप्रीत्यर्थत्वे प्रमाणम् । हारीतः ।
अनुष्ठितं तु यद्देवैर्मुनिभिर्यदनुष्ठितम् । नानुष्ठेयं मनुष्यैस्तत्तदुक्तं कर्म आचरेत् । वाराहपुराणे । स्नानं संध्या तर्पणादि ज
पहोमामरार्चनं । उपवासवता कार्यं सायंसंध्याहुतीर्विना । चतुर्विंशतिमते । इक्षूनपः फलं मूलं तांबूलं पयऔष
धम् । भक्षयित्वापि कर्तव्याः स्नानदानादिकाः क्रियाः ॥ इति परिभाषा ॥ अथ यथावत्स्मारणाचारकर्मणो निशीथि
न्यं स्याद्यामोपेतदिवसरूपकाले नुष्ठेयतावगमाद्दिवसस्यानेकतद्व्यापकत्वेनोपाधिघटितत्वेन कस्मिन्समयोपाधौ किं क
र्तव्यमित्येतद्विभागे दक्ष आह । उक्तं कर्मक्रमेणोक्तेन कालत्वत एव हि । द्विजानां तु हितार्थाय यदक्षः स्वयमिहाब्रवीत् । प्रा
तरुत्थाय कर्तव्यं यद्द्विजेन दिने दिने । तत्सर्वं संप्रवक्ष्यामि द्विजानां हितकाम्यया । दिवसस्याद्यभागे तु कृत्यं तस्योपदिश्यते ।
द्वितीये च तृतीये च चतुर्थे पंचमे तथा । षष्ठे च सप्तमे चैव अष्टमे च पृथक् पृथक् । विभागेष्वेषु यत्कर्म तत्प्रवक्ष्याम्यशेषतः ।

ध्यायीत परमेश्वर इति कूर्मपुराणात् ५

१० स्त्रीरूपदधातीतिवत् अजहत्स्वार्थलक्षणया दिवसशब्दोत्र निशीथिन्यंत्याद्ययामोपेतदिवसपरः। नचप्रमाणासदसङ्गा
वाभ्यां विशेष इति वाच्यं। यतो दिवसस्येत्युपक्रम्य ब्राह्ममुहूर्ते शयनादिकर्मनिरूपणात्। तत्र ब्राह्ममुहूर्तकृत्ये विष्णुपुराणं।
10 ब्राह्मे मुहूर्ते स्वस्थे च मानसे मतिमान्नृप। विबुद्धश्चिंतयेद्धर्मम् अर्थं चास्याविरोधिनम्। अपीडयात योः काममुभयोर
पि चिंतयेत्। तथाच मनुः। ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिंतयेत्। कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च।
तन्मूलान्धर्मान् हेतुभूतक्रियानिमित्तकान्। वेदतत्त्वार्थं ब्रह्मेत्यर्थः॥ कुतर्कप्रतीतार्थवारणार्थं चेत्येके। याज्ञवल्क्यो
पि। ब्राह्मे मुहूर्ते चोत्थाय चिंतयेदात्मनो हितं। धर्मार्थकामान् स्वे काले यथाशक्ति न हापयेत्॥ अंगिराः। उत्थाय पश्चि
मे यामे रात्रिवासः परित्यजेत्। प्रक्षाल्य हस्तपादास्यान्युपस्पृश्य हरिं स्मरेत्। पश्चिमयामशब्दः पश्चिमयामान्त्यार्धप्रहर
परः। तदुक्तं काशीखंडे। रजनीप्रांतयामार्धं ब्राह्मः समय उच्यते। स्वहितं चिंतयेत्प्राज्ञस्तस्मिंश्चोत्थाय सर्वदा। वि
ष्णुरपि। रात्रेः पश्चिमयामस्य मुहूर्तो यस्तृतीयकः। स ब्राह्म इति विज्ञेयो विहितः स प्रबोधने। ब्राह्मे मुहूर्ते या निद्रा सा
पुण्यक्षयकारिणी। तां करोति तु यो मोहात्पादकृच्छ्रेण शुध्यति। गर्गोपि। अव्याधितं चेत्स्वपंतमादित्योभ्युदमिया
द्वाग्यतोनुपविशन् रात्रिशेषं भूत्वा येन सूर्य ज्योतिषा बाधते तम इति पंचभिरादित्यमुपतिष्ठेताभ्युदयाच्चेदं कर्म श्रां
तमनोभिरूपेण कर्मणा वाग्यत इति समानमुत्तराभिश्चतसृभिरुपस्थानमिति। इदं प्रायश्चित्तं गुरुसेवाध्ययनाद्यखिलविषयम्॥

शौनकः। अस्तं गच्छति तिग्मांशुः नवव्याधिगत एव यः। स्वपेत्स वाग्यतः स्थित्वा समस्तामपि तां निशां। प्रातः स्नात्वा शुचिर्भूत्वा येन सूर्येति पंचभिः।
ऋग्भिर्देवमुपस्थाय सवितारं विशुध्यति। सूर्योदये स्वपेत्सोपि पूर्ववत्सकलं दिनं। वाग्यमो भवेत्स्थित्वा चाल्पयंतं दिवाकरं। ऋग्भिस्तु पश्यते वि
श्वेत्यादिभिः पंचसूक्तका। उत्तराभिश्चतसृभिरुपतिष्ठेन्नृप्रसूपे

ब्राह्मे चिंतनीयार्थविशेषं दर्शयति विष्णुः। उत्थायोत्थाय बोद्धव्यं किमद्य सुकृतं कृतं। दत्तं वा दापितं वापि वाक्सत्या चापि भाषिता। उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितं। मरणव्याधिशोकानां किमद्य निपतिष्यतीति ३.पं ६

वामनपुराणे । ब्राह्मे मुहूर्ते प्रथमं विबुद्धे दनुस्मरेद्देववरान्मुनींश्च । प्राभातिकं मंगलमेव वाच्यं यदुक्तवान्दे
वपतिस्त्रिनेत्रः । व्यासः । ब्राह्मे मुहूर्ते पुरुषस्त्यक्तनिद्रो हरिं स्मरेत् । आलोक्य मंगलद्रव्यं कर्मावश्यकमाचरेत् ।
आवश्यकमत्र मूत्रपुरीषोत्सर्गः । स्कान्दे । शयनादुत्थितो यस्तु कीर्त्तयेन्मधुसूदनम् । कीर्त्तनात्तस्य पापानि
नाशमायान्त्यशेषतः । तथा । हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः । अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः ।
विष्णुपुराणे । प्रायश्चित्तान्यनेकानि तपःकर्मात्मकानि वै । यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥ ॥
अत्र स्मरणीयमाह व्यासः । महर्षिर्भगवान्व्यासः कृत्वेमां संहितां पुरा । श्लोकैश्चतुर्भिर्धर्मात्मा पुत्रमध्यापयच्छुकं ।
मातापितृसहस्राणि पुत्रदारशतानि च । संसारेष्वनुभूतानि यांति यास्यंति चापरे । हर्षस्थानसहस्राणि भयस्था
नशतानि च । दिवसे दिवसे मूढमाविशंति न पंडितम् । ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे । धर्मादर्थ
श्च कामश्च स किमर्थं न सेव्यते । न जातु कामान्न भयान्न लोभाद्धर्मं त्यजेज्जीवितस्यापि हेतोः । धर्मो नित्यः सुखदुः
खे त्वनित्ये जीवो नित्यो हेतुरस्य त्वनित्यः । इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत् । स भारतफलं प्राप्य परं
ब्रह्माधिगच्छति ॥ स्कंदपुराणे । प्रातः स्मरामि भवभीतिमहार्त्तिशांत्यै नारायणं गरुडवाहनमब्जनाभं ।
ग्राहाभिभूतवरवारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रम् । प्रातर्नमामि मनसा वचसा च मूर्ध्ना पादार

१२ विंदयुगलं परमस्य पुंसः। नारायणस्य नरकार्णवतारणस्य पारायणप्रवणविप्रपरायणस्य। प्रातर्भजामि भ
जतामभयंकरं तं प्राक्सर्वजन्मकृतपापभयापहत्यै। यो ग्राहवक्त्रपतितांघ्रिगजेंद्रघोरशोकप्रणाशनकरो
धृतशंखचक्रः। श्लोकत्रयमिदं पुण्यं प्रातः प्रातः पठेन्नरः। लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः। स्वर्ग
चिंतामणौ। प्रातः स्मरामि गणनाथमनाथबंधुं सिंदूरपूरपरिशोभितगंडयुग्मं। उद्दंडविघ्नपरिखंडन
चंडदंडमाखंडलादिसुरनायकवृंदवंद्यं। प्रातर्नमामि चतुराननवंद्यमानमिच्छानुकूलमखिलं च वरं ददा
नं। तं तुंदिलं द्विरसनाधिपयज्ञसूत्रं पुत्रं विलासचतुरं शिवयोः शिवाय। प्रातर्भजाम्यभयदं खलु भक्तशोकदावा
नलं गणविभुं वरकुंजरास्यं। अज्ञानकाननविनाशनहव्यवाहमुत्साहवर्द्धनमहं सुतमीश्वरस्य। श्लोकत्रयमिदं
पुण्यं सदा साम्राज्यदायिकं। प्रातरुत्थाय सततं यः पठेत्प्रयतः पुमान्॥ प्रातः स्मरामि खलु तत्सवितुर्वरेण्यं रूपं
हि मंडलमृचोऽथ तनुर्यजूंषि। सामानि यस्य किरणाः प्रभवादिहेतुं ब्रह्माहरात्मकमलक्ष्यमचिंत्यरूपम्।
प्रातर्नमामि तरणिं तनुवाङ्मनोभिर्ब्रह्मेंद्रपूर्वकसुरैर्नुतमर्चितं च। वृष्टिप्रमोचनविनिग्रहहेतुभूतं त्रैलोक्यपाल
नपरं त्रिगुणात्मकं च। प्रातर्भजामि सवितारमनंतशक्तिं पापौघशत्रुभयरोगहरं परं च। तं सर्वलोककलनात्म
ककालमूर्त्तिं गोकंठबंधनविमोचनमादिदेवं। श्लोकत्रयमिदं भानोः प्रातः प्रातः पठेत्तु यः। सर्वव्याधिविनिर्मुक्तः

परं सुखमवाप्नुयात्। प्रातः स्मरामि शरदिंदुकरोज्वलाभां सद्रत्नवन्मकरकुंडलहारभूषां। दिव्यायुधोर्जितसुनीलस
हस्रहस्तां रक्तोत्पलाभचरणां भवतीं परेशीं। प्रातर्नमामि महिषासुरचण्डमुण्डशुंभासुरप्रमुखदैत्यविनाशदक्षां। ब्र
ह्मेंद्ररुद्रमुनिमोहनशीललीलां चण्डीं समस्तसुरमूर्तिमनेकरूपां। प्रातः स्मरामि भजतामभिलाषदात्रीं धात्रीं स
मस्तजगतां दुरितापहर्त्रीं। संसारबंधनविमोचनहेतुभूतां मायां परां समधिगम्य परस्य विष्णोः। श्लोकत्रयमिदं
देव्याश्चण्डिकायाः पठेन्नरः। सर्वान्कामानवाप्नोति विष्णुलोके महीयते। प्रातः स्मरामि भवभीतिहरं सुरेशं गंगा
धरं वृषभवाहनमंबिकेशं। खट्वांगशूलवरदाभयहस्तमीशं संसाररोगहरमौषधमद्वितीयं। प्रातर्नमामि गिरिशं
गिरिजार्द्धदेहं सर्गस्थितिप्रलयकारणमादिदेवं। विश्वेश्वरं विजितविश्वमनोभिरामं संसाररोगहरमौषधमद्वितीयं।
प्रातर्भजामि शिवमेकमनंतमाद्यं वेदांतवेद्यमनघं पुरुषं महांतं। नामादिभेदरहितं षड्भावशून्यं संसाररोगहरमौ
षधमद्वितीयं। प्रातः समुत्थाय शिवं विचिंत्य श्लोकत्रयं येनुदिनं पठंति। ते दुःखजालं बहुजन्मसंचितं हित्वा पदं यांति त
देव शंभोः॥ ॥ वामनपुराणे। ब्रह्मा मुरारिस्त्रिपुरांतकारी भानुः शशी भूमिसुतो बुधश्च। गुरुश्च शुक्रः शनिरा
हुकेतवः कुर्वंतु सर्वे मम सुप्रभातम्। भृगुर्वसिष्ठः क्रतुरंगिराश्च मनुः पुलस्त्यः पुलहश्च गौतमः। रैभ्यो मरीचिश्च्यव
नश्च दक्षः कुर्वंतु सर्वे मम सुप्रभातम्। सनत्कुमारः सनकः सनंदनः सनातनोप्यासुरिपिंगलौ च। सप्त स्वराः सप्त रसात
लानि कुर्वंतु सर्वे मम सुप्रभातम्। सप्तार्णवाः सप्त कुलाचलाश्च सप्तर्षयो द्वीपवनानि सप्त। भूरादिकृत्वा भुवनानि सप्त कुर्वंतु

वैन्यं पृथुं हैहयमर्जुनं च शाकुंतलेयं भरतं नलं च । रामं च यो यः स्मरति प्रभाते तस्यार्थलाभो विजयश्च सिद्धिः । कुत्रापि प्रयाणे इति पाठः ऊ॰ पं ९

१२ सर्वे मम सुप्रभातम् । पृथ्वी सगंधा सरसास्तथापः स्पर्शी च वायुर्ज्वलितं च तेजः । नभः सशब्दं महता सहैव कुर्वंतु सर्वे मम
सुप्रभातम् । इत्थं प्रभाते परमं पवित्रं पठेत्स्मरेद्वा शृणुयाच्च तद्वत् । दुःस्वप्ननाशस्त्विह सुप्रभातं भवेच्च नित्यं भगवत्प्र
12 सादात् । पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः । पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः । अश्वत्थामा
बलिर्व्यासो हनुमांश्च विभीषणः । कृपः परशुरामश्च सप्तैते चिरजीविनः । सप्तैतानि स्मरेन्नित्यं मार्कंडेयमथाष्ट
मं । जीवेद्वर्षशतं सोपि सर्वव्याधिविवर्जितः । अहल्या द्रौपदी सीता तारा मंदोदरी तथा । पंचकन्याः स्मरेन्नित्यं
मानहान्या न बाध्यते ॥ मदनपारिजाते स्कान्दे । अविमुक्तं चरणयुगलं दंतिनाम्नैश्वकुंडं च तुष्कं । स्मरण
मपि वाराणस्या निहंति दुःस्वप्नमपशकुनं च । हारीते नापुक्रमम् । अथ वक्ष्यामि राजेंद्र विष्णोराराधनं परं । प्रत्यू
षे सहसोत्थाय सम्यगाचम्य वारिणा । आत्मानं देहमीशं च चिंतयेत्संजितेंद्रियः । देहेंद्रियात्परः साक्षात्पंचविंशा
त्म ५ कोस्म्यहं । अस्मिन्देहे निवत्स्यामि शेषभूतोस्मि शार्ङ्गिणः । शुक्रशोणितसंभूते जरारोगाद्युपद्रुते । मेदोरक्ता
स्थिमांसादिहेमद्रव्यसमाकुले । मलमूत्रवसापंके नानादुःखसमाकुले । तापत्रयमहावह्निदह्यमाने दिवानिशं ।
ईषणात्रयतप्तादि पच्यमाने दुरत्यये । क्लेशादिपापभूयिष्ठे कारागृहनिभेशुभे । बहुजन्मबहुक्लेशगर्भवासादिदुः
खदे । वसामि सर्वदोषाणां समूले दुःखभाजने । तस्माद्विमोक्षणार्थाय चिंतयिष्यामि केशवम् । वैकुंठे परमे व्योम्नि
दुग्धाब्धौ वै परे पदे । अनंतभोगपर्यंके समासीनं श्रिया सह । इंद्रनीलमणिश्यामं शंखचक्रगदाधरं । पीतांबरधरं

अग्निपुराणेपि॥ ब्राह्मे मुहूर्ते चोत्थाय वि
द्यादीन् दैवतां स्मरेदिति

देवं पद्मपत्रनिभेक्षणं। श्रीवत्सकौस्तुभोरस्कं सर्वाभरणभूषितं। चिंतयित्वा नमस्कृत्य कीर्तयेद्दिव्यनामभिः।
संकीर्त्य नामसाहस्रं नमस्कृत्वा गुरूनपि। तुलसीकाननं गांश्च संस्मृत्वाथ समाहितः। योगदीपिकायां। मुहूर्ते
ब्राह्म उत्थाय सर्वात्मानं हरिं हृदि। स्मृत्वा तु निद्रितो नेन जागमीत्यनुचिंतयेत्। स्वामिन्दासोस्मि ते नित्यं प्रीत
ये करवाणि अहं। अप्रिये भवतो नाथ मा गन्मे मन इत्यादिकमिति॥ ॥ अथ प्रयोगपारिजाते भूप्रार्थना॥ समु
द्रवसने देवि पर्वतस्तनमंडले। विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे। अथ स्वहितचिंतनानंतरं श्रोत्रियादिकं
मंगलद्रव्यं चावलोकयेन्न तु पापिष्ठादिकमिति। तत्र कर्मप्रदीपे कात्यायनः। श्रोत्रियं सुभगं गां च अग्निमग्नि
चितिं तथा। प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते। रोचनां चंदनं गंधं मंगलं दर्पणं मणिं। गुरुमग्निं रविं
पश्येन्नमस्येत्प्रातरेव हि। ब्रह्मपुराणे। उत्थाय मातापितरौ पूर्वमेवाभिवादयेत्। आचार्यश्च ततो नित्यमभि
वाद्यो विजानता॥ तथा च वर्ज्यानि कर्मप्रदीपे। पापिष्ठं दुर्भगं चांधं नाग्नमुत्कृत्तनासिकं। प्रातरुत्थाय यः पश्येत्त
त्कलेरुपलक्षणम्। नग्नं बालकव्यतिरिक्तमिति नृसिंहः॥ ॥ अथ मूत्रपुरीषोत्सर्गविधिः॥ तदाहांगिराः। इति प्रबोधविधिः ४
उत्थाय पश्चिमे यामे ततः आचम्य चोदकम्। अंतर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा। वाचं नियम्य यत्नेन निष्ठीवोच्छ्वा
सवर्जितः। कुर्यान्मूत्रपुरीषे तु शुचौ देशे समाहितः। तत्र तृणाधाने विशेषमाह यमः। अयज्ञियैरनार्द्रैश्च तृणैः सं
छाद्य मेदिनीमिति। तृणग्रहणं काष्ठादेरप्युपलक्षणम्। तृणैः कुशादिव्यतिरिक्तैः। काष्ठैः पालाशादिव्यतिरिक्तैः।

उ॰ पं

१२ तृणमयाज्ञिककाष्ठमित्यापस्तंभवचनात् । वायुपुराणेपि । अच्छैस्तृणैस्तथा काष्ठैः पत्रैर्वेणुदलेन वा । मृन्मये
भाजने वापि अंतर्धाय वसुंधरामिति । यज्ञियं काष्ठं तु ब्रह्मपुराणे दर्शितम् । शमीपलाशन्यग्रोधप्लक्षवैकंकतोद्भ
13 वाः ॥ अश्वत्थोदुंबरो बिल्वः चंदनः सरलस्तथा । साल्वश्च देवदारुश्च खदिरश्चेति याज्ञिकाः । पराशरोप्याह । ततः
प्रातः समुत्थाय कुर्याद्विण्मूत्रमेव च । नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः । तिरस्कृत्योच्चरेत्काष्ठपत्रलो
ष्ठतृणानि वा । नियम्य प्रयतो वाचं संवीतांगोवगुंठित इति । तिरस्करणमंतर्धानं । संवीतांगो वेष्टितदेहः अव
गुंठितः प्रावृतशिराः । उच्चरेत्पुरीषं विसृजेदित्यर्थः ॥ तत्र कालभेदेन नियममाह याज्ञवल्क्यः ॥ दिवासंध्यासु क
र्णस्थब्रह्मसूत्र उदङ्मुखः । कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुख इति । कर्णस्थ इति दक्षिणः । पवित्रं दक्षिणे
कर्णे कृत्वा विण्मूत्रमुत्सृजेदिति । स्मृत्यंतरेपि । पवित्रस्य दक्षिणकर्णस्थानाभिधानात् । यज्ञोपवीत
स्थापितदेवस्थानं न्याय्यम् । अंगिरास्तु विकल्पेन स्थानांतरमाह । कृत्वा यज्ञोपवीतं तु पृष्ठतः कंठलंबि
तं । विण्मूत्रे तु गृही कुर्याद्यद्वा कर्णे समाहित इति । तत्र कर्णे निधानमेकवस्त्रविषयम् । सांख्यायनः ।
यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा मूत्रपुरीषोत्सर्गं कुर्यादिति । तत्र दिग्विषये आपस्तंभः । मूत्रपुरीषे कुर्यात
दक्षिणां दिशं । दक्षिणापरां वा । दक्षिणापरां नैर्ऋतिं गत्वेति शेषः । विष्णुपुराणे । ततः प्रातः समुत्थाय

पवित्रशब्द उपवीता
परपर्यायः विलोः प
वित्रारोपणकाले उप
वीतशब्दस्य पवित्रशब्दे
न निर्देशात् ७८

नयाव २

कुर्यान्मैत्रं नरेश्वर । नैरृत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः । मैत्रं मूत्रपुरीषोत्सर्गः । मित्रदेवताकं पायु
संबंधात् । नैरृत्यामिति शयनस्थानात् । पराशरोप्याह । ग्रामात् दशतं गच्छेन्नगराच्च चतुर्गुणमिति ।
तत्तु दिवाविषयम् । अस्तमिते वहिर्ग्रामाद्द्वाराद्वावसथाद्वा मूत्रपुरीषयोः कर्म वर्जयेदिति । एवं निषेधो दृष्टार्थ
एव । मदनरत्ने हारीतः । उच्चारे मैथुने चैव प्रस्रावे दंतधावने । श्राद्धे भोजनकाले च षट्सु मौनं समाचरेत् ।
आचारप्रदीपे अंगिराः । संध्ययोरुभयोर्जाप्ये भोजने दंतधावने । श्राद्धे भोजनकाले च षट्सु मौनं समाचरेत् ।
पितृकार्ये च दैवे च तथा मूत्रपुरीषयोः । गुरूणां सन्निधौ दाने योगे चैव विशेषतः । एषु मौनं समातिष्ठन् स्वर्गं
प्राप्नोति मानवः । पुनरपि स एव । आहारं तु रहः कुर्यान्निहारं चैव सर्वदा । गुप्ताभ्यां लक्ष्म्युपेतः स्यात्प्रका
शे हीयते श्रिया । आपस्तंबश्च । न च सोपानत्को मूत्रपुरीषे कुर्यादिति । सांपरायीये । गृहीत्वा जलपात्रं तु
विण्मूत्रं कुरुते यदि । तज्जलं मूत्रसदृशं पीत्वा चांद्रायणं चरेत् । मलमूत्रं त्यजेद्विप्रो विस्मृत्यैवोपवीतधृक् ।
उपवीतं तदुत्सृज्य गृह्णीतान्यन्नवं तदेति । मनुः । मूत्रोच्चारसमुत्सर्गं दिवा कुर्यादुदङ्मुखः । दक्षिणाभिमुखो
रात्रौ संध्ययोश्च यथा दिवा । एवं च मनुना सर्वकालव्याप्यमुखनियमविधानात् । प्रत्यङ्मुखस्तु पूर्वाह्णे अपराह्णे प्रा
ङ्मुखस्तथा । उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुख इति यमवचनम् । सदैवोदङ्मुखः प्रातः सायाह्ने दक्षिणा

विएमूत्रे विसृजेन्नित्यं संध्यास्वपि विवर्जयेदिति वर्जनं त्वनुपरुद्धविषयम् । नोपरुद्धः क्रियां कुर्यान्न वेगं धारयेत्क्वचिदिति मनूक्तेः १५

१४ मुखइति देवलवचनं च नार्हत्यम् । मन्त्रार्थविपरीता तु या स्मृतिः सा न प्रशस्यते इति बृहस्पतिवचनात् । अथ
वामान्वं दिवा पदं प्रातर्मध्याह्न परमिति न विरोधः । शंखलिखितौ । अनुदकः अप्सु को न मेहेदिति ।
मेहनादप्सु जलमध्ये मूत्रं न कर्तव्यमित्यर्थः । स्मृत्यन्तरे । मूत्रपुरीषे नो कुर्यात् सोपानत्कः कदाचन । उ
द्धृत्य मृज्जलं कुर्यात् शौचं ज्ञात्वा मेहनं द्विजाः । तथा । द्वाभ्यां मूत्रपुरीषाभ्यां आर्द्रेणाहृतमृत्तिकां । पश्चाद्गृ
हीताभावेन स्ववाससा जलमाविशेत् । शिष्टास्तु मृद्ग्रहणं लोष्टकाष्ठयोरन्यतरेणाहुः । विना लोष्टं विना
काष्ठं मृत्तिका येन चोद्धृता । विष्ठानुलेपनं तस्य पुनः शौचेन शुध्यति । मृत्तिकाग्रहणप्रकारस्तु हलायु
धेन निरूपितः । अष्टांगुलं खनित्वा च द्वादशांगुलमेव च । तदधो मृत्तिका ग्राह्या सर्वत्रैव विचक्षणैः ।
अधिकाम्बुद्ध ८ स्थले द्वादशांगुलं खननम् । अल्पाम्बुदेशस्थले ऽष्टांगुलं खननमिति दृष्टार्थानुसारेण खननीयं । अन्यथा
अंगुलिखननस्यादृष्टार्थत्वापत्तेः । हारीतोपि । अरण्ये वसुधा मेध्या ग्रामे मेध्या क्वचित्क्वचित् । सर्वत्रैव
सुधा मेध्या यत्र लेपो न विद्यते इति । गालवोपि । सर्वत्र वसुधा पूता यत्र लेपो न विद्यते । उपलिप्ते तु देशे हि
पुनर्लेपेन शुध्यति इति लेपाभावे अंगुलिखननं न त्वावश्यकम् । पराशरोपि । विप्रे गौरमृदा प्रोक्ता तत्रै
रक्ता तु पीरिता । हरिद्रावर्णा वैश्ये तु कृष्णा शूद्रे स्मृता । यमश्च । आहरेन्मृत्तिकां विप्रः कूलात्स

सिकतांतथेति। पुनरपिसएव। वापीकूपतडागेषुनाहरेद्वाह्यमृत्तिकां। आहरेज्जलमध्यात्तुपरतोमणि
बंधनात्। स्मृतिश्चिंतामणौ। अंतर्जलगताग्राह्यापरतोमणिवंधनात्। आरण्यकेषुतेवंस्याद्ग्रामेष्वा
वरणान्नतु। उक्तविशेषाणांमनेवयाकाचिद्ग्राह्यातदाह मनुः। यस्मिन्देशेतुयत्तोयंयावत्तत्रैवमृत्तिका। है
वतत्रप्रशस्तास्यात्तयाशौचंविधीयते। अयमृद्ग्रहणेनमारयमः। नाहरेन्मृत्तिकांवप्रान्नकूलात्सैकता
त्तथा। नमार्गान्नोषराद्वैवशौचशिष्टांपरस्यतु। विप्रपदं शौचकर्तृमात्रोपलक्षकम्। सैकतादितिनाति
विकृष्णादित्यर्थः। विष्णुपुराणेपि। वल्मीकमूषकोत्खातांमृदंमंतर्जलात्तथा। शौचावशिष्टांगेहाच्चनाद्द्या
ल्लेपसंभवां। अंतः प्राण्यवपन्नांचहलोत्खातांचपार्थिव। परित्यजेन्मृदस्त्वेताः सकलाः शौचसाधने। अंतः
प्राण्यवपन्ना सकीटामित्यर्थः। आश्वलायनोपि। देवागारश्मशानाद्वल्मीकान्मार्गाद्गेहाज्जलात्स्थलात्।
ऊषरादेवताख्यानान्नद्विजोमृदमाहरेत्। नाश्मभस्मताचैत्याच्चनवेद्यागोव्रजान्मृदं। आहरेल्लेपमृत्तांच
जंतुमिश्रांनकर्दमाम्। अंतर्जलेदेवगृहेवल्मीकमूषकस्थले। अन्यशौचावशिष्टाचनग्राह्याः पंचमृत्तिकाः।
मार्गरथ्याश्मशानस्थापांसुलांमलिनांत्यजेत्। कीटांगारास्थिसहितांनाहरेच्छर्करान्वितामिति। स्मृतिमंज
र्यायांपद्मोक्तम्। वापीकूपतडागेषुनाहरेत्तीरमृत्तिकाम्। अंतर्जलगतान्ग्राह्यापरतोमणिवंधनान्मणिवंध

१५ ब्राह्मणस्यैवेष्टयित्वातुमूत्रंश्रोत्रेग्रीवामासज्यदक्षिणेवामपार्श्वेकमंडलुमादायमूत्रपुरीषमुत्सृजेदिति
हारीतः॥ सूत्रंश्रोत्रेभस्त्रोरत्लिका। ग्रीवाधारणंतुतद्धारणायोग्यभूभागेबोध्यम्। दक्षिणबाहुपार्श्वे
15 कमंडलुंनिधायसव्येसूत्रंचोत्सृजेदित्यागमोक्तेः। निधायभूमौधृत्वा। करस्थोदकपात्रस्तुकुर्यान्मूत्र
पुरीषके। नजलंमूत्रसदृशंतत्पानेनतत्समम्। तत्सममितिदोषोक्तेः। मूत्रपुरीषोत्सर्गस्थल
वर्जनमाहमनुः। छायायामंधकारेवारात्रावहनिवाद्विजः। यथासुखमुखःकुर्यात्प्राणबाधाभयेषुच।
अन्यथा ६ यथासुखमुखेतिकथनंतुप्राणबाधाभयपरंबोध्यं। दि॰ यमकथनवैयर्थ्यापत्तेः। अंधकारवदंतुनी
हारादिकृतव्यामोहविषयंबोध्यम्। पुनरपिसएव। उपरुद्धोनसेवेतछायावृक्षंतंचतुष्पथे। उदकंचो
दकांतंचरजमार्गंचवर्जयेत्। नमूत्रंपथिकुर्वीतनश्मशानेनपर्वते। नफालकृष्टेनजलेनचित्यांनाद्रि मूत्रमितिपुरी
मस्तके। नजीर्णदेवायतनेनवल्मीकेनगोव्रजे। नससत्त्वेषुगर्तेषुनगच्छन्नापिचोत्थितः। ननदीतीर षस्याप्युपल
मासाद्यशृंगक्षेत्रेनचगोमये। वाय्वग्निविप्रमादित्यंचंद्रमस्तारागणपस्तथा। नकदाचनविण्मूत्रेपश्यन्कुर्या क्षणम्
त्तथैवगां। चित्यामित्यग्निचयनस्थाने। श्मशानस्यपृथगुपादानात्। नजीर्णदेवायतनइतिदृष्टार्थं काष्ठेष्टकादिपा
तसंभवात्

पर्वत।

पर्वतनिषेधादेव मस्तकनिषेधे सिद्धे पुनस्तन्निषेधोयत्रापि पर्वतवासिनां पर्वतोऽशक्यपरिहारस्तत्रापि मस्तक
वर्जनार्थः। वायुपदेन वाय्वागमनदिगुपलक्ष्यते। वायोरूपस्पृश्यत्वात्। देवलः। वापीकूपनदीतीरे चैत्यांभः
पथि भस्मसु। अग्नेर्गोद्वारे सस्यभूमौ न मेहेत कदाचन। वाप्यादिपदं जलरहितभूभागनिषेधार्थं। अंभसः एष्य
गुपादानात्। चैत्यं देवतायतनमतो ग्रामप्रसिद्धिहेतुर्वृक्षः। सभा वा। पुनरपि स एव। दशहस्तं परित्यज्य मूत्रं
कुर्याज्जलाशयात्। शतहस्तं पुरीषं च तीर्थे नद्यां चतुर्गुणं। जलाशयो नदीतडागादिः। नदीतस्तीर्थे च चतुर्गुण
मिति क्रमेणाशय क्रमवाधः। तीर्थं गंगादिः [illegible]। विष्णुः। नोषरे न शाद्वले न पराकृष्टे नोद्याने नोदक
[margin: योनीकारोध] समीपे मूत्रं कुर्यादित्यर्थ इति शेषः। आकाशे संवृते देशे। न दुर्गे वायवीये। यदा कोऽपि भीतस्तस्मान्नासंवृते कश्चित्। [margin: नः]
कुर्यान्मूत्रं पुरीषं वा न भुंजीत पिबेन्न च। असंवृते अनावृते दृष्टोयं निषेधः। नखद्वारोपद्वारयोर्मूत्रपुरीषं कुर्यादिति [margin: एवं च द्वालिका]
हारीतः। चत्वरं सभा। यमः। तुषांगारकपालानि देवताग्निचत्वलानि च। वर्जयेद्वृक्षमूलानि। पथि कोपजीव्य [margin: दि स्थित इत्याका]
वृक्षमूलानि। न तत्र मूत्रपुरीषे कुर्यात्। नोपजीव्यच्छायासु इति हारीतोक्तेः। पुनः स एव। आत्यादित्यं न मेहेत [margin: शादिवरणं नामं]
न पश्येदात्मनः शकृत्। दृष्ट्वा सूर्यं निरीक्षेत गामग्निं ब्राह्मणं तथा। ईक्षणादेव तीर्थांस्तु प्रज्ञाहानिः प्रजायते। [margin: नो ५२]
सूर्यादि निरीक्षणं तु प्राङ्मुखोत्थितमेव। शंखलिखितौ। नान्तर्वासा न निर्वासाः कुर्यान्मूत्रपुरीषे इति शेषः॥

ततो लोष्टादिना परिमृज्य गुदमेहनौ गृहीतशिश्नश्चोत्तिष्ठेदिति भारद्वाजः। अथवा पक्वेष्टकाविशमस्तं लोष्टकाष्ठतृणादिना।
उद्धृतवासा उत्तिष्ठेद्दृढविधृतमेहन इति व्यासः। नाश्ममल्लफलोमारेलुमृज्जानत्सवर्हिषा। नाद्रेतणलतापत्रेर्नीङ्गोमयभस्मना। उ मृज्जानुकृदिति शेषः २४

२९ विष्णुपुराणे। उत्सर्गे वै पुरीषस्य मूत्रस्य च विसर्जने। तिष्ठेन्नातिचिरं तत्र नैव किंचिदुदीरयेदिति। अनेन मौनं नि-
18 रूपितम्। प्रोच्चारे मैथुने चैव भोजने दन्तधावने। स्नाने दाने जपे चैव मौनं सप्तसु कारयेदिति वचनात्। ४
इति मूत्रपुरीषोत्सर्गविधिः॥ ॥ अथ शौचविधिः॥ ॥ वक्ष्यमाणशौचकरणेपि यस्य भावशुद्धिर्नास्ति
न तस्य शुद्धिरित्याह व्याघ्रपादः। शौचं तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा। मृज्जलाभ्यां स्मृतं बाह्यं भाव-
शुद्धिस्तथान्तरम्। गंगातोयेन कृत्स्नेन मृद्भारैश्च नगोपमैः। आमृत्योश्चाचरन् शौचं भावदुष्टो न शुध्यतीति।
शौचस्य द्विविधस्यापि सर्वकर्माधिकारे हेतुत्वमन्वयव्यतिरेकाभ्यां दक्षो दर्शयति। शौचे यत्नः सदा कार्यः
शौचमूलो द्विजः स्मृतः। शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः ४। हरिनाथीयस्मृतिसारे। एतेन शौचस्य
सूत्रं ५८ मुधाद्रव्येण शुद्धिः स्यान्न च लोके शौचव्ययः। यस्य शौचेपि शैथिल्यं चित्तं तस्य परीक्षितं। मुधाद्रव्येषु ल- कर्तव्यत्वं पुरु
मद्रव्यं मृदादिः। तथा च। विप्रो वृक्षो मूलमत्र स्य शौचं वेदाः शाखा धर्मकर्माणि पत्रं। तस्माच्छौचं यत्न- षार्थत्वमुप
तः पालनीयं छिन्ने मूले नैव पत्रं न शाखा। अंगिराः। मूत्रोत्सर्गं द्विजः कृत्वा न कुर्याच्छौचमात्मनः। मोहा- दर्शितम्
द्भुक्ते त्रिरात्रेण जलं पीत्वा विशुध्यतीति। तत्करणमाह याज्ञवल्क्यः। गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृ-
तैर्जलैः। गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः। व्यासोपि। उत्थायोद्धृतमृज्जोयैर्लिंगपायुकरान्क्र-
मतान्क्रितः नमृत्सरत्वर्थः।

मात्रभोजनस्थाने जलपानं वोध्यम्। अंजानस्य गृह्यमाने ... कृत्वा शौचं ततः पश्चादुपस्पृशेत्।

मात्। शोधयेदात्मनः शुद्धे स्थले न्यत्रोपविश्य च। उद्धृतस्नातोपैरित्यनेन जलांतरनिषेधः। गंधलेपक्षयकर
मितितु यथाविहितशौचानंतरं यदि गंधलेपो दृश्येतेतद्विषयम्। स्त्रीशूद्रानुपनीतविषयं तेषां गंधलेप
क्षयपर्यंतशौचविधानात्। यदाह शंखः। स्त्रीशूद्रानुपनीतानां गंधलेपक्षयावहं शौचमिति शेषः। ब्रह्म
पुराणेपि। नयावदुपनीयेत विप्रः शूद्रस्तथांगना। गंधलेपक्षयकरं शौचं तेषां विधीयते। विप्रपदं त्रैव
र्णिकोपलक्षकं स्त्रीशूद्रयोः पृथङ्निर्देशात्। देवलः। प्रमाणं शौचसंख्याया न शिष्टैरुपदिश्यते। यावता मन्यते
शुद्धिं तावच्छौचं विधीयते। इदमपि यथोक्तकारणशुद्धेतरेयम्। अन्यथा दक्षवाक्यविरोधापत्तेः। तथा।
न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सता। प्रायश्चित्तेन युज्येत विहितातिक्रमे कृते। इदं संख्यापरिमाणो
भयविषयं। विशेषश्रवणात्। यत्तु गंधलेपक्षयकरणादेव शौचं न संख्यानियमस्तद् दृष्टार्थमितिव्या
ख्यानमयुक्तम्। शुद्धिमभीप्सितेति मनुश्रवणात्। यत्तु आदित्यपुराणे। आर्त्तः कुर्याद्यथाशक्ति स्वस्थः
कुर्याद्यथोदितं। स्त्रीशूद्रयोरर्द्धमानं शौचं प्रोक्तं मनीषिभिः। बालस्यानुपनीतस्य गंधलेपक्षयावहमि
ति। तद्विधवास्त्रीसच्छूद्रविषयम्। प्रतीयतेऽन्यथा शंखविरोधः स्यात्। ब्रह्मांडपुराणे। उद्धृतोदकमा
दाय मृत्तिकां चैव वाग्यतः। उदङ्मुखो दिवा कुर्याद्रात्रौ चेद्दक्षिणामुखः। शौचमिति शेषः॥ ॥

विवस्वान् ।= १८

17

तथाचमोक्षः । गंधलेपापकर्षणं शौचममेध्यस्य तदद्भिः पूर्वमृद्भाचेति एतेन लिंगनिर्णिक्तपदं काष्ठादिप्रोंछितगुदानुवादक मितिवर्द्धतः परास्ताः । व्यर्थत्वात् । अत एव लिंगनिर्णिक्ते जलप्रक्षालिते पाय्वादाविति कल्पतरुव्याख्यानं संगच्छते ५ अपि च शिखां बद्धा वसित्वा

मदनपारिजाते । तीर्थे शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा । रत्निमात्रं जलं त्यक्त्वा कुर्याच्छौचमनुद्धृते । पश्चात्तु शोधयेत्तीर्थमन्यथा ह्यशुचिर्भवेत् । रत्निमात्रं जलशिरः यंत्यक्तेत्यर्थः । उद्धृतजलैः शौचं कुर्यात् । अनंतरं तीर्थं कृतशौचस्थलं शोधयेत् । जलेनाप्लावयेदित्यर्थः । बद्धमुष्टिकरो रत्निः । यदुक्तं त्रिकांडशाम् । प्रकोष्ठे विस्तृतकरे हस्तो मुष्ट्यानुबद्धया । सरत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना । ब्रह्मपुराणे शौचप्रकार उक्तम् । लिंगनिर्णिक्ते मृदं दद्यान्मृदं तेन त्वपएव च । लिंगनिर्णिक्ते केवलजलप्रक्षालिते पाय्वादौ । तदेवाह दक्षः । दातव्यमुदकं तावद्यावत्स्यान्मृत्तिकाक्षयः । मनुरपि । यावन्नापैतिमेध्याक्तो गंधोलेपश्च तत्कृतः । तावन्मृद्वारि देयं स्यात्सर्वासु द्रव्यशुद्धिषु । इदं च यथाविधि कृते शौचे गंधस्य चापरास्ततिन्तद्विषयम् । देवलः । धर्मविद्दक्षिणं हस्तमधः शौचे न योजयेत् । वामेन पाणिना तद्वन्नाभेरूर्ध्वं न शोधयेत् । प्रकृतिस्थितिरेषा स्यात्कारणाद्गुभयक्रिया इति । कारणाद्रोगादेः । उभयक्रिया दक्षिणहस्तेन नाभेरधः कायशोधनम् । वामहस्तेनोर्ध्वकायशोधनम् । एतेनामलककस्नानचूडाबंधनादीनामपि संग्रहः । शौचे मृत्संख्यामाह मनुः । एका लिंगे गुदे तिस्रस्तथा वामकरे दश । उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता । तथा । पादयोः षट् प्रदातव्याः सप्तयेव करएकके । द्विरान्चमपततः शुद्धे तस्मात्त्वाविश्चसनातनम् । पादयोः षडिति लेपशंकायां । अन्यथा त्वेकैकवारं पा

धारजलदाने निषेधमाह कश्यपः । धारेण शौचं न कर्तव्यं शौचशुद्धिमभीप्सता । चुलुकेनैव कर्तव्यं हस्तशुद्धिविधानतः । वृषधारा शौचकर्म निषेधमाह दक्षः । न शौचं वर्षधाराभिराचरेन्नुकदाचनेति ६

देति लिंगे वासतीश्रमे इति देवलोक्तमपि संगच्छते ५

स्मृत्यर्थसारे । आर्द्रामलकमात्रास्यान्मूत्रशौचे तु मृत्तिका
मूत्रात्तु द्विगुणा शुक्रे मैथुने त्रिगुणा स्मृतेति ८ ५

बौधायनः मूत्रवद्रेतः समुत्सर्गे ५ २

द्वयोरिति । यद्वा षडिति मूत्रपुरीषे । एकैकेति केवलमूत्रे । करपृष्ठे वामकरपृष्ठे । अत्रैकालिंगे इति विट्शौचे । लिंगशौचस्याभिधानं मूत्रनिमित्तकम् । अन्यथादृश्यपत्तेः ।'। शौचक्रममाहाश्वलायनः । लिंगशौचं पुरा कार्यं गुदशौचं ततः स्मृतं । ननु प्रतिनिमित्तं नैमित्तिकमिति न्यायादुभयनिमित्तोपसन्निपातात्तन्निमित्तिकहस्तादिशौचानि प्रत्येकमनुष्ठेयानि स्युः । गुदशौचनिमित्तानां हस्तादिशौचानां गुदशौचाव्यवहिते नैककालेऽुभयोः प्राप्त्यभावात् । यत्र क्रमेणोवानेकनिमित्तोपजनकस्तत्र तेनैव क्रमेण नैमित्तकानुष्ठानं दृश्यते । उपकारोपि नैकस्तन्तन्त्रो चप्रयुक्तसंख्यानुष्ठानानुक्रमणिकानामनेकत्वात् । अत्र मूत्रपुरीषोत्सर्गे मूत्रोत्सर्गस्यानांतरीयकत्वात् । हस्तादिशौचं तंत्रेणैव देशकालयोरैक्यात् । तच्छौचोपकारवत्तस्यैकत्वाच्चेति । केवलमूत्रे दद्यः । एका लिंगे गुदे तिस्रो उभयोर्मृत्त्रयं स्मृतेमिति ।'। अपानमृत्तिकामाने दद्यः । अर्धप्रसृतिमध्याप्रथमा मृत्तिका स्मृता । द्वितीया च तृतीया च तदर्धं परिमाणतः । लिंगेत्वाह स एव । लिंगे प्यत्र समाख्याता त्रिपर्वीपूर्यते यया । त्रिपर्वीमध्यमातर्जन्यनामिका । मृत्परिमाणं शातातपोप्याह । आर्द्रामलकमात्रास्तु ग्रासार्द्धं दुत्रते
शौचे मूत्रशौचे २ स्मृताः । तथैवाहुतयः सर्वाः शौचार्थे याश्च मृत्तिकाः । इति गुदेतरविषयम् ।'। यत्तु दर्शानि रोमंपा परिमाणांतरमुक्तम् । अर्धप्रसृतिमात्रा तु प्रथमा मृत्तिके त्यादि तत्र सर्वत्र न्यूनपरिमाणे तन्निषेधाद्यदपेक्षयाधिकपरिमाणं ग्राह्यम् ।

पुनः स एवाह अरण्ये निर्जले रात्रौ चौरव्याघ्राकुले पथि । कृत्वा मूत्रपुरीषं तु द्रव्यहस्तो न दुष्यतीति २

१८ 19 यत्तु वसिष्ठवचनं एकस्मिन्विंशतिर्हस्ते द्वयोर्देयाश्चतुर्दशेति इदंच ब्रह्मचारिपरमेव। कल्पनालाघवात्। सर्वत्रा
संभवे विकल्पस्योक्तत्वात्। अत्र केचिदाहुः। आश्रमविशेषेपि गंधलेपसाम्यात् न्यूनाधिक्ये ऽदृष्टार्थे
गंधलेपक्षयकरं शौचं दृष्टार्थं। तेनोभयरूपे कर्मण्युभयमेव कर्तव्यम्। गंधलेपक्षयकरं दृष्टार्थमात्रे तन्न वे
दकर्मणामुत्सर्गत एव उभयार्थत्वात् वदनशौचैः। तत्कस्याकिंचित्करत्वात्। मनुः। एतच्छौचं गृहस्था
नां द्विगुणं ब्रह्मचारिणां। त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणं। इतीदं द्वैगुण्यादि संख्यामात्रे। तदनंतरमे
वाभिधानात्। यद्दिवा विहितं शौचं रात्रौ तस्यार्धमिष्यते। तदर्धमातुरे प्रोक्तमातुरस्यार्धमध्वनि। इदं चाहुमांश
शौचमतिकालांतरे त्वापस्तंभः। अद्भिः शौचं यथाप्रोक्तं निशायां तु तदिष्यते। पथि पादस्तु विज्ञेय आर्तः कुर्या
द्यथाबलं। पराशरोपि। आपत्काले तु विप्राणां शौचाशौचं न चिंतयेदिति। वृद्धपराशरस्तु। उपविष्टस्तु विण्मू
त्रं कर्तुं यस्तु न विंदति। स कुर्यादर्धशौचं स्वस्य शौचस्य सर्वदा। एवं च सर्वोप्ययं क्रमो यथोक्तकरणमेव। न
निशात्वादिपुरस्कारेण एवं वाकस्माद्दृष्टार्थापत्तेः। शौचस्थलशोधनमाह अत्र्यंगिराः। यस्मिन्स्थाने कृतं
शौचं वारिणा तद्विशोधयेत्। न स्यादि तु भवेत्तस्य यावद्भूमिं न शोधयेत्। इदं सर्वं शौचविधानं सति संभवे बोध्यम्।
यथोक्तमृदाद्यलाभे मनुः। यस्मिन्देशे तु यत्तोयं या च भूः पांसुमृत्तिका। सैव तत्र प्रशस्ता स्यात्तया शौचं विधीयते।
शौचानंतरं भगवान्विवस्वानपि कर्तव्यमाह। देशांतरगतो विप्रः क्षालयेत्तच्च भूतलं। शौचशेषां मृदं तोयैर्न हि प्रक्षालयेद्यदि। अशेषास्तस्य पितरस्तास्मिन्नंति न संशयः।
शौचविलंबे प्रायश्चित्तमाह संवर्तः। स्नात्वा लब्धोदकः पश्चात्सचैलस्तु विशुध्यतीति। ततः प्रथमं प्राङ्मुखं स्थित्वा पादौ प्रक्षालयेच्छनैः। न प्रहसन्न जल्पन्नात्मानमवलोकयन्।
इत्येवमङ्घ्रि रजानु प्रक्षाल्य चरणौ पृथक्। हस्तौ चामणिबंधाच्च कुर्यादाचमनं ततः। सकर्दमं तु वर्षासु प्रविश्य ग्राममध्यके। जंघयोर्मृत्तिकास्तिस्रः पादयोर्द्विगुणास्त्यसेत् ३·पं१

मरीचिरपि । येषु स्थानेषु यच्छौचं धर्माचारश्च यादृशः । तत्र तत्रावमन्येत धर्माचारः स तादृशः । येषु दे
शेषु ये देवा येषु देशेषु ये द्विजाः । येषु देशेषु यच्छौचं याश्च यत्रैव मृत्तिका । सैव तत्र प्रशस्तेत्यनेन यथाला
भं शुक्लादिगुणहीनापि मृदेव प्रशस्ता । ननु मुख्यस्यैतन्मृदसंभवे विजातीयेनश्वेतपिष्टादिना शौचं कार्य
मिति । न हि श्वेतच्छागालाभे श्वेतापिष्टपिंडीमालम्भ्यकृती भवति । किंतु कृष्णमपि छागमेव । तदुक्तं
मंडनमिश्रैः । कृष्णव्रीह्यादिके द्रव्ये शिष्टे प्रच्चारिते सति । ग्राह्यः कृष्णोपि सव्रीहिर्नान्यो व्रीहिः कदाचन ।
नाव्रीहिः कृष्णगुणोपि । एवं छागचोदनास्त्वनिषिद्धमिति संशये परं जात्यंतरातत्र निषिद्धोपि स्वजाति
मान् । अकूरछागलाभे स्याच्छागः कूटो न तत्त्वविः । कूरछागाद्यलाभे स्यान्मेषादिरिति भाष्यते । वृद्ध
पराशरः । कृत्वापि शौचं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः । निबद्धशिखकक्षस्तु द्विज आचमनं चरेदिति ।
आचमनार्थोपलक्षणं निबद्धशिखकक्ष इत्यनुसारात् । केचिन्मूत्राद्युत्सर्गे शिखामोचनमिच्छंतीदं न
समीचीनं । पुरुषार्थतया साधारणोक्तेः । भारतेपि । कृत्वा मूत्रपुरीषे तु रथ्यामाक्रम्य वा पुनः । पादप्र
क्षालनं कुर्यात्स्वाध्याये भोजने तथा । पादप्रक्षालनं कृत्वा गंडूषान्द्वादश क्षिपेत् । अन्यत्रचोपविश्याथ
प्राङ्मुखोदङ्मुखोपि वा । देवलश्च । प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेच्छनैः । उदङ्मुखो वा दैवत्ये पि

१९ 19 त्रके रतिसामुखः। शिखां बद्ध्वा वसित्वा द्वे निर्णिक्ते वाससी शुभे। तदनंतरमाचमनं कुर्यादिति शेषः। शिखां
बद्ध्वेति तु यदि केशप्रसाधनेन मुक्ता भवेत् तदैव बध्नीयात् न तु मुच्यमानाभावेपि। द्विवस्त्राभावे स्मृतिः।
अभावे धौतवस्त्रस्य शाणक्षौमाविकानि च। कुतपं योगपट्टं वा द्विवासा येन केनचित्। यत्तत्त्वर्यदावसे
चनमित्यापस्तंभोक्तं प्रत्यक्षादाभिषेचनं तत्केवलपादप्रक्षालनपरं। उक्तनियमातिक्रमे प्रायश्चित्त
मुक्तं स्मृतिसारावल्याम्। गायत्र्यष्टशतं चैव प्राणायामत्रयं तथा। प्रायश्चित्तमिदं प्रोक्तं नियमातिक्रमे स
तीति। यत्तु व्यासः। अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा। यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचि
रिति। तद्यथोक्तशौचेषु कृतेष्वात्मसंतोषाभावे बोध्यम्। अन्यच्च। प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरे
षु यत्। स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिरिति। शौचानंतरं कमंडलुशुद्धिमाह हारीतः। गोमये
न मृदा वा कमंडलुं परिमृज्य सर्ववदुपस्पृश्यादित्यं सोममग्निं वा वीक्षेत। अत्र दिवा आदित्यम्। रात्रौ सोमं।
उभयोरभावेऽग्निमिति सेयम्। ब्रह्मपुराणे विष्णुस्मरणमुक्तम्। पादयोर्द्वे न हित्वाच सप्रक्षालितपाणि
ना। त्रिराचमनं ततः शुद्धः स्मृत्वा विष्णुं सनातनम्। अत्रेशानस्मरणमाहतुः शंखलिखितौ। आचम्येशा
नं मनसा ध्यायेत। शौचानंतरं मंत्रोच्चारदर्शननिषेधमाह व्यासः। शौचं कृत्वा मंत्रोच्चारं न पश्येद्दृष्ट्वा

यद्वा येन द्रव्येण पस्पृश्य द्विरुक्तानि तेनैव तत्क्षेपयेत्। यदुक्तं भस्मना अध्यते कांस्यं ताम्रमम्लेन शुद्ध्यति। रजसा शुद्ध्यते नारी गोमयेनायसं तथा। तां भसे स्पृध्याहार्यम्। रजसा मृदा। नारीपित्तलमात्रम् ५

आदित्यमग्निं सोमं वा पश्येदिति । अत्रविशिष्टोऽन्यात्मनादर्शनमाह । अत्र प्रसंगाच्छरीरमलमाह मनुः ।
वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविन्नखाः । श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः । दूषिका नेत्रमलं ।
विण्मूत्रोत्सर्गशुद्ध्यर्थं मृदाकार्यादेवमर्थवत् । दैहिकानां मलानां च शुद्धिर्द्वादशस्वपि । तत्र विभागमा
ह बौधायनः । आददीत मृदः पंच षट्सु पूर्वेषु शुद्धये । उत्तरेषु तु षट्स्वद्भिः केवलाभिर्विशुध्यतीति । पर
कीयमलस्पर्शे देवलः । मानुषास्थि वसां विष्ठामार्तवं मूत्ररेतसी । मज्जानं शोणितं वापि परस्य यदि संस्पृशेत्
स्नात्वापमृज्य लेपादीनाचम्य स शुचिर्भवेत् । तान्येव स्वानि संस्पृश्य पुनः स्यात्परिमार्जनम् । तत्र विशेष
माह विष्णुः । नाभेरधस्तात्प्रबाहुषु च कायिकैर्मलैः सुराभिर्मद्यैर्वोपहतो मृत्तोयैस्तदंगं प्रक्षाल्यना
शुध्येत । अन्यत्रोपहतो मृत्तोयैस्तदंगं प्रक्षाल्य स्नानेन इंद्रियेषूपहतेषूपोष्य स्नात्वा पंचगव्येन । तत्र
मृत्तिकामाह मनुः । मूत्रे तिस्रः पादयोस्तु हस्तयोस्तिस्र एव तु । मृदः पंचदशा मेध्ये हस्तादीनां विशेषतः ।
एतदात्मीयमूत्रादिसंस्पर्शनमुदाहृतं । परस्य शोणितस्पर्शे रेतोविण्मूत्रजे तथा । चतुर्णामपि वर्णानां
द्वाविंशन्मृत्तिकाः स्मृताः । पुनः स एव । ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वशः । यान्यधस्तादमेध्या
नि देहाच्चैव मलाश्च्युताः । परकीयमलादिस्पर्शे यमोऽप्याह । परस्य शोणितस्पर्शे रेतोविण्मूत्रजे तथा ।

चतुर्णामपि वर्णानां द्वात्रिंशन्मृत्तिकाः स्मृताः ॥ अन्हयेइतिशेषः ॥ इति शरीरमलशौचविधिः ॥
अथाचमनविधिः ॥ ॥ तत्र देवलः ॥ प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेच्छनैः । उदङ्मुखो वा
दैवत्ये पैत्रिके दक्षिणामुखः । शिखां च बद्ध्वा वसित्वा द्वे निर्णिक्ते वाससी शुभे । एतेन प्रत्यक्पादावसे
चनमित्यापस्तंबीयं पश्चिमाभिमुखत्वं केवलपादप्रक्षालनपरम् । तथा । इत्येवमङ्गिरा जानुप्रक्षा
ल्य चरणौ पृथक् । हस्तौ चामणिबंधाभ्यां पश्चादासीत संयतः । अन्ततः प्रथमात्तीर्थाद्दक्षिणात् त्रिः
पिबेत्समम् । अशब्दमनवाचमवहिर्जानुबद्धुदं । आजान्विति लेपशंकायां । तत्पर्यंतमशौचम् ।
आजंघाभ्यां पादाविति हारीतोक्तेः । अत्र भविष्यपुराणे । समौ च चरणौ कृत्वा तथा बद्धशिखोऽपि ।
घनांगुलिकरं कृत्वा एकाग्रः सुमनो द्विजः । नरसिंहपुराणे । दक्षिणं तु करं कृत्वा गोकर्णाकृति
वत्पुनः । त्रिः पिबेद्वीक्षितं तोयमास्यं द्विः परिमार्जयेत् । मनुः । ब्राह्मेण विप्रस्तीर्थेन नित्यकालमु
पस्पृशेत् । कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन । विप्रपदं आचमनकर्तृमात्रोपलक्षकम् । आ
चमनोद्देशेन तीर्थविधानात् । कायं प्राजापत्यम् । त्रैदशिकं दैवम् । संभवे ब्राह्मतीर्थेनैवाचमनं
नित्यकालमिति श्रवणात् । रोगेण तन्निरोधे कायत्रैदशिकाभ्यामिति व्यवस्थितो विकल्पः ॥

तीर्थांतरमप्याह बौधायनः । निर्वपणसंस्रवणलाजाहोमनित्यहोमान्कायेन कुर्वीत । दैवेन दैविकं च । पैत्र्यकं पित्र्येण ।
कमण्डलुस्पर्शनं दधिस्पर्शनं नवान्नप्राशनं च स्रुग्ग्रहणं दैविकं सौम्येन । आग्नेयेन प्रतिग्रहं कुर्यात् । अंगुलिमूले सौम्यं । करमध्ये आग्नेयम् ।
पैत्र्यं तु सदा निर्दिष्टं । न पैत्र्येण कदाचनेति निषेधात् । ब्रह्मतीर्थं तीर्थांतरेभ्यो विविनक्ति याज्ञवल्क्यः ।
कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रं करस्य च । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमादिति । शंखलिखिताभ्या
मपि स्पष्टीकृतम् । अंगुष्ठमूलस्योत्तरतः प्रागग्रायां लेखायां ब्राह्मं तीर्थम् । प्रदेशिन्यंगुष्ठयोरंतरा पित्र्यम् ।
कनिष्ठिकातलयोरंतरा प्राजापत्यम् । पूर्वेणांगुलिपर्वणो दैवमिति । आचमनीयमुदकं विशिनष्टि शंखः ।
अद्भिः समुद्धृताभिस्तु हीनाभिः फेनबुद्बुदैः । वह्निना न च तप्ताभिरक्षाराभिरुपस्पृशेदिति । याज्ञवल्क्योपि ।
अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः । हृत्कंठतालुगाभिस्तु यथासंख्यं द्विजातयः । शुध्येरन्स्त्री च शूद्र
श्च सकृत्स्पृष्टाभिरंततः इति । अंततः इति ओष्ठप्रांततः इत्यर्थः । मनुरपि । हृद्गाभिः पूयते विप्रः कंठगाभिस्तु
भूमिपः । वैश्योद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरंततः इति । प्रचेता अपि । अनुष्णाभिरफेनाभिः पूता
भिर्वस्त्रचक्षुषा । हृद्गताभिरशब्दाभिस्त्रिश्चतुर्वाद्भिराचमेदिति । तत्रापवादमाह यमः । रात्रौ वीक्षितेना
पि शुद्धिरुक्ता मनीषिणां । उदकेनातुराणां च तथोष्णेनोष्मपायिनामिति । गौतमोपि । शुचौ देशे आ
सीनो दक्षिणं बाहुं जान्वंतरं कृत्वा यज्ञोपवीत्यामणिबंधनात्पाणिं प्रक्षाल्य वाग्यतो हृदयस्पृशस्त्रिश्च
तुर्वापि आचामेत् । पादौ चाभ्युक्षेत् । खानि चोपस्पृशेत् । शीर्षण्यानि मूर्ध्नि च दद्यादिति । तत्र त्रिश्चतु हृदयस्पृश इति ग्रासमाणपदे ९
ग्रह रि
उदकेण प्रमाणं च ... ह भरद्वाजः । आयतं सर्वतः कृत्वा गोकर्णाकृतिवत्करं । संहितांगुलिना तोयं गृहीत्वा पाणिना द्विजः ।
मुक्तांगुष्ठकनिष्ठेन शेषेणाचमनं चरेत् । माषमज्जनमात्रास्तु संगृह्य त्रिः पिबेदप इति । स च पाणिर्दक्षिणो द्रष्टव्यः । त्रिः पिबेद्दक्षिणेनापीति पुराणवचनात् ।

सकृदिति त्रित्वमा त्रापवादकम् । न त्वं गस्पर्शनिषेधकं तेनांगस्पर्श इति क र्तव्यता स्त्रीशूद्राणां कर्तव्यैव ॥ ६

२१

वैत्येत्विक्रो विकल्प इति माधवः। त्रयेण परितो ॰ ष इति श्रीदत्तः। फलमभ्युपमार्ष्टि मितिकेचित्॥ १८

खानींद्रियाणि। उपस्पृशेदप इत्यन्वयः। उदकपानानंतरं भाविनीमिति कर्तव्यतामाह दत्तः। संहत्या

गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखं। संहताभिस्त्रिभिः पूर्वमास्यमेतदुपस्पृशेत्। अंगुष्ठेन प्रदेशिन्या घ्राणं

पश्चादनंतरं। अंगुष्ठानामिकाभ्यां तु चक्षुःश्रोत्रे पुनः पुनः। कनिष्ठांगुष्ठयोर्नाभिं हृदयं तु तलेन वै।

सर्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेदिति॥ हृदयस्पर्शं खस्पर्शनमाह। तर्जन्यंगुष्ठयोगेन

स्पृशेन्नासापुटद्वयं। मध्यमांगुष्ठयोगेन स्पृशेन्नेत्रद्वयं ततः। अंगुष्ठस्यानामिकया योगेन श्रवणौ स्पृशे

त्। कनिष्ठांगुष्ठयोगेन स्पृशेत्स्कंधद्वयं ततः। नाभिं च हृदयं तद्वत्स्पृशेत्पाणितलेन तु। संस्पृशेत्ततः शी

र्षमयमाचमने विधिरिति। एवमन्येपि प्रकारांतरेणांगस्पर्शं वर्णयंति। तत्र यथाशाखं व्यवस्था द्रष्टव्या।

गोभिलगृह्येपि। इंद्रियाण्यद्भिः संस्पृशेत्। अक्षिणी नासिके कर्णाविति। मनुरप्याह। खानि चैवं

स्पृशेदद्भिः। आद्यपादेन विष्णुस्मरणपूर्वकमाचमनमुक्तम्। केशवादित्रिभिः पीत्वा चतुर्थेन मृजेत्करं।

पंचमेन च षष्ठेन द्विरोष्ठावुन्मृजेत्करात्। नोसप्तमेनापि मृजेदेकवारं तु मंत्रवित्। अष्टमेन तु मंत्रेण त्वभि

मंत्र्य जलं शुचिः। वामं संप्रोक्षयेत्पाणिं मनुना नवमेन तु। दक्षिणं दशमेनांघ्रिं वाममेकादशेन तु। मूर्धानं

अत्र [illegible] घ्राणस्य चक्षुषः श्रोत्रस्य स्पर्शनं पुटद्वये तद भिप्रायेण पुनः पुनरिति बाहुस्पर्शनं च वा शादेशे ५

इदं पत्त्रयं केशवादित्रिभिः पीत्वा चतुर्थेन मृजेत्करमिति वाद्यपादवाक्यविधादुपेत्यम्। १

द्वादशेनाप्यस्पृशेदूर्ध्वौष्ठकं ततः। संकर्षणाय नम इत्यनेनांगुलिमूर्धभिः। अंगुष्ठतर्जन्यग्राभ्यां संश्लि-
ष्टाभ्यां जलैः सह। नासारंध्रे वासुदेवप्रद्युम्नाभ्यां स्पृशेत्क्रमे। अंगुष्ठानामिकाभ्यां च संश्लिष्टाभ्यां जलैः
सह। अनिरुद्धाय नम इति संस्पृशेदक्षि दक्षिणं। पुरुषोत्तममंत्रेण ताभ्यां वामं स्पृशेद्दृशं। तथांगुष्ठक-
निष्ठाभ्यां संश्लिष्टाभ्यां जलैः सह। अधोक्षजनृसिंहाभ्यां श्रोत्रे द्वे संस्पृशेत्क्रमात्। नाभिमच्युतमंत्रेण
ताभ्यामेव स्पृशेद्बुधः। श्रीजनार्दनमंत्रेण तलेन हृदयं स्पृशेत्। उपेंद्रायेति मूर्ध्नि संस्पृशेत्स जलपा-
णिना। सर्वांगुल्यग्रभागैस्तु समाश्लिष्टैर्जलैः सह। भुजौ तु हरिकृष्णाभ्यां संस्पृशेद्दक्षिणेतरौ। आचमे-
न्नित्यमेवं यो भगवन्नामभिः क्रमात्। सयाः श्रुतः सविहिते सूत्रे स्वाधिकानिति। स्पर्शविशेषमाहा-
श्वलायनः। जलैः शुद्धैः पिबेद्द्विस्त्रिरनुर्वीक्षितैर्द्विजः। प्रमृज्येद्द्विरथ वेलापुणोष्ठावतिहस्तकैः।
मुखमंगुष्ठमूलेन पृथक्काणमुपस्पृशेत्। पाणिनाथाग्निमंत्रेण अवमृज्याथ संस्पृशेत्। विश्ल-
नेतराणां तु तन्मुखाल्लंवनं स्मृतं। स्पर्शीयदक्षिणेनेत्रे वामे तोलायवायवे। नमो दिश्यः श्रवणयोर्वी-
ह्वोरिंद्राय संस्पृशेत्। पृथिव्यै पादयोर्जान्वोरंतरिक्षाय गुह्यके। दिशिनाभ्यां ब्रह्मणे च विश्वेभ्यो हृदये तथा।
शिवायेति शिरः संते हस्तं प्रक्षालयेत्तत इति। अगस्त्यसंहितायां। केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालये-

२२

22

त्करौ। द्वाभ्यामोष्ठौ तु संमृज्य द्वाभ्यामुन्मार्जनं तथा। एकेन हस्तं प्रक्षाल्य पादावपि तथैव च। संप्रोक्ष्यैकेन
मूर्धानं ततः संकर्षणादिभिः। आस्यनासाक्षिकर्णांश्च नाभिहृत्कं भुजौ स्पृशेत्। एवमाचमनं कृ
त्वा साक्षान्नारायणो भवेत्। अत्रैतानि केशवादिकृत्यानि तानि चतुर्विंशतिनामानि चतुर्थ्यंतानि न
मोंतानि प्रथमैकवचनांतानि चोच्चार्याणि। केचित्तु संबुद्ध्यंतान्युच्चारयंति। तत्रापि विष्णुपदं हरि
पदं चाविभक्तिकमेवोच्चारयंति तन्न साधु नैव प्रयुंजीत। नासाधु निति भगवत्पतंजलिना साधु
शब्दोच्चारणे धर्मबोधनात्। प्रकारांतरमाह भरद्वाजः। रेखापादे त्रिभिः पीत्वा ... नैव धा
स्पृशेत्। पुनर्मार्हतिराय आशिरोमंत्रैर्द्विधा स्पृशेत्। बौधायनोपि। त्रिःपरिमृज्य द्विरित्ये
क इति। श्रोत्रुाविति शेषः। विलोमकाविति हेमाद्रिः। वामकरस्पर्शनाचमनमाह यमः। नाव त्रोपस्पृ
शेद्विप्रो यावद्वामं न संस्पृशेत्। वामे हि द्वादशादित्या वरुणस्त्रिदशेश्वरः। आचारप्रदीपेपि। दक्षिणे
तु स्थितं तोयं तर्जन्या सव्यपाणिना। तत्तोयं स्पृशते यस्तु सोमपानफलं भवेत्। अपामपर्युदकमाह शा
ट्यायनिः। त्रिभिः पर्युक्षणं कुर्यात्पात्रोपरि त्रिभिः सदा। बिंदुं विनिक्षिपेन्मध्ये शेषं स्रुचाति बिंदुभिः।

एवमुक्तास्तदंगा[illegible]चमनस्पर्शनयोः फलमाह व्याघ्रपादः । एवं यो ब्राह्मणो नित्यमुपस्पर्शनमाचरेत् ।
ब्रह्मादिस्तंबपर्यंतं जगत्स परितर्पयेदिति । वृद्धशंखोपि । त्रिः प्राश्नीयाद्यदंभस्तु प्रीतास्तेनास्य देवताः ।
ब्रह्मा विष्णुश्च रुद्रश्च भवंतीत्यनुशुश्रुम । गंगा च यमुना चैव प्रीयेते परिमार्जनात् । पादाभ्यां प्रीयते विष्णु
र्ब्रह्मा शिरसि कीर्तितः । नासत्यदस्रौ प्रीयेते स्पृष्टे नासापुटद्वये । स्पृष्टे लोचनयुग्मे तु प्रीयेते शशिभास्करौ ।
कर्णयुग्मे तथा स्पृष्टे प्रीयेते त्वनलानिलौ । स्कंधयोः स्पर्शनादेव प्रीयंते सर्वदेवताः । नाभिसंस्पर्शनान्नागाः
प्रीयंते चास्य नित्यशः । संस्पृष्टे हृदये चास्य प्रीयंते सर्वदेवताः । मूर्द्धसंस्पर्शनादस्य प्रीतस्तु पुरुषो भवेदिति ।
आचमनाकरणे प्रत्यवायो दर्शितः पुराणसारे । यः क्रियाः कुरुते मोहादनाचम्यैव नास्तिकः । भवंति हि वृथा
तस्य क्रियाः सर्वा न संशय इति । आचमनासंभवे प्रकारांतरमुक्तं मार्कंडेयपुराणे । कुर्यादाचमनं स्पर्शं गोपृष्ठ
स्यार्कदर्शनं । कुर्वीतालंभनं वापि दक्षिणश्रवणस्य च । अविद्यमाने सर्वस्मिन्नुत्तरप्राप्तिरिष्यते । आचम
नस्याविद्यमानता । हस्तपादादिक्षालनाभावः । जलाभावे च । मार्कंडेयोपाख्याने । देवतापितृसत्कारब्र
यज्ञसत्यादिनिरर्कैः । कृत्वा च स्पर्शमालापं शुद्ध्येतार्कविलोकनात् । क्षुते निष्ठीवने चैव दंतश्लिष्टे तथा
नृते । पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेत् । प्रभासादीनि तीर्थानि गंगाद्याः सरितस्तथा । विप्रस्य द

यमोपि । उत्तीर्योदकमा
चामेदवतीर्य तथैव च ।
एवं स्यात्तेजसा युक्तो व
रुणस्यापि पूजितः
उत्तीर्य जलान्निर्गत्य
अवतीर्य जलं प्रविश्य

२२ क्षिणे कर्णे वसतीमनुरब्रवीत् । तथा । आदित्यो वरुणः सोम अग्निर्वायुस्तथैव च । विप्रस्य दक्षिणे कर्णे
23 नित्यं तिष्ठंति देवताः । विप्रपरमाचमनकर्णमात्रोपलक्षकं । याज्ञवल्क्यः । गंगा च दक्षिणे कर्णे ना
सिकायां हुताशनः । उभयोः स्पर्शने चैव तत्क्षणादेव शुद्ध्यति ॥ अथाचमनापवादः । तत्र गौतमः ।
दंतश्लिष्टे दंतवत् । अन्यत्र जिह्वाभिमर्षणात् । प्राक्च्युतेरित्येके । च्युतेष्वास्राववद्विधानात् । निगर
न्नेव तच्छुचिरिति । प्राक्च्युतेरित्येक इति । जिह्वाश्लिष्टमपि दंतलग्नं यदि न च्यवते तदाऽशुद्धमिती
त्यर्थः । तेन दंतलग्नं जिह्वास्पृष्टमाचमनार्थमाकर्षणीयं । यदि न च्यवते तदा दंतलग्ने सत्याचम
नं न कर्त्तव्यम् । तदेवाह भगवान्देवलः । भोजने दंतलग्नानि निर्हृत्याचमनं चरेत् । दंतलग्नमसंहार्यं
लेपं मन्येत दंतवत् । न तत्र बहुशः कुर्याद्यत्नमुद्धरणे पुनः । भवेदशौचमत्यर्थं तृणवेधाद्व्रणे कृ
ते । यद्दंतलग्नमाचमनोत्तरं च्युतेत तदास्राववल्लालावन्निगरन्नेव शुद्ध्यति । वसिष्ठः । दंतवद्दंत
लग्नेषु यच्चाप्यंतर्मुखे भवेत् । आचांतस्यावशिष्टं स्यान्निगरन्नेव तच्छुचिः । यच्चापीति दंतच्युतमप्य
करणादि यत्नमात्रावशिष्टमाचमनोत्तरमुपलभ्यते तदपि निगरन्नेव शुद्ध्यतीत्यर्थः । शंखः । दंत
वद्दंतलग्नेषु रसवर्जं । मनुः । नोच्छिष्टं कुर्वते मुख्या विप्रुषोंगं न यंति याः । अस्यायमर्थः । तरलच्युत

मन्यत्रजिह्वाम
र्षणादिति १

बिंदवोम्भसि पतिताः स्पृष्टा अपि शुचयः। अंगलग्नास्तु रोमद्वयस्के दसमर्था आचमनहेतवः। तथा
च पैठीनसिः। भूमिगता बिंदवः परामृष्टाः कृता विप्रुषः आस्याद्विरोमक्लिन्नेष्वाचामेत्। तथा। स्पृ
ष्टेति बिंदवः पादौ य आचामयतः परान्। भूमिगैस्तैः समाज्ञेया न तैरप्रयतो भवेत्। आंगिरसो।
मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च। नोच्छिष्टस्तु भवेद्विप्रो यथात्रेर्वचनं तथा। अस्योच्छिष्टतानि
षेधः। पीत्वाप इति नैमित्तिकमाचमनम्। प्रयतो पीतिश्रवणाच्च। एवं च पीत्वाप आचमनविधिमया
दर्शितत्वाद्भोजनविषयम्। प्राणाहुतिसन्निकर्षादिति कल्पतरुकारादीनां व्याख्यानमयुक्तम्॥

फलमूलादिषु विशेषमाह १

तथा च शातातपः। दंतलग्ने फले मूले भुक्तस्नेहावशिष्टके। तांबूले चेक्षुदंडे च नोच्छिष्टो भवति द्वि
जः। फले कटुतिक्तकषाये। जातीफलादौ समाचारादित्याहुः। तथा च लघुहारीतः। कषायकटु
तांबूले भुक्तस्नेहानुलेपने। मनुः। उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन। अनिधायैव तद्द्रव्य
माचांतः शुचितामियात्। द्रव्यमन्नपानव्यतिरिक्तम्। तथा च बृहस्पतिः। प्रचरंश्चान्नपानेषु यदो
च्छिष्टमुपस्पृशेत्। भूमौ निधाय तद्द्रव्यमाचम्य प्रचरेत्ततः। अरण्येऽनुदके रात्रौ चौरव्याघ्राकुले पथि।
कृत्वा मूत्रं पुरीषं वा द्रव्यहस्तो न दुष्यति। शौचं च कुर्यात्प्रथमं पादौ प्रक्षालयेत्ततः। उपस्पृश्य तदभ्युक्ष्या
च

२४ गृहीतं शुचिता मियात् । द्रव्यहस्तो गृहीतद्रव्यः । द्रव्यपदमसंकुचितमेव । कृत्वा मूत्रं पुरीषं च द्रव्यहस्तः
25 कथंचन । भूमावन्नं प्रतिष्ठाप्य कृत्वाह्लानं यथाविधि । तत्संयोगात्तु पक्वान्नमुपस्पृश्य स्पृशेत्ततः । शुचिरित्या
पलंभवचनात् । प्रक्षाल्य पादौ निक्षिप्य आचम्याभ्युक्षणं ततः । पुष्पादीनां तृणादीनां प्रोक्षणं हविषां
तथेति वायवीयाच्च । निक्षिप्य द्रव्यं भूमौ निधायेत्यर्थः । षट्त्रिंशन्मते । तांबूले चैव सोमे च भु
क्तस्नेहावशिष्टके । दंतलग्नस्य संस्पर्शे नोच्छिष्टो भवेन्नरः । त्वग्भिः पत्रैर्मूलपुष्पैस्तृणकाष्ठ
मयैस्तथा । सुगंधिभिस्तथा द्रव्यैर्नोच्छिष्टो भवति द्विजः । एतच्च मुखसौरभाद्यर्थोपभुक्तविषयं ।
तांबूलसाहचर्यात् । दंतलग्नस्य संस्पर्श इति । अनिर्हार्यस्य दंतलग्नस्य जिह्वयास्पर्श इत्यर्थः ।
याज्ञवल्क्योपि । मुखजा विप्रुषो मेध्यास्तथाचमनबिंदवः । श्मश्रु चास्यगतं दंतसक्तं त्यक्त्वा ततः
शुचिरिति । मुखनिःसृता बिंदवो यद्यंगे निपतंति तदा नाचमनापवादकाः । तथा च गौतमः ।
न मुख्या विप्रुष उच्छिष्टं कुर्वंति । न चेदंगे निपतंतीति । आचमनबिंदवस्त्वंगस्पृष्टा अपि मेध्याः ।
तथा च मनुः । स्पृशंति बिंदवः पादौ य आचामयतः परान् । भौमिकैस्ते समा ज्ञेया न तैरप्रयतो
भवेदिति । अत्र पादग्रहणमवयवांतरस्याप्युपलक्षणार्थम् । तथा च यमः । प्रयांत्याचामयतो

याश्च शरीरे विप्रुषोन्नं रां । उच्छिष्टदोषो नास्ति च भूमितुल्यास्तु ताः स्मृता इति । श्मश्रुविषये वि
शेषमाहापस्तंभः । न श्मश्रुभिरुच्छिष्टो भवत्यन्तरास्ये सद्भिर्यावन्न हस्तेनोपस्पृशतीति । स्मृ
त्यर्थसारे । वेदाभ्यासे मुखाज्जाता शुद्धा एव तु सर्वतः ॥ ॥ अथाचमननिमित्तानि ॥ ॥
तत्र पैठीनसिः । उच्छिष्टे रेतोविण्मूत्रसंस्पृष्टोन्यस्त्वाचम्य प्रयतो भवति । त्रिः प्रक्षाल्य च तं देशं ।
आचमनप्रक्षालनयोरर्थक्रमेण पाठक्रमबाधः । अत्रोच्छिष्टादिस्पृष्टप्रदेशे क्षालनानन्तरमाचमनं द्रष्ट
व्यम् । यवागूपाकादनंतरं अग्निहोत्रहोमस्य मीमांसकैः सिद्धांतितत्वात् । अन्यथा होमानंतरं यवागू
पाकस्यादृष्टार्थत्वापत्तेः । होमस्य च द्रव्यांतरकल्पनापत्तेश्च । मनुः । सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्यो
क्त्वानृतं वचः । पीत्वापोध्येष्यमाणश्च आचामेत्प्रयतोपि सन् । प्रयतोपीत्यस्य कृताचमनोपीत्यर्थः । शाकु
पुनः स एव । अनाचांतः पिबेद्यस्तु पीत्वा वानाचमेद्यदि । गायत्र्यास्त्रिशतं जप्त्वा प्राणायामेन शुध्यति ।
अनाचांतः पिबेद्यस्तु भक्षयेद्वापि किंचन । अपोशानमकृत्वा च भोक्ता सांतपनं चरेत् । वामनः । विण्मू
त्रे ष्ठीवने स्पर्शने तथा पादावनेजने । उच्छिष्टस्य तु संभाषादशुच्यप्रयतस्य च । संदेहेषु च सर्वेषु शिखां मुक्त्वा
तथैव च । विना यज्ञोपवीतेनेति । यज्ञोपवीतत्यागे आचमननिमित्तम् । अपरार्के । क्रियां यः कुरुते मोहाद्

अग्निहोत्रं जुहोति यवागूं पचतीति श्रुतिवाक्ये

२५ 25 नाचम्येह नास्तिकः । भवंति ताः क्रियास्तस्य वृथा सर्वा न संशयः । मनुः । उपक्रमे वा शिष्टस्य कर्मणः प्रय
तो नरः । कृत्वानुपितृकार्याणि सकृदाचम्य शुध्यति । सकृदित्यस्य चुलकत्रयात्मकमित्यर्थः । भोजने हव
ने दाने उपहारे प्रतिग्रहे । संध्यात्रये ऽबुपाने च पूर्वं पश्चाद्द्विराचमेत् । उपहारशब्देन देवपूजा । याज्ञवल्क्यः ।
रुद्रपित्र्यासुरान्मंत्रांस्तथा चैवाभिचारिकान् । आहृत्यालभ्य चात्मानमपः स्पृष्ट्वान्यदाचमेत् । आत्मा आद्रिसोद्धार्ये
नं हृदयं आलभ्य स्पृष्ट्वा । तथा । एतान्याहृत्य रौद्रादीनस्पृष्ट्वा जलं द्विजः । ऊर्ध्वं यत्कुरुते कर्म तद्भव त्यर्थः । ४
त्यजपाकृतं । देवलः । उच्छिष्टं मानवं स्पृष्ट्वा भोज्यं वापि तथाविधं । तथैव हस्तौ पादौ च प्रक्षाल्याचम्य
शुध्यति । तथाविधं नाम उच्छिष्टं । भोज्यं अन्नादि । तथा । यद्दर्भाः शौचनिर्मुक्ताः क्षितिं प्राप्य विनश्य
ति । प्रक्षाल्याशुचिलिप्तं च स्पृष्ट्वा चाचमय शुध्यति । तेन शौचार्द्रां भूमिं स्पृष्ट्वा अशुचिलिप्तमंगं प्रक्षा
आपस्तंबः ४ ल्याचम्य शुध्यतीत्यर्थः । आचारचिंतामणौ । सुप्ते तथैवासिंहाणिकायां आलंभे केशानामरनेर्गवां
ब्राह्मणस्य स्त्रियाश्चालंभे महापथं गत्वा मेध्यं चोपस्पृश्य अप्रयतं च मानुषं नीवीं च परिधायावस्पृशेत् व ४=
आर्द्रं वा शकृत् ओषधिर्भूमिं वा ॥ क्षवथुः छिक्का । सिंहाणिका नासामलं अश्रु नेत्रमलं । महापथो
राजमार्गः । नीवी अधरीयवसनग्रंथिः । शकृत् गोमयं । एतेषु निमित्तेष्वाचामेत् । आचमनासंभवे

आर्द्रं गोमयं । आर्द्रौषधीः आर्द्रां भूमिं वा स्पृशेदित्यर्थः । गोब्राह्मणादिस्पर्शे यदाचमनं विहितं तत्स्व
स्मृ २ यं शुचिनावेदितव्यम् । बौधायनः । नीवीं विस्रंस्य परिधायोपस्पृशेदिति । योगियाज्ञवल्क्यः ।
स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे । आचांतः पुनराचामेद्वासो विपरिधाय च । आचांतस्य पुनराचमनवि
धानात् । त्रिरभ्यस्तमेवाचमनमावर्त्तते । न तु द्विरित्यनेन त्रिरित्यस्य बाधः । पैठीनसिः । कलिलकासश्वासा
गमे रथ्याचत्वरश्मशानाक्रमणेष्वाचांतः पुनराचामेत् । कलिलशब्देन कठिनश्लेष्मा श्वासोच्छ्वसितः । चत्वरं
भूतबलिस्थानं । रथ्यागोनरयानश्च हस्त्यश्वारोहणात्तथा । आचांतः कर्मयुक्तः स्यात्ताम्बूलौषधभक्षणे । यान
शब्दस्य गोनर[illegible]शब्दाभ्यां सह प्रत्येकं संबंधः । द्वंद्वांते श्रूयमाणं पदं प्रत्येकमभिसंबध्यते इति न्यायात् । तेन गो
यानं शकटम् । नरयानं शिबिका । साक्षाद्गोयाने प्रायश्चित्तश्रवणात् । बृहस्पतिरपि । अधो वायुसमुत्सर्गे
आक्रंदे क्रोधसंभवे । मार्जारमूषकस्पर्शे प्रहासेऽनृतभाषणे । निमित्तेष्वेषु धर्मार्थं कर्म कुर्वन्नुपस्पृशेदिति ।
स्मृत्यर्थसारे । कर्म कुर्वन् काकादिदर्शने आचामेदिति । बौधायनोपि । कर्मयुक्तो नाभेरधःस्पर्शं वर्जये
त् । छंदोगपरिशिष्टे । पितृमंत्रानुद्रवणे आत्मालंभे अवेक्षणे अधो वायुसमुत्सर्गे प्रहासेऽनृतभाषणे ।
पितृमंत्रानुद्रवणं नाम उच्चारणं । आत्मालंभ इत्यस्य हृदयस्पर्श इत्यर्थः । अवेक्षणं नाम हृदयस्यैवेत्यर्थः ।

२६ मार्जारस्पर्शेऽत्र मार्जारकर्तृकोऽबोध्यः। स्वयंकृते स्नानविधानात्। ब्रह्मांडपुराणे। कंठं शिरो वा प्रावृत्य
रथ्यापण्यगतोऽपि वा। अकृत्वा पादयोः शौचमाचांतोऽप्यशुचिर्भवेत्। मनुः। सकर्दमेषु वर्षासु प्रवि
26 श्य ग्रामसंकरं। जंघाभ्यां मृत्तिकास्तिस्रः पद्भ्यां तु द्विगुणाः स्मृताः। एतत्कालानंतरं ग्रामाक्रमणानै
मित्तिकाचमनात्प्राक्। ततो द्विराचमनम्। संवर्तः। आचारादर्शे। चर्मारं रजकं वेणं धीवरं नटमे
स्पृष्ट्वा॰वा॰५८ वच। एतान्दृष्ट्वा नरो मोहादाचामेत्प्रयतोऽपि सन्। मोहादकामत इत्यर्थः। द्विराचमनानंतरं वि
ष्णुस्मरणं। द्विराचम्य ततः शुध्येत्स्मृत्वा विष्णुं सनातनमिति स्मृत्यंतरोक्तेः। ब्रह्मपुराणे। अधमवर्ण
स्य संलापे सुप्ते वा दंतधावने। आचम्य प्रयतो भूत्वा ततः शुद्धो भवेन्नरः। अधमवर्णश्चांडालादिरित्यर्थः।
[illegible] कौर्मे। चांडालम्लेच्छसंभाषे स्त्रीशूद्रोच्छिष्टभाषणे। उच्छिष्टं पुरुषं
स्पृष्ट्वा भोज्यं वापि तथाविधं। आचामेदश्रुपाते च लोहितस्य तथैव च। अग्नेर्गवामथालंभे स्पृष्ट्वा प्रय
तमेव वा। स्त्रीणामथात्मनः स्पर्शे नीवीं वा परिधाय चेति। दक्षः। स्नानादनंतरं तावदुपस्पर्शनमि
ष्यते। प्रजापतिः। उपक्रमे वसिष्ठस्य कर्मणः प्रयतोऽपि सन्। आचामेदिति शेषः। वसिष्ठः। कृत्वा चाव
श्यकार्याणि आचामेच्छौचवित्तमः। मार्कंडेयपुराणे। देवार्चनादिकार्याणि तथा गुर्वभिवादनं। कुर्वी

तस्मादाचमनतद्वद्देवभुजिक्रिया। हारीतः। देवतामभिगंतुकाम आचामेत्। शातातपः। आचामे
द्वर्जयेन्नित्यं भुक्त्वा तांबूलचर्वणं। ओष्ठौ विलोमकौ स्पृष्ट्वा वासो विपरिधाय च। अथाचमनवर्ज्यानाह।
तत्र मनुः। विना यज्ञोपवीतेन तथा धौतेन वाससा। मुक्त्वा शिखां चाप्याचामेत्कृतस्यैव पुनः क्रिया।
सोष्णीषो बद्धपर्यंकः प्रौढपादस्तथा नगः। दुर्देशप्रपदस्थैव नाचामन् शुद्धिमाप्नुयादिति। बौधाय
नोपि। पादप्रक्षालनात् शेषेणा नाचामेत्। भूमौ स्रावयित्वा आचामेत्। न सबुद्बुदाभिर्न फेनाभि
र्नोष्णाभिर्न क्षाराभिर्न विवर्णाभिर्न कलुषाभिर्न हसन्न जल्पन्न तिष्ठन्न प्रह्वो न प्रणतो न मुक्तशिखो ना
बद्धकच्छो न बहिर्जानुर्न वेष्टितशिरा न बद्धकलो न पठ्यमानो नायज्ञोपवीती न प्रसारितपादो न शब्दं
कुर्वन्नित्रिरपो हृदयंगमाः पिबेदिति। देवलोपि। सोपानत्को जलस्थो वा मुक्तकेशोपि वा नरः। उष्णी
को ४८ षी वापि नाचामेद्वस्त्रेणावद्धवा शिर इति। आपस्तंबोपि। न वर्षधारास्वाचामेदिति। यमोपि। अपः
करनखस्पृष्टा य आचामति वै द्विजः। सुरां पिबति स व्यक्तं यमस्य वचनं यथेति। गौतमोपि। नांज
लिना पिबेन्न तिष्ठन्नुद्धृतोदकेन नाचामेदिति। न तिष्ठन्निति स्थलविषयम्। जलेऽवतिष्ठन्नपा
चामेत्। तथा च विष्णुः। जान्वोरूर्ध्वं जले तिष्ठन्नाचांतः शुचितामियात्। अधस्ताच्छतकृत्वोपि समाचांतो

नश्यतीति। कौशिकोऽपि। अपवित्रकरः कश्चिद्ब्राह्मणोपस्पृशेत्। अकृतं तस्य तत्सर्वं भव
त्याचमनं तथा। वामहस्ते स्थिते दर्भे दक्षिणेनाचमेद्यदि। रक्तं तु तद्भवेत्तोयं पीत्वा चान्द्रायणं चरेदि
ति। गोभिलः। हस्तद्वये पवित्रं प्रशंसति। उभयत्र स्थितैर्दर्भैः समाचामति यो द्विजः। सोमपा
नफलं तस्य भुक्त्वा यज्ञफलं लभेदिति। स्नानानंतरभाविन्याचमने दक्षो विशेषमाह। स्नात्वा
चामेत्तदा विप्रः पादौ कृत्वा जले स्थले। उभयोरप्यसौ शुद्धस्ततः क्षेमो भवेदिति। हारीतः।
आर्द्रवासा जले कुर्यात्तर्पणाचमनं जपं। शुष्कवासाः स्थले कुर्यात्तर्पणाचमनं जपमिति। स्थल
विषये विशेषो दर्शितः स्मृत्यंतरे। अलाबु ताम्रपात्रं च कंकं च कमंडलं। गृहीत्वा स्वयमाचामन्न
रो नाशुचितो भवेत्। करकालाबुकाद्यैश्च ताम्रचर्मपुटेन च। स्वहस्ताचमनं कार्यं त्रिहलेपांश्च वर्ज
येत्। करपात्रे च यत्तोयं यत्तोयं ताम्रभाजने। सौवर्णे राजते चैव नैवाशुद्धं तु तत्स्मृतमिति। देवलो
ऽपि। न गच्छन्न शयानश्च न कालेन परान्स्पृशन्। न हसन्नैव संजल्पन्नात्मानं चैव वीक्षयन्।
केशान्नीवीमधःकायमस्पृशन्धरिणीमपि। यदि स्पृशति चैतानि भूयः प्रक्षालयेत्करम्।
गच्छन्नित्यादिना नाचामेदिति समुदायार्थः। कालेन कालनायुक्तः इत्यर्थः। आत्मानं हृदयं वीक्ष

यन्निति स्वार्थे णिः । नीवी अधरीयवसनग्रंथिः । अधःकायं नाभेरधःकायमित्यर्थः । गयादासी
ये । दुर्दर्शः अपदश्यैवतिष्ठन्नाचम्य प्रयतस्तु दन् । वामहस्तेन न गनश्चनाचमन्शुद्धिमाप्नुयात् ।
एवं द्वितीयमाचमनं नमपितत्रद्विराचमनेतांगमावर्तयेदद्दृष्टार्थत्वात् । नपादप्रक्षालनमपितत्रे
स्तेवोपपत्तेः । आचमनानंतरं भविष्यपुराणे । यद्भूमावुदकं वीर समुत्सृजति मानवः । वासुकिप्र
मुखान्नागांस्तेन प्रीणाति नित्यशः । विनायज्ञोपवीतेन यथामुक्तशिखो द्विजः । अप्रक्षालितपाद
स्तु आचांतोप्यशुचिर्भवेत् । देवलः । सोपानत्कोजलस्थो वा मुक्तकेशः शिखोपि वा । नोष्णीषीव
हुपर्यंकः प्रौढपादस्तु यानगः । नशौचवर्षधाराभिराचामेद्देदतत्त्ववित् । जलस्थ इति जानुभ्या
मधोजलस्थः । नतूर्ध्वंजलस्थस्य तद्विधानात् । गोभिलः । जानुभ्यामूर्ध्वमाचम्य जले तिष्ठ
न्नदुष्यति । नाभ्यामधस्तथा तिष्ठन्नाचामेन्नविचक्षणः । सांख्यायनः । दानमाचमनं होमं भोज
नं देवतार्चनं । प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणम् । आसनारूढपादस्तु जानुनोर्जंघयोस्तथा ।
कृत्वावसक्थिकोयश्च प्रौढपादः सउच्यते । भुक्त्वासनस्थो यश्चाचामेन्नान्यकाले कदाचन । शौचा
पादकस्याचमनस्य आसनस्थस्य निषेधात् । संध्यांगाचमनं मासनस्थोपि कुर्वीत । गोभिलः ।

२८ नाधरीयैकदेशेन कल्पयित्वोत्तरीयकम्। आचमनमिति शेषः। याज्ञवल्क्यः। परिधानाद्बहिः कृता
28 निकक्षा चाहरी भवेत्। धर्मकर्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः। कृता अधरीयवस्त्रस्याञ्चलद्वयं ब
हिर्निवद्धेत्यन्वयः। ब्रह्मांडपुराणे। राज्ञां गुरूणां देवानां न दुष्येदिति केचरन्। आजानुपत्रेचरणं तथा
चमनकर्मणि। आजानुपत्रं मोजा इति भाषायां। न वहिर्जानुत्वरया नासनस्थो न चोत्थितः। न पादु
कस्थोप्याचामेन्नान्वितोऽप्युचिमानसः। शिरः प्रावृत्य कंठं वा मुक्तकच्छशिखोऽपि वा। अकृत्वा पादयोः त १८
शौचमाचांतोप्यशुचिर्भवेत्। आपस्तंबोपि। पादक्षालनशेषेण नाचामेद्वारिणा द्विजः। अन्याभावेऽपि
चेत्किंचित्यक्त्वा भूमौ तु तज्जलमिति। पुनः स एव। नाप्सु दकशेषेण न वृथा कर्मणि कुर्वीत आचामेद्वा
पाणिसंमुक्तेन नैकपाण्यावर्जितेन। कुर्वतीत्यस्य कुर्वन्नित्यर्थः। शंखलिखितौ। उद्धृत्य परिपूताभिर
वेक्षिताभिरफेनाभिरबुद्बुदाभिर्न शूद्रेणाशुच्येकपाण्यावर्जिताभिराचामेदिति। शूद्रेण अशुचिना वा
पुरुषांतरेण एकेन पाणिना वा आवर्जिताभिर्हस्तेन दीयमानाभिः स्वयं त्वशुचिना एकपाणिवर्जिता
भिराचमनमशुद्धम्। संवर्तः। संध्यार्थे भोजनार्थे च जपादिहवनेषु च। शूद्राहृतेन नाचामेत् पित्र्यर्थे
वा तथैव च। तथा। संध्याकार्ये पितृश्राद्धे वैश्वदेवे शिवार्चने। यती च ब्रह्मचारी च नाचामेच्चर्मवारिणा।

इत्यत्रात्यंतनिषेधो वा । नान्यत्र विधिः परिसंख्यापत्तेः । आपस्तंबः । न वर्षधाराभिराचामेत् । प्रदरो
दकेन तप्ताभिश्चाकारणात् । प्रदरः स्वयंविदीर्णो भूभागः । तत्रस्थं जलं चेद्गोतृप्तिक्षमं न भवति
रसवर्णदुष्टं तदा वर्जयेत् । अकारणादग्न्यादिना विना तप्ताभिर्नाचामेदित्यर्थः । तथा च वसिष्ठः ।
प्रदरादपि या गोस्तर्पणसमर्थाः स्युर्न रसवर्णदुष्टा याः स्युः शुभागमास्ताभिराचामेदिति शेषः ।
गोभिलः । उद्धृत्यपरिस्रुताभिरक्षाराभिरवेदताभिराचामेत् । रात्रावपीति तेनैव शुद्धिरुक्ता म
नीषिभिः । उदकेन नराणां च तयोस्तेनोष्मपायिनां । उष्मपायिनो रोगार्ता दीक्षिताश्चेत्यर्थः ।
महावीरेषु दीक्षित उष्मपायी । तन्नेनोदकार्यान्कुर्वीतेति वचनात् । ब्रह्मपुराणे । स्त्रीशूद्रावयनित्यं भःक्षा
लनाच्च करोष्ठयोः । क्षालनादित्यनेन स्त्रीशूद्राणामिंद्रियस्पर्शं विनैव शुद्धिः । अनुपनीतब्राह्मणादीनाम
पि शूद्रवदेवाचनं युज्यते । बौधायनः । शूद्राणामार्याधिष्ठितानामार्यवदाचमनकल्पः । वैश्यवच्छौ
चकल्पश्चेति स्मृतेश्च । आचमनार्थजलपरिमाणमाहोशनाः । माषहर्वणमज्जनमात्रा हृदयंगमाः
कमंडल्वधिकारे बौधायनः । मूत्रपुरीषे कुर्वन्दक्षिणहस्तेन गृह्णाति । सव्ये आचमनीयम् । आचमन
विधिं कुर्वन्सव्यहस्ते कमंडलुं गृह्णातीत्यर्थः । तेनाचमने वामकरावर्जनत्वमभिमतम् । अन्यथा तद्वारण

२९ 29

स्याद्दृष्टार्थतापत्तेः। आचमनानंतरं देवलः। रेतोमूत्रशकृन्मोक्षे भोजने परिधाने। शौचमेवंविधं श्रो
त्रमेतच्चान्यत्र वर्तते। एवंविधं इंद्रियस्पर्शसहितम्। अन्यत्राचमनमात्रमपि त्वरादिवशाच्छुद्धये भवति।
आपस्तंबः। पादशेषं पीतशेषं शौचशेषं तु जज्जलं। तज्जलं हरयात्तुल्यं पर्यङ्ककरणं विना। तथा। कां
स्यैरायसपात्रेष्व त्रपुसीसकपित्तलैः। आचांतः शतकृत्वोपि न शुद्ध्यति कदाचनेति॥ ॥
इत्याचमनविधिः॥ ॥ अथ दंतधावनविधिः॥ ॥ तत्र दक्षः। उषःकाले तु संप्राप्ते शौचं कुर्याद्य
थार्थवत्। ततः स्नानं प्रकुर्वीत दंतधावनपूर्वकम्। उषःकालः संध्या प्रातः प्राचीप्रकाशवान्। इदं चाश्रध्य
यं न तु स्नानांगं। मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः। तस्मात्सर्वप्रयत्नेन भक्षयेद्दंतधावनमिति।
वृद्धशातातपेन स्वतंत्रस्यैव शुद्धिहेतुतया कथनात्। अत एव दंतान्प्रक्षाल्य स्नायादिति छंदोगपरिशि
ष्टे व्यारंभणीयो यावत्कालार्थ एव संयोगो न त्वंगांगिभावः। भारते। प्रक्षाल्य हस्तपादौ च मुखं च सु
समाहितः। दक्षिणं बाहुमुद्धृत्य कृत्वा जान्वंतरं ततः। प्राङ्मुखो विविक्ते तु भक्षयेद्वाग्यतो नरः। द श्लो २४
क्षिणं बाहुमुद्धृत्य उपवीती भूत्वेत्यर्थः। अत्रिः। मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः। तदार्द्र
काष्ठं शुष्कं वा भक्षयेद्दंतधावनमिति। व्यासोपि। प्रक्षाल्य हस्तौ पादौ च मुखं च सुसमाहितः। दक्षिणं

वाहुमर्दं त्यक्त्वा जान्वंतरं ततः । तिक्तं कषायं कटुकं सुगंधं कंटकान्वितं । क्षीरिणो वृक्षगुल्मादीन्
भक्षयेद्दंतधावनमिति । विष्णुः । उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः । परिजप्य च मंत्रेण
भक्षयेद्दंतधावनं । मंत्रस्तु । अन्नाद्याय व्यूहध्वं सोमो राजायमागमत् । स मे मुखं प्रमार्क्ष्यते यशसा
च भगेन चेति । वैदिकः । कात्यायनो दंतधावनकाष्ठाभिमंत्रणमंत्रांतरेणाह । आयुर्बलं यशो वर्चः
प्रजापशुवसूनि च । ब्रह्मप्रज्ञां च मेधां च त्वन्नो देहि वनस्पते इति । तत्र विनियोगः । ॐ आयुरिति मंत्रस्य
प्रजापतिर्ऋषिर्वनस्पतिर्देवता अनुष्टुप् छंदः काष्ठाभिमंत्रणे विनियोगः । इत्यभिमंत्र्योपरितनदंतानां
रभ्य निमृजेत् । तत ऊर्ध्वं क्रमेणैव धावयेच्च समाहितः इत्यंगिरासस्मरणात् । आश्वलायनोप्याह । एवमा
चम्य दंतानां काष्ठेन निमृजेन्मलं । प्राग्वादङ्मुख आसीनः प्रागुदङ्मुख एव च । वितस्तिमात्रमुद्दिष्टं
त काष्ठं द्विजन्मनां । क्षत्रियस्य द्वयोनं तदर्धं स्यान्नातिशुष्कं न जंतुमत् । कनिष्ठांगुलिवत्स्थूलं तदग्रकृतकूर्च
कं । सर्वे कंटकिनः पुण्याः क्षीरिणश्च यशस्विनः । औदुंबरेण वाक्सिद्धिं लभेत ज्वलेनैव धनं । अर्कजेन
विरोगत्वं वटेन महतीं श्रियं । अपामार्गेण सर्वर्द्धिं श्रीवश्यं च प्रियंगुभिः । वेणुना प्राप्नुयाद्दावीरजवृताज
यं लभेत् । चूतेन च पवश्यं स्यात् सौभाग्यं पनसेन तु । दीर्घायुर्जंबुजेनेष्टसिद्धिः स्याद्दघ्यजंबुना । जयं कदंबवृक्षता

२० दौर्बल्यं वैकंकतेन तु । आरोग्यं कर्णिकारेण पारंत्या सौख्यमुत्तमं । अशोकेन विशोकः स्यात्ब्रह्मवर्चसं

38 ब्रह्मवर्चसं । खदिरादखिलान्कामान् लभ्यतेतिशयो महान् । वाग्यतो निसृजेद्दंतान्दूतमंसान्यपी

ड्यन् । रात्रस्यामुत्सृजेत्काष्ठं दिशिनिम्नज्ञातकुचो । दंतधावनकाष्ठं तु यस्मात्सृज्यंत दंततः ।

समिष्टाहारमाप्नोति पतत्यभिमुखं हृदि । मिहिरेणाप्युक्तम । अभिमुखपतितं प्रशांत दिकस्थं शुभ

मतिशोभनमूर्ध्वसंस्थितं तु । अशुभकरमधोन्यथास्थितं च स्थितपतितं च करोति मिष्टमन्नं । प्रशां

तदिक् । सूर्याधिकरणक । सूर्ये सांत्वागमिष्यमाणसूर्यकादिगता । तयासएव । दग्धादिगुक्ता

दिननाथमुक्ता विवस्वदाप्ताभवतिप्रदीप्ता । साधूमिता यांसविताप्रयाति शेषाः दिशः स्युः खलु पंच

शांताः । पौराणिकास्तु । कनीन्यग्रसमं स्थौल्यं स कूर्चं द्वादशांगुलं । प्रातर्भुक्त्वा च यतवाग्भक्षये

द्दंतधावनम् । भुक्त्वेति यतिपरमिति हलायुधः । भोजनोत्तरं दंतलग्ननिर्हरणार्थत्वात् । सर्वान्प्रती

ति श्रीदत्तः । विष्णुः । कंटकितीरवृक्षोत्थं द्वादशांगुलसंमितं । कनिष्ठांगुलिवत्स्थूलं पर्वार्धकृतकूर्च

कं । दंतधावनमुद्दिष्टं जिह्वोल्लेखनिकातथा । हस्तूलंस्त्वदंतस्यसमदंतस्य मध्यमं । स्थूलं विषम

दंतस्य त्रिविधं दंतधावनं । द्वादशांगुलकं विप्रे काष्ठमाहुर्मनीषिणः । क्षत्रविट्शूद्रजातीनां नवषट्

अत्र च कालादिनिषेधो नास्ति । भोजने दंतलग्नानि निर्हृत्याचमनं चरेदिति देवलोक्तेः । उच्छिष्टनिर्हरणस्यावश्यकत्वात् । [illegible] स्त्वत्यर्थसारे पि । निषेधो

दंतकाष्ठस्य भोजनांते न कस्यचित् । पत्रैर्वा द्वादशेर्दंतान्गंडूषैः शोधयेदपि ३४

चतुरंगुलमिति। अंगिराः। आम्रपुन्नागबिल्वानामपामार्गशिरीषयोः। भक्षयेत्प्रातरुत्थाय वाग्यतो
दंतधावनमिति। वटाश्वत्थार्कखदिरकरवीरांश्च वर्जयेत्। जातीं च बिल्वखदिरमूलं तु ककुभस्य च।
अरिमेदं प्रियंगुं च कंटकिरण्यस्तथैव च। प्रातस्तु भक्षयेत्पूर्वं प्रक्षाल्यैव च संत्यजेत्। उदङ्मुखः प्राङ्मुखो
वा कषायं तिक्तकं तथा। प्रातर्भुक्त्वा च यतवाग्भक्षयेद्दंतधावनमिति। मार्कंडेयपुराणे। द्वादशांगुलि
विप्राणां क्षत्रियाणां दशांगुलिः। अष्टांगुलं तु वैश्यानां शूद्राणां सप्तसंमितं। अंतरप्रभवानां तु षडंगुलमुदाहृ
तं। चतुरंगुलमानं तु नारीणां नात्र संशयः। गर्गोपि। दशांगुलं तु विप्राणां क्षत्रियाणां नवांगुलं। सप्तांगुलं
तु वैश्यानां शूद्राणां तु षडंगुलं। चतुरंगुलमानेन नारीणां परिकीर्तितं। अत्रेत्थं विरोधपरिहारः। द्वाद
शांगुलादिप्रमाणालाभे दशांगुलादिपरिमाणविशिष्टं ग्राह्यम्। न तु द्वादशांगुलादौ फलाधिक्यम्। तस्या
श्रवणात्। नरसिंहपुराणेपि। दंतकाष्ठस्य वक्ष्यामि समासेन प्रशस्ततां। सर्वे कंटकिनः पुण्याः क्षीरिणश्च
यशस्विनः। खदिरश्च करंजश्च करंजश्च वटस्तथा। तिंतिणी वेणुपृष्ठं च आम्रनिंबौ तथैव च। अपामार्गश्च
बिल्वश्च अर्कश्चोदुंबरस्तथा। — — — — कथिता दंतधावनकर्मणि। भारते। तिक्तं कषायं कटुकं सु
गंधिः कंटकान्वितं। क्षीरिणो वृक्षगुल्माद्या भक्षयेद्दंतधावनमिति। तथा च। जंबूदुंबरचूतश्च करंजवालो

३१ 31 धूर्त्तचंपकाः। बदरी च द्रुमा ह्येते प्रोक्ता दंतप्रधावने। सर्वे कंटकिनः पुण्या आयुर्दाः क्षीरिणः स्मृताः। क
टुतिक्तकषायाश्च बलारोग्यसुखप्रदाः। कूर्मपुराणे। मध्यांगुलिसमं स्थूलं द्वादशांगुलसंमितं। सत्व
चं दंतकाष्ठं स्यात्तदग्रेण तु धावयेत्। इदं विषमदंतस्य। इतरस्य तु कनिष्ठिकाग्रसमस्थूलमित्युक्तं प्राक्।
स्कंदपुराणे। आम्रेण सर्वसंपत्तिर्बदरे विपुलं धनं। शिरीषे कीर्त्तिरेव स्यात्कदंबे सुस्वरः स्वनः। खदिरे स
वें सौभाग्यं मालत्या बुद्धिरुत्तमा। प्लक्षे चैवार्थसंपत्तिर्बिल्वे तु विपुलं धनं। औदुंबरेण वाक्सिद्धिः धूपके
न च संस्मृतिः। अर्को नाशयते व्याधिमर्थलाभं च कारयेत्। अपामार्गेण धीर्मेधा प्रज्ञाशक्तिर्वपुस्तथा।
सर्जे शौर्यं वटे दीप्तिः करंजे विजयः सदा। करवीरे परं स्थानं करंजे शत्रुनिर्णयः। अत्र वृक्षविशेषा
णां फलविशेषकथनं गोदोहनाधिकरणन्यायेन गुणविधिकथनार्थम्। प्रकारेणोक्तं। ऋद्धिरूप
फलमप्येव। गर्गः। सर्जे धैर्यं वटे दीप्तिः करंजे विजयो रणे। प्लक्षजे चार्थसंपत्तिर्बदर्यां मधुरः स्वरः।
खदिरे चैव सौभाग्यं बिल्वे तु विपुलं धनं। औदुंबरे च वाक्सिद्धिर्बंधूके च दृढा मतिः। सैंधे च कीर्त्तिः सौ
भाग्यं पालाशे सिद्धिरुत्तमा। कदंबे सकला लक्ष्मी राम्रे चारोग्यमेव च। अपामार्गे धृतिर्मेधा प्रज्ञा वाग्वि
वपुः श्रुतिः। आयुः शीलं यशो लक्ष्मीः सौभाग्यं चोपजायते। अर्केण हंति रोगांस्तु वीजपूरेण तु व्यथां।

दाडिमे सिंधुवारे च उटजे कुब्जे तथा । जातीच करमर्दी च दुःस्वप्नं नाशयेदिति । ककुभेन नयायु
ष्मान्भवेत्पलितवर्जितः । ककुभं प्रसेवकः । नागदेवीये । चिरं दंतेषु केशेषु चिरं मूत्रपुरीषयोः । चिरं
स्नाने च शीर्षे च मैथुने शयने शने । नातितत्र चिरं तिष्ठेदिति निषेधस्तु प्रमादपरः । वर्ज्या नाहोशनाः ।
नांगुलिभिर्दंतान्प्रक्षालयेत् । दक्षिणामिमुखो नाद्यात् । नीलं धवकदंबके । तिंदुकेंगुदवं धूकमो
चाकरजवल्लिजं । कार्पासं दंतकाष्ठं च विस्मारपिहरे च्छिवम् । न भक्षयेत्तु पालाशं कार्पासं शाकमेव च ।
एतानि भक्षयेद्यस्तु दीर्घरोगः स जायते इति । नीलं नीलोत्पलं । धवः प्रसिद्धः । मोचा कदली । वृद्ध
याज्ञवल्क्यः । इष्टिकालोष्टपाषाणैर्नखैरंगुलिभिस्तथा । मुक्त्वा चानामिकांगुष्ठौ वर्जयेद्दंतधावनं ।
आचार्यः । नार्द्रं न तत्त्वाहीनं नाग्रशास्तं तरूद्भवं । स्नुहीकिंशुकशाल्मलीकरंजादींश्च वर्जयेत् ।
कोविदारेंगुदीश्लेष्मशाल्मलीहृत्नसिंहिका । श्यामाकं पारिभद्रं च गुग्गुलुं पिच्छिलां तथा । इतिगंधा
म्लमधुरस्थिरं दंतधावनं । प्रतीचीं दक्षिणां चैव वर्जयेद्दंतधावनं । इतिगंधो दुर्गंधिः । विष्णुः ।
न श्लेष्मांतकारिष्ट विभीतकधवधन्वजं । कोविदारशमीपीलुपिप्पलेंगुदगुग्गुलुं । न वकुरं न निर्गु
डी शिग्रुतिलकतिंदुकं । [illegible] । पारिभद्राम्लिका मोचा शाल्मली शणजं तथा । नाम्लं न मधुरं नोर्ध्व

शुष्कं। नसुषिरं। नशतिर्गंधि:। नपिच्छलं। नदक्षिणाशाभिमुखोद्यादुदङ्मुख: प्राङ्मुखोवा खादेत्।
अरिष्टं रेठ्ठा इतिप्रसिद्धं। धान्विनो धमाला। पीलुजालिरिति। इंगुद: मालकंगुणी। शिग्रु: सोभांज
न:। पारिभद्र: करह इतिप्रसिद्ध:। मोचाकदली। आमलिका प्रसिद्धा। ऊर्ध्वशुष्कं स्वयंशुष्कम्।
सुषिरं छिद्रयुक्तम्। हारीत:। कालेय पलाशकोविदारश्लेष्मांतक चिल्हक:। शाकहेतनिर्गुंडी
शिखंडीशिरीषमालती करवीर वदरीकरंजवेणुवर्ज्यमिति। कोविदार: श्वेतपुष्प:। श्लेष्मांतक:
प्रसिद्ध:। चिल्हू: प्रसिद्ध:। शाकहेत: सगवन:। निर्गुंडी वणा। शिखंडीमयूरशिखा। वेणुनिषेध
स्तुत्वग्विहीनपर:। तेननश्ववाक्यविरोध:। गर्ग:। कुशं काशं पलाशंच शिंशपं यस्तु भक्षयेत्।
तावद्भवति चांडालो यावद्गंगां नपश्यति। व्यास:। आसने शयने याने पादुके दंतधावने। पलाशस्य
त्यकोविदारं कर्मसुगर्हितौ। मार्कंडेय:। शाल्मलस्याश्वत्थभवानां धवकिंशुकयोरपि। कोविदार
शमीतालश्लेष्मांतकविभीतके:। वर्जयेद्दंतकाष्ठं च गुग्गुलुंकल्मकं तथा। वराहमिहिर:। अज्ञातवृक्षा
णि नदंतकाष्ठान्याद्यान्वपत्रैश्च समन्वितानि। नयुग्मपर्वाणि नपाटितानि न चोर्ध्वशुष्काणि वि
नात्वचा वा। तथापाद्म। स्वांगिगारकपालाश्मवालुकायस्चर्मभि:। दंतधावनकर्त्तारो भविष्यंति नराधमा:।

तथा । कुशकाशौ च कर्पासेरतसीवेत्रवैरणौः । दंतकाष्ठं नरः कृत्वा दहत्यासप्तमं कुलं । भक्षितं चंद्रोदये । दं
तकाष्ठं प्रकुर्वीत जिह्वोल्लेखनिकां तथा । एकेनैवोभयं कुर्वन् दुःखदारिद्र्यमाप्नुयात् । तथा । नार्द्रं नाति
कृशं । नातिस्थूलं । नापोथिताग्रमनोष्ठं ग्रंथि उदङ्मुखः प्राङ्मुखो वा दंतधावनं भक्षयेत् । आर्द्रमत्रसद्यः
छिन्नं । ततोऽन्यदनार्द्रमित्यर्थः । नातिशुष्कमित्यभिधानात् । अपोथिताग्रमीषच्चूर्णिताग्रं । अनोष्ठग्रं
थि ओष्ठसमीपे ग्रंथिरहितमित्यर्थः । दिग्विशेषे फलविशेषमाह विष्णुः । प्राङ्मुखस्य धृतिः सौख्यं
शरीरारोग्यमेव च । दक्षिणेन तथा कष्टं पश्चिमेन पराजयः । उत्तरे गवां नाशः स्त्रीणां परिजनस्य च ।
पूर्वोत्तरे तु दिग्भागे सर्वान्कामानवाप्नुयात् । पूर्वोत्तरे ईशान्यामित्यर्थः । इदं सकामपरम् । विष्णूक्त उदङ्मु
ख प्राङ्मुखाभिधानं निष्कामपरम् । एवं न पूर्वापरविरोधः । अंगिराः । पतितान्त्यजपाखंडिदेवाजीव
रजस्वलाः । भिषक्याजकिचंडालान्नप्रेक्षाद्दंतधावने । श्वानकं विड्वराहं च छत्राकं ग्रामकुक्कुटं । अन्या
न्नैवेदृशान्यश्येद्द्विजश्रेष्ठो विचक्षण इति । देवाजीवो देवलकः । अन्ये प्रसिद्धाः । द्विजा दंता इत्यर्थः ।
दंतधावनोत्तरं शौनकः । प्रक्षाल्य द्वादशांगूष्ठैर्विदध्याद्दंतधावनं । स्थित्वोंकारं च गायत्रीं निवध्नीयाच्छि
खां तत इति । आश्वलायनः । नांगुलीभिश्चमृद्भिश्च परौ लीष्टैश्च भक्षना । नायसैश्च तथा लोहैः सर्वे दंतान्
विष्णुः प्रक्षाल्य भंक्त्वा तज्जह्याच्छुचौ देशे प्रयत्नत इति ४२

२२
33

म्जेद्द्विजः। शातातपः। दंतधावनमंगुल्या प्रत्यक्षं लवणं तथा। मृत्तिकाभक्षणं वापि तुल्यं गोमांसभक्षणं।
प्रयोगपारिजाते धर्मसारे। अंगारवालुकापर्णतृणवस्त्रनखादिभिः। न कुर्याद्दंतकाष्ठं च स्त्रीकामो दूषिते दिने।
न कुर्याद्दंतकाष्ठं च तैलं च शिरसि स्थिते। अत्र कानिचित्सामान्यतो निषिद्धान्यपि कामार्थित्वेन विहितत्वात्
तत्कामनावद्भिर्ग्राह्याण्येव। यानि तु केवलं विहितप्रतिषिद्धानि तेषु नतोपशोकरोतीति वद्विकल्प इति।
वर्ज्यतिथ्यादिमाह विष्णुः। नवम्यां चैव द्वादश्यां वर्जयेद्दंतधावनं। नवम्यां भानुवारे चेति वा पाठः। श्राद्धा
हे जन्मदिवसे विवाहे सुखदुःखयोः। व्रते चैवोपवासे च वर्जयेद्दंतधावनं। व्यासोपि। श्राद्धे च यज्ञे नियमे
नाद्यात्प्रोषितभर्तृका। श्राद्धकर्तुर्नियमोयं न तु भोक्तुः कदाचन। नाद्याद्दंतकाष्ठमिति शेषः। आचार्यः।
अष्टम्यां च चतुर्दश्यां पंचदश्यां त्रिजन्मसु। व्यतीपाते च संक्रांत्यां दंतकाष्ठं न भक्षयेत्। नाद्यादजीर्णेव
मथुः श्वासकासज्वरार्दितः। पुरोदयाद्वेलवद्यान्नोदिते स्तमिते रवौ। त्रिजन्मसु। जन्मतदाद्युत्तरभेष्वि
ति केचित्। जन्मदशमैकोनविंशतिकेष्विति ज्योतिषिकाः। गोविंदार्णवे। दीक्षितो ब्रह्मचारी च यतिश्च वि
धवांगना। नित्यमद्याद्दंतकाष्ठममायां तु विवर्जयेत्। अत्र दीक्षितो मंत्रदीक्षितः। ज्योतिष्टोमादिदीक्षा
वतः स्नानादेरपि निषेधात्। व्यासः। नारीणां तु विशेषोयं भर्तरि प्रोषिते तथा। रजस्वला सूतिका च वर्जे

अलाभे दंतकाष्ठानां
निषिद्धायां तथा ति
थौ। अपां द्वादश
गंडूषैर्विदध्याद्दंत
धावनमिति ७
अत्र च गंडूषस्य दंत
काष्ठकार्यकारित्वेपि
न मंत्रादिसंबंधः। अ
वम्येन चरतीत्यग्नि
कार्यमिवाप्सु मुखस्य
शुद्ध्यर्थतो मात्रा वना
मात्। तेन वाग्यमदि
ग्नियमादिरावश्यमनाद्य
दृष्टार्थीनां परित्य [illegible]

येद्दंतधावनं । यमोपि । चतुर्दश्यष्टमीदर्शपूर्णिमासंक्रमरवेः । एषु स्त्रीतैलमांसानि दंतकाष्टं च वर्जयेत् ।
श्राद्धे जन्मदिने चैव विवाहे जीर्णदोषतः । व्रते चैवोपवासे च वर्जयेद्दंतधावनमिति । नृसिंहपुराणे । प्रति
पद्दर्शषष्ठीषु नवम्यां चैव भारत । दंतानां काष्टसंयोगो दहत्यासप्तमं कुलम् । काष्टग्रहणात्पर्णादिना दोषः । तथा
च व्यासः । प्रतिपद्दर्शषष्ठीषु नवम्यां दंतधावनं । पर्णैरन्यत्र काष्टैस्तु जिह्वोल्लेखः सदैव तु । तृणपर्णैर्म
ध्यमानामिकांगुष्ठैर्निषिद्धा हे कुर्युरिति स्मृत्यर्थसारे । स्कांदे । अभ्यंगे चोदधिस्नाने दंतधावनमैथुने । जाते
च मरणे चैव तत्कालव्यापिनी तिथिः । वसिष्ठः । शन्यर्कशुक्रवारेषु कुजे हेव्रतवासरे । जन्माहे श्राद्धदिव
से दंतकाष्टं विवर्जयेत् । यमः । मध्याह्ने त्वपरवेलायां यो मर्त्यो दंतधावनं । निराशास्तस्य गच्छंति देवताः
पितृभिः सह । अत्र नोदित इत्यनेनैव मध्याह्ननिषेधे सिद्धे पुनर्निषेधो दोषाधिक्यार्थः । मध्याह्ने त्वा
ह्नवेलायामिति वा पाठः । गोभिलः । रजस्वला सूतिका च वर्जयेद्दंतधावनं । स्मृतिमंजर्यां । रज
स्वला च तुर्येह्नि सूतिका दशमेहनि । स्नानात्पूर्वं वै धर्मो दंतनिं देष्वपि चरेदिति । गंडूषत्यागविधिः
स्मृत्यर्थसारे । चतुरष्टद्विषट्द्वाष्टगंडूषाः शुद्धिकारिणः । मूत्रे पुरीषे भुक्तांते तथैव मुखनिःसृजे । पुरतो देव
ता तिष्ठेद्दक्षिणे पितृदेवता । गंडूषं तेपरां तस्माद्वामभागे विधीयते । स्मृतिसारे गोभिलः । गुडाकतालाहिता

२४ लकेतकंचवृहद्दट: । खर्ज्जूरीनारिकेलंचसप्तैतेतृणराजका: । तृणराजसमोपेतंयः कुर्याद्दंतधावनं ।
35 नरश्चांडालयोनिःस्याद्यावद्गंगांनपश्यति । यत्तु क्वचित्खर्ज्जूरोपिप्रशस्त: सतुभिन्नजातीय: पुंस्त्वेननिर्दिष्ट: ।
तथा । कुशकाशानामिकांगुष्ठंतृणंमुख्यंकंत्वचंविना । दंतकाष्ठंनर: कृत्वातस्ययद्विहितंत्वघं । तस्यभा
गीत्वहंब्रह्मन्यदिमिथ्याभवेद्वच: । इतिनारदीयेरावलीशपथे । अत्रतृणंतृणराजं । तृणपर्वोः स
दाकुर्यादित्युक्ते: । भारते । वर्जयेद्दंतकाष्ठानिवर्ज्जनीयानिनित्यश: । भक्षयेच्छास्त्रदृष्टानिपर्वस्वपिवि
वर्जयेत् । स्मृत्यंतरे । अविद्वान्स्नानकालेतु य: कुर्याद्दंतधावनं । पापीयान्रौरवंयातिपितृशापहतोध्रु
वं । मध्याह्नस्नानकालविषयमेतत् । मध्याह्नस्नानवेलायांभक्षयेद्दंतधावनं । निराशास्तस्यगच्छंतिपितृ
भि: सहदेवता: इतियमोक्ते: । तथा । उपवासेतथाश्राद्धे नखादेद्दंतधावनं । दंतानांकाष्ठसंयोगोदहत्यास
प्तमंकुलं । उपवासइतिअकृतपारणस्यदंतकाष्ठनिषेध: । पारणेनोपवाससमाप्ते: । अयंनिषेध: उ
पवासकर्तृविषयोनतुतिथिविषय: । उपवासश्राद्धपुरस्कारेणोक्तत्वात् । एकादश्यांव्रतस्थस्यश्रा
द्धेकुर्यान्नतत्क्वचिदिति कात्यायनोक्ते: । केचित्तु । उपवासेतथाश्राद्धे इतिप्रारब्धेसतितद्दिनपरत्वेन
व्याचक्षते । तेनघटिकाचतुष्टयावशिष्टायांपूर्वरात्रौदंतधावनंकर्तव्यमितिमन्यंते । व्यास: । अश्वत्थं

मनुः। मैत्रं प्रसाधनं स्नानं दंतधावनमंजनं। पूर्वाह्ण एव कुर्वीत देवतानां च पूजनं। पूर्वाह्ण एवेति पुरीषोत्सर्गे सति संभवे नियमः। केशप्रसाधने चोत्सवादिनिमित्ताभावे। दंतधावने भोजनोत्तरविहिते तरे। अंजने भेषजेतरे। सौवीरांजनादौ। स्नाने देवपूजने च मध्याह्नादिविहितेतरे। विष्णुपुराणेपि। स्नातस्तततः कुर्यात्सुमान्केशप्रसाधनं। आदर्शांजनमांगल्यदूर्वाद्यालंभनानि चेति ८५

प्रातरुत्थाय मनुष्यो दंतधावनं। आद्दे पक्षे च नियमान्नाद्यात्प्रोषितृर्तका। नाद्यादजीर्णवमथुः श्वासकासज्वरार्दितः। तृष्णास्यपाकहृन्नेत्रशिरःकर्णामयी च तत्। अथ दंतधावनानुकल्पः। प्रतिपद्दर्शषष्ठीषु नवम्यां दंतधावने। पत्रैरन्यत्र काष्ठैश्च जिह्वोल्लेखः सदैव हि। काष्ठैः प्रतिपदादौ यन्निषिद्धं दंतधावनं तृणपर्णैः सदा कुर्यादमामेकादशीं विना इति मिताक्षरायां। पत्रैर्विहितवृक्षपत्रैः॥ इति दंतधावनम्॥

अथ केशप्रसाधनम्॥ तदुक्तं मदनपारिजाते। स्नातकश्च ततः कुर्यात्सुमान्केशप्रसाधनं। स्नातकग्रहणं ब्रह्मचारिवनस्थयतयः। पुंग्रहणात्स्त्रीणां तद्दिनापि प्रातःस्नानाधिकारः। केशप्रसाधनं नाम कंकतिकया मार्जनम्॥ इति केशप्रसाधनम्॥ ॥अथ शिखाबंधनम्॥ ॥तत्र व्यासः। सत्त्वोंकारं गायत्रीं निबध्नीयाच्छिखां बुधः। पुनराचम्य हृदयं बाहुस्कंधौ च संस्पृशेत्। पुनराचम्येति शिखाबंधात्पूर्वमपि सकृदाचमेदित्यर्थः। कर्मुमिः। शिखिवच्छिखया भाव्यं ब्रह्मावर्तनिबद्धया। प्रदक्षिणं द्विरावर्त्य पाशं ततः संप्रवेशनात्। प्रथमं द्विगुणीकृत्य ब्रह्मावर्तमितीरितं। गायत्रीं प्रजपन्कुर्याच्छिखायाश्च निबंधनं। यत्तु चतुर्विंशतिमते। मानस्तोके इति मंत्रेण शिखाबंधनमाचरेत्। जप एव हि विप्राणां रक्षाकर्म विवर्जनात्। तज्जप एवेति विशेषे एवकारोपादानात्। मंत्रपुरश्चरणे कृते देवभीतिवारणाय क्रियमाणशि

२५ खावेधनपरं । शाखांतरविषयं वा । शिखाभावे कुशत्रयनिर्मितब्रह्मग्रंथिं कर्णोपरि धारयेत् । तदुक्तं का
35 ठकगृह्ये । अथ चेत्प्रमादान्नश्येच्छिखा स्यात्तदा कौशीं शिखां ब्रह्मग्रंथ्यान्वितां दक्षिणकर्णोपरि सर्वदा शिखा
बंधादधः क्षिप्त्वैदिति । हारीतः । शिखां छिंदंति ये केचिद्वैराग्यात्तोऽपि वा । पुनः संस्कारमर्हंति त्रयो व
र्णा द्विजातयः । अथ यज्ञोपवीतविधिः ॥ तत्र भागुरिः ॥ कार्पासं तु समादाय शुचिदेशे विशोधितम् ।
जीवद्भर्तृकया नार्या ब्राह्मण्या सूत्रकारितं । तावत्त्रिगुणितं सूत्रं कुर्याद्दुष्टप्रमाणतः । सूत्रं सरोमकं
चेत्स्यात्ततः कृत्वा विरोमकं । सावित्र्या दशकृत्वोऽद्भिर्मंत्रिताभिस्तु पुक्षयेत् । मनुः । कार्पासमुपवीतं
स्यात्तत्रैको ग्रंथिरिष्यते । सावित्र्या तत्त्रिवृत्कुर्यात्त्रवसूत्रं तु यज्ञवेत् । ग्रंथिस्त्रिभिः । प्रवरानुसारेण ।
प्रवराग्रंथिभेदश्च सूत्रमेखलयोस्तथा इति याज्ञवल्क्योक्तेः । देवलः । शुचिसूत्रं शुचौ देशे संहतां
गुलिमूलके । आवेष्ट्य षण्णवत्या तं त्रिगुणीकृत्य यत्नतः । अवलिंगकैः सूक्तिभिः सम्यक् प्रक्षाल्योर्ध्वं वृत
तं त्रिवृत् । अप्रदक्षिणमावर्त्य सावित्र्या त्रिगुणीकृतं । ततः प्रदक्षिणावर्तं समं स्यान्नवसूत्रकं । त्रिरा
वेष्ट्य दृढं बद्धा ब्रह्मविष्ण्वीश्वरान्नमेत् । तत्करणप्रकारमाह मनुः । त्रिवृदूर्ध्ववृतं कुर्यात्तंतुत्रयमधो
वृतं । त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते । अधोवृतं तंतुत्रयं वामावर्तेन वलितं त्रिगुणीकृतं सूत्रं

त्रिवृत । पुनस्त्रिगुणीकृतमूर्द्ध्ववृतं कार्यं तल्लक्षणं । करेणादक्षिणेनोर्ध्वगतेन त्रिगुणीकृतं । वलितं
मानवे सूत्रं शास्त्रऊर्ध्ववृतं स्मृतं । देवलः । यज्ञोपवीतं कुर्वीत सूत्रेण नवतंतुकं । एकेन ग्रंथिना तंतु
र्द्विगुणस्त्रिगुणोथवा । सूत्रेणेत्यादिवदत्रापि सूत्रमय एवोपवीतशब्दशक्तिर्मुख्या । वस्त्रकुशरज्ज्वादौ
तु गौणः प्रयोगः । अन्यथानुगतैकरूपाभावादनेकशक्तिकल्पनापत्तिरिति दर्शितं । द्विगुणोथवे
ति । सतिसंभवे तावत्तंतुस्त्रिगुणः त्रिगुणः कर्तव्यः । असंभवे तु द्विगुण एव द्विगुणः एवं षट्तंतुकत्वं
भवति । अन्ये तु द्वितंतुकं त्रितंतुकं चाचक्षते । तदप्यसंभव एव । अत्र वर्णव्यवस्थयाप्यसूत्रमाह मनुः ।
कार्पासमुपवीतं स्याद्विप्रस्योर्द्ध्ववृतं त्रिवृत् । शाणसूत्रमयं राज्ञो वैश्यस्याविकसूत्रजं । इदं युगांतरवि
षयं असंभवविषयं वा । यथाह पारिजाते । कृते पद्ममयं सूत्रं त्रेतायां कानकं स्मृतं । द्वापरे राजतं सू
त्रं कलौ कार्पासमुच्यते । देवलः । कार्पासक्षौमगोवालशणवल्कतृणोद्भवं । सदासंभवतो धार्यमु
पवीतं द्विजातिभिः । गोभिलः । यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वा अपि कुशरज्जुमेव वेति । अत्र यज्ञोप
वीतार्थत्वेन सूत्रादि विधीयते । तत्र च स्वर्दं घटं करोतीतिवदिकार्यकर्म । तथा च यज्ञोपवीतस्यानिर्देशा
त् । सूत्रादेः करणत्वावगमात् । सूत्रेणेत्यर्थो लभ्यते । तत्स्थाने विहितत्वाच्च कुशरज्ज्वादेस्तद्धर्मता

पत्तेः। नचैवं वस्त्रस्यापि तदापत्तिः। उपवीतशब्दस्य तंतुमय एव शक्तत्वात्। तेन सूत्रश्रुतिनिधीनां तु
कुशरज्जुगोवालादीनां त्रिवृत्त्वादि प्राप्तिरस्त्येव। त्रिवृत्त्वादेः सूत्रधर्मत्वाभिधानात्। न वस्त्रस्येति दिक्।
यत्तु निगमपरिशिष्टे। वाससा यज्ञोपवीतानि कुरुते। तदभावे तथता सूत्रेण कुशमुंजवालत्वक्कुशाणा
रज्जुभिर्वेति। वस्त्रानुकल्पत्वमुपवीतस्य समर्थ्यते। न तु त्रिगुणत्वादि सूत्रधर्मो वेति न विरोधः।
अथास्य नवसूत्रस्य वक्ष्यंते नव देवताः। ओंकार अग्निर्नागोच सोमः पितृप्रजापतिः। वायुसूर्य
सर्वदेवा इत्याहुस्तंतुदेवताः। तत्परिमाणमाह छंदोगपरिशिष्टः। पृष्ठवंशेच नाभ्यांच धृतं यद्विंद
ते कटिं। तद्धार्यमुपवीतं स्यान्नातिलंबं नचोच्छ्रितं। [illegible] इति वाजसनेयिपरम्। स्तनादूर्ध्वम
धोनाभेर्न धार्यं हि कथंचन। स्तनादूर्ध्वं श्रियं हंति नाभ्यधस्तात्तपःक्षयः इति तैत्तरीयपतिबोधा
यनसंवादात्॥ यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि। तृतीयमुपवीतं वा वस्त्राभावे तदिष्यते।
आयुःकामैः सदा धार्यं बहु यज्ञोपवीतकं। पंचभिः पुत्रकामी स्यादिति शास्त्रविनिश्चयः। तथा। उप
वीतं वटोरेकं द्वे तथेतरयोः स्मृते। एकमेव यतीनां च इति शास्त्रविनिश्चयः। वटुरत्राकृतसमावर्त्त
नः। यथाह देवलः। ब्रह्मचारिण एकं तु स्नातानां त्रयमिति तद्द्वयं। एकयज्ञोपवीतेन जपहोमादिकं कृतं।

तत्सर्वंराक्षसैर्नीतंपितॄणांनोपतिष्ठति। इदंगृह्यपरम्। मंत्रपूतंधृतंकार्यंयस्माद्यज्ञोपवीतकम्।
नोत्तारयेत्ततःप्रायोयदिच्छेच्छ्रेयआत्मनः। सकृदुत्तारणात्तस्यप्रायश्चित्तीभवेन्नरः। अत्रापवादः।
तैत्तिरीयाःकठाःकाण्वाश्चरकावाजसनेयिकाः। कंठादुत्तार्यसूत्रंतुकुर्युर्वैक्षालनंद्विजाः। बह्वृचाःसाम
गाश्चैवयेचान्येयजुःशाखिनः। कंठादुत्तार्यसूत्रंतुकुर्युर्नक्षालनंद्विजाः। अत्रविशेषमाह। अभ्यंग
चोदधिस्नानेमातापित्रोर्गुरोर्मृतौ। कंठादुत्तार्यसूत्रंतुकुर्याद्वैक्षालनंद्विजः। दिवोदासीये। मलापक
र्षणेस्नानेतैलाभ्यंगेतर्पणेऽपिच। ब्रह्मसूत्रंशिरःकुर्यादन्यत्रपतितोभवेदिति। इदंशाखांतरपरम्। यद्वापृ
थक्करणंकंठादुत्तार्यमलकार्येधारणं। तथा। उपवीतमलंकारंस्रजंकरकमेवच। उपानहौतथावा
सोधृतमन्यैर्नधारयेत्। मनुः। मेखलामजिनंदंडमुपवीतंकमंडलुं। अप्सुप्रास्यविनष्टानिगृहीत्वा
न्यानिमंत्रतः। पतितंत्रुटितंवापिब्रह्मसूत्रंयदाभवेत्। नूतनंधारयेद्विप्रःस्नानसंकल्पपूर्वकम्।
यज्ञोपवीतमेकैकंप्रतिमंत्रेणशोधयेत्। गोभिलः। दक्षिणंकरमुद्धृत्यवामस्कंधेनिवेशयेदिति। वारु २८
अथवर्ज्यमाह। त्रिच्छिन्नमधोयातंभुक्त्वानिर्गतमुत्सृजेत्। तथा। विधवारचितंसूत्रमनध्या
यकृतंतथा। कृतेचाशुचिनायच्चभुक्त्वानिर्गतमुत्सृजेदिति। मासद्वयानंतरंनवीनंधारयेदितिशिष्टाः।

२८ यज्ञोपवीतधारणं नित्यमित्याह कात्यायनः। सदोपवीतिना भाव्यं सदा बद्धशिखेन च। विशिखी व्युप
37 वीती च यत्करोति न तत्कृतं। सदेत्यनेन शिखाबंधनोपवीतधारणयोः पुरुषार्थतोक्तात्। ततश्चा
धारणे प्रत्यवायः। पुरुषार्थतया सदा धारणात्कर्मकालेपि धारणोपपत्तेः। ननु किं कर्मांगता नास्त्ये
वेत्यत उक्तं। विशेषेणैतत्कृतं विगुणत्वेन फलसाधकमित्यर्थः। केवलपुरुषार्थत्वेपि कार्यकाले दै
वाद् धारणे कर्मवैगुण्यमेव स्यात्। पुरुषः परं प्रत्यवायी स्यात्। नन्वेवमिति कर्मांगतोपदेशप्रयोजनं।
एवं च क्रतुपुरुषोभयार्थत्वमुभयोरुक्तम्। दक्षः। उदयास्तमयं यावन्न विप्रः क्षणिको भवेत्। नित्यनैमि
त्तिके युक्तः काम्यैः कल्पैर्विगर्हितैः। क्षणिकः शास्त्रानुमतदेशकालोचितव्यापाररहितः स्यात्। परा
शरः। विना यज्ञोपवीतेन ब्राह्मणो यदि तिष्ठति। भोजने मैथुने चैव तथा मूत्रपुरीषयोः। त्रिरात्रोपोषितो
विप्रः पादकृच्छ्रेण भूमिपः। अहोरात्रोषितो वैश्यः शुद्धिरेषा पुरातनी॥ ॥इति यज्ञोपवीतविधिः॥ ॥
॥अथ कुशाहरणविधिः॥ ॥ तत्र स्नानजपहोमादेर्दर्भपाणिना कर्तव्यत्वोपदेशादादौ दर्भविधिरुच्यते।
तत्र व्यासः। कुशैः पूतं भवेत्स्नानं कुशेनोपस्पृशेद्द्विजः। कुशेन चोद्धृतं तोयं सोमपानेन संमितम्। हारीतो
पि। अछिन्नाग्रान्सपत्रांश्च समूलान्कोमलान्शुभान्। पितृदेवजपार्थं तु समारध्यात्कुशान्द्विजः। कुशहस्ते
न्ः

नयज्ञंदानंचैवकुशैःसह।कुशहस्तस्तुयोभुंक्तेतस्यसंख्यानविद्यतेइति।पुराणेपि।कुशपूतंभवेत्स्ना
नंकुशेनोपस्पृशेद्द्विजः।कुशेनचाहृतंतोयंसोमपानेनसम्मितमिति।पवित्रधारणेफलमाहमार्कंडेयः।
कुशपाणिःसदातिष्ठेद्ब्राह्मणोदंभवर्जितः।सनित्यंहंतिपापानितूलराशिमिवानलइति।शातातपः।
जपेहोमेचदानेचस्वाध्यायेपितृतर्पणे।अशून्यंतुकरंकुर्यात्सुवर्णरजतैःकुशैरिति।पवित्रप्रकार
माहकात्यायनः।अनंतर्गर्भिणंसाग्रंकौशंद्विदलमेवच।प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचित्।
मार्कंडेयोपि।चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्यपवित्रकं।एकैकन्यूनमुद्दिष्टंवर्णेवर्णेयथाक्रमं।त्रिभिर्द
र्भैःशांतिकर्मपंचभिःपौष्टिकंतथा।चतुर्भिश्चाभिचारंच्चकुर्वन्कुर्यात्पवित्रकमिति।अत्रिः।ब्रह्मय
ज्ञेजपेचैवब्रह्मग्रंथिर्विधीयते।भोजनेवर्तुलःप्रोक्तएवंधर्मोनहीयतइति।स्मृतिसारेपि।सपवित्रेण
हस्तेनकुर्यादाचमनक्रियां।नोच्छिष्टंतत्पवित्रंस्याद्भुक्तोच्छिष्टंतुवर्जयेदिति।समौद्वौदैर्घ्येस्योल्पाभ्यांस
मौप्रादेशसम्मितौ।पवितेग्रंथितेज्ञेयेदैवेकर्मणिचोदिते।साग्राणि।त्रीणिप्रादेशसम्मितानिसमानिच।
नैकमूलान्यवक्राणिपवित्राणीहपैतृके।हेम्नारौप्येणताम्रेणमिश्रेणैकेनवासदा।पवित्रंधारयेद्धीमां
स्तत्तत्कर्मफलाप्तयेइति।अत्रविशेषमाहहारीतः।सव्यापसव्यौकुर्वीतसपवित्रौकरौबुधः।ग्रंथिर्यस्य

गोवालपवित्रंप्रकृत्याह कौशिकः। गवांवालपवित्रेण धार्यमाणो न नित्यशः। नस्पृशंतीह पापानि श्रीश्च गोत्रे च तिष्ठति। गवांवालपवित्रेण यद्युपास्तिं करोति यः। पंचाग्नयो हुतास्तेन यावज्जीवं न संशयः। गवांवालपवित्रेण संध्योपास्तिं करोति यः। सर्वे द्वादशवर्षाणि कृतसंध्यो भवेन्नरः इति ४९

२८ पवित्रस्य न तेनाचमनं चरेत्। कौशेयं विभृयान्नित्यं पवित्रं दक्षिणे करे। भुंजानस्तु विशेषेण गर्हितान्नस्य

३८ शोधनं। दोर्दंडे दक्षिणे हस्ते सव्ये त्रीण्यासने स्मृतं। एकैकमित्यर्थः। अपरार्के। काशहस्तस्तु नाचा

मेद्दूर्वाहस्तस्तथैव च। कौशिकः। पवित्रस्य तु नाशौचं आचांते तु कदाचन। पितृणां तर्पणे त्याज्यस्तु

च्चारे मूत्रजने तथा। शंखः। ग्रंथिर्यस्य पवित्रस्य न तेनाचमनं चरेत्। आचामेद्यस्तु मोहेन यथा भोक्ता

तथैव सः। तेन भोजनकालेपि ग्रंथिर्निषिद्ध इति गम्यते। अयं सग्रंथिकपवित्रस्य निषेधो लक्षणवच

नलक्षितग्रंथिविषयः। विधानं तु वर्तुलग्रंथिविषयं। भोजने वर्तुलः प्रोक्तः इत्यादिवचनात्। कुशा

भावे तथा काशा दूर्वा व्रीहियवानपि। तदभावे तु नीवारान् श्यामाकान् विनियोजयेत्। ग्रंथिलक्षणमा

हाश्वलायनः। साग्राभ्यामृजुदूर्वाभ्यां प्रादक्षिण्येन मध्यतः। मूलाग्रावुद्धृतौ त्वाके कुर्यात् ग्रंथिं च मंत्र

वित्। तारेण कुर्यात्तद्ग्रंथिं पवित्रस्य द्विजोत्तमः। ग्रंथिरेकांगुलस्तस्य तदूर्ध्वं द्व्यंगुलो मतः। सपवित्रेण

हस्तेन भुंजीयादाचमेत्पिबेत्। जपे दर्भे हुने ध्यायेद्ब्राह्मणस्तु विशेषतः। ग्रंथितेन पवित्रेण न भुंजी

यान्न चाचमेत्। न पिबेदपि कुर्यात्तु तत्तदाशौण्णितं भवेत्। तस्माद्ग्रंथिकेनांबु पिबेद्भुंजीत चाचमेत्।

अग्रंथिकेन उक्तलक्षणग्रंथिरहितेनेत्यर्थः। यमोपि। कुशाः काशास्तथा दूर्वा यवा व्रीहय एव च।

कुशानुकल्पः मदनपारिजाते। कुशाः काशाश्च सग्रंथो यवा दूर्वा थ जांगलाः। तदभावे तु नीवारान् श्यामाकांश्चापि योजयेत्

दिवोदासीये। गोमार्गे रजकक्षेत्रे नीलीक्षेत्रे समुद्भवाः। आह्वानर्हाः कुशाः प्रोक्ता स्थिता कार्पासक्षेत्रजाः। तथा। चितिदर्भाश्च ये मार्गे स्वाध्याये पितृतर्पणे। स्तरणासनपिंडेषु
नग्राह्याः सप्त वै कुशाः। चितिरग्निचयनस्थानं। तथा। नीवीमध्ये स्थिता दर्भा ब्रह्मसूत्रे च ये धृताः। पवित्रांस्तान्विजानीयाद्यथाकायस्तथाकुशाः। इक्षुक्षेत्रे यवक्षेत्रे उपक्षेत्रे वेत
ये च च। अच्छिन्नाग्राश्च शुष्काग्राः हस्ताश्चैव प्रमाणतः। कृतपा इति विज्ञेयुः पितृश्राद्धं समाचरेदिति। कुशारत्निन्यूनपरिमाणाः। गोकर्णमात्रा वा। हस्ता वा प्रचरणीयाः स्युरिति वचनात्

गोकर्णः प्रादेशः। गोकर्णमात्र हरिता अशुष्काः समूलका इति वायवीये। प्रचरणशब्देनानुष्ठानं तद्योग्या इत्यर्थः। अत्र हरिता इति वर्णास्या ८८। १८

वल्वजाः पुंडरीकाश्च निस्तृणा धा बर्हिरुच्यते। तत्र वर्ज्यानाह हारीतः। चितौ दर्भाः पथि दर्भा ये दर्भा यज्ञभूमिषु।
स्तरणासनपिंडेषु षट् कुशान्परिवर्जयेत्। ब्रह्मयज्ञेषु ये दर्भा ये दर्भाः पितृतर्पणे। हता मूत्रपुरीषाभ्यां तेषां
त्यागो विधीयते। प्रावृता गर्भिता दर्भा ये च छिन्ना नखैः स्मृताः। क्वथिता नग्निदग्धाश्च कुशान्यत्नेन वर्जयेदिति॥ आचारसंग्रहोदये। दर्भाः पिंडेषु निर्माल्याः स्थितायां च हुताशनः। मंत्राः शूद्रेषु निर्माल्या ब्राह्मणाः प्रे
तभोजने। प्रेतभोजने शवहस्तभोजने। नवश्राद्धान्नभोजने चांद्रायणादि प्रायश्चित्तोपदेशात्। तथा। पिंडा
र्थं ये स्तृता दर्भा यैः कृतं पितृतर्पणं। मूत्रोच्छिष्टे हताये च तेषां त्यागो विधीयते। कुशोत्पाटनकालनियममा
ह हारीतः॥ ॥मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः। अयातयामास्ते दर्भा नियोज्याः स्युः पुनः पुनरिति।
एतच्च प्रतिदिनाशक्तौ वेदितव्यम्। नभसीति चांद्रमासाभिप्रायेण। पुनः पुनरिति वीप्सा। तेनैकेन दर्भेणानेका
नि कर्माणि कार्याणीत्यर्थः। तथा गोविंदार्णवे। नभस्यैकादशीभूतकृष्णास्वात्मसमुद्धृताः। वर्षयोग्याः कु
शास्ते तु मासमात्रमतोन्यथा। अन्यथा अन्यायाममावास्यायां गृहीता मासमात्रमेवोपयुज्यंते। नोर्ध्वमित्यर्थः।
तेन दिनद्वितीयभागोत्पाटितस्य तद्दिन एवोपयोगः। भाद्रामावास्योत्पाटितस्य सर्वदा विनियोग इति भावः।
तथा। दर्भाः कृष्णाजिनं मंत्रा ब्राह्मणा हविरग्नयः। नैते निर्माल्यतां यांति क्रियमाणाः पुनः पुनः। [illegible] तृ ५

तथा च स्मृतिर्चितामारेगे। मासि मास्याहृता दर्भास्तन्मासे च चोदिता इति २४

35

२९

सकृल्लूनैरितिपाठेतु
सकृदित्यनेनप्रथमकु
शग्रहणेमंत्रपाठःन
पुनःपुनरिति २=

गोभिलः। कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः। कुशाग्रे शंकरं विद्यात्त्रयो देवा व्यवस्थिता इति। कुशग्र
हणविधौ कौशिकमार्कंडेयबृहस्पतयः। शुचौ देशे शुचिर्भूत्वा स्थित्वा पूर्वोत्तरामुखः। ओंकारेणैव मंत्रेण कु
शाः स्पृश्या द्विजोत्तमैरिति। उत्पाटनमंत्रस्तु हुंफडिति स्पृष्ट्वोत्पाट्य गृह्णीयात्। पौराणिकमंत्रस्तु। विरिंचिना
सहोत्पन्न परमेष्ठिनिसर्गज। नुद पापानि सर्वाणि दर्भ स्वस्तिकरो भवेति। वर्णभेदेन विनियोगमाह कात्यायनः।
हरिता यज्ञिया दर्भाः पीतकाः पाकयज्ञियाः। समूलाः पितृदैवत्याः कल्माषा वैश्वदेविका इति। कुशाभावे शंखः।
कुशाभावे द्विजश्रेष्ठ काशैः कुर्वीत तत्त्वतः। तर्पणादीनि कर्माणि काशाः कुशसमाः स्मृता इति। विष्णुः। सर्व
पत्राः शुभा दर्भास्तिलस्तेत्रसमुद्भवाः। रत्निमात्रा नियोक्तव्या दैवे पित्र्ये च कर्मणि। वृद्धमुष्टिकरो रत्निरिति।
विष्णुः। एकशाखो द्विशाखश्च तृणसंज्ञोच्यते बुधैः। त्रिशाखश्च भवेद्दर्भश्चतुःशाखः कुशः स्मृतः। पंचशाखः
कुषः प्रोक्तः षट्शाखः प्रवरः स्मृतः। सप्तशाखस्तु कुतुपो ह्यष्टशाखस्तु रोहिणः। अत ऊर्ध्वं वेदविद्भिर्बर्हि
स्तु परिकीर्तितं। अनंतगर्भिणः साग्रान् श्राद्धे दर्भांस्तु योजयेत्। उपमूलसकृल्लूनान्पिंडार्थं स्तरणाय वेर
ति। तथा। संध्यातर्पणकाले च श्राद्धे नित्ये च कर्मणि। गर्भहीनास्तु ये दर्भाः प्रशस्ताः पितृकर्मणि। होमे चाभ्युद
ये चैव शुभे चैव तु कर्मणि। गर्भयुक्तास्तु ये दर्भाः पुत्रपौत्रविवर्धनाः। हारीतः। स्वाभूते ददि दक्षिणां दिशं गत्वा ददि

स्मृत्यर्थसारे। आच्छिद्रा
ग्रान्त्रपर्णान्समूलान्
कोमलांच्छुभान्। पि
तृदेवजपार्थं तु समाद
द्यात्कुशान्द्विजः। ६

णं पूर्णतान्समस्तान्दर्भानाहरेत्। श्वोभूते श्राद्धदिने इत्यर्थः। कुशाहरणे विशेषमाह हारीतः। समित्पुष्पकुशा कुशांबूनि॰ बापा॰ १८
दीन्श्रोत्रियः स्वयमाहरेत्। शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन्पतत्यधः। श्रोत्रियोऽत्र ब्राह्मणस्तेन क्षत्रियादीना
मन्यकर्तृकाहरणमनुज्ञातं भवति। न च स्वयमेवाहरेदित्यनेनैव शूद्रनिषेधे पुनर्निषेधो व्यर्थ इति वाच्यम्। य
जमाने कर्मव्यग्रे पुत्रशिष्यादिद्वारा कुशाद्याहरणप्रापणार्थत्वात्। तथा। न दर्भानुद्धरेच्छूद्रो न पिबेत्कपि
लापयः। मध्यपत्रे न भुंजीत ब्रह्महत्यास्य भूपते। शूद्राहृतेऽपवादमाह। कुशपुष्पाणि समिध औषधं तु विशे
नपि ६— षतः। निषिद्धादपि गृह्णीयादमावास्याहनि द्विजः। वाचस्पतीयवर्षकृत्ये। कुशाः काशाश्च पुष्पं च गव्यार्थे वेतृणा
नि च। इंदुक्षये न दुष्यंति छेदनं समिधां तथा। दिवोदासे। वनस्पतिगते सोमे यस्तु हिंस्याद्वनस्पतिं। पत्रे पत्रे भ
वेत्तस्य स्पर्शो महापातकं। अमावास्यां न हिंस्यात्तु कुशांश्च समिधस्तथा। सर्वत्रावस्थिते सोमे हिंसायां ब्रह्महा भवेत्।
चंद्रक्षये तु यः कुर्यान्नरस्तृणनिकृंतनं। पत्रसंख्या तस्य भवंति ब्रह्महत्यकाः। स चंद्रो यस्मिन्मुहूर्ते वनस्पति
गतं स्यात्तदा न छिंद्यादिति न विरोधः। अवस्थानकालविशेषश्चोक्तः सोपर्णे। त्रिमुहूर्तं जले वसेत्। त्रिमुहू
र्तं वसेद्गोषु त्रिमुहूर्तं वनस्पतौ। वनस्पतिगते सोमे यस्तु हिंस्याद्वनस्पतिं। घोरायां भ्रूणहत्यायां युज्यते नात्र संश
यः। वनस्पतिकुशाद्यपेक्षकं। नात्र विरोधाशंकाः। निषेधस्तु विशेषप्राप्तं चंद्राधारमुहूर्तत्रयविषयः।

गायत्र्यक्षराणि चतुर्विंशतिः। अनुष्टुभो द्वात्रिंशत्। त्रिष्टुभश्चतुश्चत्वारिंशत्।
शलाकां कारयित्वा दीनाभिः स्रजेदंगुलीयकं ॥ ९

४० विधिस्तदितरमुहूर्तविषयः। एतन्मात्रापवादेपि वचनानां चरितार्थत्वात्। एतेन मुहूर्तत्रितयमात्रावच्छिन्नाया
मेवामायां वनस्पतिगत इति गारुडवचनानुरोधादमानिषेधस्योपसंहारादितरत्र तद्विधेरवकाशलाभात्। सर्व
4८ पवित्रेभ्यः स्वर्णपवित्रं श्रेष्ठमाह हेमाद्रौ। अन्यान्यपि पवित्राणि कुशदूर्वामयानि च। हेमात्मकपवित्रस्य कलां ना
र्हति षोडशीमिति। आश्वलायनोपि। हैमेन सर्वदा सर्वं कुर्याद्देवाविचारयन्। सौवर्णे दक्षप्रदेशिन्यां बिभृया
द्रौप्तितो द्विजः। दक्षानामिकया विप्रो बिभृयाद्ध्रिसंयुतं। अग्रंथिकं वापि हैमं तथा लोहत्रयोद्भवं। गा
यत्र्यक्षरसंख्यातं गृह्णीयात्ताम्रमुत्तमं। अनुष्टुभस्तथा रौप्यं त्रिष्टुभः कनकोत्तमं। अयं भावः। समानपरि
मितधातुत्रयेण तिस्रः शलाकाः कार्याः। चतुर्विंशतिगुंजादिमानमिति ताम्रशलाका। द्वात्रिंशन्मिता
रजतशलाका। चतुश्चत्वारिंशन्मिता स्वर्णशलाका च कार्या। एवं तिसृभिः शलाकाभिः त्रिवृदंगुलीय
कं कारयित्वोक्तफलसिद्ध्यर्थं धारयेत्। तत्फलं प्रोक्तं तेनैव। एवं लोहत्रयेणैव कृतं रत्नोत्तममुत्तमं। पाप
घ्नं च पवित्रं स्याद्रत्नाकरमनुत्तमं। आयुष्करमनाधृष्यं शुभदं रोगनाशनं। अर्द्धे धार्यं दिवा रात्रं त्रयं
सममथापि वेति। पादस्पृष्टं पवित्रं तु वर्जयेत्तृणसंभवं। विप्राणां चरणस्पृष्टं पादप्रक्षालनेन यत्। तत्प
वित्रं तृणमयमपि शस्तं न दुष्यति। त्यजेत्प्रारब्धकर्मान्ते विसृजेत्सापसव्यानले। तस्मिञ्जीर्णे द्विपेत्तोये वह्नौ
जपेद्दामप्रदेशिन्यां धृत्वा यस्तु पवित्रकं। उच्चारणादिसंसिद्धौ नरः पतन्ति द्विजोत्तमः ॥ २

त्रितं । जलं विधाय कुर्वीत यो ह्यशक्तो भवेद्द्विजः । नाप्सु द्रुत जलस्थाने देवर्षिपितृतर्पणं । अघमर्षणमात्रं
तु पठन्नंबु विनिर्दिशेत् । स्नानं मूर्ध्नि तथा कुर्यान्नित्यकर्मविधानतः । अस्याप्यशक्तो कर्तव्यं मंत्रस्नानं दिने
दिने । संध्योपासनकर्मादावधिकारस्य सिद्धये । आर्द्रवस्त्रेण संमृज्य सर्वगात्रमथं मलं । शुष्कवस्त्रं परित्य
ज्यान्यद्धौतं च धारयन् । आचम्य जलमादाय पात्रे वामकरेथवा । गायत्र्या वाथ मूलेन त्रिवारमभिमंत्रयेत् ।
तज्जलं प्रोक्षयेद्गात्रे दर्भैर्वा तुलसीदलैः । तर्जनीमध्यमाभ्यां वा अर्चेनाद्देवते न वै । भूमौ शिरसि चाकाशे
आकाशे भुवि मस्तके । मस्तके च तथाकाशे भूमौ च नव धा क्षिपेत् । अब्दैवतः स्मृतो मंत्र आपो हि ष्ठेति वै ऋचा ।
त्रिरावृत्या क्षिपेत्तोयं प्रत्यर्चं नवधा द्विजः । आकाशं हृदयं प्रोक्तं भूमिं पादाविति स्मृता । तत आचम्य विधिव
त्कुर्यात्संध्यादिकर्म च । यदा तत्राप्यशक्तोपि वृद्धो वाप्यथवातुरः । शयनोपि प्रकुर्वीत ध्यानस्नानमतंद्रितः ।
उद्यदादित्यसंकाशं पीतनिर्मलवाससं । सर्वावयवसंयुक्तं सर्वाभरणभूषितं । सर्वलक्षणसंयुक्तं सन्मंत्रिंसिष्ट
दैवतं । मस्तकोपरि तां ध्यायेत्तत्पादाभ्यां विनिःसृतां । ब्रह्मणा क्षाल्यमानाभ्यां गंगां त्रिपथगामिनीं । धृतां
शिवेन शिरसा ततो विनिःसृतां वहिः । निपतंतीं स्वके मूर्ध्नि क्षालयंतीं मुहुर्मुहुः । सर्वांगानि ततः सम्यगाचम्य पा २८
शुचितां व्रजेत् । स्नानो हि विधिवच्छक्तो वारुणेन जलेन वा । मंत्रस्नानं तथा ध्यानस्नानं कुर्वीत नित्यदा । अधि
कौस्तुभोद्भासितोरस्कं रक्ताम्भोजपदद्वयं । रत्नानुविद्धरसनं त्रिवलीललितोदरं । गूढोरस्कं रथस्कंधं कंबुग्रीवं चतुर्भुजं । शंखचक्रगदापद्मधारिणं तरुणं सदा । शीतांशुकोटिवदनं विं
बोष्ठस्मिताननं । स्वनासिकं स्फुरत्त्विमकराकृतिकुंडलं । अष्टमीचंद्रललितललाटस्फुकपोलकं । विमृष्टेंदीवरास्यच नीलकुंचितमूर्धजं । द्युमत्किरीटकटकनूपुरांगदमुद्रिकं । श्री
वत्सवक्षसं ध्यायेन्मनसा सुस्थिरेण तु । यं कांचिद्दथवाध्यायन्मन्मंत्रिंसिष्टदैवतं ॥४

हिंगुं मुक्तं प्रमंगोलनिशं वैकेतुगं मतुं । प्राच्यारत्नानि खेटानां मध्ये माणिक्यमुत्तमं गोः । अत्र हिंगुमित्याद्यदर
द्वंद्वानि हीरकमुक्तादिग्रहप्रतिपादकानि । प्राच्याः प्राचीमारभ्य ग्रहाः खेटाः । उत्तमं सूरविः । मानसोल्लासे ।
अर्केंदुरक्तास्तगुरुस्मगुमंदाहिकेतवः । माणिक्यं मौक्तिकं चारु विद्रुमं गारुडं पुनः । पुष्परागं लसद्वज्रं नीलं
गोमेदकं तथा । वैडूर्यं नवरत्नानि मुद्रांतां कल्पयेच्छुभां । जपहोमादिकं सर्वं कुर्यात्पूर्वोक्तवर्त्मना । योमु
द्रां धारयेद्देनां तस्य स्युर्वशगा ग्रहाः । रक्तो भौमः । अहिः राहुः । योगियाज्ञवल्क्यः । अनामिकाधृतं हेम
तर्जन्यां रौप्यमेव च । कनिष्ठिकाधृतं खड्गं तेन पूतो भवेन्नर इति । प्रयोगपारिजाते संग्रहकारः । उत्तरीयं
योगपट्टं तर्जन्यां रजतं तथा । न जीवत्पितृकैः कार्यं ज्येष्ठो वा विद्यते यदीति । तथा । पादुके चोत्तरीयं च
तर्जन्यां रौप्यधारणं । न जीवत्पितृकः कुर्यात् ज्येष्ठे भ्रातरि जीवति ॥ ॥ इति कुशाहरणादिपवित्रांतो विधिः ॥
॥ ॥ अथ स्नानविधिः ॥ ॥ तत्स्नानं बहुधा । तदुक्तं वाराहे । मंत्रस्नानं मलस्नानं ध्यानस्नानं च वारुणं ।
पंचमं च जलस्नानमिति पंचविधं स्मृतं । नवद्वारमिदं देहं स्रवत्यहर्हर्मलं । तच्छुद्ध्यर्थं प्रकर्तव्यं मलस्नानं दिने दि
ने । प्रथमं त्रिर्निमज्यास्य कराभ्यां शोधयेत्ततः । मलस्नानमिदं प्रोक्तमावश्यकमिदं नृणां । अथ शीतजला
शक्तौ कुर्याद्देवोस्नवारिणा । प्रदिप्य शीतलास्पृष्टं वारि पश्चाच्च शीतलं । तुलसीमृत्तिकां पुष्टं गायत्र्या चाभिमं

सर्वाणंगानि वस्त्रा
त्रिर्निमज्याचम्याभ
क्तितः २

तदेवं ब्राह्ममुहूर्तोत्स्या
दीनि कुशादिविध्यंतानि
कर्माणि निरूपितानि
इदानीं स्नानं प्रपंच्य
तो [illegible] ५

अनुद्धृतजलाभावे
तदुद्धृतेन समाचरेत् २

श्रितं । जलं विधाय कुर्वीत योह्यशक्तो भवेद्द्विजः । नास्त्यूद्धृतजलस्नाने देवर्षिपितृतर्पणं । अघमर्षणमात्रं
तु पठन्नेवं विनिर्दिशेत् । स्नानं मूर्ध्नि तथा कुर्यान्नित्यकर्मविधानतः । अस्याप्यशक्तो कर्तव्यं मंत्रस्नानं दिने
दिने । संध्योपासनकर्मादावधिकारस्य सिद्धये । आर्द्रवस्त्रेण संमृज्य सर्वगात्रमवं मलं । शुष्कवस्त्रं परित्य
ज्यान्यद्धौतं च धारयन् । आचम्य जलमादाय पात्रे वामकरेऽथवा । गायत्र्या वाथ मूलेन त्रिवारमभिमंत्रयेत् ।
तज्जलं प्रोक्षयेद्गात्रे दर्भैर्वा तुलसीदलैः । तर्जनीमध्यमाभ्यां वा अर्चेनाद्वे वतेन वै । मूर्ध्नो शिरसि चाकाशे
आकाशे भुवि मस्तके । मस्तके च तथाकाशे भूमौ च नवधा क्षिपेत् । अदैवतः स्मृतो मंत्र आपो हि ष्ठेति वै ऋचा ।
त्रिरावृत्त्या क्षिपेत्तोयं प्रत्यर्चेन नवधा द्विजः । आकाशं हृदयं प्रोक्तं भूमिं पादाविति स्मृता । ततश्चाचम्य विधिव
त्कुर्यात्संध्यादिकर्म च । यदा तत्राप्यशक्तोपि वृद्धो वाप्यथवातुरः । शयनोपि च कुर्वीत ध्यानस्नानमतंद्रितः ।
उद्यदादित्यसंकाशं पीतनिर्मलवाससं । सर्वावयवसंयुक्तं सर्वाभरणभूषितं । सर्वलक्षणसंयुक्तं स्वमूर्तिं स्वेष्ट
देवतं । मस्तकोपरि तं ध्यायेत्तत्पादाभ्यां विनिःसृतां । ब्रह्मणा क्षाल्यमानाभ्यां गंगां त्रिपथगामिनीं । धृतां
शिवेन शिरसा ततो विनिःसृतां बहिः । निपतंतीं स्वके मूर्ध्नि प्लावयंतीं मुहुर्मुहुः । सर्वांगानि ततः सम्यगाचम्य पा २८
शुचितां व्रजेत् । स्नानो हि विधिवच्छक्तो वारुणेन जलेन वा । मंत्रस्नानं तथा ध्यानस्नानं कुर्वीत नित्यदा । अधि

कौस्तुभोद्भासितोरस्कं रक्ताम्भोजपदद्वयं । रत्नानुविद्धरसनं त्रिवलीललितोदरं । गूढोरस्कं तथ स्कंधं कंबुग्रीवं चतुर्भुजं । शंखचक्रगदापद्मधारिणं तरुणं सदा । शीतांशुकोटिवदनं विं
बोष्ठस्मितानन । सुनासिकं स्फुरत्कर्णं च मकराकृतिकुंडलं । अष्टमीचंद्रललितललाटस्फकपोलकं । विमलेंदीवरालं च नीलकुंचितमूर्धजं । द्युमत्किरीटकटकनूपुरांगदमुद्रिकं । श्री
वत्सवक्षसं ध्यायेन्मनसा हृत्स्थिरेण तु । यं कांचिदथवाध्याय स्वमूर्तिं स्वेष्टदेवतं ॥४

४२
42

काऽस्य भवेच्छुद्धिः स्नानद्वयसमुद्भवा। जलस्नानमथो वक्ष्ये सिध्यर्थं सर्वकर्मणां। गंगादिषु पयालाभे कूपा
दौ स्नानमाचरेत्। शुचिः क्षालितपादः सन्धौतहस्तो द्विराचमेत्। ततो बद्धशिखो भूत्वा देशकालं च संस्मरेत्।
त्रिर्निमज्ज्य मलस्नानं विधाय अभिमंत्रयेत्। गायत्र्यावाय मूलेन याः प्रवर्त्त इतीरयन्। प्रार्थयित्वा नदीः सर्वाः
इमं मे इति चैकऋचा। मंत्रयित्वा नवर्चेन मंत्रेणाब्दैवतेन तु। पादशीर्षं चैवशस्त्रैवकरकुशश्चापि जलं क्षिप
त्। हस्ताभ्यां मूर्ध्नि तः कुर्यादघमर्षणमार्जनं। ऋतं चेति ऋचे नाप्सु लेपयन्मूर्त्तिमर्चयेत्। ध्यात्वा जल
स्थां मन्मूर्त्तिं मूलमंत्रेण भक्तितः। जलेनैव तु कुर्वीत षोडशानुपचारकान्। तस्मात् सलिलं मूर्ध्नि धृत्वा वै त्रिः
पिवेद्यः। ततश्चाचमनं कुर्वीत तर्पणं जलसंस्थितः। ब्रह्मादिदेवान्सर्दैवान्भुवः स्वर्भूर्भुवः स्थितान्। ऋषी
न्द्वैपायनादींश्च भूर्भुवः स्वः स्थितांस्तथा। तर्पयेदग्निं कव्यवाहनाग्निष्वात्तान्पितॄंस्तथा। ये के चास्मत्कुले जा
ता अपुत्रा गोत्रिणो मृताः। इति मंत्रेण वस्त्राभोदद्यान्निष्पीडयेच्चाधुनि। ततस्तीर्थं समासाद्य यस्मारणं तर्प
तोयं शरीरमलसंभवं। तस्य पापविशुद्ध्यर्थं यक्ष्मार्णं तर्पयाम्यहं ४३
येद्द्विजः। यन्मया दूषितं इति मंत्रेण सरस्यतीरे जलांजलिं क्षिपेत्। सालग्रामशिलातोयं ततो वै मूर्ध्नि धा
रयेत्। त्रिः पिबेत्तीर्थमाहात्म्यमंत्रान्वै समुदीरयन्। स्वस्वशाखोक्तरीत्या स्नानकाले कार्यं विधावामत्र
को हे निलिप्य। द्वितीये वस्त्रं वा निष्पीडयेत् त्यर्थः। तृतीयाध्याये वासिष्ठे। उद्धृत्य पंचमृत्पिंडान् दद्या

न्निष्पीड्य चांबुनि । इत्यस्यायमर्थः । स्नानादपरवारिषु । अनुध्यात्यैव नद्यां तु ह्रदप्रस्रवणादिषु । स्नानमध्ये
वर्तेमंत्रैर्मार्जनं चाघमर्षणं । मंत्रद्वयेनाभिमंत्र्य तस्मिन्ध्यायेत्सनातनं । अनंतभोगपर्यंके शयानं रमयासह ।
ध्यात्वा निमज्जेद्देवेशं त्रिःपठेदघमर्षणं । तथैव मंत्ररत्नं च जपेदप्सु निमज्य वै । उत्थायाचम्य विधिवद्देवर्षि
पितृतर्पणं । उत्तीर्य वस्त्रं निष्पीड्य पुनराचमनं चरेत् । तत्रैव षष्ठाध्याये । नदीतटाके वाप्यादौ पश्चा
त्स्नानं समाचरेत् । कृत्वाघमर्षणस्नानं पूर्वमप्सु समाहितः । आचम्य मंत्ररत्नेन प्राणायामं समाचरेत् । अ
भिमंत्र्य जलं पश्चान्मंत्ररत्नेन वैष्णवः । विसर्जनं संस्मरेदप्सु दिव्यां देवमयीं शुभां । निमज्याप्सु जपेत्पश्चान्मं
त्ररत्नं समाहितः । उत्थाय जलमादाय मंत्रेणैवाभिमंत्र्य च । प्राशयित्वा द्विराचामेद्देवादींस्तर्पयेद्द्विजः ।
उत्तीर्य पीडयेद्वस्त्रं पुनराचमनं चरेदिति । अत्र विशेषमाहाचार्यः । उद्धृतेति मृदालिप्यद्विषउष्ठचउत्तरैः ।
त्रिर्निमज्याप्सु सूक्तेन प्रोक्षयित्वा पुनस्तथा । मृदालिप्य निमज्याथ त्रिस्त्रिर्जपेदघमर्षणं । उद्धृतासि वराहेण
कृष्णेन तुलसीमूलस्यादिमृत्तिकया शरीरं लेपयित्वा त्रिवारं स्नात्वाचम्यापोहिष्ठेति ऋचा शरीरं प्रोक्षयि
त्वा पुनस्तथा उद्धृतेति मृदा शरीरमालिप्य । पुनरपि त्रिवारं स्नात्वाप्सु निमज्यैव ऋतं चेति त्रिरघमर्षणसू
क्तं त्रिवारं जपेदित्यन्वयः । जपकालेपीत्थं भावयेत् । स्रष्टारं सर्वलोकानां स्मृत्वा नारायणं परं । यतस्थासौनि

४२ 43 मज्जाप्सु प्रणवेनोत्थितस्ततः । सिंचयेत्पुरुषसूक्तेन स्वदेहस्थं हरिं स्मरन् । श्वासनिर्बंधनरूपप्राणायामं कृत्वा
पुनर्निमज्ज्यैव ऋतं चेत्यघमर्षणसूक्तं सर्वलोकानां सप्तलोकसमुद्राहोरात्रादिकालसूर्यचंद्रादीनां सर्जकं परं
सर्वोत्तमं नारायणमुदकांतः स्वशेषस्थं स्मरन् जलेन वामनसा वा प्रणवमंत्रैः षोडशोपचारपूजां च कुर्वन्
ततः जलात्तु प्रणवेन ओंकारोच्चारणपूर्वकं उत्थितः सन् पुरुषसूक्तेन स्वदेहस्थं हरिं स्मरन् स्वशाखा
स्थितं पुरुषसूक्तं पठित्वा तदर्थभूतं सर्वचेतनाचेतनं लोकसर्जकं स्वदेहस्थितं नारायणं पंचकोशांतर्गत
शरीरस्थितं तुर्यं च शंखमुद्रया प्रोक्षयेदित्यर्थः । एतदतिरिक्तं सर्वं वारणहरीत्यावाकुर्यात् । जलमध्ये पितृ
स्नाने तु गुरुस्नाने केशवाद्यभीष्टदेवतामंत्रादिस्नानं यथाप्रमाणमघमर्षणात्पूर्वं वा पश्चाद्वा कृत्वा जलतर्प
णादिकं कृत्वा । तीरे शिखोदकं दत्वा । किंचित्कालं स्थित्वा शुष्कवस्त्रेण सन्नवाताहताद्रवस्त्रेण देहं मार्जयेत् ।
नार्द्रेण पाणिना । अत्र ग्रंथे यथाविधीत्यारंभे उक्तं तदंते कृतानां संक्षेपतः शुभेति वक्ष्यमाणाच्च । तं तमारे
णा कर्मवतां ह्यनुष्ठाने कर्मस्फूर्तिर्न जायते । तावत्समस्तं कथितमिति । अस्य संक्षेपशास्त्रत्वान्न विस्तर विरोधि
ता । ते च यं सुगमो मार्गः सफलश्चानुतिष्ठतामिति चोक्तत्वात्सुलभं । आवश्यकमेवाचारो ज्ञेयो न तु शेषाचारे
विस्तारः । वारुणस्नानमृत्तिकातंडुलतिलामलकगोमयदूर्वापंचगव्यभस्मादेरप्याचार उक्तः । किंच उपक्रमे

संन्यस्याध्यात्मचेतसा निराशीर्निर्ममइति मध्येतदर्पणं परस्मैसंनिवेदयेत् । समर्पयेतदिति उपसंहारे
व्यासवाक्यसमुद्धृतिः । सदाचारस्यविषयइतिवक्ष्यमाणत्वात्तत्कर्मणांतन्नच्छाखास्थत्वयुक्तानांतत्तदुक्तकर्म
वतांस्तलभानामविरुद्धानांतच्छाखिभिरपिकरणीयत्वं विष्णुप्रेरणयाविष्णुप्रीत्यर्थंकरिष्यइतिसंकल्प्य
मध्येपिप्रतिक्षणंप्रतिकर्मचहरिंस्मृत्वांतेकृष्णार्पणंकुर्यादिति । कर्मकरणे इतिकर्तव्यतांचवक्ष्याचार्यइति ।
तेष्वपिकर्मसुनानुक्तशंकाकार्येतिज्ञेयं । तदुक्तं । यन्नाम्नातंस्वशाखायां परोक्तमविरोधियत् । विद्वद्भि
स्तदनुष्ठेयमग्निहोत्रादिकर्मवदिति । चोदनाद्यविशेषात्तु । वेदःकृत्स्नोधिगंतव्यः । सर्ववेदोक्तमार्गेण
कर्मकुर्वीतनित्यशः । आनंदोहिफलंयस्माच्छाखाभेदोह्यशक्तिजः । सर्वकर्मकृतोयस्मादशक्ताःसर्वजं
तवः । शाखाभेदात्कर्मभेदान्व्याससस्तस्मादकल्पयदित्यादिभाष्योक्तेः । ध्यानार्चगुरुशुश्रूषानित्यनैमिति
काःक्रियाः । तीर्थदानजपाद्याश्चस्वाध्यायोहरिकीर्तनं । द्वादश्यादिव्रतंत्वेवतुलस्याद्यैरथार्चनं । सर्वंभक्त्य
र्थमुद्दिष्टं निष्फलंतुतयाविनेति हरिवंशे । तीर्थस्नानहोमजपपूर्वाः सर्वेपिसर्वदा । अंगानि हरिसेवायां
भक्तिस्त्वेकाविमुक्तये इतितात्पर्यनिर्णये । मंत्रतस्तंत्रतश्छिद्रं देशकालार्हवस्तुतः । सर्वंकरोति निश्छिद्र
मनुसंकीर्तनंतव । मंत्रमध्येक्रियामध्येविष्णोःस्मरणपूर्वकं । यत्किंचित्क्रियतेकर्मतत्कर्मसफलंकुरु ।

४४
44

मंत्रतंत्रोपकरणकर्तव्यादिषु केशव । देशे काले च मन्त्रानम्य (?) कृतं कर्म निर्मलं । यस्य स्मरणमात्रेण जन्मसंसा-
रबंधनात् । विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे । मातृहा पितृहा गोघ्नो गुरुहा चाग्निहा तथा । श्वादः पुल्कस
को वापि शुध्येरन्यस्य कीर्तनात् । पुरुषं तमजं नित्यं व्रजामि शरणं हरिं । भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येन केन
चित् । भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्ण-
तां याति सद्यो वंदे तमच्युतं । विधानं कर्मणो ज्ञात्वा ततः सम्यक् समाचरेत् । कुर्वन् कर्मफलत्यागी कुर्वन् विष्णव-
र्पणं तथा । ततोंतःकरणशुद्धिः स्यात् तद्द्वारा ज्ञानमाप्नुयात् । अनुशास्तारमप्येवं सर्वधर्मपरोपि वा । विना त-
दर्पणं सम्यक् फलं नाप्नोत्यसंशयः । देहिनो याः प्रवर्तंते प्रातरारभ्य ताः क्रियाः । भक्त्या विष्णवर्पणं कुर्वन्
कर्मपाशाद्विमुच्यते । श्रद्धा जनित्री धर्माणां श्रद्धा माता परा मतिः । श्रद्धाहीनाः क्रियाः सर्वा न फलंति कदा
चनेति वायुपुराणे । तपस्विन इत्यादि भागवतोक्तेश्च । सर्वाणि स्वस्ववर्णाश्रमोचितानि प्रसंगं प्रतिक्षणं
विष्णुभक्त्यादि पूर्वकानि तत्प्रीतिसाधनत्वेन निष्कामत्वेन निरहंकारतया तन्त्रेरणया संकल्प्य । कृतानि
हरावेव समर्पणीयानीति तात्पर्यार्थे द्वाविमावित्यादि वाक्यान्युदाहृत्य सदाचारस्य विषये व्यासवाक्योद्धृतिः
कृतेति ज्ञेयं सर्वं समंजसमिति ॥ अथ काम्यस्नानम् । पुलस्त्यः । पुष्ये च जन्मनक्षत्रे व्यतीपाते च वैधृतौ ।

अमावास्यां नदी स्नानं पुनात्यासप्तमं कुलं। चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसन्निधौ। न प्रेतत्वमवाप्नो
ति गंगायां च विशेषतः। शिवलिंगसमीपे तु मुच्यते सर्वकिल्बिषैः। ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः।
गरानंदे व्यतीपाते कन्याचंद्रे वृषे रवौ। दशजन्माघ हा गंगा तेन पापहरा स्मृतेति। विष्णुः। सूर्यग्रहणतुल्या तु
शुक्लामाघस्य सप्तमी। अरुणोदयवेलायां तस्यां स्नानं महाफलं। पुनर्वसुबुधोपेता चैत्रमासे सिताष्टमी। स्रो
तस्सु विधिवत्स्नात्वा वाजपेयफलं लभेत्। मत्स्यपुराणे। आषाढादिचतुर्मासं प्रातःस्नायी भवेन्नरः। विप्रेभ्यो
भोजनं दत्वा कार्तिक्यां गोप्रदो भवेत्। स वैष्णवं पदं याति विष्णुव्रतमिति स्मृतमिति। आषाढादीत्यत्र कुणा संविज्ञा
नो बहुव्रीहिः। आदित्यपुराणे। कार्तिकं सकलं मासं नित्यस्नायी जितेंद्रियः। जपन्हविष्यभुक्शांतः सर्वपापैः
प्रमुच्यते। तुलामकरमेषेषु प्रातःस्नायी सदा भवेत्। हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति। मार्कण्डेयः।
श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः। सप्तमीं नवमीं चैव सर्वकालं च वर्जयेत्। इति। विष्णुः। बालावृद्ध
तरुणा वृद्धा नरनारीनपुंसकाः। स्नात्वा माघे शुभे तीर्थे प्राप्नुवंतीप्सितं फलं। माघमास्युषसि स्नात्वा विष्णुलोकं
स गच्छतीति। चंद्रिकायां। दर्शं च पौर्णमासं च प्रारभ्य स्नानमाचरेत्। पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे।
अप्रावृतशरीरस्तु यः कुर्यात्स्नानमाचरेत्। पदे पदेऽश्वमेधस्य फलं प्राप्नोति मानवः। अनभ्यंगी द्विजो मासं सर्व

४५ मेनं नयेद्गृही। ततः स्नानस्यावसाने भोज्यद्रव्यं सुसंस्कृतं। भोजयेद्द्विजदांपत्यं भूषयेद्वस्त्रभूषणैः। दंपत्योर्वाससी
45 सूक्ष्मे सप्तधान्यसमन्विते। त्रिंशच्च मोदका देयाः शर्करातिलसंयुताः॥ अथाश्वत्थछायाजलस्नानम्॥ प्रयो
गपारिजाते। अश्वत्थीयोदके स्नायाद्गजच्छायेति सोच्यते। अमागुरुसमायोगः सूर्यपर्वशताधिक इति। आदि
त्यपुराणे। गुरुवारे ऽप्यमावास्यामश्वत्थछायवारिणा। स्नानं प्रयागस्नानेन समं पातकनाशनं। प्रार्थनामंत्रः।
जीवो बृहस्पतिः सौरिराचार्यो गुरुरंगिराः। वाचस्पतिर्देवमंत्री शुभं कुर्यात्सदा मम। एतैर्नामभिरष्टाभिः प्रा
र्थयेत्तर्पयेत्तथा॥ इत्यश्वत्थछायास्नानम्॥ ॥अथ समुद्रस्नानम्। तत्र भरद्वाजः। पक्षोपवासफलदा महा
नद्यः समुद्रगाः। मासोपवासफलदः सकृत्स्नातो महोदधिरिति। आचार्यः। समुद्रे पर्वसु स्नायादमायां तु
विशेषतः। पापैर्विमुच्यते सर्वैरमायां स्नानमाचरेत्। गोभौमदिने स्नानं समुद्रे च विवर्जयेत्। ग्रहणे रविवा
रे च पुत्रेष्वनैतदाचरेत्॥ इति काम्यस्नानम्॥ ॥अथ नैमित्तिकम्॥ तत्र मनुः। दिवाकीर्तिमुदक्यां च पति
तं सूतिकां तथा। शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यतीति। दिवाकीर्तिश्चांडालः। संवर्तः। तत्स्पृष्टि
नं स्पृशेद्यस्तु स्नानं तस्य विधीयते। ऊर्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथेति। तदबुद्धिपूर्वस्पर्शे। अ
बुद्धिपूर्वसंस्पर्शे द्वयोः स्नानं विधीयते इति संग्रहोक्तेरिति। माधवः। बुद्धिपूर्वके तु तृतीयस्यापि स्नानम्।

उपस्पर्शोच्चतुर्थस्तु तदूर्ध्वं प्रोदुर्णस्य तमितिमरीच्युक्तेः। काष्ठाद्यचेतनांतरे स्पर्शेतु। कौर्मे। चंडालस्य
तकिशवैः संस्पृष्टः संस्पृशेद्यदि। प्रमादात्ततआचम्य जपंकुर्यात्समाहितः। तत्स्पृष्टस्पर्शिनं स्पृष्ट्वा बुद्धि
पूर्वं द्विजोत्तमः। आचमेत्तुविशुद्ध्यर्थं प्राहदेवः पितामह इति। प्रचेताः। साक्षात्स्पर्शेतुयत्प्रोक्तं तदस्त्रांतरि
तेपिवेति। चतुर्विंशतिमते। चितिं च चितिकाष्ठं च यूपं चंडालमेव च। स्पृष्ट्वा देवलकं चैव सचैलो जलमावि
शेत्। बौद्धान्पाशुपतान्जैनान्लोकायतिककापिलान्। विकर्मस्थान्द्विजान्स्पृष्ट्वा सचैलो जलमाविशेत्।
कापालिकांस्तुसंस्पृश्य प्राणायामोधिकोमत इति। कापिलाः सांख्या इति केचित्। लोकायतिककापिलानि
तिकर्मधारया लोकायतिकैकदेशिन एव कापिला इति। हेमाद्रिः स्मृत्यंतरे। देवार्चनपरो विप्रो वित्तार्थी
वत्सरत्रयं। सवै देवलकोनाम हव्यकव्येषु गर्हितः। इतिरत्नावल्यां। शिवं स्कंदं तथा चंद्रं दुर्गादीन्सुरदेवताः।
योर्चयेत्पणपूर्वं तु सद्यः पततिमानवः। देवसन्निधौ पशुबंधे च देवलयूपस्पर्शेन स्नानम्। नस्नायाद्देवलं
यूपं देवस्थाने चबंधने। अन्यदा तावुभौ स्पृष्ट्वा सचैलो जलमाविशेदिति संग्रहोक्तेः। व्यासः। महानिशा
तुविज्ञेया मध्ययामद्वयं निशि। तस्यां स्नानं न कुर्वीत काम्यं नैमित्तिकादृते। प्रदोषपश्चिमे यामे दिनवत्स्ना
नमाचरेदिति। मध्ययामयोस्तु विशेषमाहाविः। रात्रौ स्नानं यदि भवेत्पश्चान्नग्निं समाचरेत्। स्वर्णांगुलिकरो

४६
46

विप्रोवह्निनावाविनाचरेत्। पराशरः। अस्पृश्यस्पर्शनेजातेअश्रुपातेक्षुरेभगे। स्नानंनैमित्तिकंकार्यंदैवपैत्र
विवर्जितमिति। दैवादितर्पणरहितमित्यर्थः। सएव। तूष्णीमेवावगाहेतयदास्यादशुचिर्नरः। आचम्यविधिव
त्पश्चात्प्रयतःस्नानमाचरेदिति। वृद्धमनुः। मृतेजन्मनिसंक्रांतौश्राद्धेजन्मदिनेतथा। अस्पृश्यस्पर्शनेचैवन
स्नायादुष्णवारिणा। गार्ग्यः। कुर्यान्नैमित्तिकंस्नानंशीताद्भिःकाम्यमेवच। नित्यंयादृच्छिकंचैवयथारुचि
समाचरेदिति। इतिनैमित्तिकस्नानम्॥ ॥अथमलापकर्षणस्नानम्। मनुः। पक्षादौचरवौषष्ठ्यांरिक्तायांच
तथातिथौ। तैलेनाभ्यज्यमानस्तुधनायुर्भ्यांविहीयते। गर्गः। पंचदश्यांचतुर्दश्यांअष्टम्यांरविसंक्रमे। द्वाद
श्यांसप्तमीषष्ठ्योश्चतैलस्पर्शंविवर्जयेत्। नचकुर्यात्तृतीयायांत्रयोदश्यांतिथौतथा। नवम्यांचदशम्यांचस्नेहमभि
चरेन्निपुंजितइति। माधवीये। संतापःकांतिरल्पायुर्धनंनिर्द्धनतातथा। अनारोग्यंसर्वकामाअभ्यंगाद्भास्क
रादिषु। प्रचेताः। सार्षपंगंधतैलंचयत्तैलंपुष्पवासितं। अन्यद्रव्ययुतंतैलंनदुष्यतिकदाचनेति। याज्ञवल्क्यः।
वृथातूष्णोदकेस्नानंवृथाजाप्यमवैदिकं। वृथात्वश्रोत्रियेदानंवृथाभुक्तमसाक्षिकमिति। यमः। नित्यंनैमि
त्तिकंचैवक्रियांगंमलकर्षणं। तीर्थाभावेतुकर्त्तव्यमुष्णोदकपरोदकैः। आदित्यकिरणैःपूतंपुनःपूतंचवह्नि
ना। आम्नातुमातुरस्नानंनप्रशस्तंदृढांगिनामिति। आपःस्वभावतोमेध्याःकिंपुनर्वह्नितापिताः। अतःसंतःप्र

शंसंति स्नानमुष्णेन वारिणेति याज्ञवल्क्योयमातुरपरम्। वृद्धमनुः। संक्रांत्यां रविवारे च सप्तम्यां राहुदर्शने।
आरोग्यपुत्रमित्रार्थी न स्नायादुष्णवारिणेति। अथ कात्यायनां मध्याह्नस्नाने विशेषस्तत्सूत्रे। संकल्पं सूक्त
पठनं मार्जनं चाघमर्षणं। देवादितर्पणं चैव पंचांगं स्नानमुच्यते॥ प्रातःस्नानमाह कूर्मपुराणे। अदाल्प
दंतकाष्ठं वैभक्षयित्वा यथाविधि। आचम्य प्रयतो नित्यं प्रातःस्नानं समाचरेदिति। व्यासोपि। उषःकाले तु
संप्राप्ते कृत्वा चावश्यकं बुधः। स्नायान्नदीषु शुद्धासु शौचं कृत्वा यथाविधीति। दक्षोपि। अस्नात्वा नाचरेत्क
र्म जपहोमादि किंचन। लालास्वेदसमाकीर्णः शयनादुत्थितः पुमान्। अत्यंतमलिनः कायो नवच्छिद्र
समन्वितः। स्रवत्येव दिवारात्रौ प्रातःस्नानं विशोधनं। पुमानिति विशेषणात्स्त्रीणां स्नानं विनापि शुद्धिः।
द्वावेवाशुचीस्यातां दंपती शयनं गतौ। शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमानिति स्मृतेः। शंखः
प्रातःस्नानं प्रशंसंति दृष्टादृष्टकरं हि तत्। सर्वमर्हति शुद्धात्मा प्रातःस्नायी जपादिकं। दृष्टं मलापनयनम्।
अदृष्टं पापलयादिः। अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्विचिंतितं। याम्यं हि यातनादुःखं नित्यस्नायी न
पश्यति। व्यासोपि। ऋषीणामृषिता नित्यं प्रातःस्नानान्न संशयः। प्रातःस्नानेन पापानि धूयंते नात्र संश
यः। दक्षोपि। अस्नानाद्धि दिवा मोहाद्रात्रौ दुश्चरितं कृतं। प्रातःस्नानेन तत्सर्वं शोधयंति द्विजातय इति।

उपसीतिमुख्यः कालः। तदसंभवे संध्यायां। रात्रिदिनसंधौ। तदसंभवे उदिते रवौ। यत्तु। सूर्योदयं विना नैव स्नानदानादिकाः क्रियाः। अग्नेर्विहरणं चैव कृत्वभावस्य लभ्यते। इति मार्कंडेयपुराणपरिभाषितसूर्योदयपरम्। अन्यथोदयात्प्राक्स्नानसर्वयोः संध्याहोमयोः सूर्योदयानंतरमनुष्ठानापत्तेः। तत्र मुख्यविषयांतरेण वा ॥१ उ॰ पं॰ प्र॰ १

चतुर्विंशतिमते। उषस्युषसि यत्स्नानं संध्यायामुदिते पि वा। प्राजापत्येन तत्तुल्यं सर्वपापप्रणाशनमिति। उदित इति उदयाभिमुख इत्यर्थः। उदयस्याप्युपरि स्नानं चेत्संध्याप्युपकृष्येत। स्नानपूर्वकत्वात्संध्यायाः। संध्योत्कर्षश्च योगियाज्ञवल्क्येन निषिद्धः। संधौ संध्यामुपासीत नास्तगे चोद्गते रवाविति। यथोक्तकाले स्नानं कुर्वन्नघमर्षणं कुर्यात। तदाह शौनकः। स्नात्वाचांतो वारिमध्ये त्रिः पठेदघमर्षणमिति। देवीपुराणे। स्नातस्य कायिकं पापं तत्क्षणादेव नश्यति। लक्ष्मीवृद्धिमवाप्नोति देवा तिष्ठंति संमुखाः। योगियाज्ञवल्क्यः। अस्नातस्य क्रियाः सर्वा भवंतीहाफलाय तः। प्रातः समाचरेत्स्नानं तच्चामितफलप्रदं। नित्यस्नानेन शुध्यंते अपि पापकृतो नराः। प्रातःस्नायी नित्यस्नायी। प्रातःस्नानं नित्यस्नानमिति शंखोक्तेः। दुःस्वप्नं दुष्टचिंता च वंध्या भवति सर्वदा। प्रातःस्नानं विशुद्धानां पुरुषाणां विशोधयते। अत्र प्रातःशब्दः उषःकालपरः। अलक्ष्मी कालकर्णी च दुःस्वप्नं दुर्विचिंतितं। अस्मात्रेणाभिषिक्तस्य नश्यंत इति धारयेतोति पुराणांतरोक्तेः। कालकर्णी राक्षसी। तत्स्वरूपं मार्कंडेये। तत्र हि। अस्मात्रेण मंत्रादिविनापि जलमात्रेणेत्यर्थः। न जलं ताडयेत्पद्भ्यां न नग्नं तु मलं त्यजेत। न मलं क्षालयेत्तीर्थे अप्रोक्षितं न विशेज्जलमिति भागुरिः। अशुद्धः ऋतुगमनादिना। योगियाज्ञवल्क्यः। यथाह नित्यथा प्रातर्नित्यं स्नायादनातुरः। दंतान्प्रक्षाल्य नद्यादौ गेहे चेत्तदमंत्रवत् ॥

गेहे अद्धतोदके वा अमंत्रवत्स्नानं मंत्रशून्यमित्यर्थः। अत्र केचित्तत्पदेन प्रातःस्नानं मन्यमाना मध्याह्नस्नानं गृहेपि मंत्रवदाहुः तद्दीदितस्नानपरं प्रतीयते। तत्र स्नपनानंतरं सस्नात्वापो अस्मानिताद्युक्तेः। आश्वलायनः। स्नानमध्ये त्वाचमनं तर्पणं वस्त्रनिष्पीडनं करपात्रगतं तोयं गृहे चैतानि वर्जयेत्। तर्पणस्नानांगमन्त्रवस्त्रनिष्पीडनमप्सलं तत्रमीतोदेशकं तद्गृहस्नाने नस्नानदंगत्वात्। तस्य फलवत्वात्। फलवत्सन्निधावफलं तदंगमिति न्यायात्। तस्य कर्माधिकारमात्रसंपादकत्वाच्च। अत स्नानं विशेषधर्मनित्युक्तेः।

हुं होमपरिशिष्टे । अस्तत्वाद्धोमकालस्य वृत्त्वात्स्नानकर्मणः । प्रातर्न तनुयात्स्नानं होमलोपो विगर्हितः ।
गेह इति उद्धृत स्नानोपलक्षणं । नद्याद्यभावविधानात् । विष्णुः । प्रातःस्नायी अरुणकरग्रस्तां प्राचीम-
वलोक्य स्नायात् । अरुणकरग्रस्तामिति संध्यापूर्वकालपरम् । संध्यायां निषेधादिति हरिहरः । तदयुक्तम् ।
संध्यापूर्वकालेपि रात्रित्वेन निषेधात् । तस्मादरुणकरग्रस्तामिति संकुचितमेव । अत एव तत्र संध्यास्नानकी-
र्तनं । नरसिंहपुराणे । पूर्वां संध्यां सनक्षत्रामुपक्रम्य यथाविधि । गायत्रीमभ्यसेत्तावद्यावदादित्यदर्शनं ।
अनुदितहोमीतरपरमेतत् । दक्षः । संध्याकर्मावसाने तु स्वयं होमो विधीयते । अत्रानुकल्पमाह स एव । ऋ-
त्विक्पुत्रो गुरुर्भ्राता भागिनेयोथ विट्पतिः । एतैरपि हुतं यत्तु तद्धुतं स्वयमेव हि । विट्पतिर्जामाता । वाराहपु-
राणे । उदयान्निःसृतं सूर्यं यस्तु भक्त्या न होति द्विजः । दद्यात्तांजलिभिस्तिसृभिः पूजयेच्छुचिः । तस्य
भावप्रपन्नस्य ह्यस्य धर्मं यत्समुपार्जितं । तत्क्षणादेव निर्दग्धं भस्मीभवति तस्य तत् । याज्ञवल्क्यः । स्विद्यंति
हि सुप्तस्य इंद्रियाणि स्रवंति च । अंगानि समतां यांति चोत्तमान्यधमैः सह । गुणा दश स्नानपरस्य साधो रूपं च
तेजश्च बलं च शौचं । आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्ननाशश्च यशश्च मेधा । स्नानं नदी देवखात ह्रदेषु
च सरस्सु च । पंचपिंडाननुद्धृत्य न स्नायात्परवारिषु इति । परसत्ताकेऽनुद्धृते जले मृत्पिंडपंचकोद्धरणाभावे

ब्रह्मांडपुराणे नद्यादिस्नाने स्मरणे विशेष उक्तः। दिलीप उवाच। नदीषु मे वद ब्रह्मन्सर्वासु हरिमूर्तयः। काध्येया विस्तरेणेव कृपया मयि भो गुरो। वसिष्ठः। गंगायां माधवो देवः शंखचक्रगदाधरः। लसत्पद्मकरो ध्येयः तत्र स्नाने नरेश्वर। गोदावर्यां महानद्यां वीरनारायणो नृप। शंखचक्र गदापद्मैः शोभितो ध्येय एव हि। कृष्णवेण्यां नृपश्रेष्ठ कृष्णः साक्षाज्जनार्दनः। चतुर्बाहुर्महातेजाः शंखचक्रासिशार्ङ्गभृत्। कालिंद्यां यमुनायां तु कृष्णनामा

४८

48

न स्नायात् इत्यर्थः। मरीचिः। भूमिस्थमुद्धृतं वापि शीतमुष्णमथापि वा। गांगं पयः पुनात्याशु पापमामरणांतिकं मिति। याज्ञवल्क्यः। भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकं। ततोपि सारसं पुण्यं तस्मान्नादेयमुच्यते। तीर्थतोयं ततः पुण्यं ततो गांगं तु सर्वतः। इति। गंगावाक्यम्। नंदिनी नलिनी सीता मालती च महापगा। विष्णुपादाप्रसंभूता गंगा त्रिपथगामिनी। भागीरथी भोगवती जाह्नवी त्रिदशेश्वरी। द्वादशैतानि नामानि यत्र तत्र जलाशये। स्नानोद्यतः सदा कुर्यात्तत्र तत्र वसाम्यहमिति। देवलः। एकां नदीं समासाद्य नान्यां स्नाने नदीं स्मरेत्। मार्कंडेयः। संकल्पं च यथा कुर्यात्स्नानदानव्रतादिके इति। यथायथावदित्यर्थः। शंखः। आपो अस्मादिति स्नात्वा भास्कराभिमुखः स्थितः। इदं विष्णुर्जपित्वा तु प्रतिस्नातो निमज्जति। अप्रवाहोदकस्नानं विप्रपादाभिषेचनं। आदित्याभिमुखः कुर्यात्संध्यावंदनमेव चेति। पारिजाते याज्ञवल्क्यः। तत्त्वायामीति मंत्रेण वारुणेनांतरे स्थितः। उदुत्तममिति स्नात्वा ह्यवतीर्य जलाशये। आवाह्य वरुणं स्नानमाचरेद्विधिपूर्वकमिति। चतुर्विंशतिमते। स्नानमब्दैवतैर्मंत्रैर्वारुणैश्च मदा सह। कुर्याद्व्याहृतिभिर्वाथ यत्किंचेदं मंत्रवापि वा। शौनकः। स्नात्वाचांतो नवारि मध्ये योगियाज्ञवल्क्यः। य एवं विकल्पतः प्रोक्तः स्नानस्य विधिरुत्तमः। असामर्थ्यान्न कुर्याच्चेत्तत्रायं विधिरुच्यते। स्नानमंतर्जले चैव मार्जनाचमने तथा। जलाभिमंत्रणं चैव तीर्थ

हरिर्नृप। चतुर्बाहुः सदा ध्येयो दंडशंखारिशार्ङ्गभृत्। सरस्वत्यां महाभाग पद्मनाभं स्मरेन्नृप। कावेर्यां रंगनाथं च शरण्यं रामभेव च। नर्मदायां महाविष्णुं चतुर्बाहुं नृपोत्तम। वाराहं तुंगभद्रायां सिंधौ क्षीराब्धिशायिनं। नृसिंहं भवनाशिन्यां कुमुद्वत्यां त्रिविक्रमं। वंजरायां हयग्रीवं भीमरथ्यां तु श्रीधरं। अनंतं ताम्रपर्ण्यां वैमल्यां जनार्दनं। पिनाकिन्यां महाभाग केशवं क्लेशनाशनम्। ४

४ पद्मशंखारियुक्तं च गदया परिशोभितं। पृथक् सागरगामिन्यो या नद्यः संति भूतले। तासु सर्वासु राजेंद्र दत्तात्रेयं स्मरेत्सदा। स्वामिपुष्करणी तीर्थे श्रीभूमिसहितं हरिं। करिन्यस्त वामबाहुं वरदेन करेण च। युक्तं शंखारियुक्तं च प्रसन्नास्यां बुजं स्मरेत्। वामनं संस्मरेद्राजन् चंद्रपुष्करणीजले। संस्मरेन्नृपतिश्रेष्ठ मानसे मधुसूदनं। देवखातेषु राजेंद्र संस्मरेत्तु गदाधरं। तुंगापगायां राजेंद्र लक्ष्मीनारायणं स्मरेत्। तडागे संस्मरेद्राजन् शेषशायिनमच्युतं। वापीषु संस्मरेन्नित्यं चक्रपाणिं महाविभुं। एवमादिहरेर्मूर्तीः तीर्थस्नानकाले सुभिः। कर्तव्याः सततं भूपनाः कार्या विचारणेति ४
उ.प.५

अथवा वारुणान्मंत्रान्कामतः संप्रयोजयेत्

सपवित्रकलत्रं । अघमर्षणसूक्तेन त्रिरावृत्तेन नित्यशः ॥ स्नानाचरणमित्येतदुपदिष्टं महात्मभिरिति ।
चतुर्विंशतिमते । स्नानादनंतरं तावत्तर्पयेत्पितृदेवताः । उत्तीर्य पीडयेद्वस्त्रं संध्याकर्म ततः परमिति । ब्रह्मांडपु
राणे स्नानांगतर्पणं विहितं । नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते । तर्पणं तु भवेत्तस्य अंगत्वेन प्रकीर्तितमिति ।
यमोपि । द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकांजलिं । गोशृंगमात्रमुद्धृत्य जलमध्ये जलं क्षिपेदिति । कार्ष्णाजिनिः ।
नाभिमात्रे जले स्थित्वा चिंतयन्नूर्ध्वमानस इति । तर्पयेदिति शेषः । नृसिंहपुराणे । पितॄन्ऋषिगणान्देवानद्भिः
संतर्पयेत्ततः । देवान्देवगणांश्चापि मुनीन्मुनिगणानपि । पितॄन्पितृगणांश्चापि नित्यं संतर्पयेत्तत इति । भर
द्वाजोपि । वस्त्रोदकमपेक्षंते ये मृता दासकर्मिणः । तस्मात्सर्वप्रयत्नेन जलं भूमौ निपातयेदिति । वस्त्रनिष्पी
डनमंत्रस्तु । ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः । ते गृह्णंतु मया दत्तं वस्त्रनिष्पीडनोदकमिति ।
व्यासोपि । यज्ञोपवीती देवानां निवीती ऋषितर्पणं । प्राचीनावीती पित्र्ये तु स्वेन तीर्थेन भाविताः । सुमंतुः । आका
शे निक्षिपेद्वारि जलस्थो दक्षिणामुखः । पितॄणां स्थानमाकाशं दक्षिणा दिक्तथैव च । त्रीन्त्रीन् जलांजलीन्द
द्यादुच्चैरुच्चतरं बुधः । कार्ष्णाजिनिः । देवतानामृषीणां च जले दद्याज्जलांजलीन् । असंस्कृतप्रमीतानां स्थले
दद्याज्जलं पुनः । बौधायनः । जलांजलित्रयं दद्याद्ये चान्ये संस्कृता भुवि । असंस्कृतप्रमीतानामेकमेव तटे क्षिपेत् ।

तत्रमंत्रः। अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम। भूमौ दत्तेन तोयेन तृप्ता यांतु परां गतिमिति। भगवान्।
स्नानांगं तर्पणं कृत्वा यक्ष्मणे जलमाहरेत्। तन्मंत्रस्तु। यन्मया दूषितं तोयं शारीरमलसंभवात्। तद्दोषपरि
हारार्थं यक्ष्मणं तर्पयाम्यहं। नदीत्वमापन्नं कौर्मे। स्नानतोस्नानतो वापि यन्मया दुष्कृतं कृतं। तत्त्वमस्वारि वि
लं देवि जगन्मातर्नमोस्तुते। ततो दर्भांस्त्यजेत्। विकरे पिण्डदाने च तर्पणे स्नानकर्मणि। आचांतः
सन्न्यकुर्वीत दर्भसंत्यजनं बुध। इति स्मृतेः। विष्णुः। स्नातः शिरो नावधुनेन्नांगेभ्यस्तोयमुद्धरेत्।
नेच्च सूर्वं धृतो वासो न च तैलमुपस्पृशेत्। गृह्यपरिशिष्टे। अथ तीरमेत्य दक्षिणामुखः प्राचीनावीती।
ये के चास्मदित्यादिना वस्त्रनिष्पीडनोदकं दत्वा वस्त्रं निष्पीड्योपवीत्याचम्य उपस्पृश्य परिधानीयम् अभ्युक्ष्य परिधाया
चम्योत्तरीयमभ्युक्ष्योत्तरं प्रावृत्याद्विराचामेदिति। वृद्धमनुः। निष्पीड्य स्नानवस्त्रं तु पश्चात्संध्यां समाचरेत्। अ
न्यथा कुरुते यस्तु स्नानं तस्याफलं भवेत्। मनुः। मनुष्यतर्पणे चैव स्नानवस्त्रनिपीडने। निवीती च भवेद्द्विज
स्तथा मूत्रपुरीषयोः। वासोनिष्पीडने निवीतप्राचीनावीतयोर्विकल्पः। गृह्यपरिशिष्टस्याश्वलायनपरत्वात्।
तेषां प्राचीनावीतमितरेषां निवीतमिति नृसिंहः। विष्णुः। ब्रह्मक्षत्रविशां चैव मंत्रवत्स्नानमिष्यते।
तूष्णीमेव हि शूद्रस्य स्त्रीणां च कुरुनंदनेति। दक्षः। प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः। यते

सर्वेषामपि सकृत्कुर्यादशक्तो ऽपि जलं विना । प्रातः स्नानं काम्यं । नित्यकाम्यत्वेन गृहस्थेन मुख्यतः स्नानद्वयं कर्तव्यं । तदसंभवे प्रमीतपितृकेन मध्याह्ने स्नातव्यं । तत्राप्यसंभवे पूर्वोक्तद्वारा
वपि उभयत्र प्रमाणस्य वचनात् । ननु कथमेकत्र विरुद्धद्वयसमावेश इति वाच्यं । प्रमाणप्रतिपन्नत्वेन विरोधाभावात् । धर्मप्रदीपे । प्रातःस्नानं न कुर्वीत तस्मा[illegible]तो व्रजेत् । अत एव सदा
स्नायादशक्तो तु रवेर्दिने । यावदनुदिते सूर्ये स्नानसंध्याजपादिकं । कुर्वन्धर्माधिकारी स्याद्यावज्ज्ञानुदिनं भवेत् । तथा । प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ । य इच्छेद्विपुलान्भोगांश्च

त्रिषवणं प्रोक्तं सकृत्तु ब्रह्मचारिण इति । गृह्यपरिशिष्टे स्नानविधिः । तत्प्रातर्मध्याह्ने च कुर्यादेकत्र वा ।
प्रातरेव ब्रह्मचारी द्वित्रिर्वानप्रस्थः । यतिस्त्रिषु सवनेषु । तत्र प्रातः सह गोमयेन कुर्यात् । मृदा मध्यंदिने । सा
यं शुद्धाभिरद्भिः । न प्रातःस्नानात्प्राक् संध्यामुपासीत । प्रातरुत्थाय गोमयमंतरिक्षस्थं संगृह्य भूमिष्ठं वोप
यिधस्थं संत्यज्य तीर्थमेत्य धौतपाणिपादमुख आचम्य संध्योक्तवदात्माभ्युक्षणादि च कृत्वा द्विराचम्य
संयतप्राणः कर्म संकल्प्य गोमयं वीक्षितमादाय सव्ये पाणौ कृत्वा व्याहृतिभिस्त्रिधा विभज्य दक्षिण
भागं प्रणवेन दिक्षु निक्षिप्योत्तरं तीर्थे क्षिप्त्वा मध्यमं मानस्तोक इत्यृचाभिमंत्र्य गंधद्वारामित्यूर्वोर्मूर्द्धा
दि सर्वांगमालिप्य प्रांजलिः हिरण्यशृंगं वरुणं प्रपद्ये तीर्थं मे देहि याचितः । यन्मया भुक्तमसाधूनां
पापेभ्यश्च प्रतिग्रहः । यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतं तन्न इंद्रो वरुणो बृहस्पतिः सविता च पुनं
तु पुनः पुनरित्यार्याः । अवतेयतिद्वाभ्यां अवतेहेलतिद्वाभ्यां । असमाजे बृहद्दवेति सूक्तेन संप्रार्थ्य । याः
प्रवतो निवत उद्वत उदन्वतीरित्येतया तीर्थमुपस्थाप्य अपावगाह्य स्नात्वा द्विराचम्य मार्जयेदंबयो यंत्यध्वभि
रित्यष्टाभिरापो हि ष्ठेति नवभिः रथतीर्थमंगुष्ठेनेमं मे गंग इति ऋचा त्रिः प्रदक्षिणमालोड्य प्रकाशपृष्ठमग्नो
घमर्षणसूक्तं त्रिरावृत्य निमज्योन्मज्यादित्यमवलोक्य द्वादश कृत्वा आप्लुत्य पाणिभ्यां शंखमुद्रया योनि

इह सूर्यसमोपमान् । यमः ।
प्रातःस्नायी च सततं द्वौ मा
सौ माघफाल्गुनौ । देवान्
पितॄन्समभ्यर्च्य सर्वपापैः
प्रमुच्यते । न च माघादि
विशेषोपादानेन काम्य
त्वमिति वाच्यं । तेन वचना
नां नित्यत्वं निरूप्यते । किं
च फलाभिधानं । अन्यथा
नित्यबोधकवाक्य
विरोधापत्तेः ५१

५०
50
मुद्र्याचोदकमादायमूर्ध्निम्नमोदेवगाहुतोनरसिचामामंगायत्र्याभिषिच्य त्वन्नोअग्नेवरुणस्यविद्वानितिद्वाभ्यां।
नरस्त्रमंदीधावतीतिसूक्तेनपुनःस्नायात्।मूर्ध्निचाभिषिंचेत्।तद्विष्णोःपरमंपदमग्निरक्षांसितोअहमो
यत्किंचेदंवरुणदैव्येजनेइत्येताजपेत्।स्रोतसोभिमुखःसरित्सुस्नायात्।अन्यत्रादित्याभिमुखः।
अथस्नात्वानाभिरद्भिःप्राङ्मुखउपवीतीदेवतीर्थेनव्याहृतिभिर्व्यस्तसमस्ताभिर्ब्रह्मादीन्देवान्सक्
न्तर्पयित्वाऽथोदङ्मुखोनिवीतीसव्यवाभिरद्भिःप्राजापत्येनतीर्थेनऋषीन्स्ताभिर्व्याहृतिभिर्द्विर्द्वि
स्तर्पयित्वाऽथदक्षिणामुखःप्राचीनावीतीपितृतीर्थेनसतिलाभिरद्भिर्व्याहृतिरेवसोमपितृमान्य
मोंगिरस्वोग्निःकव्यवाहनइत्यादीस्त्रिस्त्रिस्तर्पयेत्।स्नानांगतर्पणमिति।शौनकः।प्रसंत्राजेद्
हत्स्नमघमर्षणंजपेत्।समुद्रादूर्मिरित्यपांसूक्तंएकादशर्चकं।आपोअस्मान्मातरइत्यृचंच
प्रजपेन्नरः।अवगाह्यनिमज्याथद्विराचम्याभिषेचयेत्।अंवयोयंत्यध्वभिश्चआपोहिष्ठादयोनव।
अद्भिःस्नात्वोदकेमग्नस्त्रिपठेदघमर्षणं।कुर्याद्द्वादशभिःस्नानंसर्वपापप्रणाशनं।धन्यंयशस्यमा
युष्यमारोग्यंवुद्धिवर्द्धनमिति।स्नानकालेजप्यमाहव्यासः।द्रुपदानामगायत्रीवेदेवाजसनेयके।सकृद
न्तर्जलेजप्त्वात्रसर्वंतत्व्यपोहतीति।साचसर्वमघमर्षणंप्रसंगेनालेखि।हंसवतुः।हंसःशुचिषदित्येता

मच्चर्यं तज्जले जपन् । सर्वस्मात्पापात्प्रमुच्यते । अपि वा व्याहृतीरंतर्जले तं जपन्सर्वस्मात्पापात्प्रमुच्यते । गोतमः । अपि
वा गायत्रीं पच्छोऽर्द्धर्चशः समस्तामपि त्रिरंतर्जले जपन्सर्वस्मात्पापात्प्रमुच्यते पिवा प्रणवं त्रिरंतर्जले जपन्सर्वस्मात्पापात्प्र
 मुच्यत इति । प्रातःकालादिलक्षणमाह विष्णुपुराणे । [illegible]षसं चाशद्घटी प्रातस्तत्त्वेको घिकौ । उषःकालो ह पंचाशद्घटे
षः सूर्योदयः स्मृत इति । अत्र पारिभाषिकप्रातःस्नानं यतिपरम् । यथोक्तं । प्रातःस्नानं यतिः कुर्याद्ब्राह्मणश्चारुणो
दये । ब्रह्मचारी उषःकाले गृही सूर्योदये तथा । स्मृतिसारेपि । नाडीद्वयावशिष्टायां रात्रौ गच्छेज्जलाशये । तिलगं
धामलैः पुष्पैर्दर्भाद्यैः सहितः शुचिः । प्रातःकालो मुहूर्तांस्त्रीनिति स्नानेतरकर्मपरम् । स्नानपदाश्रवणात् । अत्राप्य
नुदितहोमस्य यथाकालमावश्यकतयानुष्ठानाननुष्ठानात् । तत्र कार्म्यं तु कर्तव्यं यथावद्विधिचोदितमित्यपरार्के ।
नरसिंहपुराणे । ततश्चावसथं गत्वा होमं कुर्याद्विचक्षणः । देवकार्यं ततः कृत्वा गुरुमंगलदर्शनं । दक्षोपि । संध्या
कर्मावसाने च स्वयं होमो विधीयते । अल्पत्वाद्धोमकालस्य बहुत्वात्स्नानकर्मणः । प्रातर्न तनुयात्स्नानं होमलोपो विगर्हितः ।
अतो मध्याह्नकाले तु स्नानं विस्तरतश्चरेत् । नच प्रातः संक्षेपतः स्नानं शोचार्यं तु तदिष्यते । मंत्रैस्तु विधिनिष्पार्थं म
ध्याह्ने तु सविस्तरमिति मनुना यथाहनि तथेति योगि विरोध इति वाच्यं । होमलोपो विगर्हित इति हेतुमन्निगदेन सा
ग्निविषयः संक्षेपः निरग्निविषयो विस्तर इति । भिन्नविषयत्वान्न विरोधः । अथवा संक्षेपोऽनुदितहोमविषयः ।

५१ विस्तरस्तु तदितरविषयः। यथोदिते जुहोत्यनुदिते जुहोतीति चेत्यत्रोदितहोम आश्वलायनापस्तम्बवचनम्। तथा तैत्तिरीये।
प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रं दिवाकीर्त्यमदिवाकीर्तयंतः सूर्योज्योतिर्नतुतज्योतिरेषां। अत्रायं क्रमः।
51 साग्निः संक्षेपतः स्नानसंध्यां विधायानुदितहोमं कुर्यात्। निरग्निः संध्यानंतरमादित्योदयपर्यंतं गायत्रीं जपेत्। पश्चा
द्विभ्राजइत्यादिमंत्रजपः। तदेतदुभयोरपि सूर्योदये। वह्निशालाशयाभावे गृहे चेत्करोति तदा तूष्णीं स्नात्वा संध्यां
विधायानुदितहोमं कुर्यात्। निरग्निः संध्यां विधायादित्योदयपर्यंतं जपं कुर्यात्। स्नानं चास्य सांगम्। आसंगवां
तः प्रातः इति प्रातर्होमेतरकर्मपरम्। तस्मात् सूर्योदयावच्छिन्नः कालः। तदनवच्छिन्नः समयाध्युषितः। चांगसर्व
त्रप्रमाणसद्भावात्। सर्वपरिग्रहः। अत्रव्यवस्थितो विकल्पः। नैच्छिकः। अष्टदोषदुष्टत्वात्। अनन्यगतिक
त्वेन कश्चिदंगीकारात्। तद्यथा। व्रीहिभिर्यवैर्वा [illegible]तत्र व्रीहिहोमकाले चत्वारो दोषाः। यवग्रहणकाले व्री
हिग्रहणकालीनव्रीहिप्रामाण्यस्य परित्यागः। यवस्याप्रामाण्यपरिकल्पनमित्यष्टदोषा एकैके विकल्पे द्रष्टव्याः। व्यव
स्थितविकल्पे तु तुल्यवदुभयशास्त्रैः। एवमेवाष्टदोषोऽपि यद्व्रीहियवयागयोः। विकल्प आश्रितस्तत्रगतिरन्या न विद्यते।
व्यवस्था चात्र पूर्वपक्षो येनाश्रितस्तस्य यावज्जीवं तस्यैव निर्वाहः इत्येवंरूपः। यथोक्तं। विकल्पेषु च सर्वेषु स्वयमेवैक
मादितः। अंगीकरोति यं कर्त्ता स विधिस्तस्य नेतरः। न च प्राथमिकपक्षपरिग्रहसमये इच्छाया एव नियामकत्वमास्थेयं।

तथाच दुर्निवारो त्रैच्छिकविकल्प इति वाच्यं । यथासंख्यं व्यवस्थाया अंगीकारादिति । अत एव यस्य शाखायामुदिता
नुदितयोर्मध्ये एकस्मिन्विधा उभयस्वस्वपरपरिग्रहः । यथा वाजसनेयिशाखायाम् । तस्मादुदितहोमिनो विच्छिन्नमग्निहो
त्रमस्यामह इति । इत्यनितोना विच्छेदनिंदा । तेन नित्यतयैकपक्ष एवादर्तव्यः । जैमिनिः । नहि निंदा केवलं निंदां
निंदयितुं प्रवर्त्तते । अपितर्हि निंद्यादन्यं स्तोतुमिति । तस्मादुदितहोमस्तुतौ अनुदितहोमनिंदा । साच विधिसंस्पृष्टे
भवति । अर्थे तु विधिसंस्पृष्टे निषेधो नार्थवान्भवेदिति भट्टाः । मनुः । उदितेनुदिते चैव समयाध्युषिते तथा । सर्व
यावर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः । तल्लक्षणमाह व्यासः । रात्रेः षोडशभागे तु ग्रहनक्षत्रभूषिते । कालं त्वनुदितं
ज्ञात्वा होमं कुर्याद्विचक्षणः । कात्यायनः । तथा प्रभातसमये नष्टे नक्षत्रमंडले । रविर्यावन्न दृश्येत समयाध्युषितस्तु सः ।
रेखामात्रस्तु दृश्येत रश्मिभिस्तु समन्वितः । उदितं तु विजानीयात्तत्र होमं प्रकल्पयेत् । सायंस्वरूपं सर्वेषामविशिष्टम् ।
तथाच छंदोगपरिशिष्टे । यावत्सम्यङ् न भाव्यंते नभस्यृक्षाणि सर्वतः । नच लोहिततामापन्नैः स्वः सायं तु हूयते । यज
मानासन्निधौ कर्मप्रकरणे । ऋत्विक्पुत्रोथवा पत्नी शिष्यो वाथ सहोदरः । प्राप्यानुज्ञां विशेषेण जुहुयाद्वा यथाविधि
अन्यैः शतहुताद्धोमादेकः पुत्रः ततो वरं । पुत्रैः शतहुताद्धोमादेको ह्यात्महुतो वरं । श्रौते स्मार्त्ते त्वध्वर्य्योर्मुख्यत्वं क्ष
त्रवैश्ययोः । स्मार्तेपि तस्य मुख्यत्वं स्वयं होमानधिकारात् इति । कात्यायनोपि । असमक्षं तु दंपत्योर्होतव्यं नर्त्विगादिना ।

५२ द्वयोरप्यसमक्षं तु भवेद्धुतमनर्थकं । एतत्प्रोषिते यजमाने पत्नीसन्निधौ । यदाह स्मृतिः । निक्षिप्याग्निं स्वदारेषु परि
र्म २८ कल्प्यर्त्विजेऽथ वा । प्रवसेत्कार्यवान्विप्रो न वृथैव चिरं क्वचित् । कार्यमात्रनिर्वाहार्थं अवृतास्वैकर्मसत्तां । एतेन प्रवासे
52 पतिरेवाधिक्रियते कार्यवान् न पत्नी । तथा । सन्निधौ यजमानः स्यादुद्देशत्यागकारकः । असन्निधौ तु पत्नी स्या
दुद्देशत्यागकारिका । असन्निधौ तु पत्न्याः स्यादध्वर्युस्तदनुज्ञया । उन्मादे प्रसवे चैव नैव कुर्वीतानुज्ञया विना ।
ऋत्विजोऽप्यभावे कन्या पत्नी च जुहुयात् विना पर्युक्षणक्रियां । श्रौतहोमानन्तरं स्मार्त्तः । तत्र भारद्वाजः । होमं वै
तानिकं कृत्वा स्मार्त्तं कुर्याद्विचक्षणः । स्मृतीनां वेदमूलत्वात्स्मार्त्तं केचित्पुरा विदुः । पुरा विदुरिति पुरश्चाधानविष
यं । कात्यायनः । पौर्णमास्यत्यये हव्यं होतव्यं यदहर्भवेत् । तदूर्ध्वं जुहुयादेवममावास्यात्ययेपि च । मरीचिः ।
शरीरात्त्रिर्भवेद्यत्र भयाद्वार्त्तिः प्रजायते । तथान्यास्वपि चापत्सु पक्षहोमो विधीयते । पक्षहोमं च यैर्हुत्वा गत्वा कस्मा
न्निवर्त्तितः । होमं पुनः प्रकुर्वीत न चास्मै शेषभाग्भवेत् । प्रवासितोऽग्निहोत्री च त्रिपंचाशीतं सप्त वा । दातव्यो होम
एकाहे सायं प्रातः पृथक्पृथक् । स्मृत्यन्तरेपि । पक्षहोमं प्रकुर्वीत प्रवसेदग्निमान्यदि । पंचयज्ञविधानं तु लौकि
काग्नौ विधीयते । परेणाग्नौ हुते स्वार्थे परस्याग्नौ स्वयं हुते । पितृयज्ञात्यये चैव वैश्वदेवात्ययस्य च । अनिष्ट्वा नव
यज्ञेन नवान्नप्राशने तथा । भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् । तत्र सायमादि प्रातरपवर्गोयं प्रयोगः ॥

यदुक्तं परिशिष्टे । सायमादिप्रातरंतमेकं कर्म प्रचक्षते । पौर्णमास्यादिदर्शांतमेकं कर्म जगुर्बुधाः । तद्द्रव्यविषये स्मृतिः । दध्नातंडुलैरक्षतैर्वा । तदभावे श्यामाक नीवार वेणुयव कंदमूल फलादीनि । तंडुलशब्देन व्रीहियवोपलक्षणार्थः । अतएव व्रीहिभिर्यजेत यवैर्वा । तत्परिमाणं । व्रीहीणांच यवानांच शतमाहुतिरिष्यते । अत्र सायं होमे यद्द्रव्यं प्रातरपि तदेव होतव्यं । उक्ताभावे उक्तप्रतिनिधिनाऽनुकल्पविकल्पौ ग्राह्यौ । अत्रायं क्रमः । श्रीरामनाथस्य परमेश्वर प्रीतये सायं होममहं करिष्ये । सकामश्चेत् श्रुतिस्मृत्युक्त फलावाप्तये संकल्पं कुर्यात् । तत्र सूर्य प्रजापती अग्नि कद्रुवेणहं यदेवे । उपयमन कुशानादायोत्तिष्ठन्समिधो आघार्य्योपस्थान्जुहुयात् । ॐ सूर्याय स्वाहा । इदं सूर्याय । ॐ प्रजापतये स्वाहा । इदं प्रजापतये । ततो बिम्बाधिष्ठ्यनुवाक जपं विधाय ब्रह्मयज्ञं कुर्यात् । ततो ऽग्निं दंपती नमस्कृत्य । प्रमादादिति पठेत् । निरग्निं प्रतिहोमानुकल्पमाह व्यासः । ॐ सूर्याय नमः प्रातः सायं चैवाग्नये नमः । अनग्निमान्ब्रह्मचारी चरद्याद्दुदकांजलिं । हुत्वाग्निं सूर्य दैवत्यान्जपेन्मंत्रान्यथार्थवत् । सूर्य दैवत्यान् उदुत्यं जातवेदसमित्यादीन् । गार्ग्योपि । कृतदारो न वै तिष्ठेत्क्षणमप्यग्निना विना । तिष्ठेत वेद्द्विजो व्रात्यस्तथा च पतितो भवेत् । श्रौताभावे स्मार्त्तानुष्ठानमावश्यकमाह मरीचिः । विदध्याद्देवस्यंजां च प्रातर्होमादनंतरं । सं

५२ ड्रिलेप्रतिमा यां वाव ह्रैवाहृदयेऽपि वेति ॥ प्रासंगिकं परिसमाप्य प्रकृतमनुसंधीयते । तथा च कात्यायनः । अथा
तो नित्यस्नानं । नद्यादौ मृद्गोमयकुशतिलसुमनस आहृत्योदकान्तं गत्वा शुचौ देशे स्थाप्य प्रक्षाल्य पाणिपादं कुशोप
53 ग्रहो बद्धशिखी यज्ञोपवीत्याचम्योरुं हीति तोयमामंत्र्यावर्तयेद्ये ते शतमिति । सुमित्रिया न इत्यपोंजलिनादाय दुर्मि
त्रियास्तस्मै इति द्वेष्यं प्रति निषिंचेत्कटिं वस्त्रं जंघे चरणौ करौ मृदा त्रिस्त्रिः प्रक्षाल्याचम्य नमस्योदकमालभेदं गानि
मृदेदं विष्णुरिति सूर्याभिमुखो मज्जेदापो अस्मानिति स्नात्वोदिदाभ्य इत्युन्मज्य निमज्योन्मज्याचम्य गोमयेन वि
लिंपेन्मानस्तोक इति । ततोऽभिषिंचेदिमं मे वरुणेति चतसृभिर्भाग उदुत्तमं मुंचन्त्ववभृथेत्यंते चैव निमज्योन्म
ज्याचम्य दर्भैः पावयेदापो हिष्ठेति तिसृभिरिदमापो हविष्मतीर्देवीरापः इति द्वाभ्यामापो देवा द्रुपदादिव शन्नो देवी
रपां रसमयोदेवीः पुनंतु मेति नवभिश्चित्पतिर्मेत्योंकारेण व्याहृतिभिर्वा विष्णोर्वा स्मरणं । कातीयानामेतत्स्ना
नं सूर्याभिमुखेनैव प्रवाहमुखेनान्येषामिति कर्कः । शिरस्नानमित्यनेनाशिरस्कोऽपि प्राणायामोऽस्तीति गम्यत इति
हरिहरः ॥ अथ व्याख्या ॥ स्नानं नाम बहिः । सर्वांगीणः यथोरुजलसंयोगः तदुपक्रम्य स्नेति कर्तव्यतादिकं स
र्वं दर्शयति । अथेति दिनतृतीयभागानंतरमित्यर्थः । अत इति यतः स्नानेनैव वैधकर्माधिकारोऽतो नित्यस्नानं ।
प्रात्यहिकं स्नानं । नद्यादावित्यत्र तद्गुणसंविज्ञानो बहुव्रीहिः । मृद्गोमयादित्यादि । प्रक्षाल्य पाणिपादमिति पारस्क

पादश्च पाणिपादं । प्राधान्येनेकांतरांतस्य पाणेः पूर्वनिपातः । एकैकया मृदा पादौ हस्तौ च प्रक्षाल्य कुशोपग्रहः कुशहस्तः । बद्धशिखी यज्ञोपवीती । यद्यपि नित्यं यज्ञोपवीतीत्यनद्विधिना मुक्तशिखा वर्ज्येमित्य तदीयनिषेधेन पुरुषार्थतयोपवीतीत्वशिखाबंधने कात्यायनेन विहिते तथापीदानिं कृत्वर्थतामाश्रित्य ते विदधाति इति स्मरणार्थं वा यज्ञोपवीती सव्यासव्यधृतोपवीतवान् । उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः । सव्ये प्राचीनावीती निवीती कंठमज्जने इति मनूक्तेः । यत्तु यज्ञोपवीती हि विशेषविधिनोत्तरीयनिवृत्तिः तत्र परिसंख्यापत्तेः । बहुवाक्यविरोधाच्च । न च विशिख इत्यत एवागतत्वमपि प्राप्तमेवेति युक्तं तात्पर्यं लभ्यतः शास्त्रातेः बलवत्वाच्च । यद्वा बद्धशिखी बद्धचूडः हेष्यामिति । यस्यां दिशि द्वेष्योऽस्ति तामुद्दिश्य जलं क्षिपेत् । तां दिशं निरस्तति यस्यां दिशि द्वेष्योऽस्ति ॥ दुर्मित्रियास्तस्मै भूयासु रिति बोधायनः । निरस्तति सिंचति । कटिमित्यादि पायुमंडलबस्ति नाभिमेढ्रांतरालं ऊरुमूलितोऽधस्तात् ग्रंथिपर्यंतं जंघे ग्रंथितोऽधस्तात् गुल्फपर्यंते । चरणे गुल्फतोऽधस्तान्तलमभिव्याप्य । करौ मणिबंधादारभ्यान्तर्बहिरंगुल्यग्रेऽभिमुख इति । आपो ऽस्मानिति सूर्याभिमुख इति । आपो अस्मानिति । सूर्याभिमुखो निमज्योन्मज्याचमेत्यन्वयः । इत्यत्र मज्जनत्रयं चतुर्थं तु मज्जनं मते चेत त्रिमज्येति तेनात्रस्ना

६१ नेमज्जनचतुष्टयमितिकेचित् । अन्ये तु आपो अस्मानिति निमज्ज उन्मज्येत स्य सापेक्षत्वात् स्नात्वेति तस्यैव मज्जनस्यानु

ग्रावधि । मृदा सव्यहस्तागृहीतया तावत्कटिमसकृदालिप्य प्रक्षाल्य पुनरालिप्य प्रक्षालयेत् । एवं वक्ष्यादिकमपि त्रिः सूर्या

५४ 54 वादः। तेनो पास्मानि उदिदाभ्य इति द्वाभ्यां। निमज्योन्मज्य पुनस्त्रूस्मी निमज्योन्मज्याचमेत्यन्वयः। तेन निमज्जन
द्वयमेव लभ्यते स्नात्वेत्यस्य वक्ति वच। यदि स्यादशुचिर्नरः। आचम्य विधिवत्पश्चात्ततः स्नानं समाचरेत्। प्रक्षाल्य
हस्तौ पादौ च शिखाबंधनमाचरेत्। प्रक्षाल्य पत्तस्त्रं च मृद्भिरद्भिः शनैः शनैः। सपवित्रं करे कृत्वा आचम्य प्राङ्मु
खः स्थितः। प्राणायामत्रयं कुर्यात्कालज्ञानमतः परं। आपादमस्तकं देहं तत्येव क्षालयेद्बुधः। उरूंपाहि त्यृचा
तोयमुपस्थाय प्रदक्षिणं। आवर्तयेत्तदुदकं ये ते शतमिति त्यृचा। सुमित्रिया इत्यंजलिमुद्धरेद्देवतं स्मरन्। दुर्मि
त्रिया इति द्वेष्यं ध्यायन्नापः प्रसेचयेत्। अद्भिर्मृद्भिश्च गात्राणि क्रमशस्त्ववनेजयेत्। एकया तु शिरः क्षाल्यं द्वा
भ्यां नाभेस्तथोपरि। कटिं वस्तुरूजंघे च चरणौ च त्रिभिः त्रिभिः। प्रक्षाल्य हस्तौ वाचम्य नमस्कृत्य जलं ततः। य
त्किंचेति मंत्रेण नमस्येत्प्रयतांजलिः। महाव्याहृतिभिः पश्चादाचमेत्प्रयतोपि सन्। आलभेन्मृदं गात्राणि इदं वि
ष्णुरिति त्यृचा। भास्कराभिमुखो मज्जेदापो अस्मानिति त्यृचा। ततोभिमृश्य गात्राणि निमज्योन्मज्य वै पुनः।
आचम्य गोमयेनापि मानस्तोकाः समालभेत्। ततोभिषिच्य मंत्रैस्तु वारुणैस्तु यथाक्रमं। इमं मे वरुण इति त्वन्नः
स त्वन्न इत्यपि। आप उदुत्तममिति। मुंचंत्वव भृथेति च। अभिषिच्य तदात्मानं निमज्याचम्य वै पुनः। दर्भैस्तु
पावयेन्मंत्रैरव्यंगैः पावनैः शुभैः। आपो हि ष्ठेति तिसृभिरिदमापो हविष्मती। देवीराप इति द्वाभ्यामापो देवा

इतितृचा । द्रुपदादिवेति तृचा शन्नोदेवीरपांरसं । आपोदेवीः पावमान्यः पुनंत्वाद्यास्तृचो भुवा । चित्पति
मेतिचवशनैः पाव्यात्मानं समाहितः । वारुणीभिव ऋक्सूक्तं शक्तितः संप्रयोजयेत् । जलमध्ये स्थितो विप्रः अघ
मावो हरिं स्मरेत् । ॐकारेण व्याहृतिभिः गायत्र्याच समाहितः । आदावंते च कुर्वीत अभिषेकं यथाक्रमं । अपां
मध्ये स्थितस्यैव मार्जनं च विधीयते । अंतर्जले जपेन्मग्नस्त्रिः कृत्वोह्यघमर्षणं । द्रुपदां वा त्रिरभ्यस्येदायं गो
रितिवा तृचा । हंसः शुचिषदित्सूक्तं त्रिरावर्त्य जपेद्द्विजः । अन्यानि चैव सूक्तानि स्मृतिदृष्टानि संस्मरेत् । व्याहृ
तिसप्रणवां गायत्रीं त्रिर्जपेदथ । आवर्तयेद्वा प्रणवं स्मरेद्वा विष्णुमव्ययं ॥ ॥ अथ स्नानप्रयोगः ॥ ॥
नद्यादौ गत्वा शुद्धे वाससी परिधाय कृतकुशोपग्रहः कृतप्राणायामो दक्षिणपाणिनागृहीतवारिकुसुमयव
कुशो देशकालौ संकीर्त्य स्नानमहं करिष्ये । ततस्तीरं प्रक्षाल्य शुभ्रां मृदमादाय गोमयं कुशान् तिलान् दंता
न्सुरभीनि पुष्पाणि पृथक्कृत्य कक्षां प्रापयेत् । प्रथमभागेन मृदा पाणिपादानुलेपनं । अश्वक्रांते रथक्रांते
विष्णुक्रांते वसुंधरे । मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतमिति मंत्रेण । ततः प्रक्षालितपाणिपादः सपवि
त्रकरः बद्धत्रिकच्छशिखो धृतवामस्कंधस्तत्र स्थले जले चैकं पादं कृत्वा वामस्कंधबाहुं विधाय मुक्तांगुष्ठ तरं २
कनिष्ठकेन दक्षिणहस्तेन फेनबुद्बुदवर्ज्यं स्वच्छं माषमज्जनपरिमितं जलमादायांगुष्ठमूलस्य ब्राह्मेण तीर्थे

५५ णशाद्धमकुर्वंस्त्रिः पिबेत्। ततोंगुष्ठमूलेन मुखं द्विमृज्यांगुष्ठमूलेन प्रक्षाल्यांगानि संस्पृशेत्। तद्यथा। त

55 र्जनीमध्यमानामिकाभिरास्यं। अंगुष्ठतर्जनीभ्यां नासारंध्रद्वयं। अनामिकांगुष्ठाभ्यां चक्षुषी। ताभ्यां श्रोत्रे

अंगुष्ठकनिष्ठकाभ्यां नाभिं। पाणितलेन हृदयं। संकुचितकराग्रेण स्कंधद्वयं। एवं शीर्षं। एवं स्मार्ताचम

नं विधाय। तत उरुंहीत्यस्य मंत्रस्य शुनःशेफ ऋषिस्त्रिष्टुप्छंदो वरुणो देवता जलाभिमंत्रणे विनियोगः।

ॐ उरुंहि राजा वरुणश्चकार सूर्याय पंथामन्वेतवा उ। अपदे पादा प्रतिधातवेकरुतापवक्ता हृदया

विधश्चित्। नमो वरुणायाभिष्ठितो वरुणस्य पाशः १ इति मंत्रेण तोयमामंत्रयेत्। ये ते शतमिति मंत्र

स्य वामदेव ऋषिस्त्रिष्टुप्छंदो वरुणसविता विष्णुर्मरुतः स्वर्का देवताः तत्तोयावर्तने विनियोगः। ॐ ये ते शतं

वरुण ये सहस्रं यज्ञियाः पाशा वितता महांताः। तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुंचंतु मरुतः स्वर्काः २

इति जलं दक्षिणहस्तेन दक्षिणावर्तमनामिकया त्रिः प्रदक्षिणमालोडयेत्। ततो गंगां ध्यात्वा। सितमक

स्ना र निषण्णां शुभ्रवर्णां त्रिनेत्रां करधृतकलशोद्यत्सोत्पलामत्यभीष्टां। विधिहरिहररूपां सेंदुकोटीरयुक्तां

कलितसितदुकूलां जाह्नवीं तां नमामि १ आवाहयाम्यहं गंगे त्वां नार्य इह सुंदरि। एहि गंगे नमस्तुभ्यं सर्वती

र्थसमन्विते। ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे। तेन सत्येन मे देव तीर्थं देहि दिवाकर। आधारः सर्व

भूतानां विष्णोरतुलतेजसः। तद्रूपाश्च ततो जातास्ता आपः प्रणमाम्यहम् १ सुमित्रिया न इति मंत्रस्य प्रजाप
तिर्ऋषिरापो देवता यजुश्छंदो जलग्रहणे विनियोगः। ॐ सुमित्रिया न ऽआप ओषधयः सन्तु इत्यनेनापोंजलि
ना गृहीत्वा यजुश्छंदः अंजलिप्रदाने विनियोगः। ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यं च वयं द्विष्मः।
इत्यनेन यस्यां दिशि द्वेष्टास्ति तस्यां दिशि द्वेषिविक्रमावुद्दिश्य त्वाद्वेष्टारमभावे कामादीनस्य तं जलं प्रक्षिपेत्।
द्वितीयभागेन मृदा कट्यादीनामनुलेपनं। मृदं वामकरे गृहीत्वा योभयकटिमनुलिप्यादिप्रक्षाल्य तथैव पुनर्द्वि
र्लेपनप्रक्षालने कुर्यात्। तथैव वर्तिलिङ्गऊरू जंघे चरणौ करौ च मृदा प्रत्येकं त्रिसीत्रिभिः प्रक्षाल्याचम्य। ॐ उ
दकाय नमः इत्युदकं नमस्कृत्य। ततस्तृतीयभागेन मृदा इदं विष्णुरिति मंत्रेण पाणिगृहीतया मृदा लला
टादि नाभिपर्यंतानि शरीरांगाण्यनुलिंपयेत्। वामहस्तया मृदा नाभिमारभ्य पादपर्यंतं गात्रांगाण्यनुलिं
पयेत्। इदं विष्णुरिति मंत्रस्य मेधातिथिर्ऋषिर्गायत्री छंदो विष्णुर्देवता अंगान्यनुलेपने विनियोगः। ॐ
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांसुरे। ततो नाभिदघ्ने जले स्थित्वा। आपो ऽस्मा
स्मानिति मंत्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप् छंदः आपो देवता निमज्जने विनियोगः। ॐ आपो ऽस्मान्मात
रः शुंधयंतु घृतेन नो घृतप्वः पुनंतु विश्वं हि रिप्रं प्रवहंति देवीः इति निमज्ज्य। ॐ उदिताभ्यः शुचिरापूत

५६ एमि इति पठित्वोन्मज्ज्य पुनः तूष्णीं निमज्ज्योन्मज्ज्याचमेत्। ततः पालाशीं गोमयमादाय पूर्वम्लेपनं ललाटादिपा
दतलपर्यंतं गात्राण्युपलिंपयेत्। मानस्तोक इति मंत्रस्य कुत्स ऋषिर्जगती छंदो रुद्रो देवता अंगान्यनुलेपने विनियोगः।
56 ॐ मानस्तोके तनये मान ऽआयुषि मानो गोषु मानो ऽअश्वेषु रीरिषः मानो वीरान्रुद्र भामिनो वधीर्हविष्मंतः सदमि
त्वा हवामहे इति पूर्ववत्स्नात्वा। ततश्चुलुकेन जलमादाय इति मंत्रस्व शिरोभिषिंचेत्। इमम्मे वरुणेति मंत्रस्य
शुनःशेप ऋषिर्गायत्री छंदो वरुणो देवता अभिषेके विनियोगः। ॐ इमम्मे वरुण श्रुधी हवमद्या च मृडय
त्वामवस्युराचके। तत्वायामीति मंत्रस्य शुनःशेप ऋषिस्त्रिष्टुप् छंदो वरुणो देवता अभिषेके विनियोगः।
ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः
प्रमोषीः। त्वन्न इति मंत्रस्य वामदेव ऋषिस्त्रिष्टुप् छंदो ऽग्निवरुणौ देवते अभिषेके विनियोगः। ॐ त्वन्नो ऽअ
ग्ने वरुणस्य विद्वान्देवस्य हेडो ऽअवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्र
मुमुग्ध्यस्मत्। सत्वन्न इति मंत्रस्य वामदेव ऋषिस्त्रिष्टुप् छंदो ऽग्निवरुणौ देवते अभिषेके विनियोगः।
ॐ सत्वन्नो ऽअग्नेवमो भवोती नेदिष्ठो ऽअस्या ऽउषसो व्युष्टौ अवयक्ष्व नो वरुणं रराणो वीहि मृडी
कं सुहवो न एधि। मापद इति प्रजापतिऋषिर्हृदयस्थूलं देवतं यजुः छंदः अभिषेके विनियोगः।

ॐ मापोमौषधीर्हिंसीर्द्धाम्नोधाम्नोराजंस्ततोवरुणनोमुञ्च यदाहुरघ्न्याऽइतिवरुणेतिशपामहे ततोवरुणनोमुञ्च।
उदुत्तममितिमंत्रस्यशुनःशेपऋषिस्त्रिष्टुप्छंदोवरुणोदेवतापावनेविनियोगः। ॐ उदुत्तमंवरुणपाशमस्मदवाधमं
विमध्यमंश्रथाय अथावयमादित्यव्रतेतवानागसोऽअदितयेस्याम। मुंचंत्वितिमंत्रस्यबंधुऋषिरनुष्टुप्छंदः ओषधो
देवता अभिषेकेविनियोगः। ॐ मुञ्चन्तुमाशपथ्यादथोवरुण्यादुत अथोयमस्यपड्वीशात्सर्वस्माद्देवकिल्बिषात्।
अवभृथेत्यस्यप्रजापतिऋषिरनुष्टुप्छंदोयज्ञोदेवता अभिषेकेविनियोगः। ॐ अवभृथनिचुंपुणनिचेरुरसिनिचुम्पु
णः अवदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यकृतम्पुरुराव्णोदेवरिषस्पाहि। ततोवहतिजलेप्रवाहाभिमुखःस्थि
रःसूर्याभिमुखोमौनीशरवन्निमज्योन्मज्याचमेत्। ततोवक्ष्यमाणमंत्रैरद्भिर्दर्भाग्रैर्नाभिदक्षिणपार्श्वमारभ्यपादादिं
शिरोपरिनीत्वानाभिवामपार्श्वपर्यंतंप्रदक्षिणमात्मानंपावयेत्। तत्रमंत्राः। ॐकारस्यब्रह्माऋषिर्गायत्रीछंदःपर
मात्मादेवतापावनेविनियोगः। ॐ पुनातु। ॐ महाव्याहृतीनांप्रजापतिऋषिर्गायत्र्युष्णिगनुष्टुभश्छंदांस्यग्निवा
युसूर्यादेवताःपावनेविनियोगः। ॐ भूः पुनातु। ॐ भुवः पुनातु। ॐ स्वः पुनातु। तत्सवितुरितिविश्वामित्रऋषिर्गा
यत्रीछंदःसवितादेवतापावनेविनियोगः। ॐ तत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि। धियोयोनःप्रचोदयात् पुनातु।
आपोहिष्ठेतितिसृणांसिंधुद्वीपऋषिर्गायत्रीछंदः आपोदेवतापावनेविनियोगः। ॐ आपोहिष्ठामयोभुव स्तानऽऊर्जे

५८ दधातन: महेरणाय चक्षसे यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः तस्मा अरंगमाम वो यस्य क्षयाय जि
59 न्वथ आपो जनयथा च नः पुनातु। इदमित्यस्य प्रजापतिर्ऋषिर्महापंक्तिश्छंद आपो देवता पावने विनियोगः। ओं इदमापः
प्रवहतावद्यं च मलं च यत् यच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणं आपो मा तस्मादेनसः पवमानश्च मुंचतु पुनातु।
हविष्मतीरित्यस्य प्रजापतिर्ऋषिरनुष्टुप्छंदो लिंगोक्ता देवता पावने विनियोगः। ओं हविष्मतीरिमा आपो हविष्मां
आविवासति हविष्मान्देवो अध्वरो हविष्माँ अस्तु सूर्यः पुनातु। देवीराप इत्यस्य प्रजापतिर्ऋषिः पंक्तिश्छंद
आपो देवता पावने विनियोगः। ओं देवीरापो अपां नपाद्यो व ऊर्म्मिर्हविष्य इंद्रियावान्मदिन्तमः तं देवेभ्यो दे
वत्रा दत्त शुक्रपेभ्यो येषां भाग स्थ स्वाहा पुनातु। कार्षिरसीत्यादीनां त्रयाणां प्रजापतिर्ऋषिरनुष्टुप्छंदः कार्षिरसीत्य
स्या लस्य चतुष्टुयस्याज्यं देवता समुद्रस्य समाप इत्यस्य चापो देवता पावने विनियोगः। ओं कार्षिरसि समुद्रस्य त्वा क्षि
त्या उन्नयामि समापो अद्भिरग्मत समोषधीभिरोषधीः पुनातु। आपो देवा इत्यस्य वरुण ऋषिस्त्रिष्टुप्छंद आपो
देवता पावने विनियोगः। ओं आपो देवी मधुमतीरगृभ्णन्नूर्जस्वती राजस्वश्चितानाः याभिर्मित्रावरुणावभ्यषिञ्च
न्याभिरिन्द्रमनयन्नत्यरातीः पुनातु। द्रुपदादिवेत्यस्य प्रजापत्याश्विसरस्वतीन्द्रा ऋषयो ऽनुष्टुप्छंद आपो देवता पाव
ने विनियोगः। ओं द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः पुनातु।

शन्न इत्यस्य दध्यङ्ङाथर्वण ऋषिर्गायत्री छंद आपो देवता पावने विनियोगः । ॐ शन्नो देवीरभिष्टय आपो भवं
तु पीतये शंयोरभिस्रवंतु नः पुनातु । अपांरसमिति बृहस्पतिर्ऋषिरनुष्टुप्छंद इंद्रो देवता पावने विनियोगः ।
ॐ अपांरसमुद्वयसं सूर्ये संतं समाहितं अपांरसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतोसीन्द्राय त्वा जु
ष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् पुनातु । अपो देवीरित्यस्य सिंधुद्वीप ऋषिर्पंक्तिसारिणी बृहती छंदः
आपो देवता पावने विनियोगः । ॐ अपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः तासामास्थानादुज्जिहतामोषधयः
सुपिप्पलाः पुनातु । पुनंतु मेत्यस्य प्रजापतिर्ऋषिरनुष्टुप्छंदः पितरो देवताः पावने विनियोगः । ॐ पुनंतु मा पिताम
हाः पुनंतु प्रपितामहाः पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै पुनातु । अग्न इत्यस्य वैश्वानर ऋषिर्गायत्री छंदोग्नि
र्देवता पावने विनियोगः । ॐ अग्न आयूंषि पवस आसुवोर्ज्जमिषं च नः आरे बाधस्व दुच्छुनाम् पुनातु । पुनंतु मे
त्यस्य प्रजापतिर्ऋषिरनुष्टुप्छंदो लिंगोक्ता देवता पावने विनियोगः । ॐ पुनंतु मा देवजनाः पुनंतु मनसा धियः पुनंतु नं
विश्वा भूतानि जातवेदः पुनीहि माम् पुनातु । पवित्रेणेत्यस्य प्रजापतिर्ऋषिर्गायत्री छंदोग्निर्देवता पावने विनियोगः ।
ॐ पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् अग्ने क्रत्वा क्रतूँ रनु पुनातु । यत इति प्रजापतिर्ऋषिर्गायत्री छंदोग्निर्दे
वता तृतीय पादस्य ब्रह्मा देवता पावने विनियोगः । ॐ यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ब्रह्म तेन पुनातु मा पुनातु ॥

५८ पवमान इत्यस्य प्रजापतिर्ऋषिर्गायत्रीछंदोग्निर्देवता पावने विनियोगः । ओं पवमानः सोऽद्यनः पवित्रेण विचर्ष
58 णिः यः पोता स पुनातु मा पुनातु । उभाभ्यां देवेत्यस्य प्रजापतिर्ऋषिर्गायत्री छंदः सविता देवता पावने विनियोगः ।
ओं उभाभ्यां देव सवितः पवित्रेण सवेन च मां पुनीहि विश्वतः पुनातु । वैश्वदेवी पुनतीत्यस्य प्रजापतिर्ऋषिस्त्रिष्टु
प्छंदो वैश्वानरो देवता पावने विनियोगः । ओं वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः तया मदं
तः सधमादेषु वयं स्याम पतयो रयीणाम् पुनातु ॥ ॥ वक्ष्यमाणमंत्राभ्यां नाभेरूर्द्ध्वं पावयेत् । चित्पतिर्मेति
त्रयाणां प्रजापतिर्ऋषिर्मी वाक्पतिर्मेत्युभयोः प्रजापतिर्देवता देवो मा इत्यस्य सविता देवता यजुः छंदः पावने विनि
योगः । ओं चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः तस्य
ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् पुनातु । ओं वाक्पतिर्मा पुनातु देवो मा सविता पुनात्वच्छिद्रेण
पवित्रेण सूर्यस्य रश्मिभिः तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् पुनातु । अनेन नाभे
रधः पावयेत् । ओं देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः तस्य ते पवित्रपते पवित्रपूतस्य
त्कामः पुने तच्छकेयम् पुनातु । पुनः समुच्चयेन सर्वांगं पावयेत् । ओं भूः पुनातु । ओं भुवः पुनातु । ओं स्वः पुनातु ।
ओं तत्सवितु० । ओं इमम्मे० । ओं तत्त्वायामि० । ओं त्वन्नोऽग्ने० । ओं स त्वन्नो० । ओं मा पो मोष० । ओं उदुत्तमं० । ओं मुंचंतु मा० ।

ॐ अवभृथ्यनि०। पूर्ववदेतैर्मंत्रैः स्वशिरसि जलं क्षिपेत्। तत अपाघमित्यनेनापामार्गैस्त्रिभिर्मार्जयेत्।
अपाघमित्यस्य शुनःशेप ऋषिरनुष्टुप्छंदो लिंगोक्ता देवता अपामार्जने विनियोगः। ॐ अपाघमप
किल्बिषमपकृत्यामपोरपः अपामार्ग त्वमस्मदप दुःस्वप्न्यं सुव। ततः काण्डात्काण्डादिति मंत्रेण दू
र्वाभिस्त्रिसृभिर्मार्जयेत्। ॐ काण्डात्काण्डादित्यस्याग्नि ऋषिरनुष्टुप्छंदः दूर्वा स्तुको देवता मार्जने विनि
योगः। ॐ काण्डात्काण्डात्प्ररोहंति परुषः परुषस्परि एवानो दूर्वे प्रतनु सहस्रेण शतेन च। ततो वक्ष्यमाण
षट्पद्यानि। ऋतं च सत्यं चेति अंतर्जले त्रिः पठेत्। द्रुपदादिवेति। आयङ्गौरिति ऋक्त्रयं। वासशिरसं
प्राणायामं विष्णोः स्मरणं त्रिरावर्तयेत्। ॐ आयङ्गौरित्येषां त्रयाणां प्रजापतिर्ऋषिर्गायत्री छंदोऽग्निर्दे
वता परावरस्तपो देवता अघमर्षणे विनियोगः। ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः पितरं च प्रय
न्स्वः। ॐ अंतश्चरति रोचनास्य प्राणादपानती व्यख्यन्महिषो दिवम्। ॐ त्रिंशद्धाम विराजति वा
इति कातीय पतंगाय धीयते प्रतिवस्तोरह द्युभिः॥ ॥ अथ स्नानानंतरं वस्त्रधारणविधिः॥ तथा च कात्यायनः।
स्नानविधिः॥ उत्तीर्य धौते वाससी परिधाय। स्नानानंतरं वासः परिदध्यात्। तथा च मत्स्यपुराणम्। एवं स्नात्वा ततः पश्चादा
५९ चम्य च विधानतः। उत्थाय वाससी शुक्ले शुद्धे तु परिधाय चेति। कर्म कुर्यादिति शेषः। योगियाज्ञवल्क्यः।

उत्तरीयं पृष्ठदेशावस्थितदक्षमेव धार्यं । आगमे चोत्तरीयं च कर्मकालेन धारयेत् । धार्यमारोहिस्तकृतं स्वयमेव निकृंततीति वचनात् ॥२

५९ स्नात्वैवं वाससी धौते अच्छिन्ने परिधाय च । प्रक्षाल्योरू मृदाद्भिश्च हस्तौ प्रक्षालयेत्तत इति । अत्र विशेषमाह व्यासः ।
नोत्तरीयमधः कुर्यान्नोपर्याधस्त्यमंबरं । नांतर्वासो विना जातु निवसेद्वसनं बुध इति ॥ परिधेयवस्त्रे विशेषमाह देवलः ।
स्वयं धौतेन कर्तव्या क्रिया धर्म्या विपश्चिता । ननु नेजकधौतेन नाहतेन न कुत्रचिदिति । नेजको रजकः । नाहतेने
ति समस्तपदम् । ब्राह्मणस्य सितं वस्त्रं नृपतेरक्तमुल्वणं । पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्यते । विकच्छो
अनन्तेऽनग्नमित्याहुर्नग्नं कौपीनवर्जितम् ॥ नुत्तरीयश्च नग्नश्चावस्त्र एव च । श्रौतं स्मार्तं तथा कर्म न नग्नश्चिंतयेदपि । नग्नः स्यान्मलवद्वासो नग्नः कौशे
यकेवलः । नग्नो द्विगुणवस्त्रः स्यान्नग्नो दग्धपटस्तथा । नग्नश्च स्यूतवस्त्रः स्यान्नग्नो ग्रथितवस्त्रकः । नग्नश्च
पंचनग्नमाह नारदः । एककच्छो द्विकच्छश्च मुक्तकच्छस्तथैव च । एकवासा अवासाश्च नग्नः पंचविधः स्मृतः । पूर्वकच्छे दशागोप्यानामोनमध्यतु वाससा । नाभनीचा स्ततीया तु त्रिकच्छस्तदा भवेत् । एकवासा यथाप्राप्ते परिधायततः शुचिः । अन्यत्सत्योत्तरासंगमाचम्य प्राङ्मुखस्थितः ॥ ५९ ३.५४
बहुवस्त्रः स्यान्नग्नः कौपीनकेवलः । काषायवस्त्रः सात्त्वाश्च दश नग्नाः प्रकीर्तिताः । कौशेयमात्रधारणएव नग्न
ता । ननु परिधेयोत्तरीयवासोंतरसाहित्येपि । कौपीने चैवं । उभयत्रापि केवलशब्दोपादानस्वरसात् ॥ नग्नः कौशेयवासस इति पाठे कौशेयवस्त्रनिषेधो ब्राह्मणमात्रे इत्येके । परं तु कौशेयविषय इत्यन्ये । मलिनादिवर्जनं शक्तेपरं । शक्तिविभवे नजीर्णमलवद्वासाः स्यादिति गौतमोक्तेः । ५८
कच्छिः । परिधानाद्बहिः कच्छा निबद्धा ह्यासुरी मता । धर्मकर्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः ॥ प्रयोगपारि
जाते । स्नानं कृत्वार्द्रवस्त्रं तु ऊर्ध्वमुत्तारयेद्द्विजः । आर्द्रवस्त्रमधः क्षिप्त्वेत्तु पुनः स्नानेन शुद्ध्यति । विष्णुपुराणे ।
होमदेवार्चनाद्यासु क्रियासु पठने तथा । नैकवस्त्रः प्रवर्तेत द्विजो नाचमने जपे । जाबालिः । निष्पीडितं धौ
तवस्त्रं यदा स्कंधे विनिक्षिपेत् । तदा सर्वं भवेत्कर्म पुनः स्नानं विशोधनं । वस्त्रं चतुर्गुणीकृत्य निष्पीडयेत् सदशं तथा ।

तृतीयमुपवीतं वा कुशरज्जुमथापि वा धारयेदिति शेषः २४

वामप्रकोष्ठे निक्षिप्य स्थलस्थश्चाद्विराचमेत् । वस्त्रं त्रिगुणितं यस्तु निष्पीड्यति मंदधीः । वृथास्नानं भवेत्तस्य स्नानस्य दश
धांबुभिः । गोभिलः । एकवस्त्रो न भुंजीत न कुर्याद्देवतार्चनं । शातातपः । सव्यादंशात्परिभ्रष्टं नाभिदेशे व्यवस्थितं । द्विवस्त्रे त्वेकवस्त्रतामाह २
एकवस्त्रं तु तं विद्याद्दैवे पित्र्ये च कर्मणि । योगियाज्ञवल्क्यः । अलाभे धौतवस्त्रस्य शाणक्षौमाविकानि च । कुतुपं
योगपट्टं च द्विवासास्तु न भवेदिति । उत्तरीयाभावे स्मृत्यंतरं । यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि । तृती
यमुत्तरीयार्थे वस्त्राभावे तदिष्यत इति । पारस्करगृह्ये तु । एकं चेद्वासो भवति तस्यैवोत्तरवर्गेण प्रच्छादयीत ।
जाबालिः । स्नात्वा निवस्य वस्त्रं च जंघे शोधेन्मृदंभसा । अपवित्रीकृते तेन तु कौपीनस्नानवारिणेति । एतद्यतीब्रह्म
चारिविषयं । गृह्यपरिशिष्टे । अथ तीरमेत्य दक्षिणामुखः प्राचीनावीती ये के चास्मत्कुले जाता अपुत्रा गो
त्रिणो मृताः । ते गृह्णंतु मया दत्तं वस्त्रनिष्पीडनोदकमिति । वस्त्रं निष्पीड्योपवीती अप उपस्पृश्य परिधानीयमस्पृ
ष्ट्वा परिधायान्यच्चोत्तरीयमस्पृष्टं प्रावृत्याद्विराचमेदिति । वृद्धमनुः । निष्पीड्य स्नानवस्त्रं तु पश्चात्संध्यां समारभेत् ।
अन्यथा कुरुते यस्तु स्नानं तस्याफलं भवेत् । मनुः । मनुष्यतर्पणे चैव स्नानवस्त्रनिपीडने । निवीती च भवेद्विप्रस्तथा
मूत्रपुरीषयोः । वासोनिष्पीडने निवीतप्राचीनावीतयोर्विकल्प इति केचित् । गृह्यपरिशिष्टस्याश्वलायनपरत्वात्
तेषां प्राचीनावीतमितरेषां निवीतमिति तु नृसिंहः । धौतवस्त्रपरिधानमाह मनुः । स्नात्वैवं वाससी धौते क्लिष्टे विप

६० रिधायच। प्रक्षाल्योत्तमदङ्घ्रिश्च हस्तौ प्रक्षालयेन्मृदा। अक्लिष्टे अरजकक्षालिते। ते अपि सदशे। अछिन्नाग्रं
60 तु यद्वस्त्रं शुचितन्मनुरब्रवीत्। ते अपि शुक्ले शुष्के च। नार्द्रमेकं हि वसनं परिदध्यात्कथंचन। न चानुलेपादत्ते हि वास वासः ५२
सीन विधूनयेत्। आर्द्राण्येव च वासांसि स्नातासेवेन्नमानवः। सप्तवाताहतं कृत्वा आर्द्रमपि परिदध्यात्। सप्तवाताह
तं शुष्कवद्भवतीति शातातपोक्तेः। पद्मपुराणे। प्रत्यहं क्षालयेद्वासो दैवे पित्र्ये च कर्मणि। सर्वं विरागं न शुष्कं वा तु
दूषितं तु मृदंबुभिः। क्षालयेदिति शेषः। वाचस्पतीयकृत्ये वसिष्ठः। शुक्लमहतं वासो ब्राह्मणस्य कार्यम्। मांजि
ष्ठं क्षौमं क्षत्रियस्य। पीतं कौशेयं वैश्यस्य। सर्वेषां वा तांतवमरक्तम्। तांतवं कार्पासमित्यर्थः। गौतमः। वासां
सि शाणक्षौमचीरकुतुपाः। सर्वेषां कार्पासं वा। अविकृतं काषायमप्येके। ब्राह्मणस्य वा शाणं। मांजिष्ठहारिद्रा
वितरयोरिति। शाणं शणमयं। क्षौमं। क्षौमा अतसी तदुद्भवं। चीरं केशनिष्पन्नं। कुतुपः पर्वतदेशविशेषीय
छागमेषरोमोद्भवः। कंबलः॥ छागरोमोद्भवं वापि कुतुपं कंबलं विदुरिति धरणीकोशोक्तेः। अविकृतमरक्तं।
काषायं वल्कलत्वक्छेदनक्षालनाभ्यासेन संयातवर्णांतरम्। तदपि शुक्लमेव। इदमुपनयनसमंत्रकवस्त्र[illegible]ग्र
हणपरमपि भाति। यत्तु काषायवासाः कुरुते जपहोमप्रतिग्रहान्। न तद्देवंगमं भवति हव्यकव्येतथेतरे इति क
ल्पतरौ। तद्गैरिकरक्तवासः परम्। मांजिष्ठादेविशेषोपादानात्। अहतवस्त्रलक्षणमाह कात्यायनः।

ईषद्धौतं नवं श्वेतं सदशं यन्न धारितं । अहतं तद्विजानीयात्पावनं सर्वकर्मसु । ईषद्धौतं क्षारं विनाधौतं । नवं तत्
विनाधौतं । तथा । अष्टहस्तं नवं श्वेतं सदशं यन्न धारितं । अहतं तद्विजानीयात्सर्वकर्मसु पावनं । तत्रापि अकृत्रि
मदशम् । तथा च व्यासः । अकृत्रिमदशं वस्त्रं प्रशस्तं सर्वकर्मसु । अकृत्रिमा दशा ज्ञेया तिर्यग्द्रावपनकर्मणि । भा
रते । ईषद्धौतं स्त्रिया धौतं पूर्वं शूद्रधौतमेव च । अधौतवस्त्रसंस्पृष्टं पुनः प्रक्षालितं शुचिः । अत्र ईषद्धौतं मंदधौतं ।
न स्पृष्टेनेन दग्धेन पारिक्येण विशेषतः । नाखुकोत्कीर्णजीर्णेन कर्म कुर्याद्विचक्षणः । आह्निकचन्द्रोदये । कर्पास
लोमकुतुपाश्च वल्कलकंबलाः । सर्वं तु धारयेत्कुले वासस्तत्परिधानिकम् । परिधानप्रयोजकमित्यर्थः । आचा
रतिलके । शुक्रशोणितहृद्दिग्धं श्लेष्ममूत्रपुरीषकं । स्निग्धदुर्गंधिजीर्णं च नवदोषास्तु वाससि । वृद्धपराशरः ।
न जीर्णं नीलकाषायं मांजिष्ठेन तु वाससा । अध्याद्युपहते नैव शुद्धिः स्यान्नैकवाससा । मांजिष्ठेनेति कार्पासेन । कौ
शेयस्य विहितत्वात् । मदनपारिजाते । अन्यदेव भवेद्वासः शयनीये नराधिप । अन्यद्रथ्यासु देवानामर्चायामन्यदे
व हि । अन्यच्च लोकयात्रायामन्यदीश्वरदर्शने । गदाधरीये । न कुर्यात्संधितं वासो वै दैवे कर्मणि भूमिप । न दग्धं नैव
वै छिन्नं पारक्यं न च धारयेत् । आचारप्रदीपे । काकविष्ठासुसंयुक्तं परिधौतं च यद्भवेत् । रजकेन हृतं यच्च तद्वस्त्रमशु
चिः स्मृतं । परिवर्जनादप्रक्षालितमित्यर्थः । तथा । कटिस्पृष्टं च यद्वस्त्रं पुरीषं येन कारितं । मैथुनं मेहनं वापि तद्व

९१ स्त्रंपरिवर्जयेत् ।दग्धंजीर्णंचमलिनंमूषकोपहतंतथा ।खादितंगोमहिष्याद्यैस्तत्त्याज्यंसर्वथाद्विजैः । तथा ।
काषायंकृष्णवर्णंवामलिनंकेशदूषितं ।छिन्नाग्रंचोपविद्धंचकुत्सितंधर्मतोविदुः ।काषायंगैरिकरक्तम् ।आपस्तं
61 बः ।नीलीरक्तंयदावस्त्रंब्राह्मणोंगेविधारयेत् ।तंतुसंहतिसंख्यायांनरकेवसतेध्रुवं ।स्नानंदानंजपोहोमःस्वाध्या
यःपितृतर्पणं ।वृथातस्यमहायज्ञानीलीवाससोविभर्त्तियः । अंगिराः ।रोमकूपेयदागच्छेद्रसोनील्यास्तुकस्य
चित् ।त्रिषुवर्णेषुसामान्यंतप्तकृच्छ्रंविशोधनम् । अत्रापवादमाहसएव ।स्त्रीणांक्रीडार्थसंभोगेशयनीयेनदु
ष्यति ।नीलीतिशेषः । तथाचाररचिंतामणौ ।स्त्रीधृताशयनेनीलीब्राह्मणस्यनदुष्यति ।नृपस्यवृद्धौवैश्य
स्यपर्वण्येवंविधारणं । तथा ।ऊर्णायांपट्टवस्त्रेचनीलीरागोनदुष्यति । आचारप्रदीपे ।छिन्नंवासंधितंदग्ध
माविकंसर्वदाशुचिः । तथा ।आविकेनतुवस्त्रेणमानवःश्राद्धमाचरेत् ।गयाश्राद्धसमंप्रोक्तंपितृभ्योदत्तमक्षयं ।
भारते ।आविकंतुसदावस्त्रंपवित्रंराजसत्तम ।पितृदेवमनुष्याणांक्रियायांसंप्रशस्यते ।धौताधौतंतथादग्धं
संधितंकरकाहतं ।रक्तमूत्रशकृल्लिप्तंतथापिपरमंशुचि । ।अग्निराविकवस्त्राणिब्राह्मणाश्चतथाकुशाः ।चतु
र्णांनकृतोदोषोब्रह्मणापरमेष्ठिना । अंगिराः ।रेतःस्पृष्टंरजस्पृष्टमाविकंसर्वदाशुचि । ।पाद्मेगौतमांबरीषसं
वादे ।यद्दुकूलंसदापीतमाविकंतुविशेषतः ।विष्णोरर्चनकालेतुधार्यंचैवप्रयत्नतः । मिताक्षरायाम् ।सेके

ऊर्णा मेषादिरोमा
णि ५२

(८

रुद्रकगोमूत्रैः शुध्यत्याविककौशिकं । सश्रीफलैरंशुपट्टं सारिष्टैः कुतुपं तथा । कौशिकं चमरीपट्टादि । अंशुपट्टं
वल्कलजं । ऊर्णा मेषादिरोमाणीत्यमरः । इदमत्यंतोपघाते । ऊर्णा कौशेयकुतुपाः पट्टाः क्षौमदुकूलजाः । अल्प
शौचा भवंत्येते शोषणप्रोक्षणादिभिः । तान्येवामेध्ययुक्तानि क्षालयेच्छोधयेत्स्वकैः । धान्यकल्कैस्तु फलजै रसैः क्षा
रानुगैरपीति देवलोक्तेः । शातातपः । प्रागग्रमुदगग्रं वा धौतं वस्त्रं प्रसारयेत् । पश्चिमाग्रे दक्षिणाग्रे पुनः प्रक्षा
लनं जगुः । वस्त्राग्रं सदशभागं । वस्त्रांतयोरेकत्र संगोपनमिति केचित् । तथा चोत्तरीयवस्त्रे बोधायनः । उत्तरीयं
च कर्तव्यं पंचस्वेतेषु कर्मसु । स्वाध्यायोत्सर्गदानेषु भुक्त्याचमनयोस्तथा । उत्सर्गो मूत्रादेः । तथा । एकवासा जपेद्य
स्तु यद्ददाति जुहोति च । तत्सर्वमहरेंद्राणां ब्रह्माभागमकल्पयत् । स्मृतिसारे । उत्तरीययोगपट्टं तर्जन्यां रजतं तथा ।
न जीवत्पितृकैर्धार्यं ज्येष्ठो वा विद्यते यदि । जीवत्पितृकेन योगपट्टातिरिक्तमुत्तरीयं धार्यम् । अत्र स्नानादिषूत्तरी
यालाभे तृतीयोपवीतं धार्यमित्यकल्पत्वेन विधानात् । वस्त्ररहितेनापि तृतीयोपवीतवता स्नानादि कार्यम् ।
न च पृथक् पुनरुत्तरीयं धार्यं । वैयर्थ्यात् । उपात्तपरित्यागस्य चान्याय्यत्वात् । यदाहुर्मंडनमिश्राः । उपात्ते तु प्रति
निधौ मुख्यार्थो यदि लभ्यते । तत्र मुख्यमनादृत्य गौणेनैव समापयेदिति । तर्ह्युत्तरीयविधानं निर्विषयं । नेत्याह ।
प्रथमकल्पिकत्वात् । तृतीयोपवीतस्याधारणपक्षे तस्यैव प्राप्तत्वात् । काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके हि

६५

अत्रकारणमाहगोभिलः। पिबंतिशिरसोदेवाः पिबंतिपितरोमुखात्। मध्यतः सर्वगंधर्वा अधस्तात्सर्वजंतवः। तस्मात्स्नातोन प्रमृज्यात्स्नानशाट्यानपाणिनेति २०

६२ तत्। काम्येसत्यपितृतीयोपवीते उत्तरीयमपिधार्यम्। कात्यायनः। यथोक्तवस्त्रासंपत्तौग्राह्यंतदनुकारियत्। य
वानामिवगोधूमाव्रीहीणामिवशालयः। संभग्नुकल्पनिषेधमाह हारीतः। प्रभुःप्रथमकल्पस्ययोनकल्पेनवर्त्त
ते। नसांपरायिकंतस्यदुर्मतेर्जायतेफलं। विष्णुः।स्नातःशिरोनावधुनेन्नांगेभ्यस्तोयमुद्धरेत्। नचशृंवैधतंवा
सोनचतैलमनुस्पृशेत्॥ शातातपोप्याह। अप्रमृज्यान्नचस्नातोगात्राण्यंपश्चलपाणिभिः। नचापिधूनये
त्केशान्वाससीनविधूनयेत्। करेणमार्जयेत्केशान्गात्रंवस्त्रेणमार्जयेत्। श्वनोच्छिष्टं तुयद्गात्रं पुनःस्नाने
नशुध्यति। सुराबिंदुसमंतोयंशृष्टतःकेशबिंदवः। दक्षिणेजानुवीतोयं वामेतद्रुधिरंभवेत्। तिस्रःकोट्यो
र्धकोटीचयावद्रोमाणिमानुषे। स्रवंतिसर्वतीर्थाणितस्मान्नपरिमार्जयेत्। अयंदेहजलापनयननिषेधः
स्नानवस्त्रेणपाणिनावा। नतुवस्त्रांतरेण। तथाचस्मृतिः। स्नातोनांगानिनिर्मृज्यात्स्नानवस्त्रेणसर्वथा। नान्यो
न्यंपृष्टतोमृज्यान्नलिम्पेतपृष्टतोमिथः। विष्णुपुराणेपि। स्नातोनांगानिनिर्मृज्यात्स्नानशाट्यानपाणिना। स्ना
स्वं ६३ नशाटीस्नानाधरीयवसनेनम्। तेनवस्त्रांतरेणनदोषः। विशेषनिषेधःशेषाभ्यनुज्ञाफलकइतिन्यायात्। गोदो
हनमात्रकालानंतरंमार्जनमुक्तंस्मृतिसारे। गोदोहमात्रंस्नातस्तुगात्रवारिनमार्जयेत्। तद्धिदेवाश्चपितरः
पिबंतिश्रद्धयान्विताः। एतच्चशक्तपरमाह देवलः। अंगानिशक्तोवस्त्रेणपाणिनावानमार्जयेत्। उक्तविधा

गोदोहनमात्रकालविधानं १९

रणं। शिरोजलापनयनार्थमाह विष्णुः। स्नातएववाससीसौह्मीयेविभृयात्। नपतितादिभिः संभाषणंकुर्यात्।
शुष्कशीर्षेणकर्तव्यंनथाशुष्केनवाससा। तथाक्लिद्धशिरवैश्चैवएतत्सर्वत्वन्यथाभवेत्। मनुः। स्नात्वानिष्पस्यवासो
न्यद्धंघेप्रक्षालयेन्नरदा। अपवित्रीकृतेतेनतुकौपीनक्षालितवारिणा। वासोन्यत्परिधायेतिशेषः। कौपीनंगुह्य
वस्त्रम्। ऊर्ध्वैर्निर्घ्योर्हस्तयोर्म्र्जलाभ्यांक्षालनंधौतवस्त्रपरिधानानंतरम्। परिधायप्रक्षाल्येतिनृसिंहपुरा
णीयक्रमात्। ततोद्विराचमनमाह व्यासः। ततोवस्त्रयुगंशुद्धंगृहीत्वाद्विरुपस्पृशेत्। स्नात्वानिरस्याद्रवस्त्रंजं
घेशोध्येस्यदंभसा। आचमनप्रकारमाह दक्षः। स्नात्वाचामेद्यदाविप्रः पादौकृत्वाजलेस्थले। उभयोरप्यसौशु
द्धस्ततः कर्मक्षमोभवेत्। उभयोर्जलस्थलयोरित्यर्थः। स्नानंकृत्वार्द्रवासस्तुविण्मूत्रंकुरुतेयदि। प्राणायामत्र
यंकृत्वापुनःस्नानेनशुध्यति। स्नानानंतरंवस्त्रपरिधानमाह स्मृतिसारे। वसित्वावासआचम्यप्रोक्षाचम्यचमंत्र
तः। गायत्र्यांबांजलिंदत्वाध्यात्वासूर्यगतंहरिं। मंत्रतः परिहृत्याप्यसमाचम्यहरादिकान्। तर्पयित्वानिपीड्या
र्यवासोविसृज्यत्यचांजसा। अर्कमंडलगंविष्णुंध्यात्वैवंत्रिपदींजपेत्। सहस्रपरमांदेवींशतमध्यांदशावराम्।
वाससार्धचकक्ष्ययुक्तेन। हस्तेनगुदादिकमाच्छाद्येत्यर्थः। शाटिपीडनविषये शंखआह। उदकस्याप्रदाना
द्विस्नानशाटींनपीडयेत्। सांख्यायनगृह्ये। आप्लुत्याप्युदकोन्यद्वस्त्रमादधीत। अशुद्धकोऽशुद्धोदकः
एषोपिपाणिवस्त्राभ्यामुद्धरणेनिषेधः कुलविशेषनियतोवाक्ष्यगृह्योक्तत्वात्॥ इतिवस्त्रधारणविधिः।

दूर्वादधिसर्पिरथोदकुंभं धेनुंसवत्सां वृषभंसुवर्णं । मृद्गोमयंस्वस्तिकमक्षतानि लाजामधुब्राह्मणकन्यकाश्च । श्वेतानिपुष्पाणितथा शमींच हुताशनं चंदनमर्कविंबं । अश्वत्थवृक्षंच समालभेतततश्चकुर्याच्चिजजातिधर्मान् । देशानुशिष्टंकुलधर्ममग्र्यंस्वगोत्रधर्मं नहिसंत्यजेच्च । अथालंभनंस्पर्शनं । स्वस्तिकोभवनभेदः । अर्कविंवनिरीक्षणम् । ५३.पं ५

पा मे १८ – तथाचग्रंथांतरे अश्वत्थसागरौसेव्यौ नस्प्रष्टव्यौकदाचन । अश्वत्थं मंदवारे तु सागरं पर्वणि स्पृशेत् अतोऽश्वत्थालंभनं मंदवारे एव अन्यत्रदर्शनं कार्यम् । ततश्चदिनंततरं तृतीयभागेत्यर्थः । अत्रायंक्रमः । प्रातःस्नानानंतरं संध्या । ततोगायत्रीजपः । ततस्तर्पणं । ततोनित्योदितहोमः । ततः काम्यदेवता पूजा । कालाद्यनुरोधेन नित्यपूजापि । ततोमंगलालंभनं । ततोयथाशक्त्यादानं । ततोवहिर्निर्गमनमिति ५५ यत्मंगलांतर्गतंब्राह्मणपूजनं तेनदानंलक्ष्यते । भागवतेश्रीकृष्णाह्निके दर्शनात् । यथा । उपस्थायार्कमर्घ्येन तर्पयित्वात्मनः कलाः । देवानृषीन्पितॄन्वृद्धान्विप्रानभ्यर्च्यचात्मवान् धेनूनांरुक्मशृंगीणां दद्यात् अहन्यहनि दिने ५५पं ५

६२
63

अथमंगलालंभनम् ॥ ॥ तत्रवामनपुराणम् । कृत्वाशिरःस्नानमथाह्निकंतु संतर्प्य तोयेन पितॄन्सदेवान् । होमंचकृत्वालंभनंशुभानां ततोवहिर्निर्गमनंप्रशस्तं । आह्निकं अहःस्नानं । एतच्चाभ्युदयादौ । यदित्वाह्निकं सर्वमहःकर्म उच्यते तदा सतर्प्येत्याद्यनर्थकंस्यात् । संतर्प्येति प्रातःस्नानेपि तर्पणं कार्यम् । तच्चस्नानांगमेव नस्वतंत्रं । एवंचस्नानाभावेनिवर्तते । अंगिनो लोपादंगलोप इतिन्यायात् । होमोत्रानुदितहोमः । कालानुरोधेन वैश्वदेवोवा । मुख्यत्वेन तस्य पंचमभागेविधानात् । अष्टभागंदिनं विभज्य प्रथमभागकृत्ये दक्षः । देवकार्यं ततः कृत्वा गुरुमंगलवीक्षणं । गुरुः पित्रादिः । मंगलंश्रोत्रियादिः । मनुः । देवतामभिगच्छेत्तुधार्मिकांश्चद्विजोत्तमान् । ईश्वरंचैवरक्षार्थंगुरूंश्चैवचपर्वसु । यमः । प्रातःकालेयोद्वितीये । यतीनांदर्शनंचैव स्पर्शनं भाषणंतथा । कुर्वाणःपूयते नित्यं तस्मात्पश्येत्तु नित्यशः । अग्निचित्कपिलासत्री राजाभिक्षुर्महोदधिः । दृष्टमात्राः पुनंत्येते तस्मात्पश्येत्तु नित्यशः । सत्री अन्नादिसत्रशीलः । कृतसत्रयागइत्येके । भिक्षुर्यतिः । भारते । यज्वाभिषिक्तस्तदःसत्रीशताग्नुधार्मिकः शुचिः । ज्ञानसिद्धस्तपःसिद्धान्दृष्ट्वापापात्प्रमुच्यते । वाराहपुराणे । वामनंब्राह्मणंदृष्ट्वा वाराहंचजलोत्थितं । नमस्येच्चैवयोभक्त्यासपापेभ्यः प्रमुच्यते । ब्रह्मपुराणे । स्वमात्मानं घृतेपश्येद्यदीच्छेच्चिरजीवितं । आत्मानंशरीरं । नारदः । लोकेस्मिन्मंगलान्यष्टौ ब्राह्मणोगौर्हुताशनः । हिरण्यंसर्पिरादित्य आपोराजातथाष्टमः । एतानिसततंपश्येन्नमस्येदर्चयेत्सुनः ।

प्रशस्ताचरणंनित्यमप्रशस्तविवर्जनं । एतद्धिमंगलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः । २

प्रदक्षिणंचकुर्वीततथास्यायुर्नहीयते । तथा । दर्पणःपूर्णकलशःकन्यासुमनसोऽक्षतः । दीपमालाध्वजालाजाःप्र
शस्तंचाष्टमंगलं । ब्रह्मवैवर्त्तपुराणेपि । नंदराजउवाच । येषांचदर्शनेपुण्यंपापंयस्यचदर्शने । तत्सर्वंवददेवेशश्रो
तुंकौतूहलंमम । श्रीकृष्णउवाच । सुब्राह्मणानांतीर्थानांवैष्णवानांचदर्शने । देवताप्रतिमानांचतीर्थस्नायीभ
वेन्नरः । सूर्यस्यदर्शनेभक्त्यासतीनांदर्शनेतथा । संन्यासिनांयतीनांचतथैवब्रह्मचारिणां । भक्त्यागवांचव
ह्नीनांगुरूणांचविशेषतः । गजेंद्राणांचसिंहानांश्वेताश्वानांतथैवच । शुकानांचपिकानांचखंजनानांतथैवच ।
हंसानांचमयूराणांचाषाणांशंखपक्षिणां । वत्सप्रयुक्तधेनूनामश्वत्थानांतथैवच । पतिपुत्रवतीनांचनारीणां
तीर्थयायिनां । प्रदीपानांसुवर्णानांमणीनांचविशेषतः । मुक्तानांहीरकाणांचमाणिक्यानांमहाशय । तुलसीशु
क्लपुष्पाणांदर्शनंपापनाशनं । फलानिशुक्लधान्यानिदधिघृतमधूनिच । पूर्णकुंभंचलाजंचराजेंद्रदर्पणंज
लं । मालांचशुक्लपुष्पाणांदृष्ट्वापुण्यंलभेन्नरः । देवाश्रितंशुभघटंसुगंधिपवनंतथा । शंखंचदुंदुभिंदृष्ट्वासद्यः
पुण्यंलभेन्नरः । सूक्तिंप्रवालंरुद्राक्षंस्फाटिकंकुशमूलकं । गंगामृदंकुशंताम्रंदृष्ट्वापुण्यंलभेन्नरः । पुराणं
पुस्तकंशुद्धमतीवविष्णुमंत्रकं । स्निग्धदूर्वाक्षतंरत्नंदृष्ट्वापुण्यंलभेन्नरः । तपस्विनंसिद्धमंत्रंसमुद्रंकृष्णसारकं ।
यज्ञंमहोत्सवंदृष्ट्वासपुण्यंलभतेनरः । गोमूत्रंगोमयंदुग्धंगोधूलिंगोष्पदंतथा । पक्वसस्यान्वितंक्षेत्रंदृष्ट्वापुण्यंल

रवीर...

कुवं ।८

६४ मेन्नरैः। रुचिरांपद्मिनींश्यामांन्यग्रोधपरिमंडलां। सुवेशांकांस्यवसनांदिव्यभूषणभूषितां। वेश्यांलेमंकरींगंधःसु
64 दूर्वाक्षततंडुलं। सिद्धान्नंपरमान्नंचदृष्ट्वापुण्यंलभेन्नरः। कार्त्तिक्यांपुष्करिणीमायांचराधिकाप्रतिमांशुभां। संपूज्य
दृष्ट्वानत्वाचकरोतिजन्मखंडनं। हिंगुलायांतथाष्टम्यांमासेमासेसितेशुभे। श्रीदुर्गांप्रतिमांदृष्ट्वाकरोतिजन्म
खंडनं। शिवरात्रौचकाश्यांचविश्वनाथस्यदर्शनं। कृत्वोपवासंपूजांचकरोतिजन्मखंडनं। जन्माष्टमीदिने
भक्तोदृष्ट्वामांबिंदुमाधवं। प्रणम्यपूजांकृत्वाचकरोतिजन्मखंडनं। पौषेमासिकुहूरात्रौयत्रतत्रस्थलेनरः।
पद्मायाःप्रतिमांदृष्ट्वाकरोतिजन्मखंडनं। चैत्रेमासिचतुर्दश्यांकामरूपेसुपुण्यदे। दृष्ट्वानत्वाभद्रकालींकरो
तिजन्मखंडनं। अयोध्यायांचरामंमांश्रीरामनवमीदिने। संपूज्यदृष्ट्वानत्वाचकरोतिजन्मखंडनं। दत्वाविष्णुप
देपिंडंविष्णुयज्ञंप्रपूजयेत्। पितॄणांस्वात्मनश्चैवकरोतिजन्मखंडनं। प्रयागेमुंडनंकृत्वादानंचकुरुतेयदि।
उपोष्यनैमिषारण्येकरोतिजन्मखंडनं। उपोष्यपुष्करेस्नात्वाकिंवाबदरिकाश्रमे। संपूज्यदृष्ट्वामामेवकरोति
जन्मखंडनं। सिद्धंकृत्वातुबदरींभुंक्तेबदरिकानने। दृष्ट्वामांप्रतिमांनंदकरोतिजन्मखंडनं। दोलायमानंगोविंदं
पुण्येवृंदावनेचमां। दृष्ट्वासंपूज्यनत्वाचकरोतिजन्मखंडनं। भाद्रेदृष्ट्वाचमंचस्थंमामेवमधुसूदनं। संपूज्यनत्वाभ
क्त्याचकरोतिजन्मखंडनं। रथस्थंचजगन्नाथंकलौद्रक्ष्यतियोनरः। संपूज्यभक्त्यानत्वाचकरोतिजन्मखंडनम्।

उत्तरायणसंक्रांत्यांप्रयागेस्नानमाचरेत्। संस्पृश्य नत्वामामेवकरोतिजन्मखंडनं। कार्त्तिकीपूर्णिमायांचरासेवृंदाव
नेचमां। प्रणम्यराधाप्रतिमांकरोतिजन्मखंडनं। उपोष्यव्रजभूमौचभांडीरेमालतीवने। संस्पृश्यमांचराधांचकरोति
जन्मखंडनं। वैशाखीपूर्णिमायांचदृष्ट्वामत्प्रतिमांशुभां। उपोष्यपूजांकृत्वाचकरोतिजन्मखंडनं। चंद्रभागासमीपेव
माघ्यांमांपूजयेच्छुचिः। राधयासहमांदृष्ट्वाकरोतिजन्मनःक्षयं। रामेश्वरंसेतुबंधेआषाढीपूर्णिमादिने। उपोष्यदृष्ट्वा
संस्पृश्यकरोतिजन्मनःक्षयं। स्वर्गविद्याधरीरात्रौनृत्यंतीचमुहुर्मुहुः। प्रणामंकर्तुमीशंतंसमायातिविभीषणः। गायं
तिकिन्नरारात्रौगंधर्वाश्चमनोहरं। प्रणामंकर्तुमीशंतंसमायातिचनारदः। दृष्ट्वासाक्षाद्वसंतंचसर्वेशंचंद्रशेखरं। जीव
न्मुक्तोभवेद्देहेतेनयातिहरेर्मंदिरं। दीननाथंदिनकरंकोणार्केचोत्तरायणे। उपोष्यदृष्ट्वासंस्पृश्यकरोतिजन्मनःक्षयं।
कृषिकोट्टेहवसनेकलविंकेयुगंधरे। विस्पंदकेराजकोट्टेनंदकेपुष्पभद्रके। पार्वतीप्रतिमांदृष्ट्वाकार्त्तिकेयंगणेश्वरं।
नंदिनंशंकरंदृष्ट्वाकरोतिजन्मनःक्षयं। उपोष्यप्रातःसंस्पृश्यदृष्ट्वानत्वास्तुत्वोनतः। पारणंचदधिप्राश्यकरोतिजन्मनःक्ष
यं। त्रिकूटेमणिभद्रेचपश्चिमोदधिसन्निधौ। समुपोष्यदधिप्राश्यमांदृष्ट्वामुक्तिमाप्नुयात्॥ ॥अथप्रसंगान्नित्यदानम्।
तत्रयाज्ञवल्क्यः। दातव्यंप्रत्यहंपात्रेनिमित्तेषुविशेषतः। याचितेनापिदातव्यंश्रद्धापूतंतुशक्तितः। गोभूतिलहिरण्यादि
पात्रेदातव्यमर्चिते। नापात्रेविदुषाकिंचिदात्मनःश्रेयइच्छता। तथा। कृतेतपःप्रशंसंतित्रेतायांज्ञानमेवच। द्वापरेयज्ञ

६५ मित्याहुर्दानमेकं कलौ युगे । भारते । यदि नाम न धर्माय न कामाय न कीर्त्तये । यत्परित्यज्य गंतव्यं तद्दानं किंन्न दीयते ।
65 यद्ददाति विशिष्टेभ्यो यच्चाश्नाति दिने दिने । तन्ने वित्तमहं मन्ये शेषं कस्यापि रक्षितम् । वेनतेयपुराणे । नित्यं नैमित्तिकं का
म्यं विमलं दानमीरितं । अहन्यहनि यत्किंचिद्दीयतेनुपकारिणे । अनुद्दिश्य फलं तस्माद्ब्राह्मणाय तु नित्यकं । यत्तु पा
पोपशांत्यैवा दीयतेनुपकारिणे । नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्टितं । अपत्यविजयैश्वर्यस्वर्गार्थं यत्प्रदीयते । दा
नं तत्काम्यमाख्यातमृषिभिर्धर्मचिंतकैः । ईश्वरप्रीणनार्थाय ब्रह्मवित्सु प्रदीयते । चेतसा सत्वयुक्तेन दानं तद्विम
लं शिवं । ब्रह्मपुराणे । सदाचाराः कुलीनाश्च रूपवंतः प्रियंवदाः । बहुश्रुतास्तु धर्मज्ञा याच्यमानाः परान् गृहान् ।
दृश्यंते दुःखिनः सर्वे प्राणिनः सर्वदा मुने । अदत्तदाना जायंते परभाग्योपजीविनः । मार्कंडेयपुराणे । कुटुंबं पीड
यित्वापि ब्राह्मणाय महात्मने । दातव्यं भिक्षवे चान्नमात्मनो भूतिमिच्छता । वह्निपुराणे । अन्नं मूलं फलं शाकमुद
मात्रं तपोधनाः । दानं विभवतो दत्वा नरः स्वर्यांति धार्मिकाः । स्कांदे । देहीत्येवं ब्रुवन्नर्थी जनं बोधयतीव सः । यदि
दं कष्टमर्थित्वं प्राग्दानफलं हि तत् । एकेन तिष्ठताधस्तादन्येनोपरि तिष्ठता । दातृयाचकयोर्भेदः कराभ्यामेव
सूचितः । दीयमानं तु यो मोहाद्गोविप्राग्निसुरेषु च । निवारयति पापात्मा तिर्यग्योनिं व्रजेत्तु सः । भविष्यपुरा
णे । प्रतिगृहीता द्रव्यं च देशः कालश्च पावनः । श्रद्धा च सात्विकी ज्ञेयं दानानामंगपंचकं । पात्रनिरूपणं ब्रह्म

वैवर्त्ते । येषु सर्वेषु जिता ये च पुरस्तात्पुनमस्कृताः । तान्निराकृत्य यान्येषु कुर्वन्दानं पतत्यधः । महाभारते । पंग्वंधवधिरा
मूका व्याधिनोपहताश्च ये । भर्त्तव्यास्ते महाराज न तु देयः प्रतिग्रहः । तथा । सन्निकृष्टमधीयानं ब्राह्मणं यः परित्य
जेत् । भोजने चैव दाने च स दाता किल्बिषी भवेत् । भविष्योत्तरे । यस्त्वासन्नमतिक्रम्य ब्राह्मणं पतितादृते । दूरस्थं
भोजयेन्मूढो गुणाढ्यं नरकं व्रजेत् । तस्मान्नातिक्रमेत्प्राज्ञो ब्राह्मणान्प्रातिवेश्मिकान् । संबंधिनः तथा सर्वान्दौहि
त्रं विश्पतिं तथा । भागिनेयं विशेषेण तथा बंधून्गृहागतान् । ब्राह्मणोत्राल्पविद्यः । यस्य चैव गृहे मूर्खो दूरस्थोपि
बहुश्रुतः । बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रम इति वसिष्ठोक्तेः । विष्णुः । पुरोहितस्वात्मन एव पात्रे । स्वदुहितृ
पुत्रजामातरश्चेति । गुणरहिता अपि पुरोहितादित्वेन पात्राणीत्यर्थः । लघुव्यासः । पितुः शतगुणं दानं सहस्रं मातुरु
च्यते । भगिन्यां शतसाहस्रं सोदरे दत्तमक्षयं । दरिद्राणां च बंधूनां दानं कोटिगुणं भवेत् । मनुः । अयाज्ययाजना
च्चैव नास्तिक्येन च कर्मणां । कुलान्याशु विनश्यंति यानि हीनानि मंत्रतः । मंत्रस्तं तु यद्दानमपात्रेभ्यः प्रदीयते । दातु
र्निकृत्य हस्तं तु भोक्तुर्जिह्वां निकृंतति । इति स्मृतिः । सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे । अधीते शतसाहस्र
मनंतं वेदपारगे । शीलं संवासतो ज्ञेयं शौचं संव्यवहारतः । प्रज्ञा संकथनाज्ज्ञेया त्रिभिः पात्रं परीक्षते । संकथनं सह
भावेन विद्याकथा । अब्राह्मणलक्षणं व्यासेनोक्तं । ब्रह्मबीजसमुत्पन्नो मंत्रसंस्कारवर्जितः । जातिमात्रोपजीवी च भवेदब्राह्म

९९ णलक्षणः। ब्राह्मणब्रुवस्तु। गर्भाधानादिभिर्युक्तस्तथोपनयनेन तु। न कर्म कृन्नचाधीते स भवेद्ब्राह्मणब्रुव इति। तथा।
66 अव्रतानाममंत्राणां जातिमात्रोपजीविनां। नैषां प्रतिग्रहो देयो न शिला तारयेच्छिलां। अत्र गायत्रीमंत्ररहितानां दान
निषेधो मंत्रवज्ञवादिदानविषयः। यमः। विद्याशीलो धर्मयुक्तः प्रशांतः क्षांतो दांतः सत्यवादी कृतज्ञः। वृत्तिग्ला
नो गोहितो गोशरण्यो दाता यज्वा ब्राह्मणः पात्रमाहुः। पात्रं गुणकुलाचारपवित्रो द्विजसत्तमः। इत्युक्तेश्च। न विद्य
या केवलया तपसा वापि पात्रता। यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते। स्वाध्यायाढ्यं धर्मयोनिं प्रशांतं वैतान
स्थं पापभीरुं बहुज्ञं। स्त्रीषु क्षांतं धार्मिकं गोशरण्यं व्रतैः क्लांतं तादृशं पात्रमाहुः। व्रतात्क्लांतमित्यपि पाठः। योनि
मंतं कुलीनं। ये क्षांतदांताः श्रुतपूर्णकर्णाः जितेंद्रियाः प्राणिवधान्निवृत्ताः। प्रतिग्रहात्संकुचिताग्रहस्तास्ते
ब्राह्मणास्तारयितुं समर्थाः। पात्रासन्निधौ नारदीयपुराणे। मनसा पात्रमुद्दिश्य जलं भूमौ विनिक्षिपेत्। विद्यते सा
गरस्यांतो दानस्यांतो न विद्यते। द्रव्यपात्राभावे षड्त्रिंशन्मतं। द्रव्यपात्रविप्रकर्षे परोक्षं दातुमुद्यतः। तद्धितं दैव
वं पात्रं द्रव्यमादित्यदैवतं। अग्निपुराणे। न जातिर्न कुलं राजन्न स्वाध्यायः श्रुतं न च। कारणानि द्विजत्वस्य कारि
ष्यति दुरात्मनः। किं कुलेन विशालेन शीलमेवात्र कारणं। क्रिमयः किं न जायंते कुसुमेषु सुगंधिषु। कपालस्थं
यथा तोयं श्वाहृतं च यथा पयः। दूष्यं स्यात्स्थानदोषेण वृत्तिहीने तथा श्रुतं। तस्माद्दिक्षिमहाराज वृत्तं ब्राह्मणलक्षणं।

अथेयंव्यवस्था। स्वकुलस्य सन्निकृष्टवासि दौहित्रमित्रादीनां ब्राह्मणमात्राणामपि पात्रता अन्येषु यथोक्तं।
तत्र पंचमब्रह्मपुराणयोः देयद्रव्यनिरूपणम्। कृतं शुक्लेन वित्तेन पुण्यं बहुफलं भवेत्। शबलं मध्यमफलं कृष्णं
हीनफलं धनं। अब्जादीनां लक्षणं वर्णाश्रमधर्मेषु लिखितमस्ति। विष्णुपुराणे। यद्यदिष्टतमं लोके यच्चाति
प्रियमात्मनः। तत्तद्गुणवते देयं धर्ममक्षयमिच्छता। वह्निपुराणे। अभोपायेन यत्किंचित्करोति लघु नान
रः। अनंतफलमाप्नोति शाकेनापि नृपोत्तम। आर्त्तानामन्नदानं च गोदानं च कुटुंबिनां। तथा प्रतिष्ठाहीना
नां क्षेत्रदानं प्रशस्यते। सुवर्णं याज्ञिकानां च विद्या चैवोर्ध्वरेतसां। कन्याश्चैवानपत्यानां ददतां गतिरुत्तमा।
मनुः। एधोदकं फलं मूलमन्नमभ्युद्यतं च यत्। सर्वतः प्रतिगृह्णीयात्सपत्याभयदक्षिणाम्। विद्या
तपोभ्यां हीनेन नैव ग्राह्यः प्रतिग्रहः। गृह्णन्प्रदातारमधो नयत्यात्मानमेव च। स्कंदपुराणे। असद्भ्यो धन
मादाय साधुभ्यो यः प्रयच्छति। धनस्वामिनमात्मानं संतारयति दुस्तरं। असाधुभ्यः हीनकर्मादिभ्यः।
उत्कृष्टेभ्यः ऋत्विगादिभ्यः। अपहृत्य परस्वार्थं यः परेभ्यः प्रयच्छति। स दाता नरकं याति यस्यार्थस्तस्य
तत्फलं। यदाह स एव। योर्चितः प्रतिगृह्णाति ददात्यर्चितमेव वा। उभौ तौ व्रजतः स्वर्गं विपरीते विपर्ययः॥
६८ गारुडे। स्नातः सम्यगुपस्पृश्य दधानो धौतवाससी। सपवित्रकरश्चैव प्रतिगृह्णीत धर्मवित्। कात्यायनः।

९८

६१

कुशोपरि निविष्टेन तथा यज्ञोपवीतिना। देयं प्रतिग्रहीतव्यमन्यथा विफलं हि तत्। यज्ञोपवीतिना कृतसव्येन।
पराशरः। विधिहीनं तु यत्कर्म करोत्यविधिना तु यः। न किंचित्फलमाप्नोति क्लेशमात्रं हि तस्य तदिति। मत्स्यपुराणे।
हलस्यं ग्राम न द्वा हं महिसिमुक्तादिकां चनं। परोक्षं हृदये धृत्वा तु पश्चाद्दानं प्रयच्छति। सोपि गच्छति वै स्वर्गं दाता रोयत्र
भोगिनः। अन्यथा कर्मिणा प्रोक्ताः पच्यंते नरके धमा इति दानस्यावश्यं पकरणीयत्वं बोध्यते। न तु विधिलस्य
त्वाभावेन दानायोगात्॥ अथ दानविधिराग्नेये। तमोहृतलयोदद्यादद्याल्क्रोधान्येव च। न परदानं तु तत्त
वै भंक्ते गर्भस्थ एव सः। ईर्ष्यामन्युमता चैव दंभार्थं चार्थकारणात्। यो ददाति द्विजातिभ्यः स बालत्वे तदश्नुते।
देशे काले च पात्रे च यो ददाति द्विजातिषु। परितुष्टेन मनसा यौवनस्य स्तदश्नुते। वैश्वदेवविहीने च संध्योपासन
वर्जिते। ब्रह्मदानं दीयते तत्तु वृद्धकाले समश्नुते॥ अथ प्रतिहस्तकाः। आत्मा पुत्रः पुरोधाश्च भ्राता पत्नी सखा
पिता। यात्रायां वृद्धिकार्येषु जायंते प्रतिहस्तकाः। एभिः कृतं महद्देवि स्वयमेव कृतं भवेत्। भ्रातृपुत्रोपि चेति
च पाठः। यात्रायां तीर्थयात्रायाम्। मत्स्यपुराणे। न चिरं धारयेद्गेहे हेम संप्रोक्षितं बुधः। तिष्ठन्भयावहं तस्मा
व्याधिशोककरं तथा। शीघ्रं परस्वीकरणात् श्रेयः प्राप्नोति पुष्कलं। तथा पुराणांतरे। पूर्वसंकल्पितं द्रव्यं
रक्षितुं नैव शोभनं। हिरण्यं परलितं महारिदानुर्भयकरं भवेत्। न दत्तमिति साधुस्याद्दानं दत्तं न लंघयेत्।

कुशोदकेनयद्दत्तंदातव्यमितिनिश्चितं।यमः।सर्वजातान्नरोहन्त्याद्धत्तेमानांस्तुसत्त्वच।अतिक्रांतान्सत्तहन्या
दशयच्छन्नुप्रतिश्रुतं।यथादिवोदासे।द्रव्यंसंकल्पितंसूर्यसंक्रांतिंलंघयेयदा।सहस्रगुणितंज्ञेयंलंघ्वं
द्व्यहेभवेत्।सूर्यग्रहेकोटिगुणंभवेदेवंमनोमतं।तथा।पर्वणिदीयतेदानंद्विगुणंतत्रपर्वणि इति।तत्रप
र्वणितस्मिन्पर्वणिसंचिंते इत्यर्थः।यस्मैप्रतिश्रुतंतदभावेनारदः।ब्राह्मणस्यचयद्देयंसान्वयस्यचनास्ति
सः।सकुल्यतस्यनिनयेत्तदभावेस्वबंधुषु।यदातुनसकुल्याःस्यान्नचसंबंधिबांधवाः।दद्यात्सजातिशिष्ये
भ्यस्तदभावेप्सुनिक्षिपेत्।अंगिराः।बहुभ्योनप्रदेयानिगोगृहंशयनंस्त्रियः।विभक्तदक्षिणाह्येतादातारं
पातयंतिहि।देवतानांगुरूणांचमातापित्रोस्तथैवच।पुण्यंदेयंप्रयत्नेननापुण्यंचोदितंक्वचित्।अथदक्षि
णाअग्निपुराणे।यथानामसगोत्रायविप्रायामुकशर्मणे।एतद्दानप्रतिष्ठार्थंसुवर्णंदक्षिणांददेत्।भविष्ये।
अदत्तदक्षिणंदानंव्रतंचैवनृपोत्तम।विफलंतद्विजानीयाभस्मनीवहुतंहविः।स्कंदपुराणे।देयद्रव्यस्यतुरीयां
शंदक्षिणांपरिकल्पयेत्।अनुक्तदक्षिणेदानेदशांशंवापिशक्तितः।अथानन्यगतीनांच।तथाकृतसंक
ल्पानांअशौचेपिनित्यदानादौअशुचित्वमाह विष्णुः।नाशौचंराज्ञांराजकर्मणि।नव्रतिनांव्रते।नसत्रिणां
सत्रेइति।सत्रिणोनित्यदानादिप्रवृत्तास्तेषामपिपक्वान्नंनिषिद्धं।यदुक्तं।अन्नसत्रप्रवृत्तानामामान्नमगर्हितं।

६८
68

भुक्त्वा पक्वान्नमेतेषां त्रिरात्रं तु पयः पिबेत्। पयोत्र गोदुग्धं। याज्ञवल्क्यः। ऋत्विजां दीक्षितानां च यज्ञियं
कर्म कुर्वतां। सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा। दाने विवाहे यज्ञे च संग्रामे राष्ट्रविप्लवे। आपद्यपि च
कष्टायां सद्यः शौचं विधीयते।। ऋत्विजो वरणसंवृताः। दीक्षायां संस्कृता दीक्षिताः। सत्रिग्रहणेनैव सत
तानुष्ठानतुल्यतया सत्रप्रवृत्ता लक्ष्यंते। मुख्यानां सत्रिणां दीक्षितग्रहणेनैव सिद्धेः प्रतिशब्देनैव कृच्छ्रादिप्रवृ
त्ताः प्रायश्चित्तव्रतप्रवृत्ताश्चोच्यंते। तेषां तद्व्रतीतया पूजादावशौचाभावः। दानशब्देनात्र महादानप्रवृ
त्ताश्चोच्यंते। ब्रह्मविदो ज्ञानिनः। दानादौ प्रारब्धे संग्रामे संग्रामोद्यतस्य राज्ञः प्रस्थानिकहोमादौ राष्ट्र
विप्लवे स्फोटकादिभिरुपसर्गैराजभयाद्वा। कष्टायामापदि व्याध्याद्यभिभवे मुमूर्षावस्थायां दुरितश
मनार्थकर्मणि तथातिदरिद्रस्य मातृपितृमरणार्थं प्रतिग्रहे च सद्यः शुद्धिः स्यात्। स्नानमात्रसाध्येत्य
र्थः। तथा। दातॄणां व्रतिमात्रे केकवयः सत्रिणामपि। सद्यः शौचमदोषार्थमूचुर्धर्मविदः कलौ। पैठी
नसिः। व्याध्यातुरे च तीर्थे च विवाहे यज्ञमंडपे। चंद्रसूर्यग्रहे चैव नाशौचं मृतसूतके। अयं त्वशौचा
भावो यत्कर्मपुरस्कारेणोक्तस्तत्कर्मण्येव ज्ञेयः। न तु संध्यावंदनादावपीति माधवप्रकाशे। इति श्री
आचाररत्नाकरे दिवसाद्यभागविधिः समाप्तः।। इति दिवसाद्यभागपरिच्छेदः परिपूर्णः।। ॥

अथ दिनद्वितीयभागकृत्यमाह दक्षः ॥ द्वितीये च तथा भागे वेदाभ्यासो विधीयते । वेदस्वीकरणं पूर्वं विचारोऽभ्यस
नं जपः । तद्दानं चैव शिष्येभ्यो वेदाभ्यासस्तु पंचधा । समित्पुष्पकुशादीनां स कालः परिकीर्तितः । ग्रहणस्येति शेषः ।
वेदस्वीकरणं गुरुमुखोच्चारणानूच्चारणम् । अध्ययनमिति यावत् । पैठीनसिः । अध्येष्यमाणं तु गुरुर्नित्यकाल
मतंद्रितः । अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत् । वेदाध्ययनविधिमाह याज्ञवल्क्यः । गुरुं चैवाप्युपासीत
स्वाध्यायार्थं समाहितः । आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत् । वर्जयेन्मधुमांसादि सर्वभोगविवर्जितः । अने
नैव विधानेन वेदस्वीकरणं भवेत् । दंडाजिनोपवीतानि मेखलां चैव धारयेत् । ब्राह्मणेषु चरेद्भैक्षमनिंद्येष्वात्मवृत्तये ।
आदिमध्यावसानेषु भवच्छब्दोपलक्षितः । ब्राह्मणक्षत्रियविशां भैक्षचर्या यथाक्रमम् । इति ब्रह्मचारिणो वेदाध्य
यनप्रकारः ॥ गृहस्थस्याप्यनधीतभागे अध्ययनमाह पल्लवः । यया विद्यया न रोचेत्तां ड नराचार्यमुपेत्य शोधयेदि
ति । याज्ञवल्क्यः । वेदार्थानधिगच्छेत्तु शास्त्राणि विविधानि च । बुद्धिवृद्धिकराणीह धन्यानि च हितानि च । बुद्धि
वृद्धिकराणि तर्कमीमांसादीनि । धन्यान्यर्थोपायबोधकानि । आयुर्वेदादीनि । विविधानि दृष्टफलानि । वेदा
नभ्यासे दोषमाह व्यासः । अनभ्यासाच्च वेदानां निंदितस्य च सेवनात् । आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्जिघांसति ।
वेदानध्यापने दोषमाह बृहस्पतिः । यस्मां पृथिवीं दद्यात्सर्वरत्नोपशोभितां । स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते ।

तथा च मनुः। विद्या ब्राह्मणमेत्याह सेवधिस्तेऽस्मि रक्ष मां। असूयकाय मां मादास्तथा स्यां वीर्यवत्तमा। यमेव तु शुचिं विद्या नियतं ब्रह्मचारिणं।
तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने। विद्येति विद्याधिष्ठात्री देवता ब्राह्मणं कंचिदध्यापकमागत्यैवमवदत्। तव निधिरहमस्मि। मां रक्ष
असूयादिदोषवते न मां वदेः। तथा च सत्यतिशयेन वीर्यवती भूयासं। यमिति। यमेव तु नः शिष्यं शुचिं नियतेन्द्रियं ब्रह्मचारिणं जानासि तस्मै वि
द्यारूपनिधिरक्षका
य प्रमादरहिताय
मां वद ॥ तथा
च छांदोग्यब्राह्म
णम्। विद्या ह वै
ब्राह्मणमाजगाम
तवाहमस्मि त्वं मां
पालय अनर्हते
मानिने नैव मादाः
गोपाय मां श्रेय
सी तथाहमस्मीति
दे।

९९ ज्ञानकर्मसमायुक्तं सुतपश्च कलितं यथा। अधीतं श्रुतसंपन्नं तथा श्रेयो न केवलं। तथा। धर्मार्थौ यत्र न स्यातां शुश्रू
षा वापि तद्विधा। न तत्र विद्या वक्तव्या शुभं बीजमिवोषरे। विद्ययैव समं कामं मर्तव्यं ब्रह्मवादिना। आपद्यपि च घो
५ रायां न त्वेनामीरिणे वपेत्। इरिणेऽकृतसज्ञादौ। विद्योद्देशेन राजद्रव्यग्रहणे दोषमाह पैठीनसिः। राजद्रव्यं यथा देवि
विद्योद्देशेन गृह्यते। पच्यते आमगर्भे तु जन्मकोटिशतानि च। ज्ञातव्यः सर्ववेदार्थो वेदानां कर्मसिद्धये। पाठमा
त्रावसानस्तु पंके गौरिव सीदति। अध्ययनप्रसंगादनध्याया उक्ता आचारचंद्रोदये। अयने विषुवे चैव शयने बोधने
तथा। अनध्यायं प्रकुर्वीत मन्वादिषु युगादिषु। अनध्यायेष्वध्ययने दोषमुक्तं स्मृतिचंद्रिकायां। अनध्यायेष्वध्य
यने प्रज्ञामायुः प्रजां श्रियं। ब्रह्मवीर्यं श्रियं तेजो निकृंतति यमः स्वयं। अष्टमी च गुरुं हंति शिष्यं हंति चतुर्दशी। अमा
वस्या उभौ हंति प्रतिपत्पाठनाशिनी। यत्तु कौर्मे। अनध्यायस्तु नांगेषु नेतिहासपुराणयोः। न धर्मशास्त्रेष्वन्येषु पर्वण्येव
तानि वर्जयेत्। तत्संध्यागर्जिताद्यनध्ययनविषयं। चतुर्दश्यष्टमीपर्वप्रतिपद्वर्जितेषु च। वेदांतन्यायमीमांसाध
र्मशास्त्राणि चाभ्यसेदिति पराशरोक्तेः। गुरोरभिवादनमाह याज्ञवल्क्यः। लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च।
आददीत यतो ज्ञानं तं पूर्वमभिवादयेत्। मनुरपि। ब्रह्मारंभेऽवसाने च पादौ ग्राह्यौ गुरोः सदा। संहत्य हस्तावध्येयं
स हि ब्रह्मांजलिः स्मृतः। व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः। सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च दक्षिणः।

सव्यहस्तेन सव्यः पादः। तत्प्रकारश्च अभिवादये यज्ञेश्वर नामाहं भो इति। आयुष्मान्भव सौम्य यज्ञेश्वरशर्मन् इति
प्रत्यभिवादयेत्। अभिवादनयोग्यानाह मनुः। अभिवादयिता विप्रो ज्यायांसमभिवादयेत्। असौ नामाहमस्मीति स्वं नाम
परिकीर्तयेत्। यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनं। नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः। आशिषोऽप्रदाने
दोषमाह यमः। अभिवाद्यश्च यो विप्रो आशिषं न प्रयच्छति। श्मशाने जायते वृक्षः काककङ्कोपसेवितः। भविष्यपु
राणे। अभीति गदितो विप्रो वादयामीति शंकरः। द्वावेव पूजितौ तेन यः करोत्यभिवादनं। यत्तु पारिजाते। आत्मनाम
गुरोर्नाम यन्नाम कृपणस्य च। आयुष्कामो न गृह्णीयाज्ज्येष्ठपुत्रकलत्रयोरिति। तदभिवादनादन्यत्र स्फुटनामकथने।
मनुः। अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत्। भोभवत्पूर्वकत्वेन अभिभाषेत धर्मवित्। भोभवत्पूर्वकत्वेनेति
भो दीक्षित। भवद्दीक्षितेति संबोध्याभिवादयेदित्यर्थः। पुनः स एव। विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः।
धनधान्येन वैश्यानां शूद्राणामेव जन्मतः। गौतमः। दशाब्दाख्यं पौरसख्यं पंचाब्दाख्यं कलाभृतां। त्र्यब्दपूर्वं श्रोत्रिया
णामल्पेनापि स्वयोनिषु। एकपुरनिवासिनां विद्यारहितानां दशवर्षतः पूर्वं सख्यं भवति। ततोऽधिको ज्यायान्।
स्वयोनिषु एकदिनपूर्वोऽपि ज्यायान्। एकदिनजातः सखा। कियता कालेन ज्यायस्त्वमतीत्यपेक्षा मनुराह। मातुः पि
तुः कनीयांसं यो न मस्यद्वयोधिकः। नमस्येत्तु गुरोः पत्नीं भ्रातृजायां विमातरं। पुनः स एव। शय्यासनेऽध्याचरिते श्रे

७० यस्मान्न समाविशेत् । शय्यासनस्थश्चैवैनं प्रत्युत्थायाभिवादयेत् । ब्राह्मणं कुशलं पृच्छेत् क्षत्रबंधुमनामयं । वैश्यं क्षेमं
७० समागत्य शूद्रमारोग्यमेव च । श्रेयसा श्रेष्ठेन अभिवादनं हस्तद्वयेन कर्त्तव्यं । एकहस्ताभिवादने दोषमाह विष्णुः ।
जन्मप्रभृति यत्किंचिच्चेतसा धर्ममाचरेत् । सर्वं तन्निष्फलं याति चैकहस्ताभिवादनात् । तथा । अजाकर्णेन विदु-
षां मखीनामेकपाणिना । अजाकर्णोऽञ्जलिः । कात्यायनः । कंठप्रावृतो गां तु कृत्वा चाचार्यस्य वंदनं । उपगम्य
गुरून्सम्यग्विप्रांश्चैवाभिवादयेत् । अभिवादनफलमाह आचारचन्द्रोदये । अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्द्धन्ते आयुः कीर्तिर्यशोबलं । ऊर्ध्वं प्राणा ह्युत्क्रामंति यूनः स्थविर आगते । प्रत्युत्थानाभिवादाभ्यां पुनः
स्तान्प्रतिपद्यते । जमदग्निः । देवताप्रतिमां दृष्ट्वा यतिं दृष्ट्वा त्रिदंडिनं । नमस्कारं न कुर्याच्चेत्प्रायश्चित्ती भवेन्नरः ।
नारदीये । सभायां यज्ञशालायां देवतायतनेष्वपि । प्रत्येकं च नमस्कारो हंति पुण्यं पुराकृतं । अत्र मिलिता एव नम-
स्याः । वाराहे । ब्राह्मणं वामनं दृष्ट्वा वाराहं च जलोत्थितं । नमस्येच्चैव यो भक्त्या सर्वपापेभ्यः प्रमुच्यते । वामनं द्विपंचा-
शदंगुलिपरिमाणं । यज्वाग्निहोत्री नरः सत्री शतायुर्धार्मिकः शुचिः । एते दृष्टाः पुनंतीह ये चान्ये च तपस्विनः ।
अथानभिवाद्याः । तत्र बृहस्पतिः । हसंतं जल्पमानं च कुर्वंतं दंतधावनं । अभ्यक्तशिरसं चैव स्नांतं नैवाभिवादयेत् ।
तथा । जपयज्ञालयस्थं च समित्पुष्पकुशानलं । जलमार्जनभैक्षं च वहंतं नाभिवादयेत् । तथा । पाषंडं पतितं व्रा-

त्यं महापातकिनं शठं । सोपानत्कं कृतघ्नं च नाभिवादेत्कथंचन । शातातपः । अभिवाद्य द्विजः शूद्रं सचैलं स्नान
माचरेत् । ब्राह्मणानां शतं सम्यगभिवाद्य विशुद्ध्यति । नाभिवाद्यास्तु विप्रेण क्षत्रियाद्याः कथंचन । ज्ञानकर्मगुणो
पेता यद्यप्येते बहुश्रुताः ॥ अथ प्रसंगात्कार्याकार्याणि लिख्यंते । तत्र कार्याणि वैस्मवे । वर्षातपादिके छत्री दं
डी रात्र्यटवीषु च । शरीरत्राणकामो हि सोपानत्कः सदा व्रजेत् । तथा । ब्रह्मचारी नृपस्नातस्त्रीरोगीवरचक्रि
णां । पंथा देयो नृपस्तेषां मान्यः स्नातश्च भूपतेः । भूपतेः स्नातको मान्य इत्यन्वयः । मनुः । चक्रिणो दशमीस्थ
स्य रोगिणो भारिणः स्त्रियः । स्नातकस्य च राज्ञश्च पंथा देयो वरस्य च । वरस्यैवैवाह्यस्य । ब्राह्मणश्चैव राजा च द्वा
वप्येतौ धृतव्रतौ । न तयोरंतरं किंचित्प्रजाधर्माभिरक्षणात् । दिवोदासे । अरणिं कृष्णमार्जारं चंदनं सुमणिं
घृतं । तिलाः कृष्णाजिनं छागं गृहे ष्वेतानि धारयेत् । ब्राह्मे । स्वमात्मानं घृते पश्येद्यदीच्छेच्चिरजीवितं । अ
थ वर्ज्यानि । तत्र पराशरः । न करे मल्लकं दद्यान्न करं मस्तके तथा । न जानुनोः शिरो धार्यं न चाहृत शिरोप
ठेत् । पठेदिति स्वाध्यायमित्यर्थः ॥ योगियाज्ञवल्क्यः । न कुर्याद्दंतसंघर्षं न कुष्णीयाच्च नासिकां । नासंवृतमुखो
जृंभेच्छ्वासकाशौ च वर्जयेत् । नोच्चैर्हसेत्सशब्दं च न मुंचेद्पवनं बहु । न खान्नखादयेच्छिंद्यान्न तृणानि महीं लिखेत् ।
न श्मश्रुं भक्षयेल्लोष्ठं न गृह्णीयाद्विचक्षणः । ज्योतींष्यमेध्यशस्त्राणि नाभिवीक्षेत वै प्रभाः । न नग्नां परस्त्रियं चैव सूर्यं

७१ चास्तमयोदये। हुंहुंकुर्याच्छवं नैव शवगंधो हि सोमजः॥ सूर्यं चास्तमयोदये नाभिवीक्षेतेति शेषः। मिताक्षरायां।
उपभोगादन्यत्र स्वस्त्रीमपि न वीक्षेत। नग्नामिति शेषः। न नग्नां स्त्रियमीक्षेत अन्यत्र मैथुनादित्याश्वलायनः। पुनः स
एव। चतुष्पथं चैत्यतरुं श्मशानोपवनानि च। दुष्टस्त्रीसन्निकर्षं च दूरतः परिवर्जयेत्। शृंगिणो दंष्ट्रिणश्चैव दूर
तः परिवर्जयेत्। याज्ञवल्क्यः। देवर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियाः। नाक्रमेद्रक्तविण्मूत्रष्ठीवनोद्वर्त
नानि च। सौपर्णी। पादेन नाक्रमेत्पादं शुष्कं वैरं न कारयेत्। सूर्पवातो नखाग्रांबु स्नानवस्त्रं घटोदकं। मार्जनी
रेणुकेशांबु हंति पुण्यं दिवाकृतं। दीपशय्यासनच्छाया कार्पासं दंतधावनं। अजाविरेणुसंस्पर्शः शक्रस्यापि श्रियं
हरेत्। द्वौ विप्रौ विप्रमग्निं च दंपत्योः स्वामिभृत्ययोः। अंतरा न हि गंतव्यं हयस्य वृषभस्य च। पराशरः। न लंघयेच्च
त्रमत्राद्यं वाय्यग्न्योर्नांतरागतिः। न द्वयोर्विप्रयोर्नाग्न्योः सौरभेय्योः परस्त्रियोः। पैठीनसिः। न गोब्राह्मणा
ग्न्यंतरेण व्यपेयात्। अनुज्ञाप्य वा व्रजेत्। तथा। जलं पिबेन्नांजलिना न शयानं प्रबोधयेत्। नाक्षैः क्रीडेद्धनार्थी
च व्याधितैर्न च संविशेत्। विद्यादिभिरात्मनोधिकं न प्रबोधयेत्। नोत्थापयेत्तु श्रेयांसमिति मिताक्षरायाम्।
लक्ष्मीपतिं प्रति ब्रह्मवाक्यम्। एकच्छायां गंधिरावेयं त्रिरात्रं पंचमासिकं। षडब्दं सप्तमातंगं स भार्यस्त्वं समाविश।
याजनं योनिसंबंधं स्वाध्यायं सहभोजनं। कृत्वा सद्यः पतत्येव पतितेन न संशयः। अग्नौ न प्रक्षिपेदग्निमद्भिर्न शमयेत्तथा।

इत्याचाररत्नाकरे दिवसद्वितीयभागकृत्यपरिच्छेदः ॥ अथ तृतीयभागकृत्यम् ॥ तत्र दक्षः । तृतीये च तथा भागे
पोष्यवर्गार्थसाधनं । अर्थसाधनं द्रव्यार्जनं कुर्यादिति शेषः । स एव पोष्यवर्गमाह । माता पिता गुरुर्भार्या प्रजा हीनाः
समाश्रिताः । अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः । भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनं । तथा । वृद्धौ च
मातापितरौ साध्वी भार्या शिशुः सुतः । अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत् । इमं लोकं मातृभक्त्या पितृभ
क्त्या च मध्यमं । गुरुशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते । सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः । अनादृतास्तु य
स्यैते सर्वास्तस्याफलाः क्रियाः । यावत्त्रयस्ते जीवेरंस्तावन्नान्यं समाचरेत् । तेष्वेव नित्यं शुश्रूषां कुर्यात्प्रियहिते रतः ।
गौतमः । उपाध्यायाद्दशाचार्या आचार्याणां शतं पिता । पितुः शतगुणं माता गौरवेणातिरिच्यते । श्रीभागवते ।
आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः । भ्राता मरुत्पतेर्मूर्तिर्माता साक्षात्क्षितेस्तनुः । दयाया भगिनी मूर्तिर्ध
र्मस्यात्मातिथिः स्वयं । अग्नेरभ्यागतो मूर्तिः सर्वभूतानि चात्मनः । तथा । पित्रोर्नित्यं प्रियं कुर्यादाचार्यस्य च
सर्वदा । तेषु हि त्रिषु तुष्टेषु तपः सर्वं समाप्यते । गौतमः । अथ योगक्षेमार्थमीश्वरमधिगच्छेत् । नान्यत्र गुरुदेवधा
र्मिकेभ्यः । अप्राप्तप्राप्तिर्योगः । प्राप्तस्य परिपालनं क्षेमं । अन्यमनीश्वरं । याज्ञवल्क्यः । उपेयादीश्वरं चैव योग
क्षेमार्थसिद्धये । न स्वाध्यायविरोध्यर्थमाहरेत यतस्ततः । तथा हि । अग्निचित्कपिलासत्री राजा भिक्षुर्महोदधिः ।
कूर्मपुराणेऽपि । उपेयादीश्वरं चाथ योगक्षेमप्रसिद्धये । साधयेद्विविधानर्थान्कुटुंबार्थे ततो द्विज इति ॥

७२
72

दुष्टमात्राः पुनं त्येते तस्मात्यक्षपेतनित्यशः। नारदः। धर्मेतत्संकृतं तस्य रत्नार्थं शासतोऽशुचीन्। मेध्यमेव
धनं प्राहुः तीक्ष्णस्यापि महीपतेः। अशुचीन्सापराधान्। पुनः स एव। यथाग्नौ संस्थिते दीप्ते शुद्धतां याति कांच
नं। एवं धनागमाः सर्वे शुद्धिमायांति राजनि। अशुचिर्वचनाद्यस्य शुचिर्भवति पूरुषः। शुचिश्चैवाशुचिः सद्यः
कथं राजा न दैवतं। विदुर्यैव दैवत्यं राज्ञोह्यमिततेजसः। तस्यैते प्रतिगृह्णंतो न लिप्यंते कथंचन। न लिप्यंते
पापेनेति शेषः। देवत्वमष्टदिक्पालकत्वमिति शूद्रकुलाचारविषयं। शूद्रकुलाचारे यमः। अराजन्यात्प्रस
ते च राज्ञः स्वच्छंदवर्तिनः। चोरः प्रतिग्रहस्तस्य मद्यस्वादो विषोपमः। तथैव राजमहिषी राजामात्यपुरोहिताः।
पापेनार्थेन संयुक्ताः सर्वे ते राजधर्म्मिणः। प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः। दुष्टा दशगुणं चैव पूर्वाद
ते यथोत्तरं। अन्यच्च। दशसूना समं चक्रं दशचक्रसमो द्विजः। दशद्विजसमा वेश्या दशवेश्यासमो नृपः। अदैन
तु ततोमात्यः सेनानीर्दंडनायकौ। ततोर्धार्द्धं तदर्द्धार्द्धं माश्रितोपाश्रितेषु च। मनुः। यात्रामात्रप्रसिद्ध्यर्थं स्वैः
अगर्हितानि कर्म्माणि अध्यापनादीनि २
कर्मभिरगर्हितैः। अक्लेशेन शरीरस्य कुर्वीत धनसंचयं। मार्कंडेयपुराणे। देशानुशिष्टं कुलधर्ममग्र्यं स्वगोत्रध
र्मं न हि संत्यजेच्च। यस्मिन्देशे यस्यां जातौ यस्मिन्कुले यो धर्मः प्रायोऽनिंदितो विहितः स एव करणीय इत्यर्थः।
पारिजाते। समयाचारका धर्मा देशजातिकुलोद्भवाः। ग्रामाचाराः परिज्ञाता ये च विध्यविरोधिनः। युगधर्माः

परिग्राह्याः सर्वत्रैव यथोचितं । मनुः । येनैव पितरो याता येन याता पितामहाः । तेन यायात्सतां मार्गं येन गच्छ-
न्न रिष्यति । यदि पितृणामेव सन्मार्गं तदा तमेव यायात् । नो चेत्तदा सतां शिष्टानां मार्गं यायादित्यर्थः । तथा ।
विरुद्धं नैव सेवेत संतोषी च भवेत्सदा । नात्रेणाकर्मणा जीवन्विशां वाप्यापदि द्विजः । अथ धनार्जनं भारते ।
अर्थेन हि विहीनस्य पुरुषस्याल्पमेधसः । उच्छिद्यंते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा । मदनपारिजाते । अविशे-
षेण सर्वेषां त्रिविधं धनमुच्यते । वैशेषिकं धनं विद्याद्ब्राह्मणस्य त्रिलक्षणं । प्रतिग्रहेण यल्लब्धं याज्यतः शिष्यत-
स्तथा । गुणान्वितेभ्यो विप्रेभ्यः शुक्लं तत्त्रिविधं धनं । त्रिविधं क्षत्रियस्यापि प्राहुर्वैशेषिकं धनं । युद्धोपलब्धं का-
रं च दंडश्च व्यवहारतः । कारं करः । वैशेषिकं धनं ज्ञेयं वैश्यस्यापि त्रिलक्षणं । कृषिगोरक्षवाणिज्यैः शूद्र-
स्यापि त्वनुग्रहात् । इतरवर्णानुज्ञया शूद्रोपि कृषिगोरक्षवाणिज्यैर्वैशेषिकधनैः स्यादित्यर्थः । नारदः । तत्तु
न त्रिविधं ज्ञेयं शुक्लं शबलमेव च । कृष्णं तस्य तु विज्ञेयो विभागः सप्तधा पुनः । श्रुतशौर्यतपः कन्या शिष्यया-
ज्यान्वयागतं । धनं सप्तविधं शुक्लमुदयोप्यस्य तद्विधः । कुसीदकृषिवाणिज्यशुल्कशिल्पानुवृत्तितः । कृतोप-
कारादापन्नं शबलं समुदाहृतं । पार्श्विकं चैव चौर्यार्त्तिप्रतिरूपकसाहसैः । व्याजेनोपार्जितं यच्च तत्कृष्णं समुदा-
हृतं । यथाविधेन द्रव्येण यत्किंचित्कुरुते नरः । तथाविधमवाप्नोति स फलं प्रेत्य चेह च । कन्यागतं श्वशुरादि-

७३ दत्तं । अन्वयागतं दायादि प्राप्तं । पार्श्विकं लुंठनात्प्राप्तं । प्रतिरूपकं कूटविधानं । कृत्रिमधातुरत्नादि । साहसं
73 गिर्यारोहणादि । असत्यशपथं कृत्वा क्रूरकार्यं । व्याजेन घृतव्याजेन तैलादि । धनविभागो भागुरिः । पादेन दे न २=
कार्यपारत्र्यं पादं कुर्यात्स्वसंचयं । अर्द्धेन चात्मभरणं नित्यनैमित्तिकान्वितं । महापुराणेपि । धर्माय यश
से र्थाय कामाय स्वजनाय च । पंचधा विभजन्वित्तमिहामुत्र च मोदते ॥ अथ प्रसंगाद्वर्णधर्मान्विध
त्सुः तावद्वर्णाभिव्यंजकलक्षणान्यभिधत्ते । तत्र महापुराणं । शमो दमस्तथा शौचं संतोषः क्षांति
रार्जवं । दानं दया च कृतात्मत्वं सत्यं च ब्रह्मलक्षणं । श्रीभागवतेपि । सत्यं दया तपः शौचं तितिक्षेक्षा
शमो दमः । अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवं । संतोषः समदृक्सेवा ग्राम्येहोपरमः शनैः । नृणां विप
र्ययेहेक्षा मौनमात्मविमर्शनं । अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः । तेष्वात्मदेवताबुद्धिः सुतरां नृषु पांडव ।
श्रवणं कीर्तनं चास्य स्मरणं महतां गतिः । सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणं । नृणामयं परो धर्मः सर्वे
षां समुदाहृतः ॥ दशलक्षणमाहरान्तः ॥ शौर्यं वीर्यं धृतिस्तेजस्त्याग आत्मजयः क्षमा । ब्रह्मण्यता प्रमादश्च
रक्षा च क्षत्रलक्षणं । देवगुर्वच्युतभक्तिस्त्रिवर्गपरिपोषणं । आस्तिक्यमुद्यमो नित्यं नैपुण्यं वैश्यलक्षणम् ।
शूद्रस्य संनतिः शौचं सेवा स्वामिन्यमायया । अमंत्रयज्ञो ह्यस्तेयं सत्संगो विप्ररक्षणम् ॥ अथ साधारणधर्मानाह स्मृतिः ॥

अहिंसासत्यमस्तेयं शौचमिंद्रियनिग्रहः। दानं दमो दया क्षांतिः सर्वेषां धर्मसाधनम्। भविष्यपुराणे। वर्णधर्मः
स्मृतस्त्वेक आश्रमाणामतः परं। वर्णाश्रमस्तृतीयस्तु गौणो नैमित्तकस्तथा। वर्णत्वमेवमाश्रित्य यो धर्मः संप्रवर्त्तते।
वर्णधर्मः स उक्तस्तु यथोपनयनं नृप। यस्त्वाश्रमं समाश्रित्य यो धर्मः संप्रवर्त्तते। स वर्णाश्रमधर्मस्तु मौंजीयं तेष
लायथा। यो गुणेन प्रवर्त्तेत गुणधर्मः स उच्यते। यथा मूर्द्धाभिषिक्तस्य नृपस्य परिपालनं। निमित्तमेक
माश्रित्य यो धर्मः संप्रवर्त्तते। नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा॥ अथ ब्राह्मणधर्मे बृहत्पराशरः॥
षट्कर्मनिरतो विप्रो देवतातिथिपूजकः। हुतशेषं च भुंजानो ब्राह्मणो नावसीदति। संध्या स्नानं जपश्चैव देवता
नां च पूजनं। वैश्वदेवस्तथातिथ्यं षट्कर्माणि दिने दिने। संध्या स्नानमित्यत्र क्रमो न विवक्षितः। स्नानपूर्वं संध्योक्तेः।
अध्यापनं चाध्ययनं यजनं याजनं तथा। दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्। मनुः। षण्णां तु कर्मणामस्य
त्रीणि कर्माणि जीविका। याजनाध्यापने चैव विशुद्धश्च प्रतिग्रहः। इज्याध्ययनदानानि क्षत्रियाणां विशामपि।
प्रतिग्रहेधिके विप्रे याजनाध्यापने तथा। इज्याध्ययनदानानि च कारा ब्राह्मणस्य च। अतः। इज्याध्ययनदा
नानि सर्वेषां च द्विजन्मनां। प्रतिग्रहोध्यापनं च ब्राह्मणस्यैव याजनं। प्रतिग्रहं मन्यमानः तपस्तेजो यशो नुदं।
अन्याभ्यामेव जीवेत शिष्टैर्वा दोषदृक्तयोः। अन्याभ्यामध्यापनयाजनाभ्यां तयोर्दीर्घकार्पण्यादिपश्यतीति

७४ दोषदृक्। अथ ब्राह्मणधर्माः। ब्राह्मणो द्विविधः प्रोक्तः साधकोऽसाधकस्तथा। यथा कौर्मे। द्विविधस्तु गृही ज्ञेयः
74 साधकश्चाप्यसाधकः। अध्यापनं याजनं च पूर्वस्याहुः प्रतिग्रहं। शिलोञ्छं वाप्युपादद्याद् गृहस्थः साधकः स्मृतः।
असाधकस्तु यः प्रोक्तो गृहस्थाश्रममाश्रितः। शिलोञ्छे तस्य कथिते द्वे वृत्ती परमर्षिभिः। क्षेत्रपतितकणादानं
शिलं। रथ्यापतितकणादानं उञ्छः। न लोकवृत्तिं वर्तेत वृत्तिहेतोः कथंचन। अजिह्मामशठां शुद्धां जीवेद्ब्रा
ह्मणजीविकां। ब्राह्मणस्य वृत्तिरूपान् धर्मानाह बृहस्पतिः। ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन च। सत्या
नृताभ्यां जीवेत न श्ववृत्त्या कथंचन। ऋतमुञ्छशिलं प्रोक्तं अमृतं स्यादयाचितं। मृतं तु नित्ययाञ्चा स्यात् प्रमृतं क
र्षणं स्मृतं। सत्यानृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनं। वर्जयेत्तां सदा विप्रो राजन्यस्तु जुगुप्सितं। उक्तं च। सेवा
श्ववृत्तिराख्याता यैस्तैर्न सम्यगुदाहृतं। श्वा तु पुच्छेन कुरुते चाटु मूर्ध्ना तु सेवकः। मनुः। राजतो धनमन्विच्छेत् संसी
कः ४ दन् स्नातकः क्षुधा। याज्यान्तेवासिनो वापि न त्वन्यत इति स्थितिः। न सीदेत् स्नातको विप्रः क्षुधा शक्तः कथंचन। न
जीर्णमलवद्वासा भवेच्च विभवे सति। क्लृप्तकेशनखश्मश्रुर्दान्तः शुक्लाम्बरः शुचिः। स्वाध्याये चैव युक्तः स्यान्नि
त्यमात्महितेषु च। वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुं। यज्ञोपवीतं वेदं च शुभे रौक्मे च कुण्डले। अकर्णभे
देऽप्यकर्णच्छेदे यज्ञोपवीती न तथा द्विजो यः। शिखाप्रबंधी न तथाहमन्त्री ते देवपित्र्योपरि वर्जनीयाः। भिन्नवृत्ति

याज्ञवल्क्योऽपि। कुसूलकुम्भीधान्यो वा त्र्याहिकोऽश्वस्तनोऽपि वा। जीवेद्वापि शिलोञ्छेन श्रेयानेषां परः परः इति ६४

र्यथानस्यात्कुर्यादि प्रतलघार्जनं। आजीवन्कर्मणानेन विप्रः क्षात्रं समाचरेत्। वैश्यकर्माथ वा कुर्याद्धीनकर्म विव
र्जयेत्। लूपि छेदने। कौर्म्मे। कुसीदं कृषिवाणिज्यं प्रकुर्वीत स्वयंकृतं। कृषेरभावे वाणिज्यं तदभावे कुसीदकं।
पराशरः। अष्टागवं धर्महलं षड्गवं जीवितार्थिनां। चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनां। हीनांगं व्याधितं क्ली
वं वृषं वृद्धं न वाहयेत्। वाहयेद्दिवसार्द्धं तु पश्चात्स्नानं समाचरेत्। प्रतिग्रहाच्च तुर्यांशं वणिक्लाभात्तृतीयकं। कृषि
तो विंशतिं चैव ददतो नास्ति पातकं। ब्राह्मणेन परद्वारा कृष्यादिकर्म कारयितव्यम्। शस्त्रमथ हलस्पर्शात्सद्यः पतति
वै द्विजः। जीवेदापदि शस्त्रेण न हलेन न सीधुनेति। स्वकर्तृकनिषेधात्। मनुः। ब्राह्मणः क्षत्रियो वापि वृद्धिं नैव प्रयो
जयेत्। कामं तु खलु धर्मार्थं दद्यात्पापीयसेल्पिकं। पुराणान्तरे। गवां विक्रयकारी तु गवि रोमाणि यानि तु। तावद्वर्ष
सहस्राणि गवां गोष्ठे कृमिर्भवेत्। अत्रापवादमाह स्मृतिः। तिलाः स्वकर्षणोत्पन्नाः स्वगोष्ठीयाश्च धेनवः। ऋणाय
न विवाहार्थं विक्रयेनास्तिपातकम्। भोजनाभ्यंजनाद्दानाद्यदन्यत्कुरुते तिलैः। कृमिर्भूत्वा च विष्ठायां पितृभिः
सह मज्जति। रसा रसैर्निमातव्या न त्वेव लवणं रसैः। न कृतं चाकृतान्नेन तिला धान्येन तत्समाः। अत्रिः। सद्यः
पतति मांसेन लाक्षया लवणेन च। त्र्यहाच्छूद्रो भवति ब्राह्मणः क्षीरविक्रयात्।। अथ क्षत्रियधर्माः। तत्र स्मृ
तिः। प्रधानं क्षत्रिये कर्म प्रजानां परिपालनं। कुसीदं कृषिवाणिज्यं पाशुपाल्यं विशः स्मृतम्। श्रीभागवते।

८५ विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहः। राज्ञो वृत्तिः प्रजागुप्तिरविप्राद्वा करादिभिः। अन्यस्य क्षत्रियस्याप्रतिग्रहः। आ
75 पद्यपि याजनाध्यापने अपि विहिते। प्रजागोप्तुः क्षत्रियस्य विप्रव्यतिरेकेन करदंडशुल्कादिभिर्वृत्तिरित्यर्थः। जघन्योनो
त्तमां वृत्तिमनापदि भजेन्नरः। अकृते राजन्यमापत्सु सर्वेषामपि सर्वशः। जघन्योनीचः। उत्तमामध्ययनादिरूपां अकृ
ते राजन्ये। क्षत्रियत्वापदि प्रतिग्रहादन्यां भजेदित्यर्थः। सिद्धांतमुक्ताफले राजधर्माः। दोषो हि दंडः सज्जनस्य सेवा
न्यायेन कोशः स्वजनस्य वृत्तिः। विपक्षघातः स्वकराष्ट्ररक्षणं षडेव यत्नाः कथिता नृपाणां। धरणीपालनेनैव कृतकृ
त्यो भवेन्नृपः। अरक्षमाणाः कुर्वंति यत्किंचित्किल्बिषं प्रजाः। तस्मात्पृथ्वीपतेरर्द्धं यस्माद्गृह्णात्यसौ करान्। ब्राह्मणे
षु क्षमी स्निग्धेष्वजिह्मः क्रोधनोरिषु। स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता॥ ॥अथ वैश्यधर्माः। तत्र स्मृतिः।
कुसीदं कृषिवाणिज्यं पाशुपाल्यं विशः स्मृतं। लोहकर्मरथानां च गवां च परिपालनं। तथा। कुसीदं कृषिवाणिज्यं वै
श्यवृत्तिरुदाहृता। सर्वेषां जीवनं प्रोक्तं धर्मतो वृत्तिकर्षणं। योगियाज्ञवल्क्यः। अशीतिभागो वृद्धिः स्यान्मासि मासि सबं
धके। वर्णक्रमाच्छतं द्वित्रिचतुष्पंचकमन्यथा। कांतारगास्तु दशकं सामुद्रा विंशतिः शतं। दद्युर्वा स्वकृतां वृद्धिं सर्वे
सर्वासु जातिषु। मनुः। नातिसंवत्सरं वृद्धिर्नादिष्टं तु पुनर्हरेत्। चक्रवृद्धिः कारिका च कायिका कालिका च या। तल्ल
क्षणं याज्ञवल्क्यः। वृद्धेर्वृद्धिश्चक्रवृद्धिः प्रतिमासं तु कालिका। इच्छाकृता कारिका स्यात् कायिका कायकर्मणा। हारीतः।

शूद्रवृत्तिस्तु शङ्खेनसा दर्शिता। शूद्रस्य द्विजशुश्रूषा सर्वशिल्पानि वाप्यथ। विक्रयः सर्वपण्यानां शूद्रकर्म ह्युदाहृतमिति। हारीतोपि। शूद्रस्य द्विजशुश्रूषाद्यवर्जनं कलत्रादिपोषणं कर्षणं पशुपालनं भारोद्वहनं पण्यव्यवहार चित्रकर्म नृत्यगीत वेणु वीणामृदङ्गवादनानीति २५

अजीवन्निति पदच्छेदः ४५

वर्द्धितं द्विगुणं यस्मात्तु न तत्रैव वर्द्धते। मूलं तत्तु भवेद्वृद्धिश्चतुर्भागेन नान्यथा। चतुर्भागाद्वृद्धिर्वस्त्रादिविषयः। बृहस्पतिः। बहवो वर्त्तनोपाया ऋषिभिः परिकीर्त्तिताः। सर्वेषामपि चैतेषां कुसीदमधिकं विदुः। अनावृष्ट्या राजभयान्मूषकाद्यैरुपद्रवैः। कृष्यादिकामवेद्धानिः सा कुसीदे न विद्यते॥ ॥अथ शूद्रधर्माः॥ तत्र मनुः। विप्र शूद्रस्य द्विजशुश्रूषा तयाजीवन्वणिग्भवेत्। शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन्। पराशरः। शुश्रूषा ब्राह्मणादीनां तेभ्य आजीवनं तथा। एष धर्मः स्मृतः शूद्रे वाणिज्येन च जीवनं। भविष्यपुराणे। उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च। पुलकांश्चैव धान्यानां जीर्णांश्चैव परिच्छदान्। उच्छिष्टं पाकपात्रोद्धृतशेषम्। न भोजनपात्रोच्छिष्टम्। तस्यापि नमस्कारमंत्रक पाकयज्ञविधानात्। पुलकास्तुच्छसारधान्यम्। बृहत्पराशरः। विक्रयो मद्यमांसानामभक्ष्यस्य च भक्षणं। अगम्यागमनं चैव शूद्राणां पापहेतवः॥ ॥अथ वर्णसंकरधर्माः॥ श्रीभागवते। वृत्तिः संकरजातानां तत्तत्कुलकृता भवेत्। अचौराणामपापानामंत्यजांतेवसायिनां॥ ॥अथापद्धर्मास्तत्रैव। सीदन्विप्रो वणिग्वृत्त्या पण्यैरेवापदं तरेत्। खड्गेन वापदाक्रांतो न श्ववृत्त्या कथंचन। वैश्यवृत्त्या तु राजन्यो जीवेन्मृगयया पदि। चरेद्वा विप्ररूपेण न श्ववृत्त्या कथंचन। शूद्रवृत्तिं भजेद्वैश्यः शूद्रः कारुकटक्रियां। कृच्छ्रान्मुक्तो न गर्ह्येण वृत्तिं लिप्सेत कर्मणा। पण्यैर्विक्रयैः। लवणाद्यैः। विप्ररूपेणाध्यापनादिना। अपरार्के। आपत्कालेन यो धर्मः कुरुते नापदि

७६ 76

द्विजः। सनाप्नोति फलं तस्य परत्रेति विचारितं॥ अथ प्रसंगात्प्राप्ताः स्त्रीधर्माः॥ तत्र सामान्यस्त्रीधर्मे याज्ञवल्क्यः। आयतो
पस्करे दक्षा हृष्टा व्ययपराङ्मुखी। कुर्याच्छ्वशुरयोः पादवंदनं भर्तृतत्परा। मृते जीवति वा पत्यौ या नान्यमुपगच्छति।
सेह कीर्त्तिमवाप्नोति मोदते चोमया सह। सूक्ष्मेभ्योपि प्रसंगेभ्यः स्त्रियो रक्ष्या हि सर्वतः। रक्षेत्कन्यां पिता विन्नां पतिः
पुत्रश्च वार्धके। नियोज्या गृहकृत्येषु सर्वदातान्तभिः स्त्रियः। अभावे ज्ञातयः सर्वा न स्वातंत्र्यं हि योषितः। पराशरः।
नियोज्या गृहकृत्येषु सर्वदा पतिभिः स्त्रियः। गृहार्थाशक्तचित्ता सा लालदेवार्हति शोचितुं। स्त्रीणामष्टगुणः कामो
व्यवसायश्च षड्गुणः। लज्जा च तुर्गुणा तासां आहारश्च तदर्द्धतः। स्वातंत्र्येण विनश्यंति कुलजापि कुलेपि ताः। न स्वा
तंत्र्यमतस्तासां प्रजापतिरकल्पयत्। भारते। पानं दुर्जनसंसर्गः पत्या च विरहोटनं। स्वप्नोन्यगेहे वासश्च स्त्रीणां वै
दूषणानि षट्। नोलूषले न मुशले न वर्द्धिन्यां दृषद्यपि। न यंत्रके न देहल्यां न स्त्री चोपविशेत्क्वचित्। मनुः।
अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा। दाराधीनस्तथा स्वर्गः पितृणामात्मनश्च ह। यदि हि स्त्री न गच्छेत पुमांसं न
प्ररोचयेत्। अप्रमोदात्पुनः पुंसः प्रजनो नोपपद्यते। तस्माद्यत्नेन रक्षेत भर्त्तव्या मनुरब्रवीत्। न कश्चिद्योषितः
शक्तः प्रसह्य परिरक्षितुं। एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुं। अर्थस्य संग्रहे चैव व्यये चैव नियोज
येत्। शौचे धर्मेऽन्नपक्त्यां वा पारिणाह्यस्य वीक्षणे। भोज्यालंकारवासोभिः पूज्याः स्युः सर्वदा स्त्रियः। यथा

किंचिन्नशोभंवतिनित्यंकार्यंतथान्नभिः। वर्द्धयंतिकुलंतुष्टानाशयंत्यपमानिताः। नापमान्याः स्त्रियः सद्भिः प
तिस्वजनदेवरैः। शय्यासनमलंकारं कामंक्रोधमनार्जवं। द्रोहभावंकुचर्यांचस्त्रीभ्योमनुरकल्पयत्। नास्तिस्त्रीणां
क्रियामंत्रैरितिधर्मोव्यवस्थितः। निरिंद्रियाह्यमंत्राश्चस्त्रियोनृतमितिस्थितिः। निरिंद्रियाधर्मप्रमाणरहिताः।
पूज्यत्वंसद्वृत्तायाः। असद्वृत्तायास्तुप्राणयात्रामात्रभोजनम्। तथाचयाज्ञवल्क्यः। हृताधिकारांमलिनांपिंडमा
त्रोपजीविनीं। परिभूतामधःशय्यांवासयेद्व्यभिचारिणीं। अधिविन्नापिभर्त्तव्यामहदेनोन्यथाभवेत्॥ ॥अथ
पतिव्रताधर्माः। तत्रपराशरः। पतिव्रतातुसाध्वीस्त्री अपिदुष्कृतकारिणं। पतिमुद्धृत्ययातिद्यांकेकीवपतितोरगं।
जीवन्वापिमृतोवापिपतिरेवप्रभुःस्त्रियाः। नान्यातुदेवतातासांतमेवप्रभुमर्चयेत्। कूर्मपुराणे। यावत्स्वलोमसं
ख्यानितावत्कोटयायुतानिच। भर्त्रासहस्वर्गेहर्षंभुंक्तेरममाणापतिव्रता। धन्यासाजननीलोकेधन्योसौजनकःपुनः।
धन्यःसचपतिःश्रीमान्यस्यगेहेपतिव्रता। पितृवंश्यामातृवंश्याःपतिवंश्यास्त्रयस्त्रयः। पतिव्रतायाःपुण्येनस्व
र्गसौख्यादिभागिनः। सर्पिर्लवणतैलादिक्षयेप्यपिपतिव्रता। पतिंनास्तीतिनब्रूयादापद्यर्थेनियोजयेत्। आप
द्यर्थे इत्यनेनघृतादिकंगेहेस्वल्पमित्येवब्रूयात्। नतुनास्तीति। स्कांदेपि। भुंक्तेभुंक्तेपतौयातु आसीनाचास्थिते
पतौ। विनिद्रितेविनिद्रातिप्रथमंपरिबुध्यते। अनलंकृतमात्मानंपत्युर्नोदर्शयेत्क्वचित्। कार्यार्थंप्रस्थितेपत्यौ

७८ सर्वमंडनवर्जिता । नचतन्नामगृह्णीयात्तस्यायुःपरिवृद्धये । आहूतागृहकार्याणित्यक्त्वागच्छतिसत्वरं । ए
77 जोपकरणंसर्वमनुक्ताशोधयेत्स्वयं । सेवेतभर्तुरुच्छिष्टमिष्टमन्नफलादिकं । महाप्रसादइत्युक्त्वापतिदत्तंप्रती
च्छति । काशीखंडे । तीर्थस्नानार्थिनीनारीपतिपादोदकंपिबेत् । शंकरादपिविष्णोर्वापतिरेवाधिकोमतः ।
तथा । भर्तादेवोगुरुर्भर्ताधर्मतीर्थव्रतानिच । तस्मात्सर्वंपरित्यज्यपतिमेकंसमर्चयेत् । महापुराणे । स्त्रीणांच
पतिदेवानांतच्छुश्रूषानुकूलता । तद्वंधुष्वनुवृत्तिश्चनित्यंतद्व्रतधारणं । संतुष्टालोलुपादक्षासर्वज्ञापिचसत्यवा
क् । अप्रमत्ताशुचिःस्निग्धापतिंत्वपतितंभजेत् । अपतितंमहापातकशून्यम् । आश्वद्धैःसंप्रतीतोहिमहापातक
दूषितः इति याज्ञवल्क्योक्तेः । अथप्रोषितभर्तृकाधर्माः । तत्रयोगी । क्रीडांशरीरसंस्कारंसमाजोत्सवदर्शनं ।
हास्यंपरगृहेयानंत्यजेत्प्रोषितभर्तृका । मनुः । गतेदेशांतरंपत्यौगंधमाल्यांजनादिकं । दंतकाष्ठंचतांबूलंव
द्विं = र्जयेद्वनितासती । विधायप्रोषितेवृत्तिंजीवेन्नियममास्थिता । प्रोषितेत्वविधायैवजीवेच्छिल्पैरगर्हितैः ।
प्रोषितोधर्मकार्यार्थंप्रतीक्ष्योऽष्टौपतिःसमाः । विद्यार्थंषड्यशोर्थंचकामार्थंत्रीस्तुवत्सरान् । गुर्वाज्ञासंपादना
दिधर्मनिमित्तंप्रोषितःपतिरष्टौवर्षाणिप्रतीक्षणीयः । तदूर्ध्वंपतिसमीपंगच्छेत् । एवंविद्याविभाजनेनय
शोर्थमपिषट् । भार्यांतरोपभोगार्थंगतस्त्रीणां । अथविधवाधर्माः । सद्विधाब्रह्मचर्यरूपःसहगमनरू

पद्म । तत्रब्रह्मचर्यमाह । जीवहीनोयथादेहःक्षणादशुचितांव्रजेत् । पतिहीनातथायोषित्सुस्नाताप्यशुचिर्भवेत् ।
विहायमातरंचैकांसर्वमंगलवर्जिताः । तदाशिषमपिप्राप्तांत्यजेदपिविषोपमां । मदनपारिजाते । पत्यौमृतेपियायो
षिद्वैधव्यंपालयेत्क्वचित् । सापुनःप्राप्यभर्तारंस्वर्गलोकेमहीयते । विधवाकवरीबंधोभर्तृबंधायजायते । शिरसोव
पनंतस्मात्कार्यंविधवयासदा । एकाहारःसदाकार्योनद्वितीयाकदाचन । त्रिरात्रंपंचरात्रंवापक्षव्रतमथापिवा । यवा
न्नेनफलाहारैःशाकाहारैःपयोव्रतैः । प्राणयात्रांप्रकुर्वीतयावत्प्राणःस्वयंव्रजेत् । पर्यंकशायिनीनारीविधवापात
यत्पतिं । तस्माद्भूशयनंकार्यंपतिसौख्यसमीहया । नैवांगोद्वर्तनंकार्यंस्त्रियाविधवयाक्वचित् । गंधद्रव्यस्यसंयोगोनै
वकार्यस्तथापुनः । तर्पणंप्रत्यहंकार्यंभर्तुःकुशतिलोदकैः । तत्पितुस्तत्पितुश्चापिनामगोत्रादिपूर्वकं । तर्पणंपुत्राद्य
भावेकार्यम् । सर्वत्रपिंडदानादौयोग्योधिक्रियतेसुतः । दंपतीतदभावेतुसपत्न्यश्चपरस्परमितिस्मृतेः । विधवास्त्री
ति. ४८ तुयदिस्याद्दैवयोगात्सतीमहे । तस्यावदामियोधर्मःपुराणोक्तःश्रुतिस्मिते । पतिंसंकल्पयित्वासाचित्रस्थंवाप्यमृन्म
यं । तस्यपूजांसदाकुर्यात्सतीधर्ममनुस्मरन् । ततएवाप्यनुज्ञातांतुनित्यंयाचेतसुव्रता । व्रतेचैवोपवासेचभोजनेच
विशेषतः । भर्तृलोकंव्रजत्येवनचैवातिक्रमेत्पतिं । पुंस्त्वमाधम् । तथा । विष्णोस्तुपूजनंकार्यंपतिबुद्ध्यानचान्य
था । पतिमेवसदाध्यायेद्विष्णुरूपधरंपरं । यद्यदिष्टतमंलोकेयद्यत्पत्युःसमीहितं । तत्तद्गुणवतेदेयंपतिप्रीणनकामया ।

७८ 78
वैशाखेकार्त्तिकेमाघेविशेषनियमंचरेत्।स्नानंदानंतीर्थयात्रांविष्णोर्नामग्रहंपुनः।नाधिरोहेदनड्वाहंप्राणैःकं
ठगतैरपि।कंचुकीनोपरीदध्यान्नवासोविकृतंवसेत्।अपृष्ट्वाचसुतान्किंचिन्नकुर्याद्भर्तृतत्परा।एवंधर्मसमा
युक्ताविधवापिपतिव्रता।पतिलोकानवाप्नोतिनभवेत्क्वापिदुःकृता।स्मृतिसारे।ब्रह्मचारीयतिश्चैवविधवा
चरजस्वला।नागवल्लीदलंशृंगंनखादेतकदाचन।प्रत्येकंमांससतुल्यंतन्मिलितंसुरयासमं।अंगिराः।मृते
भर्त्तरियानारीनीलीवस्त्रंतुधारयेत्।तत्स्वामीनरकंयातिस्वयंचनरकंव्रजेदिति।स्मृतिसमुच्चये।विधवांकं
चुकोपेतांसधवांकंचुकंविना।यतिंचकंचुकोपेतंदृष्ट्वाचक्षुर्निमीलयेदिति।आचार्यविवेकः।यद्यपिसामा
न्यतोविधवानामयंधर्मस्तथापिपतिव्रताभिःस्वव्रतपरिपालनायसर्वथाचरणीयः।अन्यथापातिव्रत्यभंगाप
त्तेरिति।एवंब्रह्मचर्यरूपंधर्म्मंनिरूप्येदानींसहगमनानुगमनमाह।तच्चमहत्फलंसर्वासांस्त्रीणांपतिव्रतानांसा
धारणं।यदाहमनुः।कन्याविवाहसमयेवाचयेयुरितिद्विजाः।भर्तुःसहचरीभूयाज्जीवतोऽजीवतोपिवा।
हारीतः।आर्त्तार्त्तेमुदितेहृष्टाप्रोषितेमलिनाकृशा।मृतेपत्यौविशेद्वह्निंसासाध्वीज्ञेयापतिव्रता।वृहत्पराशरः।
भर्त्तारंयात्यजेन्नारीजीवंतंमृतमेववा।सागच्छेन्नरकंघोरंननिर्गच्छेत्पुनस्ततः।अपतिव्रतानामप्यधिका
रः।महाभारते।अवमन्यचयाःपूर्वंपतिंदुष्टेनचेतसा।वर्तन्तेयाश्चसततंभर्तृणांप्रतिकूलतः।भर्तुस्तमरणे

कालेविशंत्यग्निंयथाविधि। कामात्क्रोधाद्भयान्मोहात्सर्वाः पूताभवंत्युतेति। पूताभवंतीति। पत्यवज्ञाजनितदोषात्प्रमु
च्यंत इत्यर्थः। पतिव्रतास्तुतत्फलंलभंते। यदुक्तंतत्रैव। पतिव्रतासंप्रदीप्तंप्रविवेशहुताशनं। तत्रचित्रांगदधरंभर्त्ता
रं सान्वपद्यते। अत्रप्राशस्त्यमाहहारीतः। मातृकंपैतृकंचैवयत्रचैवप्रदीयते। कुलत्रयंपुनात्यास्त्रीभर्त्तारंयानुगच्छ
ति। तथा। श्मशानेनीयमानंतुभर्त्तारमनुगच्छति। पदेपदेऽश्वमेधस्यफलंप्राप्नोत्यसंशयं। तिस्रःकोट्योर्धकोटीश्च
यानिलोमानिमानवे। तावत्कालंवसेत्स्वर्गेभर्त्तारंयानुगच्छति। व्यालग्राहीयथाव्यालंबलादुद्धरतेबिलात्। तद्वदुद्धृ
त्यसानारीतिनैवसहमोदते। विष्णुः। वह्निमंतुविदेशस्थंमृतंश्रुत्वापतिव्रता। समारोहेतदीप्ताग्निंतस्याःशक्तिर्निशा
म्यतां। यदिप्रविष्टोनरकंगृहीतोयमकिंकरैः। तिष्ठतेविवशोदीनोवेष्ट्यमानःस्वकर्मभिः। व्यालग्राहीयथाव्यालंबला
दुद्धरत्यशंकितः। तद्वद्भर्त्तारमादायदिवंयातितपोबलात्। तत्रसाभर्तृपरमास्तूयमानाऽप्सरोगणैः। क्रीडतेपतिनासा
र्द्धंयावदिंद्राश्चतुर्दशेति। अंगिराः। ब्रह्मघ्नोवाकृतघ्नोवामित्रघ्नोवाभवेत्पतिः। पुनात्यविधवानारीतमादायमृताय
दि। अविधवेत्यत्रभावप्रधानोनिर्देशः। तेनाविधवावैधव्यमप्राप्ता। वैधव्यमत्रकेशमुंडनं। एवंचशिरोमुंडनानंतरमनु
गमनानधिकारः। शिष्टाचारोप्येवमेवभातीतिकेचित्। अन्येत्वविधवाविद्यमानधवदेहाभावइत्याहुः। अपरेतुध
वमरणमसहमाना वस्तुतस्तुसात्वविधवैव। तेनयथासधवानां तथाहिगौरीभोज्यकंचुकादिदानंप्रदीयते। तथा

८९ अस्या अपि। स्त्रीणां आद्येतुर्कर्मासंदष्टः स्वंजातकानितु। निमंत्रितास्याः स्त्रीभ्यो यतेस्तु सौभाग्यसंयुता इति स्मृतेः।
79 नन्वेतदनुपपन्नं ब्रह्महत्यादिदोषदुष्टस्य पत्यनुगमनेन तन्निवृत्तिः। तथाहि शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वादि
ति न्यायेनापूर्वफलयोः कर्तृसमवेतत्वात्। पतिगतदुरितापूर्वस्य पत्नीगतानुगमने नानिवृत्तिः। निवृत्त्युपगमे तु
कार्यकारणयोः समानाधिकरणं व्यावर्त्तते इति केचित्। वाढं पतिपत्न्योः सहकर्तृत्वे नाग्निहोत्रादिवदुपपत्तेः।
यथा। अर्द्धो वा एष आत्मनो यत्पत्नीति श्रुतेः। जायापती अग्निमादधीयातामिति श्रुतेः। इत्युभयोरेकात्मत्वा
वगमात्। यत्केश्चिदुच्यते इदं दुरितं जन्मांतरे कृतमेव निवृत्तं एतज्जन्मकृतब्रह्महत्यादिपापयुक्तस्य पतितत्वेन
सहानुगमनानधिकार एव तदप्यपेशलमिव प्रतीयते। तस्यापि कृतप्रायश्चित्तस्य सर्वकर्माधिकारश्रवणात्।
आपस्तम्बः। संप्रतीक्ष्यो हि महापातकदूषितः इत्युक्तेः। यत्केचिद्व्यालग्राहीत्यादिवाक्यान्यर्थवादपराण्याहुस्तदल
मसमंजसं बहुशास्त्रवैयर्थ्यापत्तेरिति दिक्॥ इति प्रासंगिकमुक्त्वा प्रकृतिरभिधीयते। ब्रह्मपुराणे। मृते
भर्त्तरि या नारी समारोहेद्धुताशनं। सारुंधती समा ज्ञेया स्वर्गलोके महीयते। हसाध्वीनां तु नारीणामग्निप्रत
पनादृते। नान्यो धर्मो हि विज्ञेयो मृते भर्त्तरि कर्हिचित्। यावच्चाग्नौ मृते पत्यौ स्त्री नात्मानं प्रदाहयेत्। ता
वन्न मुच्यते नो हि स्त्रीशरीरात्कथंचनेति। सहानुगमनफलभोगानंतरमन्यथाति स्वःकोट्योर्द्धैकोत्यादि

वाक्यवैयर्थ्यापत्तेः । अयं पत्न्याः सहाग्निप्रवेशो ब्राह्मण्यापि कार्यः । यत्तु । मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनादिति
निषेधस्तत्पृथक्चित्यारोहणविषयः । यथा । पृथक्चित्यां समारुह्य न विप्राग्निं विशेदिति । अन्यासामेव नारीणामयं ध
र्म्मो विधीयते । अत्रेदं विवेकः । ब्राह्मण्याः सहानुगमन एवाधिकारोऽन्यासां गर्भवती बालापत्या रजस्वला जातहुरजमा
त्विरहितानां सहानुगमनानुगमनयोरपि । यथोक्तं बृहन्नारदीये । बालापत्याश्च गर्भिण्य अजातऋतवस्तथा । रज
स्वला राजसुता नारोहन्ति चितां शुभे । राजाभावी सुतो यस्याः सा राजसुता राजमातेत्यर्थः । बृहस्पतिः । बालसंवर्धनं
मुक्त्वा बालापत्या न गच्छति । व्रतोपवासनिरता रक्षेद्गर्भं च गर्भिणी । अयं गर्भादिनिमित्तको निषेधस्तदनन्तरमनुगम
नेपि न दोषः । निमित्ताभावे नैमित्तिकस्याप्यभाव इति न्यायात् । न चात्मघातित्वविरोधः शंकनीयः । तस्य विहिता
तिरिक्तविषयत्वात् । यथा स्नेहेन पितृपुत्रादिभिः सह मरणमिति । यथा न हिंस्यात्सर्वभूतानीति सामान्यशास्त्रं । अग्नी
षोमीयं पशुमालभेतेति विशेषशास्त्रमुत्सृज्य प्रवर्त्तते । तद्वदत्रापीति न कश्चिद्विरोधः । सहानुगमनाभावेपि सती नास्व
र्गप्राप्तिमाह मनुः । मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता । स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिण इति । यदि ब्रा
ह्मणी प्रोषिते भर्त्तरि मृते तेनासंस्कृते सत्यनुगमनं करोति तदा तदस्थिभिः सह कुर्यात् । तदस्थ्यलाभे संवृत्य पलाशपर्ण
शरैः शौनकादिगृह्योक्तविधिना प्रतिकृतिं कृत्वा तया सहाग्निप्रवेशं कुर्वीत । तथा भारद्वाजः । पृथक्चितिं मृते

पत्यौ न विश्रामं तुमर्हति। साप्यनुम्रियते परीक्षणात्तदाहे तथा स्थितिः। संस्कृते तु यदि पतिव्रता तदा तदुपभु
क्तपादुकादि चितोपरि निधायाग्निप्रवेशं कुर्यात्। यथोक्तं प्रकरणांतरे। देशांतरे मृते पत्यौ साध्वी तत्पादुकाद्व
यं। निधायोरसि संशुद्धा प्रविशेज्जातवेदसं। तस्याप्यसंभवे ब्राह्मणी व्यतिरिक्ता पतिमनस्याधायानुगमनं कुर्या
त्। अथ यदि ब्राह्मणी रजस्वला भर्त्रा सह मुमूर्षुस्तदा रजोदर्शनात्पंचमेहनि स्नात्वा पतिदाहाग्न्यस्थिमती
चितामधिरोहेदिति केचित्। अन्ये तु षड्भिर्मृद्भिः शौचं कृत्वाष्टोत्तरशतघटैः स्नात्वा पंचगव्यं यथाविधि हु
त्वा श्रीविष्णुपादोदकं प्राश्यान्यवासांसि परिधाय ब्राह्मणेभ्यो दक्षिणां दत्वा सहगमनं कुर्यादिति। इदं चान्वा
रोहणं सवर्णीयैकचितायां कार्यम्। असवर्णादिभिः पृथक्चित्यामिति विशेषः। स्मृतिसारे प्रोक्तः। देवदासे।
क्रियक्रीता तु या नारी न सा पत्न्यभिधीयते। न सा दैवे न सा पित्र्ये दासीं तां कवयो विदुः। जारेण सह या काचिद
नुयाति हुताशनं। सा नात्मानं न भर्तारं तारयेत्पापभाक् च सा। अथ मध्ये क चितिमरणनिषेधः। यदुक्तम्।
सेविका॰वा॰पा॰ ३८ यदा जीवनमादाय तनुं त्यजति चेटिका। स्वामिनस्तु न तत्पापं सापि स्वर्गं प्रयाति च। तथा। स्नेहक्रीता तु या नारी
तदर्थे तनुमुत्सृजेत्। स्नेहस्यानृण्यमासाद्य कृतपापात्प्रमुच्यते। एवं च स्नेहसंबंधिनां भृत्यानां च पृथक्चि
तिं कृत्वा चान्वारोहणमित्येके। तत्प्रकारो यथा। अथ स्नानादिना शरीरशुद्धिं विधाय नवीनवस्त्राभरणानि परिधाय

सिंदूरतिलकं कृत्वा पंचोपचारैर्देवपूजां कृत्वा ब्राह्मणेभ्यो यथाशक्ति दक्षिणां दत्वा बंधुमित्रेषु ममत्वं त्यक्त्वा तांश्च
क्षमापयित्वा सूर्यादीन्नमस्कृत्य स्वयं चितां दीपयित्वा कुशतिलजलान्यादाय । ॐ मद्येत्यादि कालज्ञानं कृत्वा
उपात्तदुरितक्षयकुलत्रयपवित्रकरणपूर्वक स्वशरीररोमसमसंख्याकालपतिनासह स्वर्गभोगतदुत्तर स्त्रीशरीर
निवृत्तिकामनया ऽग्निप्रवेशमहं करिष्ये इति संकल्प्य । अहं सती हृशीला च पतिप्राणावलंबिनी । पत्यौ जीवति
जीवामि गच्छाम्यथ शिवालयं । त्वं साक्षी गरुडारूढ प्राणहोमं करोम्यहं । स्वामिकार्येऽग्निमाधाय परलोकजि
गीषयेति । श्रीविष्णुं विज्ञाप्य चितां प्रदक्षिणीकृत्य पतिं नमस्कृत्याग्निं प्रविशेत् । चितिप्रचलिता नारी मोहा
द्विचलते यदि । प्राजापत्यं चरेत्कृच्छ्रं पुनर्नाग्निं विशेद्यदि । प्रासंगिकमुक्त्वा प्रकृतमनुसरामः । तदाह मनुः ।
त्रयो धर्मा निवर्तंते ब्राह्मणात्क्षत्रियं प्रति । अध्यापनं याजनं च तृतीयश्च प्रतिग्रहः । वैश्यं प्रति तथैवैते निवर्तेर
न्निति स्थितिरिति । अतो नतयोरध्यापनादिरर्जनोपायः । वाढं अत एवोपायांतरं तेनैवोक्तम् । शस्त्रास्त्रभृत्त्वं क्ष
त्रस्य वणिक्पशुकृषी विश इति । वणिग्वाणिज्यम् । पशुः पशुपालनम् । उपायांतराण्याह मनुः । सप्त वित्तागमा
धर्म्या दायो लाभः क्रयो जयः । प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव चेति । दायोन्वायागतं धनम् । लाभो निधि
दर्शनम् । दायलाभक्रयाः सर्ववर्णसाधारणाः । जयः क्षत्रियस्यैव । प्रयोगो वृद्ध्यर्थं धनप्रदानम् । कर्मयोगः

८१ कृषिवाणिज्यम् । प्रयोगः कर्मयोगो वैश्यस्यैव । सत्प्रतिग्रहो विप्रस्यैव ॥ ॥ इत्याचाररत्नाकरे तृतीयभागकृत्यम् ॥
81 ॥ अथ चतुर्थभागकृत्यम् ॥ तत्र दक्षः । चतुर्थे तु तथा भागे स्नानार्थं मृदमाहरेत् । [illegible]
[illegible]ता । तिलपुष्पकुशादीनि स्नानं चाकृत्रिमे जले । रक्ता गौरी तथा श्वेता मृत्तिका त्रिविधा मता ।
असंभवे यत्र यादृशी तत्र सैव ग्राह्या । आदिशब्देन गोमयदूर्वाद्युपादानम् । अकृत्रिमे नद्यादौ स्नानं कुर्यादिति
शेषः । इदं मध्याह्नस्नानं दक्षेणाहःषोढादिनविभजनात् । तच्च प्रातःस्नानप्रसंगात्पूर्वमेव निरूपितम् । सविधिकम् ।
शातातपः । वल्मीकाखूत्करान्नेपाज्जलाच्च पथि हृतयोः । कृतस्नानावशिष्टाश्च न ग्राह्याः सप्त मृत्तिकाः । शुचौ
देशे च संग्राह्याः शर्कराश्मादिवर्जिताः । शुचाविति विधिः । नेपात्कुड्यादेः । पथिहृतयोरिति सामान्यल
क्षणा । विनादर्भेण न स्नायात्कुर्याद्धस्ते न वा तथा । उद्धृताभिरपि स्नायादाहृताभिर्द्विजातिभिः । उद्धृता
प्राते ४— वाप्रशस्यन्ते शुद्धैः पात्रैर्यथाविधि । एकरात्रोषिता यास्तु त्यजेदापः समुद्धृताः । मनुः । न स्नानमाचरेद्भुक्त्वा
नातुरो न महानिशि । न वासोभिः सहाजस्रं नाविज्ञाते जलाशये । अत्र भोजनानन्तरं रागप्राप्तस्नाननिषेधो नित्य
स्याप्राप्तत्वात् । नैमित्तिकस्य निषेद्धुमशक्यत्वात् । नैमित्तिकानि सर्वाणि निपतन्ति यदा यदा । तदा तदैव कार्या
णि कालस्तु न विधीयत इति दक्षोक्तेः । हलायुधः । महानिशायां नाचामेन्न स्नायान्मैत्रं न चाचरेत् । न पठेच्च वि

धार्येत्तत्प्रायश्चित्तीयते नरः । तथा । राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु । स्नानदानादिकं कुर्यान्निशि काम्यव्रते
षु च इति । नैमित्तिकस्य विहितत्वात्तत्कार्यम् । यज्ञे विवाहे यात्रायां तथा पुस्तकवाचने । दानान्येतानि शस्तानि रात्रौ दे
वालये तथा । हलायुधः । दिवाहृतैर्जलैः स्नानं निशि कुर्यान्निमित्ततः । प्रदीप्य च सुवर्णं तु सन्निधाप्याग्निमेव च
रात्र्याहृतेषु तोयेषु सुवर्णमग्निमेव वा । निक्षिप्य च सदा स्नायादित्येषा वैदिकी श्रुतिः । रात्र्याहृतेषु सुवर्णं निक्षिप्य वा
स्नायादित्यर्थः । रात्रौ जलानीतः स्नाननिषेधः । अशिरोमज्जनमस्तु वर्जये दक्षमिते च स्नानमित्यापस्तम्बोक्तेः । वासोभिरि
ति बहुवस्त्रनिषेधः । द्वयोर्विधानात्सचेलस्नाने विशेषवचनादेव तल्लाभः । अजस्रमनवरतं । अन्यदा आद्यादिना
यद्वासोभिः सहाजस्रमित्यत्रालुक्समासः । तेन न वासोभिस्सहाजस्रमिति । न सर्वदैकमुजस्तपदोपदानात् ।
यथाश्वलायनगृह्ये । धर्मविन्नाचरेत्स्नानमाह्निकं तु पुनः पुनः । तर्पणं ब्रह्मयज्ञं च वैश्वदेवं न चाचरेदिति । दिवारात्रौ
पुनर्नाचरेदित्यर्थः । अविज्ञाते सुगमतया साधुतया च । गोविंदार्णवे महानिशानिर्णयः । महानिशा तु विज्ञेया
मध्यस्थप्रहरद्वयं । तस्यां स्नानं न कर्तव्यं स्वाध्यायं पितृतर्पणं । मार्कण्डेयपुराणे । महानिशा द्वे घटिके मध्यमध्य
मयामयोः । नैमित्तिकं तदा कार्यं कुर्यान्न स्नानमन्यदपीति । मध्यमयामयोर्मध्यं । द्वितीययामस्यान्त्यघटिका । तृती
ययामस्याद्यघटिका इति घटिकाद्वयम् । महानिशापदांतरमाह स्मृतिः । प्रातः संध्या त्रिनाडीस्यात्सायं संध्या च तादृशी ।

८२ 82 महानिशा तु विज्ञेया चतस्रो घटिकास्तथा। अत्रापि मध्यमयामयोर्मध्यमिति शेषः। अत्रायं विवेकः। घटिकाद्वय
रूपायां महानिशायां नित्यस्नानादिकं न कर्त्तव्यमेवस्नावकाशं। नैमित्तिकमपि न कार्यम्। घटिकाचतुष्टयरूपां
नित्यस्यैव विरहान्नैमित्तिकं कार्यमेव शास्त्रेषु तथोक्तेः। जाबालिः। न पारक्ये सदा स्नायान्न भुक्त्वा न महानि
शि। नार्द्रमेकं हि वसनं परिदध्यात्कथंचन। [illegible] वसिष्ठः। नादशाकेन वस्त्रेण स्नायात्कौपीनकादृते।
नान्यदीयेन नार्द्रेण न सूच्या ग्रथितेन च। एकेन वाससा स्नायाद्द्वाभ्यां तु नियतः शुचिः। बहुभिश्च निषेधादिति
मेधातिथिः। स्नानं तर्पणपर्यंतं कुर्यादेकेन वाससेति शावस्नानपरम्। यथा दिवोदासे। ततः सर्वे सगोत्राश्चैक
ग्रामनिवासिनः। अन्ये कामोदकाश्चैकवस्त्राः प्राचीनवीतिनः। मुक्तकेशाश्च सकृदीमज्जेयुर्दक्षिणामुखा
इति। स्मृतिसारे। प्रेतक्रिया प्रकर्त्तव्या मुक्तकेशेन सर्वदा। दक्षिणाभिमुखेनैव तथा चार्द्रेण वाससा। मु द्वैक ५८
क्तकेशेन मुक्तचूडेनेत्यर्थः। अन्यथा। नाधिकारी मुक्तकेशो मुक्तचूडस्तथैव च। दाने प्रतिग्रहे यज्ञे ब्रह्मयज्ञा
दिकर्मसु। स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणं। वृथा तस्य भवंतीह एकवस्त्रस्य धारणात्। स्वप्नमध्या
पनं स्नानमुच्चारं भोजनं रतिं। उभयोः संध्ययोर्नित्यं मध्याह्ने च विवर्जयेत्। इति देवलवचननिषेधो रागप्रा
प्तस्नानविषयः। स्नानं मध्यंदिने कार्यं सुजीर्णेऽन्ने निराशयः। तिलगंधयवैर्दर्भैस्तर्पयेत्पितृदेवता इति

व्यासवचनेनविहितत्वात् । अभ्युदयादेर्विशेषात्पूर्वाह्णेपिकार्यः । यदाहवसिष्ठः । अरुग्दिवाचरेत्स्नानंमध्याह्ना
द्याविशेषत इति शंखलिखितौ । अनग्नन्नेनग्नः स्नायान्नाप्सुमेहेतकर्हिचित् । नचांगोद्वर्तनंकुर्यान्नपादेनजलं
स्पृशेत् । नपादेनपाणिनावाजलमभिहन्यादित्यर्थः । सदापोवैसर्वदेवताः नस्नवंतीत्युपाक्रामेतानवसिच्य अन
वसिच्यातर्पणमकृत्वानदींनलंघयेदित्यर्थः । एवंचैकदिनेनानानदीलाभेनानातर्पणानिनकर्तव्यानि । स
स्नान ५ मुद्रेनांतः प्रविश्यस्नायात् । इतिनिषेधोपिरागप्राप्तविषयः । विहितेतरप्रदेशविषये अविधिविषयश्चेति । मा
सस्यसरितांपतिरितियाज्ञवल्क्योक्तेः । विहितप्रदेशश्चापरार्के । सिंधोःसेतौः सरस्वत्यां गंगायांपुरुषोत्तमात् । नापर्व
णिसरिन्नाथं स्पृशेदन्यत्रकुत्रचित् । तेनदर्शेसमुद्रेसर्वत्रस्नायादन्यदातुविहितप्रदेशेष्वितिविवेकः । पुनस्त
त्रैव । कर्तुंप्रवृत्तोविधिवत्स्नानदानादिकांक्रियां । कृतिंप्रत्यामिमंत्रेणक्षिपेत्पाषाणसप्तकं । पिप्पलादात्समु
त्पन्नेकृतेलोकभयंकरे । पाषाणंतेमयादत्तमाहारार्थंप्रकल्पितं । अग्निश्चतेजोनिरिलाचदेहोरेतोधावि
ष्णुरमृतस्यनाभिः । एतद्ब्रुवन्पांडवसत्यवाक्यंततोवगाहेतपतिंनदीनां । आजन्मशतसाहस्रंयत्पापंक्रियते
क्वचित् । मुच्यतेसर्वपापेभ्यःस्नात्वैवंलवणांभसि । अन्यथान्वकुलश्रेष्ठदेवयोनिरपांपतिः । कुशाग्रेणापिकौं
तेयनस्प्रष्टव्योमहोदधिः । पाषाणदानंप्रथमंचकुर्याद्दावाहनंतत्रनमस्क्रियांच । अर्घ्यंततश्चार्थनमभ्यनुज्ञांस्नानं

चक्रुपीदद्यात्तर्पणांश्च । तथागोतमनिबंधे । गयायोगंकुहूस्नानंतिलैस्तर्पणमेवच । नजीवत्पितृकःकुर्या
त्कुर्वल्लुपितृहाभवेत् । तथा । दर्शस्नानंनकुर्वीतमातापित्रोस्तुजीवतोः । पुत्रःकुर्वन्विरात्वत्रपित्रोरुद्भूतजीवितं ।
अन्यथा । अस्नाताशीमलंभुंक्ते इत्यादिदोषोक्तेः । पित्रोरितिसाहित्यंविवक्षितं । तेनपितरिमृतेनदोषः । यो
गी । नदीस्नानानिपुण्यानितडागेमध्यमानिच । वापीकूपेवराणीहगृहेप्रत्यवराणिच । प्रत्यवराणिअति
निकृष्टानि । अभूतेविद्यमानेतु उदकेह्यमनोहरे । नाल्पोदकेनरःस्नायान्नदींचोत्सृज्यकृत्रिमे । द्विजइतिस्ना द्विजः ५=
नकर्तृमात्रोपलक्षणम् । नदीवदकृत्रिमोपलक्षकं । अंतर्द्वीपेनचस्नायात् । नैकवासानचद्वीपेनांतराले
कदाचन । श्रुतिस्मृत्युदितंकर्मनकुर्यादशुचिःक्वचित् इतिस्मृत्युक्तेः । अंतरालेगृहहालिकादौ । आद्येयत्ते
विवाहादौदानेमृत्यौतथैवच । भूमिमेकांप्रशंसंतिह्यंतरितंविवर्जयेत् । इतिस्कंदोक्तेः । दानमिहमलदानं ।
अत्रापवादःश्राद्धकल्पेप्रोक्तः । स्नानंदानंदेवपूजातर्पणंचयतस्ततः । मरणंपिंडदानंचभूमावेवविशिष्यते ।
इत्यत्रमरणपिंडदानयोर्विशिष्यभूमौविधानात् । नित्यस्नानादीन्यंतरालेपिकार्याणीतिप्रतीयते । द्वीपा
पवादमाहस्मृतिः । वृषभैकशतंयत्रगावोतिष्ठंत्यसंशयं । नतद्धर्महतंद्वीपमितिवेदविदोविदुः । याज्ञ
वल्क्यः । अग्रहास्त्वागताआपोनद्याःप्रथमवेगिकाः । प्रक्षोभिताश्चकेनापियाश्चतीर्थाद्विनिःसृताः ।

प्रवाहात्पृथग्भूताः। अपरार्के। नद्याय च परिभ्रष्टं नद्याः पश्च विनिःसृतं। गतप्रत्यागतं यच्च तत्तोयं परिवर्जयेत्।
नदीहृतं गाप्रतीयते। नद्याः परिभ्रष्टं विनिर्गत्य ततो विच्छिन्नं। नदीतो विनिःसृतं। पृथक् प्रवाहभूतं। नद्याः
संगमार्थमभिप्रवृत्तं तदसंगतं। यत्तया वर्जितं। आवर्त्तेन गतप्रत्यागतं। प्रवाहाभिमुखं प्रवृत्तं। गतप्रत्यागतं गंगो
तर नदीविषयं। प्रत्यावृत्तोदके स्नानं वर्जयेन द्याद्विजातिभिः। तस्मात्सजकतीर्थं तु दशहस्तं परित्यजेत्। इत्युक्तेः।
गंगातो निःसृतं तत्तोयं पुनर्गंगां न गच्छति। अपेयं तद्विजानीयात्पीत्वा चांद्रायणं चरेत्। इति स्कंदोक्तेः। अपेय
मिति तस्य कर्मानर्हतोक्ता। निगमः। प्रतिस्रोतो रजोयोगो रथ्याजलनिषेवणं। गंगायां न प्रदुष्यंति सा हि
धर्मद्रवः स्वयं। प्रतिस्रोतः प्रवाहाभिमुखेन प्रवृत्तं जलं। विष्णुः। अनुद्धृतादूमिस्थमुदकं पुण्यं स्थावरात्स्रवं
तस्मान्नादेयं तस्मात्साधुपरिगृहीतं सर्वत एव गांगं। साधुपरिगृहीतं मुनिसेवितं। वाचस्पतीयाचारचिंतामणौ।
पंच पिंडाननुद्धृत्य न स्नायात्परवारिणि। स्नायान्नदीदेवखातहृदेषु च सरस्सु च। स्रवंतीष्वनिरुद्धासु त्रयो वर्णा
द्विजातयः। प्रातरुत्थाय कुर्वीरन्देवर्षिपितृतर्पणं। निरुद्धासु न कुर्वीरन्नंशभाक्तत्र सेतुकृत्। तस्मात्परकृ
तान्सेतून्कूपांश्च परिवर्जयेत्। समुद्धृत्य चतुरः पिंडान्कुर्यादापत्सु नो सदा। निरुद्धासु च मृत्पिंडान्कूपाच्च वि
घटान्सपा। देवखातं पुष्करादि। उदकप्रवाहाभियातनिम्नदेशस्थितं हृदः। पर्वतादुच्चप्रदेशात्स्रुतं जलं प्र

स्ववर्णं । यद्वा देवखातं श्रीसूर्यादिसमीपयातं । तर्पणं स्नानस्यापि ग्राहकं । तदंगत्वात्तस्यापत्स्वजलांतरालाभे ।
मनुः । परकीयनिपानेषु स्नायान्नैव कदाचन । निपानकर्तुः स्नात्वा हि दुःकृतांशेन लिप्यते । अत्रेयं व्यवस्था ।
परकीयतडागे पंचपिंडानुद्धृत्य कूपादेस्तु घटत्रयमुद्धृत्य सेतुप्रतिरुद्धे जले त्रीन्पिंडानुद्धृत्य स्नायात् ।
एषु तर्पणे कूपादेस्तु घटत्रयोद्धारः । अन्यत्र तु पिंडत्रयोद्धारः । अत्र तु स्नानार्थं पिंडोद्धारे सोऽपि तर्पणार्थक
स्यापि तंत्रेणैव सिद्धे न तदर्थं पृथक् पिंडोद्धारः । यत्र स्नानमकृत्वा तर्पणं करणीयं तत्र तर्पणाद्व्यवहितं
प्रागेव पिंडोद्धारः कार्य इति । पिंडस्तु हस्तद्वयोद्धार्यः । कूपेनुद्धृततोये नैव स्नानं । तदुक्तं विष्णुपुराणे ।
कूपेषूद्धृततोयेन स्नानं कुर्वीत वै भुवि । तडागादावपि यदा प्रविश्य स्नानासंभवः तदोद्धृत्य बहिः स्नायात् ।
तदुक्तं तत्रैव । स्नायीतोद्धृततोयेन यदि वा भुव्यसंभवे । परकृतत्वेन पिंडोद्धारो नात्मीयेषु दोषः । अप्रति
ष्ठितपानीयेष्वपेयं सलिलं भवेत् । इत्यनेन तस्याऽकर्मतोक्ता । तथा । यन्न सर्वार्थं निष्पाद्यं यच्चाभोज्यं नि
पानकं । तद्वर्ज्यं सलिलं तात सदैव पितृकर्मणि । इति कंठत एव निषेधः । अत एव परकृते प्रतिष्ठितेऽप्रतिष्ठि
ते च निषेधः । आत्मीये प्रतिष्ठिते न तु सर्वार्थमुत्सृष्टत्वेन स्वस्वत्वध्वंसे जाते तदपि परकीयं स्यात् । वृ
षोत्सर्गादिवत् । न च । सर्वभूतेषु चोत्सृष्टं मयेतज्जलमूर्जितमित्याद्यसंकल्पितसर्वपदे नात्मापि लभेत ।

तथासति स्वत्त्वानिवृत्त्योत्सर्गासिद्धिः । तन्न । अत्र निपानकर्तुः स्नात्वाहीत्यादिना हेतुमन्निगदेन स्वकारित
तडागादौ स्नाने न हि स्वपापोपलेपः । स्वस्मिञ्जायते तस्य पूर्वमेव जातत्वात् । वृषोत्सर्गादौ । तथाश्रवणान्नो
पादानिकं तस्येति । तथा च मनुः । यानशय्यासनान्यस्य कूपोद्यानगृहाणि च । अदत्तान्युपभुंजान एनसः स्यात्तु
रीयभाक् । अदत्तानीति परस्यानुमतभावश्च विवक्षितः । तेन सर्वार्थोत्सृष्टमठकूपादौ उपभोगादात्मस्ना
नादौ न विरोधः इति कुल्लूकः । यथोक्तं मात्स्ये । सामान्यं सर्वभूतेभ्यो मयोत्सृष्टमिदं जलं । रमंतु सर्वभू
तानि स्नानपानावगाहनैरित्यत्र सामान्यपदेन यथा मम तथान्येषामपीत्यर्थः । यथा स्कांदे । वापीकूपतडागा
नां वृक्षवेश्मसरोरुहां । मठप्राकारगेहानां तत्र दानमुत्सर्ग इत्यसौ । उपजीवेन्निमान्यश्च परांपसोपि चरेन्नरः । सोपि वेद्वि ८=
उत्सर्गकृदपि शिष्टाचारोप्येवमेवेति दिक् । भविष्ये । शिवलिंगसमीपे तु यत्तोयं पुरतः स्थितं । शिवगंगेति वि
ख्यातं तत्र स्नात्वा दिवं व्रजेत् । जावालिः । चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसन्निधौ । सेनानित्वमवाप्नोति
गंगायांनु विशेषतः । अर्कपत्र पद्मपत्रेण सर्वरत्नोदकेन च । स्रोतसोवेन नरः स्नात्वा सर्वपापैः प्रमुच्यते । स्रोतस
इति विभक्तिव्यत्ययेन सप्तमी । दक्षिणावर्तशंखेन सर्वरत्नोदकेन च । उदकं यः प्रतीच्छेत शिरसा हृष्टमानसः । कृल २=
८। तस्य जन्मकृतं पापं तत्क्षणादेव नश्यति । वृथा तु सोदकस्नानं वृथा जप्यमवैष्णवं । वृथा अश्रोत्रिये दानं वृथा भुक्तं

८५ मसात्तिकं। तृणादेहत्वात्तनानन्यफलजनकं। असादिकमतिथ्यादिसूत्रं। तथा। स्नातस्य वह्नितप्तेन तथैव
85 वपरवारिणा। शरीरशुद्धिर्विज्ञेया न तु स्नानफलं लभेत्। वह्नितप्तेनेति विशेषकथनादातपादितप्तस्नानम
दृष्टार्थजनकमपि भवतीत्यर्थः। शरीरशुद्धिर्मलक्षालनरूपा दृष्टार्था। यत्तु स्मृतिवचनं। आपः स्व
भावतो मेध्याः किं पुनर्वह्निसंयुताः। अतः संतः प्रशंसंति स्नानमुष्णेन वारिणा। तदातुरपरम्।
आदित्यकिरणैः पूतं पुनः पूतं च वह्निना। अतो व्याध्यातुरः स्नायाद्गृहस्थोप्युष्णवारिणेति। व्यासः।
आतुरः शीतलजलसंवर्द्धनीयव्याधिमान्। द्रोणपर्व्वतावपि। असामर्थ्ये शरीरस्य व्याधिदो
षेश्व पीडने। कर्तव्यं वह्निजातीनां स्नानमुष्णेन वारिणा। तत्प्रकारे व्यासः। शीतास्वप्सु निषिच्यासं
मंत्रसंभारसंभृतं। गृहे पि शस्यते स्नानं न तद्धीनफलं लभेत्। संभारो मृदादिः। मनुः। मृते जन्मनि
संक्रांतौ श्राद्धे जन्मदिने तथा। अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा। तथा। सप्तम्यां रविवारे च
संक्रांतौ राहुसूतके। अष्टम्यां च चतुर्दश्यां न स्नायादुष्णवारिणा। राहुसूतके ग्रहणे। वृद्धपराशरः।
रविसंक्रांतिवारेषु ग्रहणेषु शशितये। व्रतेषु चैव सर्वेषु न स्नायादुष्णवारिणा। वृद्धमनुः। पौर्णमा
स्यां तथा दर्शे यः स्नायादुष्णवारिणा। स गोहत्याकृतं पापं प्राप्नोतीह न संशयः। अत्र सामान्यतएवो

ष्णोदकस्नाने निषिद्धे पुनः पौर्णमास्यादिपुरस्कारेण निषेधो दोषातिशयार्थः। मनुना तत्र स्फुटमेव दोषकथनात्।
अत्रायं विवेकः। आतुरस्योष्णोदकस्नानमप्यदृष्टार्थकं भवति। स च मार्जनादोषावहं चेतार्थः। ब्रह्मपुराणे। नित्यं नै
मित्तिकं काम्यं त्रिविधं स्नानमुच्यते। तर्पणं तु भवेत्तस्य अंगत्वेन व्यवस्थितं। नित्यं प्रात्यहिकं। नैमित्तिकमुपरागादि।
निमित्तकमिह विवक्षितं। न त्वस्पृश्यस्पर्शनादिनिमित्तकं। तत्र श्मश्रुकर्माश्रुपाते च्छर्दने मैथुने तथा। अ
स्पृश्यस्पर्शनं कृत्वा स्नायाद्गौण्यो जलक्रियेति। पुनस्तर्पणनिषेधात्। काम्यं तीर्थस्नानादि। ननु देवस्नविधिबो
धितवृष्णस्नानादि। तस्य लौकिकस्यालौकिकांगसंबंधमानाभावात्। नालौकिकं लौकिकांगमिति न्यायात्।
लोकावगतकारणादेव तदुत्पत्तेः। अत एव मलापकर्षणोपि लौकिके न तर्पणामंगं। शौचोक्तक्रियांगस्नानेपि
न स्नानधर्मसंबंधः। अद्भिरेव तु शुद्ध्यतीति वचनात्। तस्मात् शौचोक्तकाम्यनैमित्तिकक्रियांगमलापकर्षण
स्नानानि मज्जनमात्ररूपाणि धर्मसंबंधमानाभावात्। यद्यपि स्नानांगतर्पणं तत्प्रयोग एवाविर्भावयितुमर्ह
ते। तथापि वचनात् संध्योपासनोत्तरकालीनत्वमस्य। अत एव चंद्रग्रहादौ संध्योपासनाभावे स्नानांतरमे
व तदनुष्ठानं तर्पणं। पंचयज्ञांतर्गतत्वात्। स्वतंत्रमपि न पृथगनुष्ठेयं। स्नानांगतर्पणादेव अर्थगतस्त
८६ त्सिद्धेः। व्यासः। स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः। तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं भवेत्।

८६ तद्यथा हरणं स्नानं । नित्यं नैमित्तिकं काम्यं क्रियांगं मलकर्षणं । क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्त्तितमिति
86 शंखोक्तेः । नित्यं प्रात्याहिकं । अहन्यहनि यत्स्नानं तन्नित्यमभिधीयते । उच्छिष्टाद्युपघातादौ स्नानं नैमित्तिकं स्मृतं ।
चांडालशवपूयादिस्पृष्ट्वा स्नानं रजस्वलां । स्नानानर्हस्तु यः स्नाति स्नानं नैमित्तिकं हि तत् । चंद्रसूर्योपरागादौ
तथैव ग्रहसूतके । ग्रहसूतके पुत्रजन्मनि । पुष्यस्नानादिकं काम्यं दैवज्ञविधिनोदितं । तद्धि काम्यं समुद्दि
ष्टं स्नानविद्भिर्द्विजोत्तमा । जप्तुकामः पवित्राणि अर्चिष्यन्देवताः पितॄन् । स्नानं समाचरेद्यस्तु क्रियांगं त
त्प्रकीर्त्तितं । मलापकर्षणं नाम स्नानमभ्यंगपूर्वकं । मलापकर्षणायैव प्रवृत्तिस्तस्य नान्यथा । सरस्सु देव
खातेषु तीर्थेषु च नदीषु च । स्नानमेव क्रिया यस्मात्क्रियास्नानं तु तत्स्मृतं । तथा । क्रियास्नानं समुद्दि
ष्टं स्नानं तत्र क्रिया मता । क्रियारूपं स्नानं स्वर्गादिहेतुतया क्रियैव प्रधानमित्यर्थः । कुर्यान्नैमित्तिकं
स्नानं शीताद्भिः काम्यमेव च । नित्यं याादृच्छिकं चैव यथारुचि समाचरेदिति । नित्यं प्रात्याहिकं । यादृ
च्छिकमभ्यंगस्नानं । क्रियतां वा न कुर्याद्वा शास्त्रयंत्रणया विना । मलव्यपोहनफलं स्नानं यादृ
च्छिकं हि तत् । इति गर्गोक्तेः । नित्यं नैमित्तिकं काम्यं क्रियांगं मलकर्षणं । तीर्थाभावे तु कर्तव्यमुष्णोदकपरोद
के रिति स्मृतेः । अतोऽसंभवे उष्णोदकपरोदकेरपि कुर्यात् । मलस्नानं दशमाहदत्तः । मलापकर्षणं तीरे मंत्रवत्त

जलेस्थितं । संध्यास्नानमुभाभ्यां तु स्नानभेदाः प्रकीर्त्तिताः । संध्यैव स्नानं प्रातःस्नानमित्यपि प्रतिभाति । येशा
रीरमलान्यग्नौ प्रक्षिपंति जले तथा । उद्याने पथि गोष्ठे च ते वै निरयगामिन इति महाभारते ॥ प्रसंगान्मलस्ना
नविहितनिषेधकाले बृहत्पराशरः । आदित्यादिषु वारेषु तापः कांतिर्मृतिर्धनं । दारिद्र्यं दुर्भगत्वं च कामाप्तिः
स्नानतः क्रमात् । तथा । द्वितीयां दशमीं दर्शं रिक्तां षष्ठीं त्रयोदशीं । पर्वाष्टमीं रविं भौमं तैलाभ्यंगं न कारयेत् ।
पर्वशब्देन चतुर्दशीपौर्णमास्यावुच्येते । दर्शस्य पृथगुपादानात् । विष्णुपुराणे । चतुर्दश्यष्टमी चैव अमावास्या
च पूर्णिमा । पर्वाण्येतानि राजेंद्र रविसंक्रांतिरेव च । तैलस्त्रीमांससंभोगी पर्वस्वेतेषु यः पुमान् । विण्मूत्रभोजनं
नाम निरयं प्रतिपद्यते । षष्ठीषु तैलं पलमष्टमीषु क्षौरक्रियां चैव चतुर्दशीषु । स्त्रीसेवने नष्टकलासु पुंसामायुः
क्षयार्थं मुनयो वदंति । तत्रापि । शनौ षष्ठ्यां मृतं तैलं महाष्टम्यां पलाशनं । क्षौरं तीर्थे चतुर्दश्यां दीपावल्यां तु
मैथुनं । रवेः संक्रांतिः राशेःपतरगमनमिति व्युत्पत्त्या एवमेव पर्वोच्यते । केचित्पर्वद्वयं मन्यमाना योगाद्यपि क्व
चित् । रूढेर्वलवत्त्वमाहुः । यथोक्तं । लब्धात्मिका सती रूढिर्भवेद्योगापहारिणी । कल्पनीया तु लभते नात्मा
दशी १ नं याथवाधते । यथा मंडपं भोजय । तथा । षष्ठ्यष्टमी पंचदशी श्रेव च चतुर्दशी । अत्र सन्निहितं पापं तैले मांसे क्षु
रे भगे । समयप्रदीपे यमः । आमलकं कलं हंति शिरोभ्यंगे चतुर्दशी । मांसाशने पंचदशी ग्राम्यधर्मे तथाष्टमी ।

८ वृद्धशातातपः। दंतकाष्ठममायांच मैथुनं च चतुर्द्दशी। हंति सप्तकुलं तस्य तैलग्रहणमष्टमी। कौर्म्मे। शिरः
स्नातस्तु तैलेन नांगं किंचिदुपस्पृशेत्। तस्मिन्नेव दिने तैलेनांगं नोपस्पृशेदित्यर्थः। तथा। नावगाहे दर्पान
न्नो वह्निं नातिव्रजेत्तथा। शिरोभ्यंगावशिष्टेन तैलेनांगं न लेपयेदिति। तथा। द्वितीयाधननाशाय पुत्रना
87 शाय त्रयोदशी। दशम्यभयनाशाय मलस्नाने प्रकीर्तिता। इति ब्राह्मणेतरपरं स्मृ। तत्तु कुर्यात्त्रयोदश्यां द्वि
तीयायां तथा तिथौ। शाश्वतिं स्मृतिमन्विच्छन् दशम्यां च द्विजोत्तम इत्यपरार्के। तथा निर्णयामृते। त्रयो
दश्यां द्वितीयायां दशम्यां च विशेषतः। शूद्रविट्क्षत्रिया स्नानं न चरेयुः कथंचन। भविष्यपुराणे। स
प्तम्यां स्पृशते तैलमिष्टा भार्या विनश्यति। अत्रेष्टा भार्या विनश्यतीति अत्र तैलस्नानेन तन्नाशो भवतीति तन्निमि
त्तस्नाने तन्मरणजन्यदोषापत्तेः। एवमन्यत्रापि। तथा। चित्रासु हस्ते श्रवणे च तैलं क्षौरं विशाखा शतिपत्सु वर्ज्यं।
य मूले मृगे भाद्रपदासु मांसं योषिन्मघाकृत्तिकचोत्तरासु। अत्र सर्वत्र स्नाननिषेधो नित्यनैमित्तिकेतरविषयः।
भोगार्थं क्रियते यत्तु स्नानं यादृच्छिकं नरैः। तन्निषिद्धं द्वितीयादौ नित्यनैमित्तिके इति पैठीनसिवाक्यात्। तथा।
नित्यं न हापयेत्स्नानं काम्यं नैमित्तिकं च यत्। दशम्यादिषु कर्त्तव्यं न च यादृच्छिकं क्वचित्। अपरार्के। उपोषितस्य
व्रतिने कृत्तकेशस्य नापितैः। तावच्छ्रीस्तिष्ठति प्रीता यावत्तैलं न संस्पृशेत्। स्कांदे। तैलाभ्यक्तो घृताभ्यक्तो वि

स्नानं कुरुते यदि । अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यति । तथा । कषायेन शिरः स्नात्वा अभ्यक्तो येन केनचित् ।
तावत्स्यादशुचिर्विप्रो यावन्न निर्मृज्यते न तत् । कषायेनामलकादिना यावत्तैलाद्यभ्यक्तमंगं न निर्मृज्यते तावदशु
चिर्भवतीत्यर्थः । मलस्नाने निषिद्धान्याह स्मृतिः । श्रावण्यां बलिराजे च वसंतस्य च दर्शने । तैलाभ्यंगो न दुष्येत सं
क्रांतिग्रहणादिषु । वसंतस्य दर्शने चैत्रकृष्णप्रतिपदि । बलिराजे दर्शाद्वितीये शुक्लप्रतिपदि ग्रहणे संभवात् ।
तथा । श्रावण्यां बलिवासरे जनिदिनोद्वाहे वसंतोत्सवे अभ्यंगो निशुरक्षप्रदस्तु विहितः स्यात्पर्वे वर्ज्येष्वपि ।
पैठीनसिः । पुत्रजन्मनि संक्रांतौ श्राद्धे जन्मदिने तथा । मलस्नानं न कर्तव्यं तिथिदोषो न विद्यते । श्राद्धे श्वः
करिष्यमाणे आमंत्रितस्य च कर्तुस्तत्रैव स्नाननिषेधात् । कात्यायनः । मंगलविधौ तैलस्नानं वृद्धिः सर्वोत्सवेषु च ।
स्नेहमात्रसमायुक्तं मध्याह्नात्प्राग्विशिष्यते । तैलापवादमाह मदनपारिजाते । यत्र तैलनिषेधः स्यात्तिलतै
लं निषिध्यते । अभ्यंगादिनिषेधस्तु सार्षपादेरपि स्मृतः । तैलशब्दश्च योगरूढ्या तिलस्नेह एव प्रवर्त
ते । सार्षपे रूढिरेव रूढियोगारूढ्या विरोधः रूढ्या योगारूढ्यापीनपहारात् । बृहस्पतिः । संक्रांतौ रवि
वारे च षष्ठ्यां भौमदिने तथा । द्रव्यांतरयुतं तैलं न दुष्येत कदाचन । तैलं तिलसंभवं । कालविशेषद्रव्य
विशेषमाह स एव । रवौ पुष्पं गुरौ दूर्वा भौमवारे च मृत्तिका । सोमे शुक्रे तु पयो गोविट् द्रव्यांतरमितीरितं ।

८८ 88 गोविंदार्णवे । स्त्रीणां तु बुधवारे स्नाने तैलाभ्यंगविवर्जनं । तथा । रविस्तापं कांतिं वितरति शशी भूमितनयो मृतिं
लक्ष्मीं चांद्रिः सुरपतिगुरुर्वित्तहरणं । विधत्ते दैत्यानां गुरुरखिलभोगान् रविसुतो नृणां तैलाभ्यंगात्सपदि कु
रुते सूर्यतनयः । अत्र सोमे यत्कांतिप्राप्तिस्तद्गोविट्युततैलस्नाने नेति वाक्यैकवाक्यतया कल्पनालाघवात् ।
यद्वा । पुत्रवान्स्वगृहे नित्यं न भुंजीतोत्तरामुखः । सोमवारे तथाभ्यंगो वर्जनीयः सदा बुधे रिति निषेधात् । सोम
वारे पुत्रवता गोविट्युततैलमाभ्यंजनीयं । प्रचेताः । सार्षपं गंधतैलं च यत्तैलं पुष्पवासितं । अन्यद्रव्ययुतं
तैलं न दुष्यति कदाचन । गंधतैलं कुंकुमागुर्वादिनिर्मितं । पुष्पवासितस्य पृथक्कथनात् । अन्यद्रव्ययुतं लाक्षा
दिद्रव्ययुतं । व्यासः । श्रीकामः सर्वदा स्नानं कुर्यादामलकैर्नरः । तुष्यत्यामलकैर्विष्णुरेकादश्यां विशेषतः । सर्वदे
ति पदं निषिद्धेतरदिनपरं । वाक्यांतरविरोधात् । यथा । नवम्यां दर्शसप्तम्योः संक्रांतौ रविवासरे । चंद्रसूर्योपरागे
च स्नानमामलकैस्त्यजेत् । तथा । तिलैः स्नानं सदा पुण्यं कुर्यादामलकैः श्रिये । सप्तमीनवमीदर्शरविसंक्रमणादृते ।
सर्वकामं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनिः । न स्नायादुत्सवेऽतीते मंगल्यं विनिवर्त्य च । अनुव्रज्य सुहृद्बंधूनर्चयित्वे
ष्टदेवताः । मदनपारिजाते । स्नेहाभ्यंगो भवत्येव न स्नेहः सार्षपादिषु । दशमी द्वादशी श्राद्धव्रतोपवसनादृते ।
तैलशब्दस्तिलस्नेहे सरूढो नैव यौगिकः । अतस्तिलविकारे पिपिण्याकतिलमोदके । शष्कुलीकृसराद्ये च निषेधो

नैवजायते । नभोजनायते त्वसानिषेधोमृगएववः । तथा । तिलस्नायीतिलोद्वर्तीतिलहोमीच्चतर्पणी । तिलदाताच
भोक्ताचषट्तिलाःपापनाशनाः । निमित्तकालमादायवृत्तिर्विधिनिषेधयोः । विधिःशून्यतिथेर्वृत्तिर्निषेधःकाल
मात्रके । तथा । स्नानेचाभ्यंजनेचैवदंतधावनमैथुने । तिथिस्तात्कालिकीग्राह्यातथामरणजन्मनोः । गौणस्नानमा
हभरद्वाजः । दिव्यंवायव्यमाग्नेयंब्राह्मंसारस्वतंतथा । मानसंचेतिविज्ञेयंगौणस्नानंतुषड्विधं । यत्तुसातपवर्षे
णादिव्यंस्नानंतदिष्यते । वायव्यंगोरजःस्नानंश्वलंगाकृतिगोपतौ । भूतिवंदनमाग्नेयंमंत्रवत्परिचक्षते । आपोहिष्ठा
मयंब्राह्मंप्रोक्तंमार्जनलक्षणं । विद्वत्सरस्वतीप्राप्तंस्नानंसारस्वतंमतं । धर्मश्रवणवेलायांविप्रोव्यासासनेस्थितः । य
द्ददातिमहास्नानंमानसंविष्णुचिंतनं । शन्नआपस्तुद्रुपदाआपोहिष्ठाघमर्षणं । एभिश्चतुर्भिर्ऋग्मंत्रैर्मंत्रस्नानमुदाहृ
तं । विद्वद्वाक्येनपावित्र्यापावनंसारस्वतमित्यर्थः । हारीतः । पंचस्नानानिविप्राणांकीर्तितानिमनीषिभिः । आग्नेयं
वारुणंब्राह्मंवायव्यंदिव्यमेवच । आग्नेयंभस्मनास्नानमद्भिर्वारुणमुच्यते । आपोहिष्ठेतितद्ब्राह्मंवायव्यंगोरजः
स्मृतं । अद्भिःसातपवर्षादिदिव्यंस्नानमिहोच्यते । एतैस्तुमंत्रतःस्नात्वातीर्थानांफलमाप्नुयात् । भस्मनासंस्कृताग्नि
भस्मना । स्कंदपुराणे । पुरांचकनखलेयच्चप्रयागेयच्चसुंदरि । तत्फलंसकलंदेविभूतिस्नानेविधीयते । भूतिःसंस्कृ
ताग्निभस्मशब्दनिर्वचनेनारदः । भस्मनाभसितंप्रोक्तंभस्मकल्मषभक्षणात् । भूतिर्भूतिकरीपुंसांरक्षारक्षाकरंपरमिति ।

८९

८१

उच्छिष्टं वाप्रमत्तं वा नरं वाहनगं दिनि । भूतिस्थं हि नरं धर्षयंति विनायकाः । योगियाज्ञवल्क्यः । असामर्थ्याच्छरी
रस्य कालशक्त्याद्यपेक्षया । मंत्रस्नानादयः सप्त केचिदिच्छंति सूरयः । मांत्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च । वारुणं
मानसं चैव सप्त स्नानानि प्रकीर्तिताः । आपो हि ष्ठेति वै मांत्रं मृदालंभस्तु पार्थिवं । आग्नेयं भस्मना स्नानं वायव्यं गोरजः
स्मृतं । यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते । वारुणं चावगाहस्तु मानसं विष्णुचिंतनं । मंत्रस्नानक्रममाह ।
भुवि मूर्द्धि तथाकाशे मूर्ध्न्याकाशे तथा भुवि । आकाशे भुवि मूर्ध्नि स्यान्मंत्रस्नानमुदाहृतं । काशीखंडे । भूमिशब्देन चरणा
वाकाशं हृदयं स्मृतं । शिरस्येव शिरःशब्दो मार्जनस्येरुदाहृतः । शस्तस्नानं यथोद्दिष्टं मंत्रस्नानं क्रमेण तु । कालादेशादसाम
र्थ्यात्सर्वं तुल्यफलं स्मृतं । वारुणादपि चाग्नेयं तस्मादपि च मारुतं । मारुतादपि मांत्रं तु वरं स्नानं प्रकीर्तितं । मंत्रस्नानादपि वरं
ब्राह्मं स्नानं प्रकीर्तितं । ब्राह्मस्नानेन यः स्नातः स बाह्याभ्यंतरः शुचिः । ब्राह्मं ब्रह्मैव स्नानं ब्रह्मध्यानमित्यर्थः । इति योगिपरं
रहस्यस्य तु वारुणं मुख्यं । असामर्थ्यादिनाऽन्यान्यपि तत्सदृशानि । स्नानानामेव सर्वेषां वारुणेनैव मानवाः । कर्तुमर्हंति
कर्म्माणि कृतेन विधिवत्सदेति स्मृतेः । अत्र सशिरस्कं स्नानं कार्यं । यदाह शंखः । सशिरस्को हरहराज्ञवेत श्रद्धयान्वितः ।
शिरःस्नातस्तु कुर्वीत नित्यनैमित्तिकीं क्रियां । मार्कंडेयः । सर्वांगीनस्नानाशक्तौ जाबालिः । अशिरस्कं भवेत्स्नानं स्नाना
। कार्मिकं ८ शक्तौ तु कर्मिणां । आर्द्रेण वाससा वापि गात्राणां परिमार्जनं । काम्यं शिरःस्नानाभावे निवर्त्तते । कूर्मपुराणे । स्वस्यस्नावा
मार्जनं दैविकं विदुः ८

हणं स्नानं ब्राह्मं वायव्यं जलदये । दिव्यं ब्रह्मावतां पुंसां वायव्यमनुपपापिनां । मनुः । असामर्थ्याच्छरीरस्य देशकालाद्युपे
क्षया । तेषामप्युपयोगः स्यात्स्नानानां धर्मकर्मसु । कालेतिशीतानि वृष्ट्यादि तेन रोगहीने नापि अति वृष्ट्यादौ स्ना
नजन्यरोगसंभावनायां प्लवनं कार्यं । असामर्थ्ये शरीरकार्श्ये । अथातुरस्नाने देवलः । आतुरस्नाने संप्राप्ते दशकृत्वो
ह्यनातुरः । स्नात्वा स्नात्वा स्पृशेदेनं ततः शुद्ध्येत्स आतुरः । तदसंभवेपि । परस्नानमपि ग्राह्यं विशः संपादयंतिये । स्ना
नं तीर्थफलं जप्यं स्वकर्मविधिचोदितं । संपदा वाध्यते दोषैस्तस्य संपद्यते फलमिति बृहस्पतिः । संपादयंति विक्रीणं
ति । दिव्यस्नाने विष्णुपुराणं । आदाय गंगासलिलं तदादाय गभस्तिमान् । अनभ्रगतमेघानां सद्यः क्षिपति रश्मिभिः ।
तस्य संस्पर्शनिर्धूतपापपंको हि जोत्तमः । नयाति नरकं मर्त्यो दिव्यं स्नानं हि तत्स्मृतं । दृष्टसूर्ये हि यद्वारि पतत्य
भ्रैर्विनादिभिः । आकाशगंगासलिलं तद्गोभिः क्षिपते रवेः । कृत्तिकादिषु ऋक्षेषु दिव्यमेघाखयद्दिवः । दृष्टार्कप
तति तत्तोयं तद्गांगं दिग्गजोज्झितं । समर्क्षेषु च यत्तोयं पतत्यर्कोज्झितं दिवः । तत्सूर्यरश्मिभिस्सद्यः समादाय निर
स्यते । उभयं पुण्यमत्यर्थं नृणां पापहरं द्विज । आकाशगंगासलिलं दिव्यस्नानं महामुने । अथ श्रीगुरोः पादोद
कादिस्नानं स्मृतिसंग्रहे । अशक्तानां यदाशक्तो गुरोः पादोदकं स्मृतं । तज्जलं सर्वतीर्थानां समं विद्भिरादृतं । सर्व
तीर्थमयं दिव्यं सर्वपापप्रणाशनं । अस्नानधौतशमनं गुरोः पादोदकं स्मृतं । विप्रपादादिपादानुलस्ता संभृतं जलं ।

१०
न स्नानात्प्राप्यते ज्ञानं ध्यानं ज्ञानाद्विशिष्यते । इति श्रीगुरोः पादोदकादिस्नानम् ॥ एवमुक्तानुकल्पस्नातः पुरुषो
जपादिष्वर्हः स्यान्न देवतार्चनादिषु । तथैवाहाचार्यः । प्रातःस्नातुमशक्तस्य रोगाद्यैर्वा भयाच्च वा । पूर्ववत्स्वप
90
रित्यन्य शुद्धिस्तस्य भवेत्तदा । सर्वकर्मस्वनर्हः स्याद्भूतकृत्यार्चनादिषु । जपसंध्यातपोवेदे सोप्यावदि यथाविधि ।
अयं चानुकल्पः नित्यनैमित्तिकक्रियांगेषु । काम्ये प्रतिनिधेरभावात् । मलापकर्षणस्य दृष्टार्थत्वेनेतरासाध्य
त्वात् । क्रियास्नानस्य च तीर्थविशेषोद्देशेन विहितत्वादिति । तत्र यथोक्तानि मज्जनादीनि स्नानसामान्यांग
गानि अहरहःस्नाने भवंति । प्रातःस्नाने तु । यथाह नितयाप्रातरित्यतिदेशात् । एवं नैमित्तिके काम्ये च नैषा
मंगानामभिसंबंधः । प्रापकाभावात् । अतिनिर्देशस्य च प्रातरिति विशेषवचनात् । अन्यथा तथाप्रातरिति विशे
षोद्देशानार्थक्यप्रसंगात् । काम्यमलापकर्षणयोस्तु लौकिकत्वेनालौकिकांगसंबंधानर्हत्वात् । एतच्च त्रातसूत्रा
धिकरणे स्फुटं । क्रियांगस्नानेपि अद्भिरेव तु शुद्ध्यतीत्यभिधानान्नांगसंबंधः । एवं स्नानांतराणि मज्जनमात्ररूपा
ण्येव । विशेषधर्मास्तु औपदेशिकत्वात्तत्र भवंति । एवं स्नानानुकल्पेष्वपि । अत्र प्रातर्मध्याह्नेपि जपदेवपूजाद्यं
गतया प्राप्तस्य क्रियांगस्नानस्य तथा क्रियास्नानस्य नित्यतया प्राप्तस्य चाहरहःस्नानस्य किं पृथगनुष्ठानं ।
उत सकृदेवेति विचार्यते । तत्र क्रियास्नानमहरहःस्नानादभिन्नं । तत्रापि पापलयरूपस्य फलस्य सत्त्वादिति भट्ट

नयेनाहहरिहरः। तन्न। नैमित्तिकस्यापितपात्वेन अभेदापत्तेः। पृथगनुष्ठानप्रसंगात्। तस्मादसतिविरोधे देशका
लकर्त्रैक्ये तंत्रेणोभयमनुष्ठानं। तत्रनित्यान्नैमित्तिकं बलीयस्तस्मादपिकाम्यं। अतएवकार्त्तिकमाघार्कवारादिषु पृ
थक्स्नानं नकार्यं। काम्येनैवतत्सिद्धेः। गोदोहनवत्। यथाचमसेनापःप्रणयेद्गोदोहनेन पशुकामस्येत्यत्र नित्यतया
प्राप्तमपि अपांप्रणयनं पशुकामेनक्रियमाणंगोदोहनेनैवनिर्वाह्यते। नतुपृथगनुष्ठीयते॥ अथनदीस्नानं।
तत्रयाज्ञवल्क्यः। त्रिरात्रफलदानद्यो याःकाश्चिदसमुद्रगाः। समुद्रगास्तुपक्षस्य मासस्यसरितांपतिः। षण्मासफ
लदागोदावत्सरस्यतुजाह्नवी। पादोदकंभगवतोद्वादशाब्दफलप्रदमित्यत्रत्रिरात्राद्युपवासफलदातृत्वंगोदोहना
धिकरणन्यायेनगुणविधिफलेष्वप्रकरणोक्तं तीर्थफलंसाधिकारमेव। मनुः। उदकेनाभिमात्रेचयःकुर्यादभि
षेचनं। प्राक्स्रोतसितुवैनद्यांनरस्त्वेकाग्रमानसः। यावज्जीवकृतंपापंतत्क्षणान्नस्यनश्यति। स्मृतिसंग्रहे। स्रोतसो
ऽभिमुखःस्नायात्मार्जनेचाघमर्षणे। अन्यत्रार्कमुखोरात्रौप्राङ्मुखोऽग्निमुखोऽपिवा। संध्यामुखस्तुसंध्यायांस्नानंकु
र्वीतवैनरः। तथा। नद्यांप्रत्येकशःस्नानेभवेद्गोदानजंफलं। गोप्रदानेतुदशभिस्ताःसप्रसंपन्तुसंगमा। नदीभे
दः स्मृतिसारे। महानदी। नदी। कुलीनी। अल्पनदीभेदश्चतुर्द्धा। तत्रचतुर्विंशतियोजनाधिकप्रवाहामहा
९५ नदी। चतुर्विंशतियोजनगानदी। द्वादशयोजनगाऽल्पनदी। षड्योजनगतिःकूलिनी। स्मृत्यंतरे। याःशोषमु

८१ पञ्चकं तिंशत्रीण्येकं सरितो भुवि । तासु स्नानं न कुर्वीत प्रावृट्काले तु प्रदर्शने । इत्येतादृश्यः कुलिन्योल्पजला नद्यो न
९१ द्यश्च । सप्ताहं पक्षमासांतं रजस्वला न तु द्रुनद्यः । इति स्मृतिसारः । तथा कात्यायनः । कुल्यास्तु सप्तरात्रं स्या
त्पक्षं तु द्रुनदीषु च । नदीषु मासमेकं च रजोदोषः प्रकीर्तितः । तल्लक्षणं तु तत्रैव । कुल्याः षड्योजनं यांति
द्वादशस्तु द्रुसंज्ञिताः । प्रवहंति नदीसंज्ञाश्चतुर्विंशतियोजनमिति । कुलिनीकुल्ये त्वेकैव । छंदोगपरिशि
ष्टे । धनुःसहस्राण्यष्टौ च गतिर्यासां न विद्यते । न ता नदीशब्दवहा गर्तास्ताः परिकीर्तिताः । धनुश्चतुर्हस्तमितं ।
तथोक्तं । हस्तोंगुलिविंशत्या चतुरन्वितया चतुष्करो दंडः । ताद्दिसहस्रं क्रोशो योजनमेकं चतुःक्रोशाः । गर्तो
नद्याकारतया दीर्घः । महानदीलक्षणं हलायुधे । संगता या भवेद्गंगा समुद्रेणानदेन वा । सा नदी सर्वस
लिलाया योजनशतं गता । अथ प्रसंगान्नदीरजो निरूप्यते । तत्राचारचिंतामणौ । सिंहकर्कटयोर्मध्ये सर्वा
नद्यो रजस्वलाः । तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः । तास्विति श्रवणात्तदधिकरणकस्नानं निषि
ध्यते । न तु तदुद्धृतोदकेनापि । यावद्वचनं हि वाचनिकमिति न्यायात् । स्वातंत्र्येणैव स्वनाम्ना साक्षात्समु
द्रप्रविष्टाः । छंदोगपरिशिष्टे । यव्यहद्यं श्रावणादि सर्वा नद्यो रजस्वलाः । तासु स्नानं न कुर्वीत वर्जयित्वा स
मुद्रगा इति यद्गो मासः । यद्गो मासमेकः संवत्सर इति शातपथश्रुतेः । अत्रागमे स्नानमात्रस्य निषेधात्प्राग

पिरजस्वला इति हेतुमन्निगदात् स्नानानर्हत्वमेव विवक्षितं । नत्वाचमनाद्यनर्हत्वमपि संप्रदायोप्येवमेवेति रत्नाकरे ।
तथा च स्मृत्यंतरे । वापीकूपतडागेषु स्रवत्सु तोयेषु चैव हि । पुराणोदकहीनेषु त्रिरात्रं रज उच्यते । न स्नानादीनि कर्माणि दृ
श्यंते रजसि स्थिते । अत्र पुराणोदकराहित्येन नवोदकतया अहं स्नानाद्यनर्हत्वं । तत्र विशेषः स्मृत्यंतरे । महद्वंबु समं चा
त्र यदि विद्यात्पुरातनं । नवांबुमिश्रितं तेन न दुष्टमिति सूरयः । आहुरिति शेषः । भविष्ये । कालेनवांबु भूमिस्थं प्रत्यग्रमस्पृ
शि अहं । अकाले तु दशाहं तत्पीत्वा नाद्यमहर्निशं । तथा । सिंहकर्कटयोर्मध्ये सिंधुकन्या रजस्वलाः । तासु स्नानं न कुर्वीत
न तु तत्तीरवासिनां । तथा यनिगमे । न तु तत्तीरवासिनामित्यसंभवे । यदाह व्याघ्रपादः । अभावे कूपवापीनामनपायि
पयोभृतां । रजोदुष्टे पि पयसि ग्रामभोगो न दुष्यति । गंगा च यमुना चैव प्लक्षजाता सरस्वती । रजसा नाभिभूयंते ये चा
तथाहलायुधः ५ न्ये नदसंज्ञकाः । विशोकादित्युदहिता श्रीगंगा गोमती मता । रजसा न प्रदुष्यंति ये चान्ये नदसंज्ञकाः । विशोकेति पदं
महानद्युपलक्षणं । ताश्च ब्रह्मपुराणे । गोदावरी भीमरथी तुंगभद्रा च वेणिका । तापी पयोष्णी विंध्यस्य दक्षिणे तु प्र
कीर्तिताः । भागीरथी नर्मदा च यमुना च सरस्वती । विशोका च वितस्ता च विंध्यस्योत्तरतः स्थिताः । द्वादशैता महा
नद्यो देवर्षिक्षेत्रसंभवाः । विशोकादिप्रामहानदीषु दिनमेव रजः । आदौ कर्कटके देवि महानद्यो रजस्वलाः ।
त्रिदिनं तु चतुर्थे ह्नि शुद्धाः स्युर्जाह्नवी यथा । रैवी नाम नदी तस्याः अहं रजस्वलत्वं । भारते । रैवी चरे विकाचैव

भविष्ये ।

गाथा ५=

९२ मीनेशेषाद्न्याहुर्मासद्वयपर्यंतं रजस्वलाः। कपिला मधुवाहश्च शोणः स्रोतश्च घर्घरः। हिरण्यो लोहितश्चैव
नदाः सप्त प्रकीर्त्तिताः। स्कंदपुराणे। गंगा सरस्वती रेवा एकत्र रजस्वलाः। त्रिरात्रं यमुनाद्यास्तु पंचरात्रं समुद्रगाः।
92 भविष्ये। आदौ कर्कटके देवी त्र्यहं यावद्रजस्वला। चतुर्थेहनि संप्राप्ते शुद्धा स्याज्जाह्नवी यथा। देवीनाम नदीनस्याः
त्र्यहं रजस्वलात्वं। भारते। देवी च देविका चैव देवनद्यपि च त्रयं। रजसा न प्रदुष्यंते कर्कटादौ त्र्यहं पुनः। आह्नि
कप्रदीपे। सिंहकर्कटयोर्मध्ये त्र्यहं गंगा रजस्वला। चंद्रभागा सती सिंधुः सरयूर्नर्मदा तथा। त्र्यहं गंगा रजे
स्वलेति। गंगायाः त्र्यहं रजस्वलात्वं। अंतर्गतरजोभिप्रायेण। गंगा धर्मद्रवा पुण्या यमुना च सरस्वती। अंत
र्गतरजोदोषाः सर्वावस्थासु चामलेति मरीचिनिगमः। प्रतिस्रोतो रजोयोगो रथ्याजलनिषेवणं। गंगायां न प्रदु
ष्यंति सा हि धर्मद्रवः स्वयं। प्रतिस्रोतः प्रवाहाभिमुखेन प्रवृत्तं जलं। मार्कंडेयः। यावन्नोदेति भगवान् दक्षिणाशा
विभूषणं। तावद्रजो महानद्यो वर्जयित्वा तु जाह्नवी। कर्कटसंक्रांते रगस्त्योदयपर्यंतं रजस्वलात्वं। कात्यायनः।
न नदीनां रजोयोगो गंगायां चापि विद्यते। महाभारते भीष्मपर्वणि। तत्र त्रिपथगा देवी प्रथमं तु प्रतिष्ठिता। ब्र
ह्मलोकादपाक्रांता सप्तधा प्रतिपद्यते। वस्वोकसारा नलिनी पावना च सरस्वती। जंबूनदी च सीता च गंगा सिंधुश्च
सप्तमी। अचिंत्यो दिव्यसंकल्पः प्रभोरेवैष निश्चयः। उपासते यत्र संतं सहस्रयुगपर्यये। दृश्यादृश्या च भवति त

सिंधुतीरे हरिक्षेत्रे विष्णुपादोदकाश्रिते । पुंड्राणां धारणार्थाय गृह्णीयान्नत्र मृत्तिकां । अभावे तूदकेनापि पुंड्रं वि
ततमाचरेत् । व्यतिरेके निंदा तत्रैव । यच्छरीरं मनुष्याणामूर्ध्वपुंड्रं विना भवेत् । द्रष्टव्यं नैव तत्तावत् श्मशानसदृशं
हितत् । यस्योर्ध्वपुंड्रं दृश्येत ललाटे नो नरस्य हि । तद्दर्शनं न कर्तव्यं दृष्ट्वा सूर्यं निरीक्षयेत् । त्रिपुंड्रं यस्य विप्रस्य
दृश्यते नोर्ध्वपुंड्रकं । तस्य दृष्ट्वाथवा स्पृष्ट्वा सचैलं स्नानमाचरेत् । हलायुधे नारदीयवाक्यम् । ये कंठलग्नतु
लसीनलिनाक्षमाला ये वा ललाटफलके लसदूर्ध्वपुंड्राः । ये बाहुमूलपरिचिह्नितशंखचक्रास्ते वैष्णवा भुवन
माशु पवित्रयंति । तत्प्रकारः पाद्मे । नचोर्ध्वं धारयेन्मूर्तिं न तिर्यग्गोपिचंदनं । तिर्यगूर्ध्वं च वरं तं च धारयेच्चं
दनादिकं । ब्रह्मांडेपि । ऊर्ध्वपुंड्रं मृदा कुर्यात् त्रिपुंड्रं भस्मना सदा । तिलकं च द्विजः कुर्यात् चंदनेन यदृच्छया ।
स्मृतिरत्नावल्यां । मध्यमानामिकांगुष्ठैर्ललाटे यत् त्रिपुंड्रकं । तत्त्रिपुंड्रं भवेच्छ्रेष्ठं महापातकनाशनं । सितेन
भस्मना तिर्यक् त्रिपुंड्रस्य तु धारणं । शैवागमेतु निष्ठानां तत्तन्मंत्रेण शस्यते । विना भस्मत्रिपुंड्रेण विना रुद्रा
क्षमालया । पूजितोपि महादेवो न स्यात्तस्य फलप्रदो भवेदिति । काम्यं तदेकभक्तिपरं वा । ब्राह्मणानां नृपाणां
तु भस्मनि श्रेयश्चंदनं । नेत्रयुग्मप्रमाणं तु त्रिपुंड्रं धारयेद्बुधः । इदं साग्निपरं प्रतीयते । ब्रह्मपुराणे ।
ऊर्ध्वपुंड्रं द्विजः कुर्यात् क्षत्रियस्तु त्रिपुंड्रकं । अर्धचंद्रं च वैश्यस्य वर्तुलं शूद्रयातिषु । याज्ञवल्क्यः ।

९५ वेणुपत्रदलाकारं वैष्णवं तिलकं स्मृतं । अर्धचंद्रं तथा शैवं शाक्तिकं तिर्यगुच्यते । पैशाचं बिंदुमध्यस्थं तिलकं प
मनाशनं । तिर्यग्रेखात्रयात्मकं तिर्यक्तिलकं त्रिपुंड्रं सुरविप्राणामिति । सुरविप्रा देवलकाः । तथा । भुवां
95 तं सुरविप्राणां भ्रूमध्ये भूभुजां तथा । अर्द्धचंद्रं च वैश्यानां शूद्राणां कुंडलाकृतिः । याज्ञवल्क्यः । भ्रुवोर्म
ड्लमध्यस्थं तिलकं कारयेद्बुधः । तावेव लंघयेद्यस्तु लिंगभेदी स उच्यते । आदित्यपुराणे वासुदेवः । ऊर्ध्व
पुंड्रं तु सर्वेषां न निषिद्धं कदाचन । धारयेयुः स्त्रियाद्या विष्णुभक्ता भवंति ये इति । विष्णुधर्मोत्तरे । ऊर्ध्वपुं
ड्रप्रमाणानि द्व्याद्यंगुलिभेदतः । वर्णांश्च मंत्रदेशांश्च शवलामिफलानि च । मृत्तिका चंदनं भस्म तोयं चै
व चतुर्थकं । एभिर्द्रव्यैर्यथाकालमूर्ध्वपुंड्रं भवेत्सदा । स्नात्वा पुंड्रं मृदा कुर्याद्धुत्वा चैव तु भस्मना । देवानभ्यर्च्य
गंधेन सर्वपापापनुत्तये । तत्र मृदादित्रयस्य यथाकालं विनियोग उक्त एव तोयविनियोगः । स्नानांतरमावस्त्र
परिधानात् । तथा । दशांगुलप्रमाणं यदुत्तमोत्तममुच्यते । नवांगुलं मध्यमं स्यादष्टांगुलमतः परं । सप्तषट्
पंचभिः पुंड्रं मध्यमं त्रिविधं भवेत् । चतुस्त्रिद्व्यंगुलैः पुंड्रं कनिष्ठं त्रिविधं भवेत् । आचारचिंतामणौ । अंगुष्ठः पुष्टि
दः प्रोक्तो यशस्या मध्यमा भवेत् । अनामिकाश्रियं दद्यान्मुक्तिं दद्यात्प्रदेशिनी । कनिष्ठिकाश्रियं दद्यात्तिल
कस्य विधिः स्मृतः । एतैरंगुलिभेदैस्तु न खैः क्वापि न कारयेत् । पूजाकाले च होमे च सायं प्रातः समाहितः ।

मंत्रमुच्चार्यविधिनाकारयेदूर्ध्वपुंड्रकं । मंत्रस्तु । ललाटेकेशवंविंद्यान्नारायणमथोदरे । माधवंहृदयेन्यस्य
गोविंदंकंठकूपके । दक्षिणेजठरेविष्णुं बाहौचमधुसूदनं । त्रिविक्रमंकर्णदेशेवामेकुक्षौचवामनं । श्रीधरंबाहु
केवामेहृषीकेशंतुकंधरे । अपरेपद्मनाभंचकट्यांदामोदरंस्मृतः । अत्र ॐकेशवायनमः इत्यादीनि
द्वादशनामान्युच्चार्यतत्तत्स्थानेषुतिलकंकुर्यात् । तत्फलमाह हलायुधः । द्वादशस्थानतिलकास्तुल
सीदलधारिणः । जीवंतः पावयंत्यन्यान्मृताविष्णुसमीपगाः । पाद्मे । एवंद्वादशपुंड्राणिब्राह्मणोधार
येत्सदा । चत्वारिभूभुजानांतुपुंड्राणिद्वेविशांस्मृते । एकंपुंड्रंतुनारीणांशूद्राणांतुविधीयते । इदंनित्यं ।
द्विजातिमात्रस्ययद्द्वादशांगतिलकधारणं तत्काम्यंनित्येमानाभावात् । वैष्णवविषयंवा । द्वादशविधानमुक्त्वाम
वान्येषामाहवाचं । ललाटेहृदिबाह्वोश्चचतुःपुंड्राणिधारयेत् । ललाटेहृदयेद्वेतुभालेत्वेकंविधीयते । लला
टादिक्रमेणैवधारणंतुप्रशस्यते । तदाकारमाहाचारप्रदीपः । दीपवर्त्याकृतिंवापिवेणुपत्राकृतिंतथा । पद्म
स्यमुकुलाकारं तथैवकुमुदस्यच । नासामूलेसमारभ्यवंशपत्राकृतिंशुभं । वंशकामोद्विजःकुर्यात्तिलकंचं
द्रनामदिना । मदनपारिजाते ब्रह्माण्डपुराणोक्तं । श्यामंशांतिकरंप्रोक्तंरक्तंवश्यकरंतथा । श्रीकरंपीतमित्या
हुःश्वेतंमोक्षप्रदायकं । इतिकाम्यम् । तत्तत्कामापेक्षयातत्तत्कार्यं । श्याममृगमदादिः । रक्तंसिंदूरादिः ।

९६ पीतंगोरोचनादेः। सांप्रदायकास्तुसच्छिद्रंकुर्वंतिपठंतिच। पाद्मवाक्यं। एकांतिनोमहाभागाःसर्वभूतहि
96 तेरताः। सांतरालंप्रकुर्वंतिपुंड्रंहरिपदाकृतिं। नासामूलंसमारभ्यललाटांतंलिखेन्मृदा। मध्येछिद्रं
तिलक ३८ प्रकर्तव्यंतच्छिद्रंहरिमंदिरं। तृतीयोनासिकाभागोनासामूलंप्रचक्षते। नासादिकेशपर्यंतमूर्ध्वपुंड्रं
सुशोभनं। अतएवनासिकांतःकुर्यान्नैवललाटतः। स्कांदे। हरिनामाक्षरमुखंभालेगोपीमृदंकितं।
य५ तुलसीमालिकोरस्कंस्पृशेयुर्नैवतद्भटाः। तत्रैवकाशीखंडे। शंखचक्रांकिततनुःशिरसामंजरीधरः।
गोपीचंदनलिप्तांगोदृष्टश्चेत्तदघंकुतः। अथशंखचक्रादिधारणं। तत्रब्रह्मांडपुराणे। स्नानंतत‍ऊर्ध्वम्।
तदूर्ध्वपुंड्रशंखाद्यैर्भूषितस्तुलसीभूषणः। संध्योपास्त्यादिकंकुर्यात्कृष्णपाणिर्हरिंस्मरन्। तथाभगवद्वाक्यम्।
यःपुनःकलिकालेतुमत्पुरीसंभवांमृदं। मत्स्यकूर्मादिकंचिह्नंगृहीत्वाकुरुतेनरः। देहेतस्यप्रविष्टोहंजा
नेतुत्रिदशोत्तमाः। वाराहेपि। नारायणायुधैर्नित्यंचिह्नितंयस्यविग्रहं। पापकोटिप्रयुक्तस्यतस्यकिंकुरुते
यमः। सनत्कुमारः। कृष्णायुधांकितंदेहंगोपीचंदनमृत्स्नया। प्रयागादिषुतीर्थेषुगत्वाकिंकरिष्यति।
यदायदाप्रपश्येतदेहंशंखादिचिह्नितं। तदातदाजगत्स्वामीतुष्टोहरतिपातकं। हलायुधे। शंखादिकांकितो
भक्त्यायःश्राद्धंकुरुतेनरः। विधिहीनंतुसंपूर्णंपितॄणांतुगयासमं। ब्रह्मपुराणे। शंखांकिततनुर्विप्रो

भुंक्ते यस्तु वै श्राद्धे । तदन्नं स्वयमश्नाति पितृभिः सह केशवः । तथा । कूर्माद्युधांकितो यस्तु श्मशाने म्रियते यदि ।
प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य नारद । तथा । यः करोति हरेरर्चां कृष्णशस्त्रांकितो नरः । ज्ञातजन्मकृतं पापं नि
त्यं हरति केशवः । पाद्मे । चक्रचिह्नविहीनस्तु यः प्रजयति केशवं । तत्सर्वं विलयं याति पूजामंत्रजपादिकं । शंखं वा
शंखचक्रं वा तथा पंचायुधानि वा । धारयित्वाथ विधिवद्ब्रह्मकर्म समारभेत् । नारदः । भुजयुगमपि चिह्नैरंकि
तं यस्य विष्णोः परमपुरुष नाम्नां कीर्त्तनं यस्य वाचि । ऋजुतरमपि पुंड्रं मस्तके यस्य कंठे सरसिजमणिमाला यस्तु
तस्यास्मि दासः । अथ धारणप्रकारो वाराहे । दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनं । सव्ये तु शंखं बिभृयादिति ब्र
ह्मविदो विदुः । विप्र इति विशेषोपादानात् । क्षत्रियादीनां त्वन्यथा धारणं प्रतीयते । तत्र ब्रह्मांडपुराणे । चक्रं
च दक्षिणे बाहौ शंखं वामेऽपि दक्षिणे । गदां वामे गदाधस्तात्पुनश्चक्रं च धारयेत् । शंखोपरि तथा पद्मं पद्मं शं
खं च दक्षिणे । हलायुधे । वामबाहौ गदाचक्रं पद्मं शंखं च दक्षिणे । उपर्यधः क्रमोक्तेन धृत्वा पापक्षयो भवेत् ।
शंखोद्धारे च मत्स्योक्तं वसंतावर्षकोटिभिः । तत्फलं लिखिते पद्मे प्रत्यहं दक्षिणे भुजे । यत्फलं पुष्करे नित्यं पुं
डरीकाक्षदर्शने । शंखोपरि कृते पद्मे तत्फलं कोटिसम्मितं । वामे बाहौ गदा यस्य लिखिता दृश्यते कलौ । गदा
धरेण यावत्फलं प्रत्यहं कुरुते नृणां । यथा स्कंदपुराणोक्तं चक्रस्वामीसमीपतः । गदाधो लिखिते चक्रे तत्फलं स्क

१५

स्य दर्शने । भवेद्यस्य शरीरेषु अहोरात्रं दिने दिने । शंखचक्रगदापद्मं लिखितं सोऽच्युतः परः । हृदये चाललाटे वा
विलिखेन्मत्स्यकच्छपौ । मंत्रमष्टाक्षरं वापि प्रीयते तस्य केशवः । गोपीचंदनमुद्रां च कृत्वा भ्रमति भूतले । सोऽपि
देशो भवेत्पूतः किं पुनर्यत्र संस्थितः । पद्मपुराणे । कृष्णनामाक्षरैर्गात्रमंकयेच्चंदनादिना । स लोकपावनो भूत्वा
तस्य लोकमवाप्नुयात् । श्रीभगवतो वाक्यम् । ममावतारचिह्नानि दृश्यंते यस्य विग्रहे । मर्त्यो मर्त्यो न विज्ञेयः स
नूनं मामकीतनुः । काशीखंडे मित्रजिद्दर्शने । विशालोरस्थलतलश्च लंबतुलसीस्रजं । शंखचक्रांकसुभगं
भुजद्वयविराजितं । ददर्शेतिशेषः । रामार्चनचंद्रिकायां । ललाटे तु गदा धार्या मूर्ध्नि चापः शरस्तथा ।
नंदकं चैव हृन्मध्ये शंखचक्रे भुजद्वये । विष्णुधर्मोत्तरे । यथाग्निर्दहते काष्ठं वायुनाप्रेरितो भृशं । तथा दहति पा
पानि दृष्ट्वा कृष्णायुधानि वै । भारते । नान्यं देवं नमस्कुर्यान्नान्यमंत्रमुदीरयेत् । चक्रांकितः सदा तिष्ठेन्मद्भ
क्तः सर्वदा शुचिः । वाराहे । कृष्णायुधांकितो देहो गोपीचंदनमृत्स्नया । प्रयागादिषु तीर्थेषु स गत्वा किं करि
ष्यति । गारुडे भगवद्वाक्यं । गारुत्मन्त्र विशेषेण सर्ववर्णेष्वयं विधिः । विप्रो वा यपवात्तत्रैव विशेषः शूद्रजातयेव
च । अन्ये संकरजाताश्च चक्रांका मम वल्लभाः । काशीखंडे दूतान्प्रति यमवाक्यम् । येस्तु स्मृत्यौ हरिहरांकयुता स्मृ० २८
मनुष्यास्ते वै भवद्भिरपि दूरत एव वर्ज्याः । विहंगे । सर्वकर्माधिकारस्तु शुचीनामेव चोदितः । शुचित्वं तु विजानी

यान्मदीयायुधधारणात्। तथा यजुर्विकठशाखायां। धृतोर्द्ध्वपुंड्रः कृतचक्रधारी विष्णुं परं ध्यायति यो महात्मा
स्वरेण मंत्रेण सदा हृदिस्थितं परात्परं यन्महतो महांतं। अथर्वणेपि। त्रिभिर्वयमुरुक्रम चिह्नैरंकिता लोकेषु
सुभगा भवेम तद्विष्णोः परमं पदं येन गच्छंति लांछिताः। देवासो यत्र विततेन बाहुना सुदर्शनेन बाहुना प्रयताः मु
स्वर्गमायन्। येनांकिता मनवो लोकसृष्टिं वितन्विरे ब्राह्मणास्तद्वहंति। श्रीरामचरिते श्रवणो पितुर्वाक्यम्।
शिलाबुद्धिः कृता किं वा प्रतिमायां हरेर्मया। किं मया पथि दृष्टस्य विष्णुभक्तस्य कस्यचित्। तन्मुद्रांकितदेह मुद्रा ५८
स्य चेतसा नादरः कृतः। येन कर्मविपाकेन पुत्रशोको ममेदृशः। काशीखंडे। अंत्यजा अपि तद्राष्ट्रे शंखचक्रां
कधारिणः। संप्राप्य वैष्णवीं दीक्षां दीक्षिता इव संबभुः। तथा। सदोपवीतवद्धार्याः शंखचक्रगदादयः। ब्राह्म
णस्य विशेषेण वैष्णवस्य विशेषतः। अत्र सर्वत्र साधारणात् तथा सर्वेषां प्राप्तमपि शंखचक्रगदादिधारणं वै
ष्णवेषु निरंकुशं वर्द्धते तच्चिह्नधारणं तद्भक्तानां युज्यते भक्त्यतिशयव्यंजकत्वात्। तथा। शिवभक्ताः सदा
विप्रा जटारुद्राक्षादिधारिणः। अथ मालाधारणम्। तत्र स्कंदपुराणे भगवद्वाक्यं। तुलसीसंभवां मा
लां कंठे वहते तु यः। अप्यशौचोप्यनाचारो मामेवैति न संशयः। तथा तत्रैव। धात्रीफलकृता माला
तुलसीकाष्ठसंभवा। दृश्यते यस्य देहे तु स प्रह्लादसमो नरः। तुलसीदलजा माला धात्रीफलकृतापि वा।

९८ ददातिपापिनांमुक्तिंकिंपुनर्विष्णुसेविनां।तुलसीकाष्ठमालाभिर्भूषितःपुण्यमाचरेत्।पितॄणांदेवतानांचकृ
तंकोटिगुणंभवेत्।तथैवद्वारिकामाहात्म्येविशेधाये।निवेद्यकेशवेमालांतुलसीकाष्ठसंभवां।वहतेयोनरो
98 भक्त्यातस्यवैनास्तिपातकं।सदाप्रीतिमनास्तस्यकृष्णोदेवकिनंदनः।भवेदितिशेषः।नजह्यात्तुलसीमा
लांधात्रीमालांविशेषतः।महापातकसंहंत्रीधर्मकामार्थदायिनी।विष्णुधर्मोत्तरे।स्पृशेच्चयानिलोमा
निधात्रीमालाकलेवराणां।तावद्वर्षसहस्राणिवैकुंठेवसतिर्भवेत्।मालायुग्मंचयोनित्यंधात्रीतुलसि
संभवं।वहतेकंठदेशेतुकल्पकोटिदिवंवसेत्।तद्धारणप्रकारस्तत्रैव।तुलसीकाष्ठसंभूतेमालेकृष्णजन
प्रिये।बिभर्मित्वामहंकंठेकुरुमांकृष्णवल्लभं।दानेलाधातुरुद्दिष्टोलासिमांहरिवल्लभं।भक्तेभ्यश्चसमस्तेभ्य
स्तेनमालानिगद्यसे।एवंसंप्रार्थ्यविधिवन्मालांकृष्णगलेर्पितां।धारयेद्वैष्णवोयोवैसगच्छेद्वैष्णवंपदं।त
तःकृष्णार्पितांमालांधारयेत्तुलसीदलैः।पद्माक्षैस्तुलसीकाष्ठैःफलैर्धात्र्याश्चनिर्मितां।धारयेत्तुलसीकाष्ठ
भूषणानिचवैष्णवः।मस्तकेकर्णयोर्बाह्वोःकरयोश्चयथारुचि।स्कंदपुराणे।धात्रीफलकृतांमालांस्व
कंठेयोवहेन्नहि।वैष्णवोनसविज्ञेयोविष्णुपूजारतोपिहीति।इतिनिंदाश्रवणाद्वैष्णवानांनैयत्येनधा
रणम्।एतत्फलापेक्षया इतरेषामपीतिसमुदायार्थः॥ ॥इतिमालाधारणविधिः॥ ॥

नाम। उपासनंसेवनमनुष्ठानमितियावत् २५

अथसंध्योपासनं। तत्रयाज्ञवल्क्यः। अतःपरंप्रवक्ष्यामिसंध्योपासननिर्णयं। अहोरात्रकृतैःपापैर्या
मुपास्यप्रमुच्यते। संध्येतिप्राणायामादिकर्म। तत्रदक्षः। संध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मसु। य
दन्यत्कुरुतेकर्मनतस्यफलभाग्भवेत्। शातातपः। संध्यामुपासतेयेतुसततंशंसितव्रताः। विधूतपापास्ते
यांतिब्रह्मलोकंसनातनं। तथा। यदह्नाकुरुतेपापंकर्मणामनसागिरा। आसीनःपश्चिमांसंध्यांप्राणायामैस्तुहं
तितत्। यद्रात्र्याकुरुतेपापंकर्मणामनसागिरा। पूर्वांसंध्यांसमासीनःप्राणायामैर्व्यपोहति। विष्णुपुराणे। तस्मा
न्नलंघयेत्संध्यांसायंप्रातर्द्विजःसदा। उल्लंघयतियोमोहात्सयातिनरकंध्रुवं। याज्ञवल्क्यः। दिवावायदिवारात्रौय
दज्ञानकृतंभवेत्। त्रिकालसंध्याकरणात्तत्सर्वंचप्रणश्यति। पापमितिशेषः। तथा। यावंतोऽस्यांपृथिव्यांहि
विकर्मस्थास्तुवैद्विजाः। तेषांवैपावनार्थायसंध्यासृष्टास्वयंभुवा। मनुः। पूर्वांसंध्यांजपंस्तिष्ठेत्सावित्रीमार्कदर्श
नात्। पश्चिमांतुसमासीनःसम्यगृक्षविभावनात्। एतच्चनिरग्निपरं। साग्नेस्तुहोमकालातिपातदोषप्रसक्तेः।
स्मार्तश्रौतयोर्विप्रतिषेधेश्रौतस्यैवबलीयस्त्वोक्तेः। केवलावसथ्याग्निमतोपि अस्तमितानुदितयोर्दश्रातंतु
ल्लेरदत्तेर्वेतिसत्त्वात्। तस्यचप्राबल्यात्। तथा। त्रयाणांचैववेदानांब्रह्मादीनांचसंगमः। संधिःसर्वसुरा
णांचतेनसंध्याप्रकीर्तिता। तथा। अत्रसोपासितासंध्याविघ्ननाशंकरेणच। कर्तानोपास्यदेवीसिद्धि

५५ कामोद्विजोत्तमः।देवीत्वेनकीर्त्तनात्॥ संध्यातूपास्यादेवतायाश्चस्मारणप्राणायामादिना।उपासनमारा
११ धनंसंध्योपासनं।संध्यात्रयंतुकर्त्तव्यंद्विजेनात्मविदासता।दिवसस्यचरात्रेश्चसंधिःसंध्येतिकीर्त्तिता।
सोपास्यायैर्द्विजैर्यत्नात्स्नातैर्विश्वानुपासितं।ब्रह्मेशार्कहरीणांतुसंगमस्तूभयोर्भवेत्।मध्याह्निकायां
संध्यायांसर्वदेवसमागमः।छंदोगपरिशिष्टे।एतत्संध्यात्रयंप्रोक्तंब्राह्मण्यंयदधिष्ठितं।यस्यनास्त्यादर
स्तस्मिन्नसब्राह्मणउच्यते।स्मृत्यंतरे।संध्यातूपासितायेनतेनविष्णुरुपासितः।दीर्घमायुःसविंदेतस
र्वपापैःप्रमुच्यते।संध्यायेननविज्ञातासंध्यायेनानुपासिता।सशूद्रवद्बहिष्कार्यःसर्वस्माद्द्विजकर्मणः।
प्रजापतिः।अनागतांतुयेपूर्वामतिक्रांतांचपश्चिमां।संध्यांनोपासतेविप्राःकथंतेब्राह्मणाःस्मृ
ताः।योगी।संध्यायेननविज्ञातासंध्यायेनानुपासिता।सजीवन्नेवशूद्रःस्यान्मृतःश्वाचाभिजायते।संध्या
हीनेव्रतभ्रष्टेविप्रेवेदविवर्जिते।दीयमानंरुदत्यन्नंकिंमयादुष्कृतंकृतं।गोविंदार्णवे।देवाग्निद्विजवर्याणां
कार्यमहतिसंस्थिते।संध्याहानेननदोषोस्तियतस्तत्पुण्यसाधनं।कूर्मपुराणे।सायंप्रातर्द्विजःसंध्यामुपा
सीतसमाहितः।कामाल्लोभाद्भयान्मोहात्त्यक्त्वापिपतितोभवेत्।इत्यत्रद्विजशब्दोपादानाच्छूद्रस्याधिकारः।
पश्चात्मदीक्षाविधियुक्तस्यपुंसःश्रुतिस्मृत्यविरुद्धआगमोक्तसंध्योपासनविधिःशूद्रस्यतोस्तु।ननु

श्रौतः स्मार्त्तो वा तस्येत्यर्थः ॥ । याज्ञवल्क्यः । अनार्त्तश्चोत्सृजेद्यस्तु स विप्रः शूद्रसन्निभः । प्रायश्चित्ती भवे
च्चैव लोके भवति निंदितः । विष्णुपुराणे । हस्ताभ्यां तोयमादाय गायत्र्या चाभिमंत्रितं । आदित्याभिमुख
स्तिष्ठेत्त्रिरूर्द्ध्वं संध्ययोः क्षिपेत् । सकृदेव तु मध्याह्ने देयमर्घ्यं द्विजातिभिः । सर्वकालमुपस्थानं संध्ययोः पा
र्थिवेष्यते । अन्यत्र सूतकाशौचविभ्रमातुरभीतितः । हारीतः । आपद्यपि च न त्याज्यं शक्तो चेत्संध्यां कुर्वीत मान
सीं । यमोपि । सूतके मृतके चैव संध्याकर्म न संत्यजेत् । मनसोच्चारयेन्मंत्रान्प्राणायाममृते द्विजः । योगी ।
संध्यास्नानं त्यजन्विप्रः सप्ताहाच्छूद्रतां व्रजेत् । तस्मात्संध्यां च स्नानं च सूतकेपि न संत्यजेत् । तथा । राष्ट्रक्षो
भे नृपक्षोभे रोगार्त्ते त्वथ सूतके । संध्यावंदनविच्छित्तिर्न दोषाय कदाचन । मिताक्षरायां । सूतके कर्मणां
त्यागः संध्यादीनां विधीयत इति । यद्यपि सूतकादौ संध्यानिवृत्तिः श्रूयते । तथाप्यंजलिसावित्र्याप्रक्षेपव्यो ।
सूतकेपि तु सावित्र्यांजलिं प्रक्षिप्य प्रदक्षिणं कृत्वा सूर्यं ध्यायेन्नमस्कुर्यादिति । पैठीनसिस्मरणात् । अत्रा
पि सावित्रीपाठो मानस एव । सर्वत्र सूतकादौ मानसमंत्रपाठविधानात् । एकपाठकल्पनालाघवाच्च । योगी ।
ह्रासवृद्धी तु सततं दिवसानां यथाक्रमं । संध्यामुहूर्त्तमात्रा तु ह्रासे वृद्धौ समा स्मृता । तथा । संधौ संध्यामुपासीत ना
स्तगे नोदिते रवौ । उदिते केचिदयासंध्या तथावै दंतधावनं । न सा संध्या फलदा न तच्छुद्धिकरं परं । व्यासः । प्रातः

त्वा क्रम तोजिनां तु गार्ग्याह प्रयोगपारिजाते २ रा... त्वः पिबेद्यो गायत्र्यात्माद्र
मुख द्विजः ॥ ततः संध्यामुपासीत ... तदनन्तर... ७

१०० संध्यासनलक्षत्रां मध्यमां स्नानकर्मणि। स्नानकर्मणि मध्यमामिति समाख्यातादेवात्कालातिक्रमेति स्नात्वा म
100 ध्यमां विधाय सायंतनीं विदध्यात्। स्नातो वा यदि वास्नातः संध्याकर्म समाचरेदिति सायं [illegible] प्रातः
संध्यापरमेव नित्यं चैतत्संध्यात्रयं। उक्तक्रममाह शातातपः। प्रातः संध्यां सनक्षत्रामुपासीत यथावि
धि। सादित्यां पश्चिमां संध्यामर्द्धास्तमितभास्करात्। इत्यत्रोपक्रम्य कालांतरे पि समापयेदित्यर्थः। काले ख
लु समारब्धमकाले पि समापयेदित्यभ्युदयाधिकरणन्यायात्। गौणकालमाह स्कंदपुराणे। उदयात्प्राक्त
नी संध्या घटिकात्रयमिष्यते। सायं संध्या त्रिघटिका अस्तादुपरि मानतः। शातातपः। निशार्धयामे वाती
ते अर्धयामे पि वासरे। अतिकालमतिक्रांते संध्यालोपं न कारयेत्। मुख्यकालातिक्रमे का
त्यायनः। संध्याकाले व्यतिक्रांते जपं हुत्वा पुनर्मनः। अरुणं वा चमस्तं जप्त्वा पुनः संध्यामुपा
सयेत्। गौणकालातिक्रमे स्मृत्यंतरं। उदयास्तमितादूर्ध्वं यावत्स्याद्घटिकात्रयं। तावत्सं
ध्यामुपासीत प्रायश्चित्तमतः परमिति। प्रायश्चित्तमाह संवर्त्तः। संध्यालोपे शतं जपं देश
ते चाहनि द्वये। बहुभिर्दिवसैस्तत्र सोपवासपरो भवेत्। धत्रायमाशयः। संध्या नाम दिनरात्रोः
संधिः खंडमात्रोपलक्षितसमयः तस्याल्पत्वात्क्रियायाश्च विस्तृतत्वेन तावत्काले कर्तुमश

कत्वात्। मुख्यार्थबाधे सति संधिशब्देन गौण्या वृत्त्या संधिसंबंधिसर्वकालो लक्ष्यते। अतस्तत्रारभ्य प्रातः सूर्योद
यपर्यंतम् सायं सम्पमनक्षत्रदर्शनपर्यंतात्तत्र कारणासंभवे कात्यायनोक्तमंत्रान्पठित्वा सूर्योदयानंतरं द्वित्रिघटि
कात्मके काले पि संध्या कार्या। तत्रापि करणासंभवे तीक्ष्णप्रायश्चित्तमेव कुर्यात्। मंत्रास्तु। पुनर्मनः पुनरायुर्म
आगन् पुनः प्राणः पुनरात्मा म आगन् पुनश्चक्षुः पुनः श्रोत्रमागन् वैश्वानरो दब्धस्तनूपा अग्निर्नः पा
तु दुरितादवद्यात्। ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये वागोजः सहो
जो मयि प्राणापानौ यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वाति तृण्णं बृहस्पतिर्मे तद्दधातु शन्नो भवतु भुवनस्य यस्पतिः।
ॐ भूर्भुवः स्वः गायत्री च। अथ प्रसंगान्नित्यनैमित्तिककाम्यकर्मणां मुख्यकालातिक्रमे गौणकाले करणाकरणं
च निरूप्यते। ननु को मुख्यः को वा गौण उच्यते। यो विहितः स मुख्यस्तत्समीपवर्ती गौणः। एवं स्थिते विचार्यते।
किमयं सर्वकर्मणामंगामुतनेति। तत्र ब्रूमः। सर्वाण्यपि काम्यवर्ज्यं नित्यनैमित्तिकानि मुख्यकालातिक्रमेपि गौ
णकाले कर्तव्यानीति राद्धांतः। विहितांगाभावे तत्सदृशप्रतिनिधिग्रहणस्य न्याय्यत्वात्। तथा मदनमिश्राः।
मुख्यकाले यदावश्यं कर्म कर्तुं न शक्यते। गौणकालेपि कर्तव्यं गौणोप्यत्र ईदृशो भवेत्। ईदृशो मुख्यकालतुल्यः।
तथा च स्मृतिः। यथाकथंचित्कर्तव्यं नित्यकर्म विजानता। न प्राप्तस्य हि लोपोस्ति यत्रैकस्य विशेषतः। अत्रापि

विशेषो मंडनेनोक्तः। गौणेष्वेतेषु कालेषु कर्म चोदितमाचरेत्। मुख्यकालातिक्रमनिमित्तं कृत्वा प्रायश्चित्तं
१०१ 101 कुर्यादिति तात्पर्यं। तत्राप्यकरणे लोपः। विशेषस्तु श्राद्धे। संध्याराज्योर्न कर्तव्यं श्राद्धं खलु विचक्षणैरिति।
काम्ये तु गौणकालस्वीकारः। यदुक्तमपरार्के। तत्र काम्यं तु कर्तव्यं यथावद्विधिचोदितं। नित्यं नैमित्तिकम
पि यथासंभवमाचरेदिति। तथा च पैठीनसिः। प्रधानसन्निधावंगानि भवंति चेति। काम्ये प्रधाने सन्नि
वत्वमितरत्रासन्निवृत्वं सदृशत्वं। प्रधानमिवांगान्यपि तु मुख्यान्येव गौणानीत्यर्थः। यद्येवं तर्हि दर्शैकोद्दि
ष्टादिश्राद्धादीनाममावास्यादिविहितकालातिक्रमे तदनंतरं गौणकालकर्तव्यता प्रसज्येत। अस्तु नाम। कानो हानि
र्गौणकालस्वीकारवादिनां। एवं श्राद्धस्य दृष्टांतेनाभिधीयते। काले कर्म विधीयते। न कर्मणि कालः। यत्स्वेच्छया वि
नियोगार्हं तदुपादेयं यदुपादेयं तद्विधेयं। कालस्तु स्वेच्छया कर्तुं न शक्यः। अत एवानुपादेयपंचकामध्ये मीमां
सकैः परिगणितः। उक्तं हि। अंगत्वेपि च कामस्य न त्यागोऽन्यांगवस्तुनः। अनुपादेयरूपत्वात्तस्मिन्नक विधियतः।
अतः कालोद्देशेन कर्म विधातव्यम्। तथा। कालो निमित्तं निमित्ताभावे नैमित्तिकस्याप्यभावात्। कालांतरे कृतम
कृतमेवेति। गौणकालग्रहणं नोचितं। लौगाक्षिरपि। गणितो जायते कालः काले तिष्ठंति देवताः। वरं त्वेकाहु
तिः काले नाकाले लक्षकोटयः। विधिनापि कृता संध्या कालातीता फला भवेत्। अयमेव हि दृष्टांतो वंध्यास्त्रीमे

ष्ठुनं यथा। यत्तु मंडनेर्गौणकालेपि कर्त्तव्यमित्युक्तं। तत्तद्विधोदितानि कर्माणीत्यादिना यत्र गौणकालाभ्यनुज्ञा
नं वाचनिकं तद्विषयं। अत एव मंडनाः। मुख्यकालेपि मुख्यं चेत्साधनं नैव लभ्यते। तत्कालद्रव्ययोः कस्य मुख्यत्वं
गौणतापि वा। गौणकालमुपाश्रित्य गौणं मुख्यं तु साधनं। न मुख्यद्रव्यलाभेन गौणकालप्रतीक्षणं। द्रव्यमितीत
रांगस्याप्युपलक्षणं। तेनापरिमुख्यकाले प्रधानमात्रेणापि निर्वाहः कार्यः। अतो वचनमंतरेण संवत्सरर्तुमास
तिथ्यादिकालविशेषविहितानि कर्माणि स्वकालातिक्रमे कलांतरे कर्त्तुं न युज्यंते। अपि तु तदतिक्रमप्रायश्चि
त्तमेव कुर्यादिति सर्वमनवद्यम्। इति प्रासंगिकमुक्त्वा प्रकृतिमनुसंधीयते। स्थानगुणमाह शातातपः। गृहेषु
प्राकृती संध्या गोष्ठे दशगुणा भवेत्। नदीषु शतसाहस्री अनंता विष्णुसन्निधौ। प्राकृती एकगुणा। व्यासः।
वहिः संध्या दशगुणा गोष्ठप्रस्रवणादिषु। खाततीर्थे शतगुणा साहस्री जाह्नवीजले। तत्फलमाह शाता
तपः। अनृतं मद्यगंधं च दिवा स्वापं च मैथुनं। पुनाति वृषलस्यान्नं वहिः संध्या ह्युपासिता। अंगिराः। उभे
संध्ये च यो नित्यं मौनमास्ते समाहितः। दिव्यं वर्षसहस्रं तु ब्रह्मलोके महीयते। उभे वहिरेव प्रातः सायंतनी। छंदो
गपरिशिष्टे शंखलिखितौ। सव्रती वहिः संध्यामुपासीत। सव्रती ब्रह्मचारी। नैनं ग्रामे निम्लोचेत् सूर्यो नाभ्यु
दियात् कचितशतिमनुदर्शनात्। एवं ब्रह्मचारिणं ग्रामे संतं सूर्यो नास्तंगच्छेन्नोदितो भवेत्। लघुहारीतः।

१०२ दर्भहीना च या संध्या यच्च दानं विनोदकं । असंख्यातं तु यज्जप्तं तत्सर्वं निःफलं भवेत् । संध्यावंदनोपक्रमे । वामेव
102 हू कुशान्कृत्वा दक्षिणे तु पवित्रकं । निधायाचमनं कुर्यादित्येषा मानवी स्मृतिः । तदुक्तं छंदोगपरिशिष्टे ।
रक्षित्वा वारिणात्मानं परिक्षिप्य समंततः । सव्ये पाणौ कुशान्कृत्वा कुर्यादाचमनक्रियां । सव्यस्त्रोपग्रहः का
र्यो दक्षिणः सपवित्रकः । उपसमीपे गस्यते इति श्रुत्या स्यानकल्पायां पूर्वं धृतकुशत्रयसमीपे ग्रिमकर्म
कोपयुक्तकुशाधत्रैय्यः । जपहोमदानस्वाध्यायसमीपे पितृतर्पणे दक्षिणे करे कुशत्रयधारणमपि इति
लघुहारीतः । अन्यत्र पवित्रमात्रं । आह्निके स्मृतिसारे । द्व्यंगुल्योः कुशमादाय द्वे न्येत्स्पर्शस्तु जायते । पवि
त्रं सर्वगात्रं स्यात्करशुद्धिर्विधीयते । द्व्यंगुल्योः अनामिकामध्यमयोः । द्वे अन्ये तर्जनीकनिष्ठिके । पवित्रल
क्षणं छंदोगपरिशिष्टे । अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव च । प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् । द्विदलं ।
द्विपत्रं । अंतर्गर्भमतिरिक्तं । गर्भो स्यास्तीति गर्भि अंतर्मध्ये गर्भि यस्य तदंतर्गर्भि न अंतर्गर्भि अनंतर्गर्भिणं ।
गर्भं गर्भि अंतर्गर्भि च त्यक्त्वा चतुर्थं ग्राह्यं । छंदत्वात्पुंलिंगनिर्देशः । यत्र कुत्रचित्संध्यावंदनातिरिक्तस्थले
पि पवित्रं कल्पयित्वा पुनः छंदोगपरिशिष्टे । सव्यापसव्यवलितं त्रस्वग्रंथिसमन्वितं । लंघयेदेकपर्वं तु द्विती
यं नैव लंघयेत् । इति हारीतः । स्नाने दाने जपे होमे स्वाध्याये पितृतर्पणे । पवित्रं तु करे कुर्यात्सुवर्णं रजतं तु वा ।

समूलाग्रौ विगर्भौ तु कुशौ द्वौ दक्षिणे करे । सव्ये चैव तथा त्रीणि बिभृयात्सर्वकर्मसु । सर्वत्र दर्भपाणिः स्याद्दैवे
पित्र्ये च कर्मणि । तिलकं पादशौचं च न कुर्याद्दर्भपाणिना । मदनपारिजाते । ब्रह्मयज्ञे जपे चैव ब्रह्मग्रन्थिर्वि
धीयते । भोजने वर्तुलः प्रोक्त एवं धर्मो न हीयते इति । यदि पवित्रं छिद्रं तं धारयेत्तदभावे द्विदर्भसमूलाग्रकुशद्व
यधारणमित्याशयः । यत्तु । चतुर्भिर्दर्भपत्रैस्तु ब्राह्मणस्य पवित्रकं । एकैकन्यूनं विज्ञेयं वर्णे वर्णे क्रमेण तु ।
तथा । चतुष्पत्रसमायुक्तं ब्रह्मग्रन्थिसमन्वितं । लंघयेत्पर्वमात्रं तु द्वितीयं नैव लंघयेदिति । तच्चारवं वालस्य विषयं ।
कर्मविशेषविषयं वा । यथा देवदासे । त्रिभिर्दर्भैः शांतिकर्म पंचभिः पौष्टिकं तथा । चतुर्भिश्चाभिचाराख्यं कुशैः
कुर्यात्पवित्रकं । इति लघुहारीतः । जपे होमे तथा दाने स्वाध्याये पितृतर्पणे । अशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैः ।
अत्र सुवर्णरजतैरिति बहुवचनमेकस्य सुवर्णस्यैकस्य रजतस्य धारणेऽनुपपद्यते । सुवर्णरजतत्वजात्योरवयवा
वयविवृत्तित्वात् । कुशैरितिपदं । कपिंजलाधिकरणन्यायेन त्रित्वपर्यवसितं । अत्र सुवर्णधारणे प्रस्तुते स्थान
विशेषाकांक्षायां । व्यासः । अनामिकाधृतं हेम तर्जन्यां रूप्यमेव च । कनिष्ठिकाधृतं खड्गं तेन पूतो भवेन्नरः ।
देवीपुराणे । हेमधारणप्रस्तावे । धार्यं हेमानामिकायां दक्षिणस्य करस्य च । तर्जन्यां रजतं धार्यं दक्षिणस्य कर
स्य च । इति । श्रीधरस्वामिमदनाद्योप्येवमेव । केचित्सामर्थ्यात् तत्त्वे रजतधारणमपि अनामिकायामिच्छंति ।

१०२ 103 तच्चिंत्यं । बहुवाक्यविरोधात् । पितृतीर्थसन्निहितत्वेन तर्जन्यां रजतधारणोपपत्तेः । तथा । दर्भं पवित्रं हैमं
वा राजतं ताम्रमेव वा । बिभृयाद्दक्षिणे पाणौ पवित्रं चोत्तरोत्तरं । अत्र दार्भं दर्भनिर्मितं पवित्रमेवमुत्तरत्रापि ।
याज्ञवल्क्यः । ब्रह्मग्रंथिपवित्रेण संध्योपासनं करोति यः । स वै द्वादशवर्षाणि कृतसंध्यो भवेन्नरः । ब्रह्मग्रंथि
युतेनाथ बह्वृपासनं करोति यः । पंचाग्नयो हुतास्तेन यावज्जीवन्न संशयः । आह्निकेऽस्मृतिसारे । दर्भैः पवित्रं
विज्ञेयं ब्राह्मणस्य विशेषतः । हेमराजतताम्राणि क्षत्रविट्शूद्रजातिषु । तथा । जपहोमहरा ह्येते असुराय
तुराक्षसाः । पवित्रकृतहस्तस्य विद्रवंति दिशो दश । यथाऽस्त्रं शूलायुधं शंभोर्यथा चक्रं हरेरपि । यथा वज्रं महेंद्र
स्य तथा विप्रपवित्रकं । तथा । तारताम्रसुवर्णानामर्कषोडशखेंदुभिः । त्रिंशत्कौ द्विगुणीकृत्य सर्वकर्मसु
धारयेत् । तारं रजतं । द्वादशषोडशदशभागैर्यथासंख्यं । तथा । कौशेयं बिभृयान्नित्यं पवित्रं दक्षिणे करे ।
भुंजानस्तु विशेषेण गर्हितान्नविशोधनं । तत्स्य पितृवर्णादौ कुशा अपि धार्याः । कुशपाणिः सदा तिष्ठेद्ब्रा
ह्मणो दंभवर्जितः । स नित्यं हंति पापानि तूलराशिमिवानलः । इति मार्कंडेयोक्तेः । तेन कुशधारणस्य सर्वा
धिकत्वात्सुवर्णादिना विकल्प्यतेऽनुकल्प्यते वा । हारीतः । सपवित्रेण हस्तेन कुर्यादाचमनक्रियां । नोच्छि
ष्टं तु भवेत्तत्तु भुक्तोच्छिष्टं तु वर्जयेत् । तथा । विकिरे पिंडदाने च भोजने तर्पणे तथा । चालने पादशौचे च प

विंत्रं बहून्संत्यजेत्। पवित्रपरं हस्तं संबद्धं कुशोपलक्षकं। चालनेऽर्घ्यपात्रोत्तानीकरणे। श्राद्धे द्विजोच्छिष्टचालने च।
हारीतः। वामहस्ते कुशान्कृत्वा समाचमति यो द्विजः। उपस्पृष्टं भवेत्तेन रुधिरेण मलेन चेति। केवलवामहस्ते कुशा
न्कृत्वेत्यर्थः। उभयत्र स्थितैर्दर्भैः समाचमति यो द्विजः। सोमपानफलं तस्य भुक्त्वा यज्ञफलं लभेदिति। मदने तु
भयत्रधारणप्रशंसनात्। वामहस्ते स्थिते दर्भे न पिबेद्दक्षिणेन तु। वस्त्रादिनोपग्रहणेन दोषः पिबतो भवेत्। कुशा
भावे तु काशाः स्युस्तत्काशाभावे तु शाद्वलाः। तथा च मनुः। काशहस्तस्तु नाचामेत्कदाचिद्विधिसंश्रयात्। प्रायश्चि
त्तेन युज्येत दूर्वाहस्तस्तथैव चेति निषेधात्। कुशाभावे तु काशदूर्वामयपवित्रं धारयित्वा नाचमेत्। इति शंखनिषेधात्।
संध्याकृत्ये पराशरः। ईशानाभिमुखो भूत्वा द्विजः पूर्वमुखोऽपि वा। संध्यामुपासयेन्नित्यमुपात्ताघप्रशांतये। संध्या
वंदनं वाजसनेयिनां स्थले उत्तीर्य धौते वाससी परिधाय मृदो हस्तौ प्रक्षाल्य त्रिराचम्यास्तनित्यादि कात्यायनेन स्म
रणात्। श्रीविष्णुः। जानुभ्यामुपविष्टस्तु शुक्लवासाः स्थितो जले। संध्यामाचमनं कुर्याच्छुचिः स्यादशुचिः स्थले।
अशुचिः स्थले जले कुर्वीत। तथा नागदेवाचार्यप्रदीपे सत्यव्रतः। आचम्य च कुशैर्युक्त आसने सपवित्रके। करसं
पुटकं कृत्वा संध्यां नित्यं समाचरेत्। नत्वा च पुंडरीकाक्षमुपात्ताघप्रशांतये। ब्रह्मा वाशिष्ठ स्वयं प्रातःसंध्यावंध्यामुपा
स्महे। इत्थं कृत्वा च संकल्पं कुशानादाय पाणिना। नद्यां नदीस्थतोयेस्यु गृहे चामीकरस्थिते। त्रिभिर्व्याहृति

१०४ भिर्मंत्रैः प्रत्येकंमिलितैस्तुतैः। गायत्र्याचततःकुर्यादभिषेकंचतज्जलैः। ॐभूर्भुवःस्वरितिचगायत्र्याचशि
104 खांसंस्पृशेत्। दर्भैराम्रोदकैर्नैवदद्यादासनमात्मनः। पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता।
त्वंचधारयमांदेविपवित्रंकुरुचासनं। इतिब्रह्ममुखैर्मंत्रैरभिषिंचंतियेद्विजाः। तेब्रह्मसदनंयांतितस्मा
त्तैःपरिमार्जयेत्। अथन्यासः। ॐभूःविन्यसेद्धृदयेभुवःशिरसिविन्यसेत्। स्वरितीदंशिखायांतुगाय
त्र्याप्रथमंपदं। विन्यसेत्कवचेविद्वान्द्वितीयंनेत्रयोर्न्यसेत्। तृतीयेनास्त्रविन्यासः एतन्न्यासोघनाशनः।
अकारंनाभिदेशेतुउकारंहृदयेन्यसेत्। मकारंमूर्ध्निविन्यस्य एषन्यासोविमुक्तिदः। भूर्लोकंपादयोर्न्यस्य
भुवोलोकंतुजानुनोः। स्वर्लोकमूरुदेशेतुजठरेतुमहस्तथा। जनोलोकंकंठदेशेमुखदेशेतपस्तथा। स
त्यंशिरसिविन्यस्यएषन्यासोमहाफलः। गासडे। गायत्र्याकलदावर्णान्यस्याःस्युःसर्वकर्मसु। तकारंवि
न्यसेत्तस्मात्पादांगुष्ठद्वयोर्द्विजः। सकारंगुल्फदेशेतुविकारंजंघयोर्न्यसेत्। तुकारंजानुदेशेतुवकारं
मूरुदेशके। रेकारंगुह्यदेशेतुणिकारंलिंगकेन्यसेत्। यंकारंकटिदेशेतुभकारंनाभिमंडले। र्गोकारंजठ
रेयोगीदेकारंस्तनयोर्द्वयोः। वकारंहृदयेप्राज्ञःस्यकारंकंठएवहि। धीकारंवदनेविप्रोमकारंतालुदेशके।
हिकारंनासिकाग्रेतुधिकारंनयनद्वयोः। योकारंतुभ्रुवोर्मध्येद्वितीयंतुललाटके। नकारंपूर्ववक्त्रेतुप्रकारंद

क्षिणानने। चोकारं पश्चिमे वक्त्रे दकारं चोत्तरे मुखे। विन्यसेन्मूर्ध्नि याकारं व्यंजनं सर्वतो न्यसेत्। आपोगुह्ये
न्यसेज्ज्योतिश्चक्षुष्यपि रसो मुखे। अमृतं जानुनि ब्रह्म हृदये भूः पदद्वये। भुवो नाभौ ललाटे स्व ॐकारं मूर्ध्नि विन्य
सेत्। एवं कृत्वा शिरोन्यासं सर्वपापैः प्रमुच्यते। इति न्यासविधयः काम्याः सर्वत्र तत्तत्फलकथनात्। पुनश्चरणादि
गायत्रीजपादौ नैयत्येन कर्त्तव्याः। करशोधनेऽत्रिः। अंगुष्ठाभ्यां तु गोविंदं तर्जन्यां तु महीधरं। मध्यमायां हृ
षीकेशमनामायां त्रिविक्रमं। कनिष्ठायां न्यसेद्विष्णुं करमध्ये तु माधवं। जनार्दनं हस्तपृष्ठे करशोधनमीरितं।
पूर्वा संध्या च गायत्री सावित्री मध्यमा स्मृता। या भवेत्पश्चिमा संध्या सा विज्ञेया सरस्वती। गायत्री त्वक्षरां बालां
साक्षसूत्रकमंडलुं। रक्तवस्त्रां चतुर्वक्त्रां हंसवाहनसंयुतां। ब्रह्माणीं ब्रह्मदेवत्यां ब्रह्मलोकनिवासिनीं।
आवाहयाम्यहं देवीमायांतीं सूर्यमंडलात्। बृहत्पराशरः। विश्वमातः सुरारभ्ये वेदप्रिये गायत्रि वेधसि। आ
वाहयामि सुप्राप्त्यर्थमेनसो हि पुनीहि मां। संध्या मध्याह्निका श्वेता सावित्री शंभुदेवता। वृषेंद्रवाहना देवी ज्वलत्त्रि
शिरधारिणी। श्वेतांबरधरा देवी नानाभरणभूषिता। तथा। मातर्भवानि विश्वेशे विश्वे विश्वजनार्चिते।
शुभ्रे वरे परे ह्येहि आहूते हृ पुनीहि मां। संध्या सायंतनी कृष्णा विष्णुदेवा सरस्वती। खगगा कृष्णवर्णा तु शंख
चक्रगदाधरा। कृष्णस्रग्भूषणोपेता सर्वज्ञानमया वरा। वीणाक्षमालिकाबाहुहस्ता स्मितवरानना। यथा।

१०५ मातर्वाग्देवते देवि वरे सर्वेश्वरप्रदे । सर्वामरगणास्तुते आहूते हपुनीहि मां । योगी । आद्येन ऋषिविज्ञानादृष्टुं सिद्धिः
105 प्राप्नोत्ययेनवै । मंत्रेण नस्यतु प्रोक्तं मत्येभ्यो वल्लदार्थकं । छंदनाच्छंद उद्दिष्टं वासतीव इवाकृते । आत्मानं छा
दितो देवैर्मृत्योर्भीतैस्तु वै पुरा । आदित्यैर्वसुभीरुद्रैस्तेन छंदांसितानि वै । यस्य यस्य तु मंत्रस्य उद्दिष्टा या तु देव
ता । तदाकारो भवेत्तस्य देवत्वं देवतोच्यते । पुराकल्पे समुत्पन्ना मंत्राः कर्मार्थमेव च । अनेनेदं तु कर्तव्यं विनि
योगः स उच्यते । तथा । आर्षं छंदश्च दैवत्यं विनियोगस्तथैव च । वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः । यो
गी । यस्तु जानाति तत्वेन आर्षं छंदश्च दैवतं । विनियोगं ब्राह्मणं तु मंत्रस्य ज्ञानमेव च । एकैकस्य तु मंत्रस्य
प्राप्यामुत्र सलोकतां । देवतानां च सायुज्यं गच्छत्येव न संशयः । अविदित्वा च यः कुर्याद्याजनाध्यापनं जपं ।
होमं मंत्रजपादीनि तस्य चाल्पं फलं भवेत् । इति मंत्रस्य ऋष्यादिसंबंधः मंत्रकरणक प्रधाने काम्यकर्मण्या
वश्यकः । नान्यत्राल्पं फलं भवेदित्युक्तेः । ब्राह्मणपदं तत्कर्तृमात्रोपलक्षकं । यत्तदोरुपसंहारात् । अस्य मं
त्रस्य कर्मेदमयं मंत्रोऽत्र वर्तते । तत्तस्य ब्राह्मणं ज्ञेयं मंत्रस्येति श्रुतिक्रमात् । गारुडपुराणे । ओंकारः परमं ब्रह्म सर्व
मंत्रेषु प्रोच्यते । आदौ सर्वत्र युंजीत विविधेष्वेव कर्मसु । विनियोगः समुद्दिष्टः श्वेतो वर्ण उदाहृतः । पराशरः ।
ध्यानं न जप्यं न च पूजनीयं यस्मान्न वेदाद्वरणीयमन्यत् । दुष्पारसंसारपयोधिमज्जतां तारायविष्णुः प्रणवस्वरू

पः। योगी। प्रणवाद्यास्त्रयोवेदाः प्रणवाद्यं च सस्वरं। वाङ्मयं प्रणवात्सर्वं तस्मात्प्रणवमभ्यसेत्। अकारः
प्रथमा मात्रा द्वितीयोकारसंज्ञिता। मकाराख्या तृतीया च नादेख्यात्मा व्यवस्थिता। प्रथमायां भवेन्मात्रा रक्ता
वै ब्रह्मदेवता। द्वितीयायां भवेन्मात्रा कृष्णा वै विष्णुदेवता। तृतीयायां भवेन्मात्रा शुक्ला वै रुद्रदेवता। त्रिमात्र
स्तु प्रयोक्तव्यः प्रारंभे सर्वकर्मणां। भारते। ॐमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्। यः प्रयाति त्यजन्देहं
स याति परमां गतिं। तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः। प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनां।
व्याहृतीनां च सर्वासामार्षं चैव प्रजापतिः। सप्त छंदांसि यान्यासां तानि सम्यक् प्रवर्त्तयेत्। गायत्र्युष्णिगनुष्टु
प् बृहती पंक्तिरेव च। त्रिष्टुप् च जगती चैव छंदांस्येतानि सप्त वै। अग्निर्वायुस्तथादित्यो बृहस्पत्यापएव च।
इंद्रश्च विश्वेदेवाश्च देवताः समुदाहृताः। अनादिष्टेषु सर्वेषु प्रायश्चित्तेषु सर्वशः। प्राणायामप्रयोगे च
विनियोग उदाहृतः। बृहत्पराशरः। अभ्याहृतमिदं त्वासीत्सदेवासुरमानुषं। संक्षेपेणस्तु जप्त्वास्मात्सप्तमा व्या
हृतीः पुराः। भूर्भुवः स्वर्महः जनस्तपः सत्यं तथैव च। आद्यास्तिस्रो महाप्रोक्ताः सर्वत्रैतत्प्रवर्त्तते। सविता देवता यस्या मु
खमग्निस्त्रिपदा च या। विश्वामित्र ऋषिश्छंदो गायत्री सा विशिष्यते। विनियोग उपनये प्राणायामे तथैव च। तथा।
ॐ आपो ज्योतिरित्येष मंत्रो यस्तु प्रकीर्त्यते। तस्य प्रजापतिस्त्वार्षं यजुश्छंदो विवर्जितं। ब्रह्माग्निवायुसूर्याश्च देवताः

१०६ समुदाहृताः। प्राणस्यायमने चैव विनियोग उदाहृतः। बृहत्पराशरः। आपोज्योतिरित्येतच्छिरः पश्चात्प्रयुज्यते।
प्रत्योंकारसमायुक्तो मंत्रो ध्येयं तैत्तिरीयके। बृहस्पतिः। बद्धासनं नियम्याहृत्य त्वाघ्र ब्यादिकं ततः। संनि
106 मीलितदृङ्मौनी प्राणायामान् समभ्यसेत्। पाद्म मर्द्दासनं वापि तथा स्वस्तिकमासनं। एवं तेवारिणात्मानं प
रिक्षिप्य समंततः। ॐ नमो भगवते वासुदेवाय। मंत्रः। अंते पूर्वोक्ताचमनांते। आत्मानं वारिणा रक्षा कार्या
इत्यर्थः। प्राणायामात्प्राक्। प्राणायामे संवर्त्तः। गायत्रीं शिरसा सार्द्धं मनसा त्रिः पठेद्द्विजः। निरुद्ध्य वा
त्मनः प्राणान् प्राणायामो विधीयते। तथा योगियाज्ञवल्क्यः। गायत्रीं शिरसा सार्द्धं पठेद्व्याहृतिपूर्विकां।
प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः। छंदोगपरिशिष्टे। भूराद्यास्तिस्र एवैता महाव्याहृतयोऽव्ययाः।
शति ५ महर्जनस्तपः सत्यं गायत्री च शिरस्तथा। प्रत्येकं प्रणवमुच्चारयेदंते च शिरसः। एता एतां सहानेन तथैभि
र्दशभिः सह। त्रिर्जपेदायतप्राणः प्राणायामः स उच्यते। प्रतिप्रत्येकं सप्तमहाव्याहृतिगायत्रीशिर
सानवानां आदौ नवोंकाराः। शिरसोंते चैक उच्चार्यः। एताः सप्तव्याहृतीः। एतां गायत्रीं अनेन शिर
सा सह एभिर्दशभिरोंकारैश्च सह आयतप्राणो नियतवायुः सन् त्रिर्मनसा जपेत्। सोयं प्राणायाम
संज्ञको जपः। मार्कंडेयपुराणे। लघुमध्योत्तरीयाख्याः प्राणायामास्त्रिधोदिताः। तेषां प्रमाणं व

द्यामितरत्सर्वकर्मस्थूणेषु वने। लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः। त्रिगुणाभिस्तु मात्राभिरुत्तमः स उदाहृ-
तः। कूर्मपुराणे ईश्वरगीतासु। प्राणस्तु देहजो वायुरायामस्तन्निरोधनं। मात्राद्वादशको ह्रस्वश्चतुर्विंशति-
मात्रिकः। मध्यमः प्राणसंयोगः षट्त्रिंशन्मात्रिकोत्तमः। शिरआपोज्योतिरसोमृतं ब्रह्म भूर्भुवः स्वरिति तत्रैवोक्तं। योमि २८
योगी। पूरकुंभकरेचकैः प्राणायामस्त्रिलक्षणः। नासिकाकृष्ट उच्छ्वासो ध्मातः पूरक उच्यते। कुंभको निश्चलश्वा-
सो रिच्यमानस्तु रेचकः। दक्षिणे रेचयेद्वायुं वामेनोदरपूरणं। कुंभेन धारयेन्नित्यं प्राणायामं विदुर्बुधाः। नीलोत्प-
लदलश्यामं नाभिदेशे प्रतिष्ठितं। चतुर्भुजं महात्मानं पूरके तो विचिंतयेत्। कुंभके च हृदिस्थाने ध्यायेच्च कमलासनं।
ब्रह्माणं गौर सर्वांगं चतुर्वक्त्रं पितामहं। रेचके चेश्वरं विद्याल्ललाटस्थं महेश्वरं। शुद्धस्फटिकसंकाशं निर्मलं पापनाशनं।
आदानं रोधमुत्सर्गं वायोस्त्रिस्त्रिः समभ्यसेत्। केशवं वेधसं शंभुं ध्यायेदस्मादनुक्रमात्। इति व्यासः। त्रिस्त्रिरिति नवधाभ्या-
सः। त्रिविधं केचिदिच्छंति तथैव नवधापरे। तथा। पूरके विष्णुसायुज्यं कुंभके ब्रह्मणो गतिकं। रेचकेन तृतीयेन ग-
मयेदीश्वरं पदमिति। प्राणायामो द्विविधः। सबीजोऽबीजश्च। सबीजो ध्यानजपसहितः। सगुणोपासनं। अ-
स्मृ॰ २ बीजो निर्गुणोपासनं। तच्च परमहंसानां सालंबं भागवैर्त्ति स्थूलं रूपं द्विजोत्तमाः। अनालंबमनंतस्य योगिनां भामिनि
स्मृतं। मदनपारिजाते। प्राणायामा ब्राह्मणेन त्रयोपि विधिवत्कृताः। व्याहृतिप्रणवैः सार्द्धं विज्ञेयं परमं तपः।

१०७ प्राणायामविधिमाह योगी । पीड्येद्दक्षिणां नाडीमङ्गुष्ठेन तथेतरां । कनिष्ठानामिकाभ्यां च मध्यमां तर्जनीं त्यजेत् ।
बृहस्पतिः । अनामिकाकनिष्ठा च अंगुष्ठश्चैव तु तीयकः । नासिकायां नियुंजीत तर्जनीमध्यमां विना । कनिष्ठानामि
107 कांगुष्ठैर्नासाग्रस्य च पीडनं । ओंकारमुद्रा सा प्रोक्ता वानप्रस्थयत्योरपि । पंचांगुलीभिर्नासायाः पीडनं प्रणवोच्चरन् ।
मुद्रेयं सर्वपापघ्नी ब्रह्मचारिगृहस्थयोः । तर्जन्यंगुष्ठयोगेन राक्षसी मुद्रिका भवेत् । राक्षसीमुद्रिकायां यत्तत्तोयं
म ५= रुधिरं पिबेत् । व्यासः । अंगुष्ठेन पुटं ग्राह्यं नासाया दक्षिणं पुनः । कनिष्ठानामिकाभ्यां तु वामं प्राणस्य निग्रहे इति य
जुर्वेदिपरम् । पुनः स एव । अंगुष्ठेन पुटं ग्राह्यं नासाया दक्षिणं पुनः । कनिष्ठानामिकाभ्यां तु ऋग्वेदी सामगायनः ।
अंगुष्ठानामिकाभ्यां तु ग्राह्यः सर्वैरथर्वभिः । पक्षान्तरमाह । महापरासां । प्राणस्य शोधयेन्मार्गं पूरकुंभकरेचकैः ।
विपर्ययेणापि शनैरभ्यसेन्नियतेन्द्रियः । विपर्ययेण रेचकपूरककुंभककमेणापि । यद्वा वामनाड्यापूरितं दक्षि
णया त्यजेत् । तथा वापूरितं वामयेत्येवं विपर्ययेण । इडया पूरयेद्वायुं त्यजेत्पिंगलया ततः । इति योगशास्त्रोक्तेः ।
कौर्मे । चांडालीपुष्कसीमित्रकलत्रं स्नुषां गत्वोपस्पृश्य त्रीन्प्राणायामान्कृत्वा पूतो भवति । अत्र त्रीनिति पूरककुं
भकरेचकेषु प्रत्येकं वारत्रयपाठेनैकः प्राणायामः । तत्फलमाह योगी । सव्याहृतीः सप्रणवाः प्राणायामास्तु
षोडश । अपि भ्रूणहनं मासात्पुनंत्यहरहः कृताः । यथा पर्वतधातूनां दोषान्हरति पावकः । एवमंतर्गतं चेतः

प्राणायामेन दह्यते। ब्रह्महा हेमहारी च सुरापो गुरुतल्पगः। शरणागतघाती च कूटसाक्षी ह्यकार्यकृत्। एवमा
दिषु चान्येषु पापेष्वभिरता नराः। प्राणायामशतं कृत्वा सूर्यस्योदयनं प्रति। निर्मलाः स्वर्गमायांति सन्तः सुकृति
नो यथा। एकां शाखामधीत्य श्रोत्रियो भवति। सांगामधीत्य भ्रूणहा मुच्यते इति बोधायनः। भ्रूणं हंतीति भ्रूण
त्रय: ४८ हा। द्वौ प्रातर्द्वौ च मध्याह्ने त्रिसंध्यासु त्रयस्तथा। वैश्वदेवे द्वयं कुर्यात्सकृच्चैव हुतार्चने। अत्रैवं गणना। द्वौ
प्रातःस्नाने। द्वौ मध्याह्नस्नाने। त्रिसंध्यासु त्रयस्त्रयः। वैश्वदेवे प्राणायामद्वयं। एको देवार्चने। एवं प्र
त्यहं षोडश। याज्ञवल्क्यः। प्राणायामं कृत्वा आचमित्वा प्रयतोपि सन्। अंतरा क्षिद्यते यस्मात्तस्मादाचमनं स्मृ
तं। अंतरमिति हेतुकथनात्। सर्वत्र प्राणायामोत्तरमाचमनमिति। मैत्रायणीयगृह्यपरिशिष्टे। प्रातः
सूर्यश्च मेत्युक्त्वा सायमग्निश्च मेति च। आपः पुनंतु मध्याह्ने कुर्यादाचमनं तथा। ऋषिः छंदो देवतानि तत्प्रयोगे प्र
सिद्धानि प्राणानायम्य संप्रोक्ष्य त्र्यृचेनाब्दैवतेन च। शिरसा मार्जनं कुर्यात्कुशैः सोदकबिंदुभिः। तत्प्रकारमाह व्यासः।
विप्रुषोष्टौ क्षिपेदूर्ध्वं भूमौ यस्य क्षयाय च। तथा। आपो हि ष्ठेत्यृचा कुर्यान्मार्जनं तु कुशोदकैः। प्रणवेन तु संयु
क्तं क्षिपेद्वारि पदे पदे। रजस्तमः स्वमोहोत्थान् जाग्रत्स्वप्नसुषुप्तिजान्। वाङ्मनःकर्मजान्दोषान्नवैतान्नवभिर्दहेत्।
एतत्प्रपंच ऋष्यादिकमाह याज्ञवल्क्यः। सिंधुद्वीपं भवेदार्षं गायत्रं छंद उच्यते। आपस्तु देवतं प्रोक्तं विनियोगस्तु

मार्जने। सर्वत्रपावनंकर्म अब्लिंगानामुदाहृतं। पावनंमार्जनं अब्लिंगानां ।। आपोहिष्ठेत्यादीनां। ब्रह्मांडे।
१०८ नद्यांतीर्थे ह्रदेवापि भाजनेमृन्मयेपिवा। उदुंबरेपिसौवर्णे राजतेदारुसंभवे। कृत्वापोवामहस्तेवासंध्योपास
नमाचरेत्। आपस्तंबः। गंगायांवापिकूप्यांवा तडागेचतथैवच। वामहस्तेजलंकृत्वा यःकुर्यान्मार्जनंबुधः।
108 गंगेतिपदंनदीमात्रोपलक्षकं। संवर्त्तः। उद्धृतोदकेनयासंध्या पदमध्येचमार्जनं। उपविश्यचयच्चार्घ्यं
तत्सर्वंनिष्फलंभवेत्। इतिशक्तपरम्। अशक्तस्ययथोक्तेः। मार्जनंतर्पणंश्राद्धं नकुर्याद्वारिधारया। कुर्याच्चे
द्वारिधाराभिस्तत्सर्वंनिष्फलंभवेत्। व्यासः। कोकिलोराजपुत्रस्तु द्रुपदाद्यार्षमुच्यते। आनुष्टुभंभवेच्छंदस्त्वा
पश्चैवतुदैवतं। सौत्रामण्यवभृथके स्नानेतद्विनियोजनं। आपःपाणौसमादाय त्रिःपठेद्द्रुपदामृचं। तत्तोयं
मूर्ध्निविन्यस्य सर्वपापैःप्रमुच्यते। करेणोद्धृत्यसलिलं घ्राणमासज्यतत्रतु। भवेदनायतासुर्वा त्रिःसकृद्वाघम
र्षणं। वापरस्वरमादायतामहरपि। मनुः। ऋतंचेतिजपन्नप्स्वात्पापमामरणांतिकं। मनोवाक्कायजं
सर्वमर्षयेदघमर्षणं। यथाश्वमेधःक्रतुराट् सर्वपापप्रणोदनः। तथाघमर्षणंसूक्तं सर्वपापप्रणोदनं।
ऋतंसत्यंपरंब्रह्म पुरुषंकृष्णपिंगलं। ऊर्ध्वलिंगंविरूपाक्षं विश्वरूपंनमोनमः। अघमर्षणसूक्तस्य ऋषिरे
वाघमर्षणः। आनुष्टुभंभवेच्छंदो भाववृत्तंतुदैवतं। अश्वमेधावभृथके विनियोगोस्यकल्पितः। एवंसंध्या

दावपद्यमर्षणसूक्तेनद्विराचमनमुक्तं । तद्यथा । ईशानाभिमुखोभूत्वाशुचिःप्रयतमानसः । आचांतःपुनरा
चामेदृतमित्यभिमंत्रितं । अंतरंशुद्धातेह्येवमन्नपानमलीकृतं । ऋतमित्यघमर्षणसूक्तं । अघमर्षणानंतरं
शांखः । उपस्पृशेत्ततःपश्चान्मंत्रेणानेनधर्मवित् । ॐ अंतश्चरसिभूतेषुगुहायांविश्वतोमुखः । त्वंयज्ञस्त्वंवष
ट्कार आपोज्योतिरसोमृतं ब्रह्मभूर्भुवःस्वरोमिति । एतच्चाचमनंमार्जनानंतरं कृतमपि अघमर्षणानंतरंका
र्यं । शंखेनाघ्येतजपानंतरं सूर्यांजलिकथनात् । छंदोगपरिशिष्टे । उत्थायार्कंप्रतिप्रोहेत्त्रिकेणांजलिमं
भसः । प्रणवोभूर्भुवःस्वश्चगायत्रीचतृतीयकेति । त्रिकेणहित्रिप्रकारः । अंजलिमितिविधेयगतसंख्यावि
नेकत्वस्याविवक्षितत्वात् । अंजलित्रयदानमशाखार्थ इतिकेचित् । तन्न । वाक्यप्रोक्तस्यार्कस्याकिंचित्करत्वात् ।
अत्रस्नात्वाप्रातःसायमंजलित्रयं । मध्याह्ने एकोंजलिः । कराभ्यांतोयमादायगायत्र्याचाभिमंत्रितं । आदित्या
भिमुखस्तिष्ठन्त्रिःक्षिपेत्संध्ययोर्द्वयोः । मध्याह्नेतुसकृत्तोयंमोक्षणीयंद्विजातिभिरितिनारददेवाचारे व्यासो
क्तेः । जलक्षेपादिजलंतैत्तिरीयश्रुतौ । ब्रह्मवादिनःसूर्याभिमुखाःसंध्यायांगायत्र्याभिमंत्रिता आपःऊ
र्ध्वंक्षिपंति । ताएवापोवज्रीभूत्वारक्षांसिमंदेहारुणेद्वीपे अपद्यंति । यत्प्रदक्षिणंप्रक्रमंति तेनपाप्मानमव
धुन्वंत्युद्यंतमस्तंयांतमभिध्यानंकुर्वन् ब्राह्मणोविद्वान्सकलंभद्रमश्नुते । काश्यपोपि । त्रिंशत्कोट्योमहा

१०९ वीर्या मंदेहा नाम राक्षसाः । कृतघ्ना दारुणाचाराः सूर्यमिच्छंति खादितुं । ततो देवगणाः सर्वे ऋषयश्च तपोध
नाः । उपासते तदा संध्यां प्रक्षिपंत्युदकांजलिं । दह्यंते तेन ते दैत्या वज्रीभूतेन वारिणा । एतस्मात्कारणाद्विप्राः
109 संध्यां नित्यमुपासते । विष्णुपुराणे । मंदेहदेहनाशाय उदयास्तमने रविः । समीहते द्विजोत्सृष्टं मंत्रपूतांज
लित्रयं । तस्मान्न लंघनं कार्यं संध्योपासनकर्मणः । स हंति सूर्यं संध्यायां नोपास्तिं कुरुते तु यः । काशीखं
डे । गायत्री शिरसा ही नामहा व्याहृतिपूर्वकं । प्रणवाद्यां जपंति प्रक्षिपेदंजलित्रयं । तेन वज्रोदकेनाशु
मंदेहा नाम राक्षसाः । सूर्यारयः प्रलीयंते शैला वज्रहता इव । विवस्वतः सहायार्थं यो नरो न जलांजलिम् ।
दिव्येन्मंदेहनाशाय सोपि मंदेहतां व्रजेत् । काललोपेन कर्तव्यो द्विजेन स्वहितेप्सुना । अर्धोदयास्तसमये
तस्माद्वज्रोदकं क्षिपेत् । विधिनापि कृता संध्या कालातीता फला भवेत् । अयमेव हि दृष्टांतो वंध्यास्त्रीमैथुनं
यथा । कात्यायनः । पुष्पारंदवुलिश्राणपूर्ध्वं क्षिप्त्वोर्ध्वबाहुः सूर्यमुदीक्षन् उपतिष्ठेत । उद्वयंतमुदुत्यं
चित्रं तच्चक्षुरिति गायत्र्या च यथाशक्ति सूर्यमुदीक्षन्निति । सूर्यमुद्दिश्य पश्यन्नित्यर्थः । तेन मेघादिच्छन्ने
पि उपस्थान सिद्धिः । अत्र प्राणायामांजलिदानमुपस्थानं नित्यं । देशकालानुरोधादेतन्मात्रकरणाद
पि संध्यासिद्धिः । उपस्थानक्रममाह छंदोगपरिशिष्टे । तदसंसक्तपार्ष्णिर्वा एकपादार्धपादपि । कुर्या

कृतांजलिर्वापि ऊर्ध्ववाहुरथापि वा । यत्र स्यात्कृच्छ्रभूयस्त्वं श्रेयसोपि मनीषिणः । भूयस्त्वं ब्रुवते तत्र कृच्छ्राच्छ्रेयो
ह्यवाप्यते । एकपादादयो विकल्पाः फलभूयस्त्वाय । तत्र उपस्थानं प्रसंसक्तपार्ष्णिभूम्यलग्नोभयगुल्फाधो
भागः कृतांजलिरिति सायंप्रातर्विषयं । कात्यायनेन मध्याह्ने ऊर्ध्ववाहुविधानात् । शौनकः । कृत्वोत्तानौ
करौ प्रातः सायं चाधोमुखौ करौ । मध्ये स्कंधकराभ्यां तु जप एवमुदाहृतः । अधोमुखौ मुकुलाकारौ ।
स्कंधयोः करावुपस्थानमंत्रपाठो जपः । स्मृत्यंतरं । हस्ताभ्यां स्वस्तिकं कृत्वा प्रातस्तिष्ठेद्दिवाकरं । मध्याह्ने
तूर्ध्ववाहू सायं मुकुलितौ करौ । स्वस्तिकं उत्तानकरौ । संकोचितवाहू । अभिनयशास्त्रप्रसिद्धेः ।
ऊर्ध्ववाहू ऊर्ध्वावेव । योगी । अथोपतिष्ठेदादित्यं मूर्ध्नि पुष्पान्वितांजलिः । प्रक्षिप्योदकमुद्वयंत
मुदुत्यं चित्रमित्यपि । तच्चक्षुर्देवहितमिति हंसः शुचिषदित्यपि । एतज्जपेदूर्ध्ववाहुः सूर्यं वीक्ष्यन्समाहितः ।
वीक्ष्यन्निति सूर्याभिमुखो भूत्वेति तात्पर्यम् । उद्वयंतमथोदुत्यं प्रस्कण्वोऽत्र ऋषिः स्मृतः । सविता देवता
छंदोऽनुष्टुप् गायत्र्यनुक्रमात् । चित्रमांगिरसः कुत्स ऋषिः सूर्यश्च देवता । अनुष्टुप् छंदस्तच्चक्षुरिति
दध्यङ्ङाथर्वणो मुनिः । सूर्यश्च देवता छंदः विराडुष्णिगिति स्मृतः । नियोग एवं मंत्राणामुपस्थाने रवेः स्मृतः ।
इति नागदेवः । आवाहयेत गायत्रीं सर्वपापप्रणाशिनीं । न गायत्र्याः परं जप्यं न व्याहृतिसमं हुतं । आगच्छ

११० 110

वरदे देवि जपेमे सन्निधो भव । गायंतं त्रायसे यस्माद्गायत्री त्वं ततः स्मृतः । गायत्री जपे स एवाह । प्रणवो
भूर्भुवः स्वश्च अंगानि हृदयादयः । त्रिरावर्त्य ततः पश्चाद्दीर्घं छन्दश्च देवतं । विनियोगे तथा ध्यानं ध्यात
व्यं क्रमशस्तु वै । प्रणवादीनि हृदयादिषु त्रिर्विन्यस्य ऋष्यादि स्मृत्वा गायत्रीं ध्यायेदित्यर्थः । तद्रूपमाह
पुनः स एव । श्वेतवर्णा समुद्दिष्टा कौशेयवसना तथा । श्वेतैर्विलेपनैः पुष्पैरलंकारैश्च भूषिता ।
आदित्यमंडलांतस्था ब्रह्मलोकगताथवा । अक्षसूत्रधरा देवी पद्मासनगता शुभा । आवाह्यजुषाने
न तेजोसीति विधानतः । तत्रावाह्य जपित्वा च नमस्कृत्य विसर्जयेत् । तत्र चावाहनानंतरं जपात्प्रा
गेव गायत्र्या उपस्थानं ब्राह्मणेन कार्यम् । गारुडे । न्यासादिकं प्रवक्ष्यामि गायत्र्याः शृणु शंकर । छंदो
स्य गोत्रं गायत्र्याः सविता चाथ देवता । ब्रह्मशीर्षा रुद्रशिखा विष्णुहृदयसंयुता । विनियोगे कनयना
कात्यायनसगोत्रजा । त्रैलोक्यचरणा ज्ञेया पृथिवीकुक्षिसंयुता । एवं ज्ञात्वा तु गायत्रीं जपेद्द्वादशलक्ष
णां । त्रिपदाष्टाक्षरा ज्ञेया चतुःपादा षडक्षरा । न्यासे जपे तथा ध्याने अग्निकार्ये तथार्चने । गायत्री वि
न्यसेन्नित्यं सर्वपापप्रणाशिनी । नागदेवाचारप्रदीपे । तेजोसीति परमेष्ठी प्रजापतिर्ऋषिः स्मृतः ।
आज्यं देवश्च गायत्र्या वाहने विनियोगकः । ऋषिः सूर्यश्च विमलः परमात्मा च देवता । गायत्री च भवेच्छंदो

नियुक्तं मोक्षकांक्षिणि । गायत्र्येकपदीत्यादि गायत्र्याः प्रार्थनां चरेत् । नमस्ते तुरीयायेति नमस्कृत्य
तु तां जपेत् । शतपथे ऽस्या उपस्थानं । गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न हि पद्यसे
नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदोमा प्रापदिति नाग्रवच्छेदात् प्रापत्स पर्यन्ते मंत्रः इ
ति शंकरभास्कराचार्ययोर्व्याख्या । यदाह बौधायनः । उपतिष्ठेदायतां देवीं तुरीयपादे नाप्सु च दाहरं
ति । तुरीयपादः परोरजसे सावदोमिति मंत्रप्रकाशः । तत्र बौधायनस्य तैत्तिरीयसूत्रकारत्वेन शत
पथस्य माध्यंदिनत्वेन माध्यंदिनैः शतपथोक्त एव मंत्रो ग्राह्यः । तैत्तिरीयाणां बौधायनोक्त इति वाच
स्पतिः । अन्ये तु मा प्रापदिति द्वेष्ये काम्ये च सति प्रयोगः । द्वेष्यनामगृहीत्वा असौ कामोऽसौ समर्द्धि
अमुकोऽमुककाममां प्रापदिति वा । एते प्रयोगाः काम्याः । अजपां नाम गायत्रीं जीवो जपति सर्वदा । हंस
इत्येव तन्मंत्रं स च पादश्चतुर्थकः । इति काशीखंडे । जप्यमाह योगियाज्ञवल्क्यः । ओंकारः पूर्वमु
च्चार्यो भूर्भुवस्स्वरनंतरं । गायत्री प्रणवश्चांते जप्ये चैवमुदाहृतं । एवं सति गायत्र्यादौ तृतीयोंकारोच्चार
णमश्रद्धं । बृहत्पराशरः । यो न वांछति संतानं मोक्षमिच्छति केवलं । अत्योंकारमतारं नामन्तरं समभ्य
सेयात् । अर्थार्थे संपुटा काम्ये वश्ये त्रिप्रणवैर्युता । संभाभिचारे केवल्या मोक्षे चतुर्भिरेव च । गारुडे ।

१९ जप्येतु त्रिपदान्तेषां ग्रर्द्धवनेतु चतुष्पदा । न्यासे जप्येत पाद्याध्याने अग्निकार्ये तथोत्सवे । सर्वत्र त्रिपदा सै
या ब्राह्मणोस्तत्त्वचिंतकैः । वैदिकं वा जपं कुर्यात्पौराणं पांचरात्रिकं । योवेद तानि चैतानि यान्येतानि
१९१ च सांख्यकृतिः । वैदिकेतरविधानमत्र त्रैवर्णिकस्यापि तस्य तत्रानधिकारात् । तथा । सर्वेषां जपसूक्ता
नां ऋचां च यजुषां तथा । स्थाने चैकाक्षरादीनां गायत्री परमो जपः । सोंकारां यो हि गायत्रीं त्यक्त्वा
मंत्रमुपासते । फलं न तस्य तद्विद्धि देयत्तां त्यक्त्वा जपेद्यतिः । गायत्री प्रकृतिर्ज्ञेया ॐकारः पुरुषः
परः । ताभ्यामुभयसंयोगाज्जगत्सर्वं प्रवर्त्तते । व्यासः । न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह ।
सोहमस्मीत्युपासीत विधिना येन केनचित् । पादास्त्रयस्त्रयो वेदाल्लिखितत्वात्तराणि तु । चतुर्विंशति
रेवास्या येर्व्याप्तमखिलं जगत् । गायत्रीं यो न जानाति ज्ञात्वा नैव उपासते । नामधारक विप्रोहो
न विप्रो वृषलो हि सः । मनुः । जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः । कुर्यादन्यन्न वा कुर्यान्मै
त्रो ब्राह्मण उच्यते । मित्रदेवता का गायत्री तत्प्रधानो मंत्रः । यमः । सहस्रपरमां देवीं शतमध्यां
दशावरां । गायत्रीं तु जपेन्नित्यं सर्वपापप्रणाशिनीं । अस्यापवादमाह मनुः । ब्रह्मचारी गृहस्थ
श्च शतमष्टोत्तरं जपेत् । वानप्रस्थो यतिश्चैव दिसहस्राधिकं जपेत् । संध्याविशेषे फलविशेषमाह

योगी । सप्तावर्त्तात्तुनात्यंगंदशभिःप्रापयेद्दिवं । विंशावर्त्तात्तुसावित्रीनयतेहीश्वरालयं । अष्टोत्तरशतंज
प्तातारयेद्भवसागरात् । व्यासोपि । दशभिर्जन्मचरितंशतेनचपुराकृतं । त्रिजन्मजंसहस्रेणगायत्रीहंति
किल्बिषं । पराशरः । सर्वेषांचैवपापानांसंकरेसमुपस्थिते । दशसाहस्रिकोभ्यासोगायत्र्याःशोधनंपरं ।
वायुभक्षोदिनंतिष्ठेद्रात्रिंनीत्वाप्सुसूर्यदृक् । जपात्सहस्रंगायत्र्याःशुद्ध्येद्ब्रह्मवधादृतः । गोघ्नःपितृघ्नो
मातृघ्नोभ्रूणहागुरुतल्पगः । ब्रह्मस्वहरीहारीचसुरापानीतथैवच । गायत्र्याःशतसाहस्रात्पूतोभवति
मानवः । योधीतेहन्यहन्येतांत्रीणिवर्षाणिमानवः । सब्रह्मपरमभ्येतिवायुभूतःस्वमूर्त्तिमान् । नतथावे
दजाप्येनपापंनिर्दहतिद्विजः । यथासावित्रीजाप्येनसर्वपापैःप्रमुच्यते । गायत्रींयोनजानातिवृथातत
स्यपरिश्रमः । एकतश्चतुरोवेदागायत्रीचैकतःसमा । बृहस्पतिः । मनःसंहरणंशौचंमौनंमंत्रार्थचिंत
नं । अव्यग्रत्वमनिर्वेदोजपसंपत्तिहेतवः । कालविशेषेजपविशेषमाहभृगुः । अनध्यायेषुसर्वेषुप्रदोषे
षुचसर्वशः । नजप्येद्वैदिकंजाप्यंगायत्र्यष्टोत्तरंशतं । नारदः । सर्वत्रैवप्रदोषेषुगायत्र्यष्टसंख्यया ।
अष्टाविंशत्यनध्यायेजपेन्नाष्टोत्तरंशतमिति । तथा । अष्टम्यांचचतुर्दश्यांपानित्यादर्धंजपेत्सुधीः । प्रतिप
त्सुतुरीयांशंपर्वण्यल्पतरंजपेत् । पर्वाणिपूर्णिमामावास्यारूपे । उत्तरावधिमाहयाज्ञवल्क्यः । जपन्नासी

११२ तत्सावित्रीमभ्यसेदातारकोदयात् । संध्यां प्राक्प्रातरेवं हि तिष्ठेदासूर्यदर्शनात् । प्राङ्मुखेन प्रातःसंध्यामूर्ध्व
112 जानुनार्कदर्शनपर्यंतं । सायंसंध्यायां सम्यक् नक्षत्रदर्शनपर्यंतमुपतिष्ठेत्सावित्रीं जपेदित्यर्थः ॥ मध्या
ह्ने जप्येत् सूर्याभिमुखत्वं । तिष्ठंश्चेदीक्षमाणोऽर्कं जपं कुर्यात्समाहितः ॥ इति योगी । संवर्त्तः ॥ तिष्ठन्पूर्वां ज
पं कुर्याद्ब्रह्मचारी समाहितः ॥ आसीनः पश्चिमां संध्यां जपं कुर्यादतंद्रितः ॥ शंखः । कुशवृष्यां समासीनः
कुशोत्तरायां वा कुशपत्रपाणिरुदङ्मुखः सूर्याभिमुखो वा अक्षमालामादाय देवतां ध्यायन् जपं कुर्यात् ।
सुवर्णमणिमुक्ताफलस्फटिकपद्माक्षपुत्रजीवकादन्यतमां मालां कुर्यात् । कुशग्रंथिमयीं वा । हस्तोप
यामे वा गणयेत् । आदौ देवतार्षिच्छंदश्च स्मरेत् । हस्तोपयामोऽङ्गुलीनमनं । अत्र स्फटिकादारभ्योत्तरो
त्तरा माला श्रेष्ठा । स्फटिके तूपक्रम्य । कोट्युत्तरा भवेद्धि रक्षमाला विशेषतः ॥ जपस्य क्रियमाणस्य
तस्माच्छ्रेष्ठा परापरेति योगी । स्फटिकेंद्राक्षरुद्राक्षैः पुत्रजीवसमुद्भवैः ॥ जपमालाप्रकर्त्तव्या प्रशस्ता ह्युत्त
रोत्तरा । पक्षांतरमाह शातातपः ॥ अरिष्टपुत्रजीवाश्च शंखपद्मेन तथा मणिः ॥ कुशग्रंथिश्च रुद्राक्ष उत्तम
श्चोत्तरोत्तरः ॥ स्कंदपुराणे । प्रवालमुक्तास्फटिकैर्जप्तं कोटिफलप्रदं । तुलसीमणिनायेन गणितं चाक्ष
यं भवेत् । शिवपुराणे । सुवर्णरत्नमणिभिर्जप्त्वा शतगुणं भवेत् । सहस्रगुणमिंद्राक्षैः रुद्राक्षैरयुतं भवेत् ।

निगुतं प्रयुतं वाच्यं पद्माद्यैर्नात्र संशयः । पुत्रजीवैस्तु जप्तस्य परिसंख्यान विद्यते । अंगुल्या जपसंख्यान
मेकमेकमुदाहृतं । रेखयाष्टगुणं पुत्रजीवैर्दशगुणाधिकं । शतं स्याच्छंखमणिभिः प्रवालैश्च सहस्रकं । स्फा
टिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते । पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरेव तु । कुशग्रंथ्या च रुद्राक्षैरनंतफल
मुच्यते । प्रवालैस्तु सहस्रकमिति । शिवपुराणे । प्रवालगजदंतमालागणेशजपे ज्ञेये त्यागमे । हलायुधः ।
शिवमंत्रं जपेद्यस्तु नरो रुद्राक्षमालया । स याति शिवसायुज्यं शिवभक्तिसमन्वित इति । रुद्राक्षस्य शिवमंत्रे प्राश
स्त्यं नान्यत्र निषेधः । वर्णविशेषान्मालाविशेषमाह पाद्मे । कुशपर्वैर्जपेद्विप्रः स्वर्णमणिभिर्नृपः । पुत्रजीव
फलैर्वैश्यः पद्माक्षैः सर्व एव हि । तथा । जपस्य गणनां प्राहुः पद्माक्षैर्भक्तिवर्धनैः । अथांगुलीभिरेवापि ज
पमन्वहमाचरेत् । अगस्त्यसंहितायां । तुलसीकाष्ठघटितैर्मणिभिर्जपमालिका । सर्वकर्मणि सर्वेषामीप्सि यत्रै ५८
तार्थफलप्रदा । पद्मकोदुम्बरश्चैव विल्वश्चैव कुशस्तथा । पलाशो जपमालाया अभावे समुदाहृतः । कनि
ष्ठानामिकामध्या चतुर्थी तर्जनी मता । तिस्रोंगुल्यस्त्रिपर्वाः स्युर्मध्यमा चैकपर्विका । पर्वभिश्च जपः का
र्यो नांगुलीनां निपातने । तन्निपाते च यज्जप्तं सर्वं विद्यात्तदासुरं । मध्यमायाद्वयं पर्व जपकाले तु वर्जयेत् ।
२ एतन्मेरुं विजानीयाद्ब्रह्मणा भाषितं पुरा । दक्षः । अनामिकायवो मध्यस्तस्मादधः क्रमेण तु । तर्जन्या

११३ दौ जपं तेच जपमाला करे स्थिता । अभावे त्वक्षमालायाः कुशाग्रंथ्याथ पाणिना । यथाकथंचिद्गणयेत्स संख्य
113 वमवेद्यथेति । तथा योगी । अंगुल्यग्रेण यज्जप्तं यज्जप्तं मेरुलंघने । असंख्यातं च यज्जप्तं तत्सर्वं निष्फलं भवेत् ।
अंगुष्ठानामिकाभ्यां च कुर्याद्रत्नस्य कर्षणं । मदने ब्रह्माणुवचनं । अंगुष्ठेन जपेन्मोक्षं तर्जन्यात्वाभिचारिकं ।
मध्यमा धनसंपत्तिः शांतिपुष्टिरनामिका । कनिष्ठा रक्षणी प्रोक्ता जपकर्मणि शोभना । अंगुष्ठेन जपेज्जप्य
मन्यमंगुलिभिः सह । अंगुष्ठेन विना जप्यं कृतं तदफलं भवेत् इति । अन्यमकाम्यं । दीपिकायां । तर्जन्या न
स्पृशेत्सूत्रं न कंपेन्न विधूनयेत् । अंगुष्ठस्य च मध्यस्थं परिवर्तं समाचरेत् । नरसिंहपरिचर्यायां पाद्मे ।
तर्जन्यंगुष्ठसंयोगाज्जपेन्मारणकर्मणि । अंगुष्ठानामिकाभ्यां च जपेदुत्तमकर्मणि । कनिष्ठांगुष्ठसंयोगाद्विद्वे
षोच्चाटने रतः । मध्यमाकर्षणं तस्य सर्वसिद्धिप्रदायकं । जपविशेषे विधिविशेषस्तत्रैव । अनामामध्यमाक्रा
म्य जपं कुर्याच्च मानसं । मध्यमां मध्यमाक्रम्य जपं कुर्यादुपांशुकं । तर्जनीं तु समाक्रम्य जपं नैव तु कारयेत् । एकै
कं मणिमंगुष्ठेनाकर्षन्प्रजपेन्मनुं । मेरौ तु लंघिते देवि न मंत्रफलभाग्भवेत् । प्रमादात्पतिते सूत्रे जपेदष्टोत्तरं
शतं । पादयोः पतिते तस्मिन्नष्टसाल्पाद्विगुणं जपेत् । नित्यं जपं करे कुर्यान्न तु काम्यमबोधनात् । पर्वभिस्तु ज
पेद्देवी मन्त्रानियमः स्मृतः । गायत्र्या वेदबीजत्वाद्वेदः पर्वसु पठ्यते । तन्मानमाह प्रजापतिः । शतमष्टो

त्तरंकार्यंचतुःपंचाशदेववा । सप्तविंशतिमानावाततोहीनाधमाहिसा । तत्करणेन्यासः । सप्तविंशतिरुद्राक्षैः
पंचवक्त्रैःसकंटकैः । रक्तवर्णैरसिश्रेष्ठैःकीटरंध्रविवर्जितैः । अतस्तंत्रंप्रकर्त्तव्यंगोपुच्छवलयाकृति । वक्त्रं
वक्त्रेणसंयोज्यपुच्छंपुच्छेनयोजयेत् । मेरुरूर्ध्वमुखःकार्यःप्रत्येकंनागपाशकं । पश्चात्तेनजपंकुर्याल्लभेदुक्तफ
लंप्रिये । पुनःसएव । मोक्षार्थीपंचविंशत्याधनार्थीत्रिंशताजपेत् । पुष्ट्यर्थीसप्तविंशत्यापंचदश्याभिचारिकः ।
तत्स्वरूपमाह । अत्युस्थासमरंध्राचपरिशष्टाधिष्ठानवा । निश्चलाग्रथिताअंगाअन्योन्यसंघृष्टिवर्जिता । सश
ब्दाचंचलायातुत्रुटिताग्रथितातथा । शणसूत्रेषुग्रथितापापंडस्याप्रगतना । मालादुःखप्रदाग्रिन्योग्रथिता
निंद्यातंतुषु । निंद्याततवःअशुद्धादिकर्त्तिताः । सशब्दत्यादिनिषिद्धाः । गुरुंप्रकाशयेद्विद्वान्मंत्रंनैवप्रकाशयेत् ।
जपांत्यकालेतांमालांपूजयित्वातुगोपयेत् । अतमालांचमुद्रांचगुरोरपिनदर्शयेत् ॥ अथरुद्राक्षमाहात्म्यम् ।
शिवकार्त्तिकेयसंवादे । शिवउवाच । रुद्राक्षस्यफलंवत्सत्रिषुलोकेषुविश्रुतं । लक्षंसंदर्शनात्पुण्यंस्पर्शना
त्कोटिरुच्यते । दशकोटिसहस्राणिदशकोटिशतानिच । जप्यात्स्यलभतेपुण्यंनात्रकार्याविचारणा । रुद्राक्षे
रो देहसंस्थेपिकुकुर्वीणम्रियतेयदि । सोपिरुद्रपदंयातिकिंपुनर्मानवोगुह । सप्तविंशतिरुद्राक्षमालयादेहसंस्थ
या । यत्करोतिनरःपुण्यंसर्वंकोटिगुणंभवेत् । हस्तोरसिचकंठेचशिरसाचैवधारयेत् । अवशंसर्वभू

११४ 114 तानांरुद्रवद्विचरेन्महीं। सुरासुराणांसर्वेषांवंदनीयोयथाशिवः। उच्छिष्टोवाविकर्मस्थोयुक्तोवासर्वपातकैः।
मुच्यतेसर्वपापेभ्योरुद्राक्षस्यचधारणात्। शिखायांबाहुकंठेचकर्णयोश्चापियोनरः। रुद्राक्षंधारयेद्भक्त्या
सशैवंलोकमाप्नुयात्। नववक्त्रंचरुद्राक्षंधारयेद्वामपाणिना। चतुर्दशमुखंचैवशिखायांधारयेद्बुधः।
सर्वमंत्रजपंकुर्याद्द्विजोरुद्राक्षमालया। विनामंत्रेणयोधत्तेरुद्राक्षंभुविमानवः। सयातिनरकान्घोरान्
यावदिंद्राश्चतुर्दश। त्रिपुरस्यवधेकालेरुद्रस्याक्ष्णोःपतंतिये। अरुणाविंदवस्तेतुरुद्राक्षाश्चभवन्भुवि।
रुद्रवामाक्षिसंभूतंरुद्राक्षंकामरूपके। दक्षिणाक्षाच्चसंभूतंहरिलोकोद्भवंविदुः। हरिलोकः। श्री
हट देशः। शालिग्रामोवा। एकवक्त्रःशिवःसाक्षाद्ब्रह्महत्यांव्यपोहति। अवध्यत्वंप्रतिष्ठातोवह्निस्तंभंक
रोतिच। द्विवक्त्रोहरगौरःस्याद्गोवधाद्यघनाशकृत्। त्रिवक्त्रोदहनःसाक्षात्स्त्रीहत्यांदहतेक्षणात्।
चतुर्वक्त्रःस्वयंब्रह्माभ्रूणहत्यांव्यपोहति। पंचवक्त्रस्तुकालाग्निरभक्ष्यभक्ष्यपापनुत्। षड्वक्त्रस्तुगुहभ्रूणहत्या
दिशमयेदधः। सप्तवक्त्रस्त्वनंतःस्यात्स्वर्णस्तेयादिपापनुत्। विनायकोऽष्टवक्त्रःस्यात्सर्वानृतैर्विनाशकृत्। ईविघ्न २
भैरवोनववक्त्रस्तुशिवसायुज्यकारकः। दशवक्त्रःस्मृतोविष्णुर्भूतप्रेतभयापहः। एकादशमुखोयैस्तौना रुद्रो २
नायत्तफलप्रदः। द्वादशास्यस्तथादित्यःसर्वरोगनिवर्हणः। त्रयोदशमुखःकामःसर्वकामफलप्रदः।

चतुर्दशास्यः श्रीकंठो वंशोद्धारकरः परः। निश्छिद्राक्षस्तु सुपक्वाश्च रुद्राक्षा धारणे स्मृताः। पंचामृतं पंचगव्यं
स्नानकाले प्रयोजयेत्। रुद्राक्षस्य प्रतिष्ठायां मंत्रं पंचाक्षरं तथा। त्रियम्बकाय मंत्रं तु तथा तत्र प्रयोजयेत्।
तथा। अघोरं ह्रीं घोरतारं। ॐ ह्रौं ह्रीं सर्वतः सर्वत इति सर्वेभ्यो नमस्ते रुद्ररूपाय ह्रीं। अनेनापि च मंत्रेण रु
द्राक्षस्य द्विजोत्तमः। प्रतिष्ठां विधिवत्कुर्यात्ततोधिकफलं लभेत्। ततो यथावन्मंत्रेण धारयेद्भक्तिसंयुतः। अत्रा
यं प्रकारः। शुभे दिने रुद्राक्षमणीनादाय पंचगव्येन प्रक्षाल्य पंचामृतेन क्षालयित्वा पुनः शुद्ध जलेन क्षालयेत्।
ततः सम्यक् ब्राह्मणीकर्तितसूत्रनवतंतुभिर्मूलमंत्रेण ग्रंथयेत्। ग्रंथितां गुग्गुलुना धूपयेत्। दीपं च दद्यात्।
ततश्चंदनेन लेपयेत्। पुष्पैश्च पूजयेत्। इष्टदेवतां ध्यायन्नमस्कृत्वा गृहीत्वा जपेत्। संतोषयेत्। तन्मंत्रेण
सर्वं कुर्यात्। तदभावे जप्यमंत्रेण वा। पुरश्चरणजपमालायामावश्यकोयं प्रकारः। रुद्राक्षमालायां चान्यत्रा
पि च फलभूयस्त्वार्थं कार्यः। इति प्रासंगिकं विधाय प्रकृतिरनुसंधीयते। तत्र नरसिंहपुराणे। त्रिविधो जपयज्ञः
स्यात्तस्य भेदं निबोध मे। वाचिकश्च उपांशुश्च मानसश्च त्रिधा मतः। त्रयाणां जपयज्ञानां श्रेयान्स्यादुत्तरोत्तरः।
यदुच्चनीचस्वरितैः स्पष्टशब्दवदक्षरैः। मंत्रमुच्चारयेद्व्यक्तं जपयज्ञः स वाचिकः। शनैरुच्चारयेन्मंत्रमीष
दोष्ठौ प्रचालयेत्। किंचिच्छ्रवं जपं कुर्यादुपांशुः स जपः स्मृतः। धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदं।

११५ शब्दानुचिंतयाभ्यासः स उक्तो मानसो जपः। तथा। ध्यायेत्तु मनसा मंत्रान् जिह्वोष्ठौ न विचालयेत्। न कंपयेच्छि
रोग्रीवां दंतान्नैव प्रकाशयेत्। एतन्मानसविषयं वाचिके तद्विधानादिति। अत्र जपजल्पव्यक्तायां वाचीति धा
115 त्वर्थत्वान्नोपि जपशब्दोत्तरवृत्तिमात्रलक्षणयोपांशुमानसयोरपि प्रवर्त्तते। तादृशयोरपि तयोः फलविशेष
संबंधः श्रेष्ठत्वं च वाचैनेकमेव। अत एव जपः स्यादक्षरावृत्तिरित्यागमविदोपि भाषंते। वसिष्ठः। मानसः
शांतिके जप्य उपांशुः पौष्टिके स्मृतः। सशब्दश्चाभिचारेऽयं त्रिविधो जप उच्यते। तथा मदनपारिजाते।
अंगुलीर्न वियुंजीत किंचिदाकुंचयेत्करं। अंगुलीनां वियोगेन छिद्रेषु स्रवते जपः। तथा। न चक्रमन्न चह
सन्न पार्श्वमवलोकयन्। नापाश्रितो न जल्पंश्च न प्रावृतशिरस्तथा। न पदा पादमाक्रम्य न चैव हि तथा करौ।
न चासमाहितमना न च संश्रावयन् जपेत्। अच्छिन्नानि च दानानि स्नानं च निरहंकृतं। जप्यानि च हस्तगुणानि
तेषां फलमनंतकं। उपांशुजपयुक्तस्य फलं शतगुणं भवेत्। सहस्रो मानसः प्रोक्तो यस्माद्ध्यानसमो हि सः।
अपाश्रितः स्तंभाद्यवष्टंभेन स्थितः। तथा करांतरालावपि न पदाक्रम्य जपेदिति शेषः। बृहस्पतिः। नार्द्र
वासा जपं कुर्याद्धोमं दानं प्रतिग्रहं। सर्वं तद्राक्षसं ज्ञेयं बहिर्जानु च यत्कृतं। आर्द्रवस्त्रनिषेधः स्थले नित्य
जपविषयः। न क्लिन्नवासाः स्थलगो जपादीनाचरेद्बुधः। व्रतादृते नार्द्रवासा नैकवासाः कथंचन इति।

चरुर्वो ह्युपवासश्च
भैक्ष्यं नक्तमयाचितं

प्रायश्चित्ते आर्द्रवस्त्रस्यैव तद्विधानात् । अथ प्रसंगतो दीर्घकालसाध्यजपे मन्त्रमाह । शाकयावकभैक्षाणि पयोमू
लफलानि च । दधिसर्पिर्लप्स्यांश्चापः अशक्ता ह्युत्तरोत्तरं । विसर्गं गार्हनाल्लैक हविष्यान्नानि यानि तु । एतान्यनुव्रता
न्याहुश्शस्तानि जपकर्मणि । चरुरत्र स्थालीपाकविशेषः । पूर्ववाक्योपात्तस्यापि भैक्षस्याग्रिमवाक्य उपादानं प्रा
शस्त्यपरं । अनुव्रतानि जपयज्ञस्यांगभूतानि । अत्र शाकादि भक्षविशेषेण परिसंख्यायते । न तु रागप्राप्तभोज
नं विधीयते । ततश्च जपे प्रवृत्तो यदि भुंक्ते तदा शाकादिनैव भुंजीतेत्यर्थः । तेनैकादश्युपवासोपि कर्तव्यो विधि
प्राप्तत्वात् । पुनः प्रकृतमाह । जीर्णेन मलिनेनापि नसन्याग्रथितेन च । न पारक्येन नीलेन परिक्लिन्नेन
वा जपेत् । वाससेति शेषः । तथा । यतस्तत्समभूतानि सिद्धविद्याधरोरगाः । हरंति प्रसभं यस्मात्तस्माद्गुप्तं
च कारयेत् । जपकाले न भाषेत व्रतहोमादिकेषु च । एतेष्वेवावसक्तं तु यद्यागच्छेद्द्विजोत्तमः । अभिवाद्य ततो
विप्रं योगक्षेमं च कीर्तयेत् । तूष्णीमासीत च जपं चांडालपतितादिकं । दृष्ट्वा तु वार्युपस्पृश्य संभाष्य स्नात्वा पुनर्जपेत् ।
अवसक्तं प्रवृत्तयोगक्षेमकीर्तनं इतापकाशेनैव मुखाभ्यंतरे तदपि संस्कृतेनैव न म्लेच्छितेन नापभाषितेन । न म्ले
च्छितैवै नापभाषितवै इति श्रुतेः । योगी । यदि वाग्यमलोपः स्याज्जपादिषु कथंचन । व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा वि
ष्णुमव्ययं । स्थाननियममाह शंखः । गृहे त्वेकगुणं जप्यं नद्यां तु द्विगुणं भवेत् । गवां गोष्ठे दशगुणं अग्न्यागारे

११६ शताधिकं । सिद्धिक्षेत्रेषु तीर्थेषु देवतानां च सन्निधौ । सहस्रशतकोटीनामनंतं विष्णुसन्निधौ । नद्यामिति
116 संबंधलक्षणया नदीतीरे जलेनिषेधात् । यथा । कदाचिदपि नो विद्वान्गायत्रीमुदके जपेत् । गायत्र्यग्नि
मुखी प्रोक्ता तस्मादुत्थाय तां जपेत् । इति गोभिलोक्तत्वेनेदं सामशाखापरमिति । अग्निमुखहेतुनिर्देशेन
वाजसनेयिकेपि प्रवर्त्तते बाधकाभावात् । बृहस्पतिः । मार्जनं जलमध्ये तु प्राणायामो यतस्ततः । उपस्था
नं ततः पश्चाद्गायत्रीजप उच्यते । मार्जनं स्नानांगमत्र । यतस्ततः स्थले जले वा । एवं च प्राणायामोपस्थान
योः संध्यांतर्गतयोः क्रमयत्रविधानात् । उपस्थानपर्यंता संध्या जलेप्यस्य मते । गायत्रीजपस्तु सर्वेषां मते स्थ
ल एव इत्यवसीयते । केचित् जलसंध्यावदनपदे गायत्रीजपं जलेपीच्छंति । यदि स्यात्क्लिन्नवस्त्रो वै गायत्री
मुदके जपेत् । अन्यथा तु शुचौ भूम्यां कुशोपरि समाहित इति यमोक्तेः । श्रीधराचार्यपद्धतौ । कृत्वोत्तानौ क
रौ प्रातः सायं चाधोमुखौ करौ । मध्ये न तु कराभ्यां तु जपेन्यास उदाहृतः । गायत्रीजपानंतरं कात्यायनः ।
विभ्राडित्यनुवाकपुरुषसूक्तशिवसंकल्पमंडलब्राह्मणैरित्युपस्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविशे
द्दर्भेष्विति अयं जपः काम्यः । संध्यात्रयेप्युपस्थानमेतदाहुर्मनीषिणः । ~~संध्यात्रयेप्युपस्थान~~ मध्याह्नउदये
वापि विभ्राडादीच्छया जपेत् । इति छंदोगपरिशिष्टवचने । इच्छयेति श्रवणात् । तथा नियतो गायत्रीं जपित्वा

कामानवेत्स एतानिच जपित्वा प्रदक्षिणीकृत्य तूष्णीं वा गायत्रीं नमस्कृत्य दर्भोपस्तृत आसने उपविशेदिति
कात्यायनसूत्रार्थः। उदये वापीत्यभिधानात्। उदयमात्रानंतरमपि मध्याह्नसंध्यावंदनमिति पारिजाते।
योगी। तच्चक्षुरिति मंत्रेण जपांते भास्करं द्विजः। कुर्यात्प्रदक्षिणं चैव उपविश्यासने ततः। देवागात्विति
मंत्रेण कुर्याज्जपविसर्जनं। आचारप्रदीपे। उपविश्यासने पश्चात्कुर्यात्संपुटितौ करौ। देवागात्विति
मंत्रस्य मनसस्पतिरित्यृषिः। वातो देवो विराट्छंदो योगो जपविसर्जने। तथा। करे नीरं समादाय देवा
गात्विति मंत्रतः। निवेदयेज्जपं सूर्ये प्रयोगस्तत्र कथ्यते। प्रातःसंध्यांगभूतेन गायत्रीजपनेन च। साष्टेन
शतसंख्येन ब्रह्मात्मा प्रीयतां रविः। तथा। सवित्रे नम इत्युक्त्वा गायत्र्येकपदीति च। उपस्थाय च गायत्रीं
भूर्भुवःस्वर्विसर्जयेत्। गारुडे। यदक्षरमिति प्रार्थ्य संध्यां देवीं द्विजोत्तमः। उत्तरे शिखरे त्यादि पठित्वा तां
विसर्जयेत्। ‥ मते। मध्यसंध्यांगभूतेन गायत्र्या जपितेन च। साष्टेन शतसंख्येन रुद्रात्मा प्रीयतां रविः॥
एवं। सायंसंध्यांगभूतेन गायत्रीजपनेन च। साष्टेन शतसंख्येन विष्ण्वात्मा प्रीयतां रविः। ज्येष्ठं वापि कनिष्ठं
वा संध्यांते चाभिवादयेत्। वर्जयित्वा सुतं शिष्यं दौहित्रं दुहितापतिं। यदि न्यूनातिरिक्तं जपेत्तदा तत्तत्संख्यया तु: २८
प्रयोगः कार्यः॥

११८ अथसन्ध्याप्रयोगः ॥ तत्रोपवीतीबद्धशिखः आसनेकुशोपर्य्यैशान्याभिमुखउपविष्टः पादौप्रक्षाल्य
117 वामपाणौसपवित्रजलान्समूलान्नातिदीर्घान्बहून्कुशान्कृत्वा दक्षिणेयथोक्तपवित्रंविधायासनंत्यक्त्वा द्वि
राचम्य पुंडरीकाक्षंस्मरेत् । ततउपात्तदुरितोपशांतयेब्रह्मावाप्तयेप्रातःसंध्योपासनमहंकरिष्ये इतिसं
कल्पः । अथाघमर्षणसूक्तेनद्विराचमनम् । ततोऽभिषेकः । ॐभूःपुनातु । ॐभुवःपुनातु । ॐस्वः
पुनातु । ॐभूर्भुवःस्वःपुनातु । ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात्पुनातु ।
इतिसकुशजलेनशिरसिमार्जयेत् । ॐपृथ्वीतिमेरुपृष्ठऋषिःकूर्मोदेवतासुतलंछंदः आसनशोधनेवि
नियोगः । ॐपृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता । त्वंचधारयमांदेविपवित्रंकुरुचासनम् । ॐभूः
पादयोः । ॐभुवःजान्वोः । ॐस्वःकट्यां । ॐमहःनाभौ । ॐजनःहृदये । ॐतपःकंठे । ॐसत्यंवर्त्तसि । वक्रे १८
ॐतत्सवितुर्वरेण्यं कवचायहुं । ॐभर्गोदेवस्यधीमहि नेत्रे । धियोयोनःप्रचोदयात् अस्त्रम् । अथप्रण
वगायत्रीवर्णन्यासः । ॐअकारंनाभौ । ॐउकारंहृदये । ॐमकारंमूर्ध्नि । ॐतत्पादांगुष्ठयोः । ॐसकारं
गुल्फयोः । ॐविकारंजंघयोः । ॐतुकारंजान्वोः । ॐर्वकारंऊर्वोः । ॐरेकारंगुदे । ॐणिकारंलिंगे ।
यं ॐयंकारंकट्यां । ॐभकारंनाभौ । ॐर्गोकारंजठरे । ॐदेकारंस्तनयोः । ॐवकारंहृदये । ॐस्यकारंकंठे ।

ॐ धीकारं मुखे । ॐ मकारं तालुदेशे । ॐ हिकारं नासिकायां । ॐ धिकारं नेत्रयोः । ॐ योकारं भ्रूमध्ये । ॐ
द्वितीयं योकारं ललाटे । ॐ नकारं पूर्वमुखे । ॐ प्रकारं दक्षिणमुखे । ॐ चोकारं पश्चिममुखे । ॐ दकारं उत्तर
मुखे । ॐ याकारं मूर्ध्नि । ॐ व्यंजनं तत्कारं सर्वतो न्यसेत् । अथ शिरोन्यासः । ॐ आपो गुह्ये । ॐ ज्योति
श्चक्षुषोः । ॐ रसो वक्त्रे । ॐ अमृतं जान्वोः । ॐ ब्रह्म हृदये । ॐ भूः पादयोः । ॐ भुवो नाभौ । ॐ स्वः ल
लाटे । ॐ ॐकारं मूर्ध्नि इति न्यासः काम्याः फलभूयस्त्वाय कर्त्तव्याः । अथावाहनं । गायत्रीं त्र्यक्षरां बालां
साक्षसूत्रकमंडलुकरां रक्तांगीं रक्तवस्त्रां चतुर्वक्त्रां हंसवाहनसंस्थितां ऋग्वेदकृतोत्संगां ब्रह्माणीं ब्रह्मदैव
त्यां ब्रह्मलोकनिवासिनीं आयांतीं सूर्यमंडलात्साक्षाद्देवीमावाहयाम्यहम् ॥ आगच्छ वरदे देवि त्र्यक्षरे ब्रह्म
वादिनि । गायत्रि छंदसां मातर्ब्रह्मयोने नमोस्तु ते । एवं रूपां त्र्याकारां संध्यां ध्यायेत् ॥ ॐकारस्य ब्रह्मा ऋ
शुक्लो वर्ण षिः गायत्री छंदः अग्निर्देवता सर्वकर्मारंभे विनियोगः । ॐ सप्तव्याहृतीनां प्रजापति ऋषिः गायत्र्युष्णि
गनुष्टुब्बृहतीपंक्तिस्त्रिष्टुब्जगत्यः छंदांसि अग्निवाय्वादित्यबृहस्पतिवरुणेंद्रविश्वेदेवा देवताः अनादिष्ट
प्रायश्चित्ते प्राणायामे विनियोगः । ॐ गायत्र्या विश्वामित्र ऋषिः त्रिपदा गायत्री छंदः सविता देवता अग्निर्मुख
मुपनयने प्राणायामे विनियोगः । ॐ शिरसः प्रजापति ऋषिर्ब्रह्माग्निवायुसूर्या देवताः प्राणायामे विनियोगः ।

[redacted] एकावर्त्तः पूरकः स्यात्कुंभको द्विगुणस्तथा । रेचकस्त्रिगुणः प्रोक्तः प्रवेशस्थितिनिर्गमे ॥ एवंरूपः प्राणायामः ।
अंगुष्ठानामिकाभ्यां तु यत्नात्सपुटधारणं । प्राणायामः सविज्ञेयः सर्वकर्मसु पावनः ॥ ४९

११९ इति ऋष्यादिकं स्मृत्वा । वारिणात्मानं वेष्टयित्वा सकुशान्यथासनस्थो बद्धासनो निमीलितनयनो मौनी प्रा
118 णायामत्रयं कुर्यात् । अत्र वायोरादानकाले पूरकनामा प्राणायामः तत्र श्यामं चतुर्भुजं विष्णुं नाभौ ध्यायेत् ।
पूरणकाले कुंभकः तत्र कमलासनं रक्तवर्णं चतुर्भुजं ब्रह्माणं हृदि ध्यायेत् । त्यागकाले रेचकः तत्र श्वेतं त्रि
नेत्रं शिवं ललाटे ध्यायेत् । त्रिष्वप्येतेषु त्रिस्त्रिर्मानसो जपः । मंत्रस्तु । ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ
जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ आपोज्योतिरसोमृतं
ब्रह्म भूर्भुवः स्वरोँ । एवंरूपः ॥ ततः सूर्यश्चमेति ब्रह्मा ऋषिः प्रकृतिश्छंदः सूर्यो देवता आचमने विनियोगः । अपामुपस्पर्शने
इति स्मृत्वा । ॐ सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षंतां यद्रात्र्या पापमकार्षं मनसा वा
चा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुंपतु यत्किंचिद्दुरितं मयि इदमहमापोमृतयोनौ सूर्ये ज्योतिषि
जुहोमि स्वाहा इति द्विराचमेत् । ॐ आपो हि ष्ठेत्यादि ऋचस्य सिंधुद्वीप ऋषिः गायत्री छंदः आपो देवता
मार्जने विनियोगः । ॐ आपो हि ष्ठा मयोभुवः । ॐ ता न ऊर्जे दधातन । ॐ महे रणाय चक्षसे । ॐ यो वः शि
वतमो रसः । ॐ तस्य भाजयतेह नः । ॐ उशतीरिव मातरः । ॐ तस्मा अरं गमाम वः इति सप्त कृत्वा शिरसि ।
ॐ यस्य क्षयाय जिन्वथ । इति भूमौ जलं क्षिपेत् । ॐ आपो जनयथा च न इति पुनः शिरसि क्षिपेत् ॥ ॥

ततोदक्षिणहस्तेजलमादाय द्रुपदेतिपठित्वा शिरसित्रिःक्षिपेत् । तथाहि । द्रुपदादिवेतिकोकिलोराजपुत्रऋषि
रनुष्टुप्छंदः आपोदेवता सौत्रामण्यवभृथेविनियोगः । ॐद्रुपदादिवमुमुचानःस्विन्नःस्नातोमलादिव पूतंपवि
त्रेणेवाज्यमापःशुंधंतुमैनसः । ततोदक्षिणकरेणजलमादाय घ्राणंतत्रावसज्य आयतासुरनायतासुवाऋच्या
दिकंस्मृत्वा त्रिःसकृद्वाऽघमर्षणंजपेत् । तद्यथा । अघमर्षणसूक्तस्याघमर्षणऋषिर्भाववृत्तोदेवताऽनुष्टु
प्छंदः अश्वमेधावभृथेविनियोगः । ॐऋतंचसत्यंचाभीद्धात्तपसोऽध्यजायत ततोरात्र्यजायत ततःसमुद्रोअर्ण
वः समुद्रादर्णवादधिसंवत्सरोऽजायत अहोरात्राणिविदधद्विश्वस्यमिषतोवशी सूर्याचंद्रमसौधातायथापूर्व
मकल्पयत् दिवंचपृथिवींचांतरिक्षमथोस्वः । अंतश्चरसीतितिरश्चीनऋषिरनुष्टुप्छंदः आपोदेवताऽपा
मुपस्पर्शनेविनियोगः । ॐअंतश्चरसिभूतेषुगुहायांविश्वतोमुखः । त्वंयज्ञस्त्वंवषट्कार आपोज्योतीरसोमृतं ।
इत्याचामेत् । ततउत्थाय प्रणवव्याहृतिसहितगायत्र्या सूर्याभिमुखःसपुष्पांजलिस्त्रिमौलितुल्यदेशस्थामा
दाय प्रदक्षिणप्रक्रम्यक्षिपेत् । ततोभूम्यलग्नोभयगुल्फतलभागोभूमिलग्नैकपादोभूमिलग्नार्धपादोवा सा
यंप्रातर्बद्धांजलिः मध्याह्ने ऊर्ध्वबाहुः सदासूर्याभिमुखः सूर्यमुपतिष्ठेत् । ॐउद्वयंतमसुत्तंचेतिद्वयोःप्रस्क
ण्वऋषिरनुष्टुप्छंदः सूर्योदेवता सूर्योपस्थानेविनियोगः । ॐचित्रंदेवानामितिकुत्सांगिरसऋषिस्त्रिष्टुप्छंदः

११५ सूर्यो देवता सूर्योपस्थाने विनियोगः । ॐ तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषिः रत्नरातीतपुर उष्णिक् छन्दः सूर्यो देव
119 ता सूर्योपस्थाने विनियोगः । केचिदेषामृष्यादिकमन्यथामन्यंते । तदुपेक्षितं प्रमाणादर्शनात् । ॐ उद्वयं तम
सस्परि स्वः पश्यन्त उत्तरं देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमं । ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय
सूर्यम् । ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा
जगतस्तस्थुषश्च । ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतं शृणुया
म शरदः शतं प्रब्रुवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् । ततः शतमध्याह्नयोरू
र्ध्वजानुः । प्रागुदङ्मुखः सायमुपविष्टः प्रत्यङ्मुख उपस्थानं कुर्यात् । ॐ हृदयाय नमः । ॐ भूः शिरसे स्वाहा ।
ॐ भुवः शिखायै वषट् । ॐ स्वः कवचाय हुं । ॐ भूर्भुवः स्वः नेत्राभ्यां वौषट् । ॐ भूर्भुवः स्वः अस्त्राय फट् । इत्यंगा
नि त्रिरावर्त्य ॥ ॐकारस्य ब्रह्मा ऋषिः गायत्री छन्दः सविता देवता जपे विनियोगः । ॐ व्याहृतित्रयस्य प्रजापति
ऋषिर्गायत्र्युष्णिगनुष्टुप् छन्दांसि अग्निवाय्वादित्या देवता जपे विनियोगः । इति ऋष्यादिकं स्मृत्वा । ॐ ते
जोसीति परमेष्ठि प्रजापतिऋषिर्गायत्री छन्दः आज्यं देवता गायत्र्यावाहने विनियोगः इति स्मृत्वा । ॐ तेजोसि
शुक्रमस्यमृतमसि ज्योतिरसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि इति गायत्रीमावाह्य ।

अथवा । ॐ ओजसि सहोसि बलमसि भ्राजोसि देवानां धामनामासि विश्वमसि विश्वायु सर्वमसि सर्वायुरभिभूः इतिगाय
त्रीमावाह्य ॥ परोरजसइतिविमल ऋषिः परमात्मादेवता अनुष्टुप्छंदो गायत्र्युपस्थाने विनियोगः । ॐ गाय
त्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि नहिपद्यसे नमस्ते तुरीयाय दर्शिताय पदाय परोरजसेसावदो मितिगाय
त्रीमुपस्थाय । सूर्यमंडलस्थां ब्रह्मलोकगां वाश्वेतवर्णां श्वेताम्बरणानुलेपनां पुष्पवस्त्राद्यलंकृतां ध्यात्वा यथा
विहितं सव्येदक्षिणेचहस्ते उपग्रहादिकं धृत्वा रुद्राक्षाद्यन्यतमामक्षमालामादाय सहस्रकृ
त्वः शतकृत्वो दशावरम्वा यथाशक्ति वीजपेत् । अत्रपुरश्चरणादौ काम्येचजपे फलसंप्रस्त्वाय नेत्यकेच समु
द्राजपेत् । ताश्च । संमुखं संपुटं चैव विततं विस्तृतं तथा । द्विमुखं त्रिमुखं चैव चतुर्थंच मुखं तथा । षण्मुखंचा
धोमुखंच व्यापकांजलिकं तथा । शकटं यमपाशंच ग्रथितं संमुखोन्मुखं । प्रलम्बं मुष्टिकं चैव मत्स्यः कूर्म एताभिर्नानुजानाति सर्वं तस्यच निष्फलं । प्रादेवताश्च
स्नं ४= वराहकौ । सिंहाक्रांतं महाक्रांतं मुद्गरं पल्लवं तथा । एतामुद्राश्चतुर्विंशद्गायत्र्याः सुप्रतिष्ठिताः । ततः प्रदक्षि संदर्शयेपश्चाज्जपं स
णीकृत्य तूष्णीमेतां विसर्जयेत् । एतां सुप्रसिद्धांगायत्रीं यद्वा । देवागातुमितिमंत्रस्य मनस्पतिऋषिर्वीतो माहितः कुर्यादि
देवता विराट् छंदः विसर्जने विनियोगः । ॐ देवागातुविदो गातुं वित्त्वा गातुमित मनसस्पत इमं देवयज्ञं स्वाहा । तिशेषः ४५
वातेधाः । अनेन प्रातःसंध्याख्येन तेनजपेन श्रीभगवान्ब्रह्मस्वरूपी सविता प्रीयतां । ॐ सवित्रे नमः । ॐ गायत्र्यै

इतिजपनिवेदनं १५

१२०

12८

स्येकपदीद्विपदीत्रिपदीचतुष्पद्यपदसि नहिपद्यसे नमस्तेतुरीयाय दर्शिताय पदायपरोरजसे सावदों । ततोगायत्री विसर्जनम् । ॐभूर्भुवः स्वरिति उदकप्रक्षेपः । ततःसंध्यांप्रार्थयेत् । यदक्षरपदभ्रष्टं मात्राहीनंचयद्भवेत् । त त्सर्वंक्षम्यतांदेवि कश्यपप्रियवादिनि । ततः संध्याविसर्जनम् । उत्तरेशिखरेजाताभूम्यांपर्वतवासिनि । ब्राह्मणे भ्योह्यनुज्ञातागच्छदेवि यथासुखं । इत्युदकप्रक्षेपः । मध्याह्नेच यदिगायत्रीजपानंतरं विभ्राडित्यनुवाकेन पु रुषसूक्तेन मंडलब्राह्मणेनचाधिकफलार्थितयोपतिष्ठते । तदानंतरमेव विसर्जनम् । यदितर्पणाधिकारीत दातर्पणानंतरमिति । यदितोमध्याह्नसंध्यायां सायंसंध्यायांच विशेषः सलिख्यते । तत्रमध्याह्नसंध्यायामावा हनं । ॐसावित्रीं त्रिपदांशुक्लांशुक्लवस्त्रांत्रिलोचनां । त्रिशूलिनींवृषारूढांमूर्ध्नि अर्धचंद्रधारिणीं । यजुर्वेदकृतो त्संगां रुद्राणींरुद्रदेवतां । रुद्रलोकस्थितांदेवींरुद्रैकादशसंस्तुतां । सिद्धिदांध्यानयुक्तानां आयांतीसूर्यमंडलात् । वरदांअक्षरांसाक्षाद्देवीमावाहयाम्यहं । आगच्छवरदेदेवि त्र्यक्षरेरुद्रवासिनि । सावित्रिछंदसांमातः रुद्रयोने नमोस्तुते । इतिसाकारांसंध्यांध्यायेत् । अथाचमनम् । ॐआपःपुनंत्विति विष्णुऋषिरनुष्टुप्छंदःआपोदे

अपामुपस्पर्शने २८ वता आचमने विनियोगः । ॐआपःपुनंतुपृथिवींपृथ्वीपूतापुनातुमां पुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां । यदुच्छिष्टमभोज्यंवा यद्वादुश्चरितंमम सर्वंपुनंतु मामापो सतांचप्रतिग्रहं स्वाहा जुहोमिस्वाहा । अथविसर्जनम् ।

मध्यसंध्यांगभूतेनगायत्रीजपनेनच ।यथासंख्येनजप्येनरुद्रात्माप्रीयतांरविः। ततःसंध्याप्रार्थनविसर्जनेपूर्ववत्।
ततःसायंसंध्या । वृद्धांसरस्वतींकृष्णामायांतींसूर्यमंडलात् । वेदवीव्रतरांहान्द्राद्देवीमावाहयाम्यहं । आगच्छवर
देदेविव्रतरेविष्णुवादिनि । सरस्वतिवेदमातर्विष्णुयोनेनमोस्तुते । इतिसाकारांसंध्यांध्यायेत् । ततआचमनम् ।
अपामुपस्पर्शने
अग्निश्चमेतिरुद्रऋषिः प्रकृतीछंदः आपोदेवता आचमनेविनियोगः । ॐअग्निश्चमामन्युश्चमन्युपतयश्चम
न्युकृतेभ्यः पापेभ्योरक्षंतां यदह्नापापमकार्षंमनसावाचाहस्ताभ्यांपद्भ्यामुदरेणशिश्ना अहस्तदवलुंपतु यत्किंचि
दुरितंमयीदमहमापोमृतयोनौसत्येज्योतिषिजुहोमिस्वाहा । सायंसंध्यांगभूतेनगायत्रीजपनेनच ।यथासंख्या
न्वितेनैवविष्ण्वात्माप्रीयतांरविः । ततःसंध्याप्रार्थनम् । ततोविसर्जनम् ।तच्चयथापूर्वंविधेयं । अथसंक्षेपसंध्या ।
तत्रयाज्ञवल्क्यः । स्नानमब्दैवतैर्मंत्रैर्मार्जनंप्राणसंयमः । सूर्यस्यचाप्युपस्थानंसावित्र्याः प्रत्यहंजपः । अथमा
र्जनप्राणसंयमयोः पाठक्रमोनग्राह्यः । प्राणायामानंतरंसर्वत्रमार्जनाभिधानात् । तेनप्रथमंप्राणायामः । तत
आपोहिष्ठेत्यादिनामार्जनम् । ततोगायत्र्यासूर्योपस्थानम् । ततोगायत्रीजपः ॥ अथब्रह्मयज्ञः ॥ तत्रयोगियाज्ञ
वल्क्यः । प्रदक्षिणंसमावर्त्यनमस्कृत्वोपविश्यच । दर्भेषुदर्भपाणिःस्यात्प्राङ्मुखस्तुकृतांजलिः । स्वाध्यायंचयथा
शक्तिब्रह्मयज्ञार्थमाचरेत् । अस्मादेवज्ञापकादंजलिप्रक्षेपमारभ्यतिष्ठन्नेव । ततउपविश्यजपंनिवेद्यगायत्रींविस

ज्प संध्यावसाननिमित्तकं द्विराचमनं विधाय स्वाध्यायार्थं दर्भेष्वासीनो दर्भपाणिर्यथाशक्ति वेदादिकमारभ्य स्वाध्यायं
१२१ ब्रह्मयज्ञार्थं कुर्यात् । तद्देशमाह शौनकः ।। प्रागवोदग्वा निष्क्रम्याऽऽप्लुत्य यज्ञोपवीती क्लिन्नवासा दर्भाणां महदुप
121 स्तीर्य शलाकां तेषु प्राङ्मुख उपविश्योपस्थं कृत्वा दक्षिणोत्तरपाणी संधाय पवित्रवंतौ द्यावापृथिव्योः संधिं वीक्ष
माणः संमील्य वा यावदित्येतया परिदधाति । नमो ब्रह्मण इति कुशत्रयवत्यासने उपविष्टः कुशत्रयरजत
सुवर्णपवित्रवद्दक्षिणकरो ब्रह्मयज्ञमारभेत् । इतरेतरपादव्यवस्थापने नोपवेशनमुपस्करणमिति स्मृतिमंजरी ।
यावन्मन्येत तावदिति गायत्रीजपानंतरं यावत्पठितुं मन्यते तावदधीत्य नमो ब्रह्मणे नमोऽस्त्वग्नये इत्येतया परि
दधाति । परिदधानं । त्रिः पठनं । ग्रामे मनसा स्वाध्यायमधीयेत । दिवा नक्तं चेति श्रुतेः । स्वाध्यायो ब्रह्मयज्ञः
स्यात् पितृयज्ञस्तु तर्पणं । दैवो होमो बलिर्भूतो नृयज्ञोऽतिथिपूजनं । कात्यायनः । स्वरवर्णलयोपेतं मात्रास्था
न क्रियान्वितं । वेदमेव पठेद्यस्तु स्वाध्यायफलमश्नुते । ऋचो यजूंषि सामानि गाथाश्च ह्यमथापि वा । प्रादो वा
रभ्य वेदं च स्नानोपर्युपरि क्रमात् । यदधीते त्वहः शक्त्या तत्स्वाध्याय इति स्मृतः । गौतमः । नित्यं स्वाध्यायः पितृभ्य
श्चोदकदानम् । इतराणि शक्त्यपेक्षया कर्तव्यानीति । ब्रह्मयज्ञो नित्यः तदहर्ब्राह्मणो न भवति यदहः स्वाध्यायं ना
धीयते तैत्तिरीयश्रुतेः । मनुः । ब्राह्मणः प्रणवं कुर्यादादावंते च सर्वदा । स्रवत्यनोंकृतं ब्रह्म पुरस्ताच्च विशीर्यते ।

ब्राह्मणोयः सोप्यब्राह्मणः इति

देवीपुराणे । पठितव्यः सदा वेदः स्वरवर्णोपलक्षितः । ह्रस्वदीर्घक्रमात्सर्वं सानुस्वारं सुलक्षितं । अथ चमुच्चारयेद्भ्रान्तो
नद्रुतं न विलंबितं । अपरश्च महान्दोषः श्रूयते ऋषिभाषितः । इंद्रशत्रुं हंति वज्रेण यो पशब्दं समुच्चरेत् । उक्तंच । मंत्रोही
नः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोपराधात् । व्यासः ।
वेदस्याध्ययनं सर्वं धर्मशास्त्रस्य चापि यत् । अजानतोर्थं तत्सर्वं तुषाणां खंडनं यथा । अधीत्य यत्किंचिदपि वेदा
र्थाधिगमे रतः । स्वर्गलोकमवाप्नोति धर्मानुष्ठानवान्द्विजः । कात्यायनः । ऋचः पठन्मधुपयः कुल्याभिस्तर्पये
त्सुरान् । घृतामृतौघकुल्याभिर्यजूंष्यधिपठन्मुदा । सामान्यधिपठन्सोमघृतकुल्याभिरन्वहं । मेदः कुल्याभिरथ
वा अथर्वांगिरसः पठन् । मांसक्षीरोदनमधुकुल्याभिस्तर्पयेत्पठन् । वाको वाक्यं पुराणानि सेतिहासानि चान्वहं
पठन्मध्वाज्यकुल्याभिः स्वपितॄनपितर्पयेत् । तेतृप्तास्तर्पयंत्येनं जीवंतं मृतमेव वा । कामचारी च भवति सर्वेषु सुरवे
श्मसु । गुर्वब्धेनो नश्यशति पंक्तिं चैव पुनाति सः । यं यं क्रतुं च पठति फलभाक्तस्य तस्य सः । त्रिर्दत्त्वस्वर्णपृथिवीदा
नस्य फलमाप्नुयात् । वाको वाक्यं प्रश्नोत्तररूपवेदवाक्यं । पुराणं पंचलक्षणम् । श्रीभागवतादिः । इतिहासो महा
भारतादिः । सर्वाभावे गायत्रीमात्रमपि पठेत् । यदुक्तम् । ब्रह्मयज्ञप्रसिद्ध्यर्थं गायत्र्येकां जपेत्ततः । तेन प्रीतिं परां
याति देवदेवो जनार्दनः । मनुः । अपां समीपे नियतो नैत्त्यिकं विधिमास्थितः । सावित्रीमप्यधीयीत गत्वारण्यं समाहितः ।

१२२ अरण्यं गत्वेति यथा छदिर्न दृश्यते तथारण्यं गत्वेत्यर्थः। तथा च श्रुतिः। ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि ग्रामा
दच्छदिर्दर्श उदीच्यां वोदित आदित्ये न प्रातरित्यर्थः। तथा दर्भपाणिः स्वाध्यायं यथाशक्त्या
122 दावारभ्य वेदं। अत्रेयं व्यवस्था समस्तवेदाध्यायिना आदावारभ्य वेदं यथाशक्ति स्वाध्यायः कर्त्तव्यः। एकदेशाध्यायि
ना पुरुषसूक्तादिपाठेन। सावित्रीमात्राध्यायिना अरण्यवादिपाठेन। यथा तथ्यवेदपाठज्ञानेनैव र्णिकेन सच्छूद्रे
ण चेतिहासपुराणोक्तस्तोत्रादिपाठेन ब्रह्मयज्ञः कर्त्तव्यः। यद्यप्यध्यापनं ब्रह्मयज्ञः इत्यपनेनोक्तं तथाप्यहरहः
स्वाध्यायमधीयीतेति। ब्रह्मयज्ञ इति श्रुतेः। तत्कालमाह स्मृतिः। योयं श्रुतिजपः प्रोक्तो ब्रह्मयज्ञः स उच्यते।
स चार्वाक्तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः। वैश्वदेवावसाने तु नान्यत्रेति निमित्तकं। अतेनिमित्तकं स्थूलतर्पण
निमित्तं विना। अनध्याये ब्रह्मयज्ञः कथं कार्यो मनीषिणः। इत्यत्रापस्तम्बः। मनसा वानध्याये अधीयेतेति शेषः।
एवं मानसपाठे विधानेमनुः। वेदोपकरणे चैव स्वाध्याये नैत्यके तथा। नानुरोधोस्त्यनध्याये होममंत्रेषु चैव हि।
वेदोपकरणे। शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं छंदो स्वेति। वेदांगे। शौनकः। नित्ये जप्ये च काम्ये च क्र
तौ पारायणेपि वा। नानध्यायोस्ति वेदानां ग्रहणे ग्राहणे स्मृतः। नैत्यके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतम्।
इति मानववचनमपि मानसपाठपरम्। एककल्पनालाघवात्। तत्प्रकारे कात्यायनः। ॐकारं व्याहृतीस्तिस्रो

गायत्रीत्रिपदीतथा । मनसैवनमस्कृत्यवेदादिकमुपक्रमेत् । शौनकः । याज्ञवल्क्यऋषिस्त्रिष्टुप्छन्दः सूर्योदेव
तायजुर्वेदाध्ययनेविनियोगः । इतिऋष्यादिकंस्मृत्वा । यथाशक्तिवेदादिकंपठित्वाश्रीविष्णुंप्रीणयेत् । तद्यथा ।
इतिविद्यातपोयोनिरयोनिर्विष्णुरीडितः । वाग्यज्ञेनार्चितोदेवः प्रीयतांमेजनार्दनः इतिमंत्रेणसमर्पणंविधाया
चम्यतर्पणंकुर्यात् ॥ अथतर्पणम् ॥ तत्रसत्यव्रतः । अस्नानेनविधानेनदेवर्षिपितृतर्पणं । स्वशाखाविहितं
कुर्यात्स्नानांगंप्रयोगवित् । वहुत्वंवास्वगृह्योक्तंयस्ययत्कर्मचोदितं । तस्यतावतिशास्त्रार्थेकृतेसर्वंकृतंभवेदिति
तर्पणपदंस्नानस्यापिसूचकं । तदसंभवेसाधारणात्पौराणिकं । शातातपः । तर्पणंतुशुचिःकुर्यात्प्रत्यहंस्नात
कोद्विजः । देवेभ्यश्चऋषिभ्यश्चपितृभ्यश्चयथाक्रमं । शुचिर्मलस्नानादिनाप्रत्यहमितिश्रवणान्नित्याधिकारः ।
एवंप्रातःस्नानेनापितदुदयात्पूर्वंकृततर्पणेनदिवास्नानाभावेपितर्पणंकर्तव्यमेव । अहःकालीनतर्पणस्याव
श्यकत्वात् । प्रातःस्नानंयद्युदयात्परंक्रियते तदातेनैवनिर्वाहात् । द्वितीयतर्पणंवैधस्नानपदेकरणीयमिति
वाचस्पतिः । नित्यतर्पणंतुमुख्यतोमध्याह्नेकर्तव्यंतत्स्नानउक्तत्वात् । यत्तुकश्चिदाह । प्रहराभ्यंतरेपुत्रःपित्रो
र्दद्याज्जलांजलीन् । मधुनैवरसस्तुल्योहर्षःसंजायतेपितुः । द्वितीयेतुपयोज्ञेयंतृतीयेजलमेवच । चतुर्थेशोणि
तंज्ञेयमितिधर्मविदोविदुः इतितदनिर्मूलं । काम्यंवानित्यतर्पणस्यदिनचतुर्थभागेमध्याह्नस्नानान्तउक्तेः ।

१२३ कात्यायनः । तस्मात्सदैवकर्त्तव्यमकुर्वन्महतैनसा । युज्यते ब्राह्मणः कुर्वन्विश्वमेतद्बिभर्त्तिहि । सदेतिपदं वि
हितकालस्यसूचकम् । तथा । शुचिर्वस्त्रधरः स्नातो देवर्षिपितृतर्पणं । तेषामेवहितीर्थेनकुर्वीतसुसमाहितः ।
123 ऋषितीर्थमंगुल्यग्रम् । अंगुल्यग्रमार्षमिति बोधायनोक्तेः । अन्यानिप्रागुक्तानि । योगी । नजीर्णेननणी
वाससेतिशेषः लेननसूच्याग्रथितेनच । मलीमसेननातीवबुधस्तर्पणमाचरेत् । नवैरजकधौतेनधातुरक्तेनवाक्वचित् ।
दिवोदासे । पैतृकंपितृतीर्थेनदेवतीर्थेनदैविकं । कर्मकुर्यात्प्रयत्नेनविपरीतंतुरोगदं । स्नानांगमपीदं ।
नित्यंनैमित्तिकंकाम्यंत्रिविधंस्नानमुच्यते । तर्पणंतुभवेत्तस्यअंगत्वेनव्यवस्थितमितिब्रह्मपुराणवच
नात् । अंगत्वेपिचसंध्यावंदनव्यवधानेनास्यानुष्ठानं सूत्रकारवचनादेव अतोयत्रसंध्यावंदनप्रसंगस्तत्रा
व्यवधानमेव । व्यासः । स्नानेनैवतुसर्वत्रतर्पयेत्पितृदेवताः । काम्येनित्येविशेषेणतच्चकुर्यात्प्रयत्नतः ।
काम्येतीर्थादिस्नाने । काशीखंडे । रवेरर्च्चांविधायैवततस्तर्पणमाचरेत् । दर्भान्सगर्भानादायनवसप्ताथ
पंचवा । साग्रान्समूलानच्छिन्नान्द्विजोदक्षिणपाणिना । दिवोदासप्रकाशे । पैत्र्यंमूलेनमध्येनमानुषंचप्र
यत्नतः । दैवंकर्मकुशाग्रेणकर्त्तव्यंभूतिमिच्छता इति । अग्रैस्तुतर्पयेद्देवान्मनुष्यान्कुशमध्यतः । पितॄंस्तु
कुशमूलाग्रैर्विधिज्ञोयंयथाक्रमात् । मनुः । यद्देवतर्पयेदद्भिःपितॄन्स्नात्वाद्विजोत्तमः । तेनैवसर्वमाप्नोति

पितॄयज्ञक्रियाफलं । छंदोगपरिशिष्टे । नाग्नंतिपितरस्तस्य कृत्वाहत्कमलेतु यः । न तर्पयति तान्मन्नचारे हात्त्रदुधि
रं तुते । पिबंतिसर्वनाशं च कुर्वंत्यथपदेपदे । तस्मात्प्रयेन च पितॄंस्तर्पयेत्सततं बुधः । वायुपुराणे । देवतांश्च पितॄं
श्चैव मुनीन्वै योनतर्पयेत् । देवादीनामृणीभूत्वा नरकं सव्रजत्यधः । इतिविष्णुस्मृतौ । स्नातश्चार्द्रवासा देवर्षिपि
तृतीर्थेनाभस्य एव तर्पणं कुर्यात् । परिवर्तितवासाश्चोत्तरीयमवतीर्य्याश्रंभस्य एवेति छंदोगविषयं । वाजसनेयिनां
स्थलस्थानां स्थल एव कात्यायनेन शुष्कवस्त्रपरिधानानंतरं तत्कथनात् । स्थलाशौचपदे जलस्थैर पितत्कार्यं ।
यदाह योगी । यत्राशुचिः स्थलं वा स्यादुदके देवताः पितॄन् । तर्पयेत्तु यथाकामम प्सु सर्वं प्रतिष्ठितं । उदकेन उद
के स्थितः । चतुर्विंशतिमते । स्नानादनंतरं तावत्तर्पयेत्पितृदेवताः । उत्तीर्य पीडयेद्वस्त्रं संध्या कर्म ततः परं । इत्यत्र
संध्या कर्म गायत्री जपः । स च जलसंध्याकरणपक्षे शाखांतरविषयो वा । अत्र जलसंध्यावंदनपक्षे उपस्थानपर्यंता
संध्या जले ततो दशगायत्री जपः । ततस्तर्पणं । तत उत्तीर्य वाससी परिधायासंस्कृताद्दीनुद्दिश्य अस्मत्कुलेतु ये
जाता अपुत्रा गोत्रजा मृताः । ते पिबंतु मया दत्तं वस्त्रनिष्पीडनोदकं इत्यनेन वस्त्रं निष्पीडय । ततश्चावाह
नादि सहितगायत्री जपो ब्रह्मयज्ञस्थले कार्यः । तर्पणानंतरमपि । अस्मत्पक्षस्य नृसिंहपुराणादौ दर्श
नात् । अत्र कात्यायनो क्तक्रमभंगो गोभिलयाज्ञवल्क्योक्ता दीक्षानुरोधात् । बौधायनः । एवं तीर्थनि

१२४ रुद्धासु त्रयो वर्णा द्विजातयः । प्रातरुत्थाय कुर्वीरन्देवर्षिपितृतर्पणं । निरुद्धासु न कुर्वीरन्नंशभाक्तत्र सेतु
124 कृत् । तस्मात्परकृतान्सेतून्कूपांश्च परिवर्जयेत् । उद्धृत्य वापि त्रीन्पिंडान्कुर्यादापत्सु नो सदा । निरुद्धासु
च पिंडांस्त्रीन्कूपात्त्रीश्च घटांस्तथा । शंखलिखितौ । नेष्टकाचित्येपि पितॄंस्तर्पयेत् । वापीकूपतडागोदपानेषु
सप्त त्रीन्वा पिंडानुद्धृत्य देवान्पितॄंस्तर्पयेत् । ससोपानः कूपो वापी यथासंख्यं वाप्यादौ सप्तपिंडाद्युद्धारः ।
एवं यद्यपि वाप्यादौ स्नाने तर्पणे च पिंडोद्धारः । कूपे तु घटत्रयोद्धारः कथितस्तथापि स्नानकरणपक्षे स्ना
नस्य पूर्वकृतत्वात् । तदंगतर्पणेनैव प्रसंगात् । स्वतंत्रतर्पणस्यापि सिद्धिः । न पृथक् पिंडोद्धारः कार्यः
एकप्रयोगात् । यदाह योगी । उपस्थानादयस्तासां मंत्रवत्कीर्तितो विधिः । निवेदनांतं तत्स्नानमित्याहुर्ब्रह्म
वादिनः । उपस्थानं उरुं हीत्यादि । निवेदनं तु देवागातुविद इत्यादि । तर्पणोत्तरं तासां अपां रोगादिवशाच्च
स्नानमकृत्वैव मार्जनादिना शौचमुत्पाद्य वाप्यादौ तर्पणपक्षे तर्पणपूर्वं समय एव पिंडाद्युद्धारः कार्यः । अव
धानस्यौत्सर्गिकत्वात् । एवं च मध्याह्नसंध्यायाः स्वतंत्राया अपि स्नानप्रयोगांतर्भावात् । अत एव लोके तावद्दे
वकर्मणो नैरंतर्येणानुष्ठानम् । दिवोदासे । दक्षिणं पातयेज्जानु देवान्परिचरन्सदा । पातयेदितरं जानु पितॄ
न्परिचरन्नपि । परिचरं स्तर्पयन् । बृहत्पराशरे । अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु । दक्षिणं जानु भू

लग्नं देवेभ्यः सिंचयेज्जलं । तथा । उभाभ्यां सिंचयेद्वारि आकाशे दक्षिणामुखः । पितॄणां स्थानमाकाशं
दक्षिणा दिक्तथैव च । आकाशोऽत्राऽनाच्छादितदेशः । पराशरः । मूलग्नसव्यजानुश्च दक्षिणाग्रकुशेषु च ।
तत्कारोप्य तिलैस्ताम्रैर्दर्भमंत्रैः क्षिपेत्पयः । योगी । पात्राद्वा जलमादाय शुभे पात्रांतरे क्षिपेत् । जलपूर्णे त
था गर्त्ते न स्थले तु विवर्हिषि । केशभस्मतुषांगारकंटकादिसमाकुलं । भवेन्महीतलं यस्मात्तस्माद्वहिस्तं तच
रेत् । शुभे ऽनिषिद्धे । हेमरूप्यमयं पात्रं ताम्रकांस्यसमुद्भवं । पितॄणां तर्पणे प्रोक्तं मृण्मयं तु परित्यजेदिति ।
पितामहोक्तेः । मृण्मयं केवलकुलालचक्रनिष्पन्नं निषिद्धं । तस्यैव पुनः हलघटितस्य ग्रहणात् । तथा का
त्यायनः । आहरेण तु पात्रेण यस्तु दद्यात्तिलोदकं । पितरस्तस्य नाश्नंति दशवर्षाणि पंच च । कुलालचक्रनि
ष्पन्नमाहरं मृण्मयं स्मृतं । तदेव हस्तघटितं स्थाल्यादि दैविकं भवेत् । दैविकमित्युपलक्षणं । तेन पैतृकमपि ।
तदेव कुलालचक्रनिष्पन्नं सत्पुनर्हस्तघटितं स्थाल्यादि दैविकं भवतीत्यर्थः । व्यासः । अन्तश्छिन्नेन यद्दत्तं यद्द
त्तं विधिवर्जितं । अनाकाशस्थितेनापि तज्जलं रुधिरायते । अनाकाशस्थितेन गृहाभ्यन्तरस्थितेन मंडपा
दिना । अंतर्द्वीपे गृहस्यांतर्नद्याः पारे विनोदयं । तर्पणं न तु कर्त्तव्यं पितॄणां च कदाचनेति स्मृतेः । विनोदयं वे मिति २
धोदिवा तर्पणाकरणपक्षे वेदितव्यः । प्रातःस्नाने तद्विधानात् । व्यासः । गृहमध्ये तु यत्तोयं यत्तोयं विधिवर्जितं ।

१२५ 125 तिलहीनं तु यत्तोयं तत्तोयं रुधिरं भवेत् । याज्ञवल्क्यः । आवाह्य पूर्ववन्मंत्रैरास्तीर्य च कुशान् शुचीन् । प्रागग्रेषु सुरा
न्सम्यग्दक्षिणाग्रेषु वै पितॄन् । सव्यं जान्वं तथान्वाच्य पाणिभ्यां दक्षिणामुखः । तल्लिंगैस्तर्पयेन्मंत्रैः सर्वान्पितृग
णांस्तथा । मातामहांश्च सततं श्रद्धया तर्पयेद्बुधः । प्राचीनावीत्युदकं तु प्रसिंचेद्वै तिलान्वितं । यदुद्धृतं प्रसिंचेद्वै ति
लान्संमिश्रयेज्जले । अतोन्यथा तु सव्येन तिला ग्राह्या विचक्षणैः । दक्षिणे पितृतीर्थेन जलं सिंचेद्यथाविधि । दक्षि
णे नैव गृह्णीयात्पितृतीर्थसमीपतः । तिलानामप्यलाभे तु सुवर्णरजतान्वितं । तदभावे निषिंचेत्तु दर्भैर्मंत्रेण
वाप्यथ । मंत्रैर्देवानावाह्य तर्पयेत् । तथा मंत्रैः पितॄनावाह्य तर्पयेत् । कथं तर्पयेदित्याकांक्षायां पूर्ववद्दैववत् ।
तेन पितृतर्पणवाक्येपि । पितातृप्यतामिति च लभ्यते । भिन्नविषयत्वेन मंत्रशब्दद्विरुक्तिरदोषाय । कैर्मंत्रैरि
त्याकांक्षायां तल्लिंगैः पितृत्वप्रकाशकैः । अत्र कस्य मंत्रस्य कुत्र विनियोगः । आवाहनं देवानां । विश्वेदेवास आग
त शृणुत म इमं हवं इदं बर्हिर्निषीदत । विश्वेदेवाः शृणुत देवा आगच्छंत्विति । पित्र्यावाहनं तु । उशंतस्त्वे
ति आयंतु न इति आगच्छंतु पितर इत्यत्र मंत्रैरिति बहुत्वं पर्यवसितं । तेन देवावाहनेपि मंत्रत्रयं । पित्र्यावाहनेपि
मंत्रत्रयं । यद्वा मंत्रैरिति बहुत्वं मिलितमंत्रपरं । तेन । आस्तीर्य च कुशान्सम्यक् प्रांजलानावाह्य सन्मंत्रवान् । प्राचीनाग्रेषु
वै देवान् याम्याग्रेषु तथा पितॄन् इति ब्रह्मपुराणे । विश्वेदेवास आगत । विश्वेदेवाः शृणुत इत्याभ्यां मंत्राभ्यां ब्रह्म

दीनावाह्य तर्पयेत् । उशंतस्त्वा आयंतुन इति मंत्राभ्यां पितॄनावाह्य पितृलिंगैर्मंत्रैः पितॄंस्तर्पयेत् । इति । कल्प
तरुरत्नाकरवाचस्पत्यादयोप्येवमेव । केचित्तु । मंत्रैरावाह्य प्राचीनकुशानास्तीर्य प्रागग्रेषु कुशेषु सुरांस्तर्पयेत् ।
दक्षिणाग्रेषु तल्लिंगैर्मंत्रैः पितॄंस्तर्पयेत् । पितृतर्पणे प्रयोगाकांक्षायामिह । पूर्ववदिति देववदिति । तेन
पितामहप्रपितामहानिति सिद्ध्यति । पित्र्यावाहनं कार्ष्णाजिनकथितक्रमेण । तद्यथा । नाभिमात्रे जले स्थित्वा चिंतयेदूर्ध्व
मानसः । आगच्छंतु मे पितर इमं गृह्णंत्वपोंजलिं इति जलतर्पणायते चात्र नाभिमात्रजलावस्थानं द्रष्टव्यं । प्राचीना
वीतीकृतापसव्यः । प्रसिंचेद्दद्यात् । अत्र मंत्रान्वयोवश्यं कार्यः । यथोक्तं । तस्मान्मंत्रैः सदा देयं पौराणैर्वैदिके
रपि । अन्यथा तेन गृह्णंति भूतानामुपतिष्ठति । एवं देवमनुष्ययमतर्पणेप्यूह्यं । तेन ओं भूर्भुवः स्वः ओं आ
गच्छंतु ब्रह्मादयो देवा इमान् गृह्णंत्वपोंजलीनिति । एवं मनुष्यादितर्पणेपि । आज्यं द्रव्यमनादेशे जुहोतिषु विधी
यते । मंत्रस्य देवता याश्च प्रजापतिरिति स्थितिः । इति कात्यायनोक्तेः । प्रजापतिर्द्रष्टृत्वाद्याहृतर्पणे गृह्यते ।
इति शिष्टाः । तथा । दैविकं सकलं कर्म कर्तव्यमुपवीतिना । प्राचीनावीतिना पैत्र्यं मानुष्यं तु निवीतिनेति इत्युक्तेः ।
यदित्यादि पात्रस्थितं जलमादाय तर्पणे तदा पात्र एव तिलाः क्षेप्तव्याः । तेपि दक्षिणहस्तेनैव । दक्षिणस्तत्र वि
ज्ञेयः कर्मणां पारगः करः इति वचनात् । जलाशयस्थं जलमादाय तर्पणे वामेन पाणिना गृहीत्वा तिलाश्च ज

लोमेलनीयाः। दक्षिणे इति। जलाशयास्थितेन तर्पणे वामपाणिमूलस्थापितात्तिलात् दक्षिणांगुष्ठजन्यो
रंतरेणं जलो मेलनीयाः। तथा मदनपारिजाते। वामहस्ते तिलान्क्षिप्त्वा जलमध्ये तु तर्पयेत्। स्थलेशा
स्त्रं वा तटे पात्रे रोमकूपे न कुत्रचित्। तथा। रोमस्थैर्यत्तिलैः कुर्याद्देवतापितृतर्पणं। तर्पितास्तेन पितरः स्व
मांसरुधिरास्थिभिः। यत्तु। अंगस्थैर्यत्तिलैः कुर्याद्देवतापितृतर्पणं। रुधिरं तद्भवेत्तोयं प्रदाता किल्बिषी
भवेत्। इति निषेधः स तु स्थलतर्पणविषयः। बाहुद्वतैस्तिलैर्नैव स्थलस्थस्तर्पयेत्पितॄन्। जलाशयस्थस्त
कुर्यादेवं धर्मो न लुप्यते। इति स्मृत्युक्तेः। जलाशयस्थेनापि रोमरहितप्रदेशे धार्याः। यदुक्तं स्मृत्यंतरे।
ये च पाणितले घृष्टा रोमकूपेषु ये स्थिताः। ते तिलैस्तर्पणं कुर्यात्पितृघाती भवेन्नरः। तस्मात्त्रिमणिवंधेषु धार्या
विप्रैः प्रयत्नतः। विशेषोऽयं जले प्रोक्तः स्थले नैव कदाचन। पराशरः। न तर्पयेत्पतंतीभिर्विद्वानद्भिः कदा
चन। पात्रस्थाभिः सदर्भाभिः शीतलाभिश्च तर्पयेत्। आचारचिंतामणौ। पितृतीर्थेन गृह्णीयात्पितृती
र्थेन निःक्षिपेत्। पितृतीर्थमुपलक्षणार्थं। तत्तत्तीर्थेनेत्यर्थः। यत्तु शंखः। नोदकेषु न पात्रेषु न क्रुद्धो नै
कपाणिना। नोपतिष्ठति तत्तोयं यन्न भूमौ प्रदीयते। तत्तटस्थतर्पणविषयं। अप्रसंस्कृतभूमीतविषयं वा।
भूमौ यदापो दीयंते दाता चैव जले स्थितः। वृथा तद्दीयते तोयं नोपतिष्ठति कस्यचित्। इति यमोक्तेः। भूमि

पदं पवित्रस्नानस्योपलक्षणं । आचारप्रदीपे । गजाश्वरथपृष्ठेषु गृहमध्येषु कालेषु च । न तर्पयेत् पितॄन्देवांश्च
जलस्थः स्थले क्वचित् । आपो देवगणाः सर्वे आपः पितृगणास्तथा । तस्माज्जले जलं दद्यात् पितृभ्यो दत्तम
क्षयं । इति कार्ष्णाजिनिवचनेन नदीविषयम् । समुद्रगासु कुर्वाणः स्नानं द्विजो जलं क्षिपेत् । अन्येष्वपि
च तीर्थेषु तटेष्वपि क्षिपेत्क्षणः । इति संस्कारे पितृगीतासूक्तेः । तथा । जलमध्ये जलक्षेपो गंगादिषु विधी
यते । ह्रदादिषु तटक्षेपो नोयात्तु जलमध्यतः । अत्रैवं व्यवस्था । नदीषु जलस्थतर्पणे जल एव प्रक्षेपः ।
तटस्थतर्पणेऽपि जले । ह्रदादिस्थावरतीर्थेषु जलस्थेन जले स्थलस्थेन स्थले । तडागादिकृत्रिमे
जलस्थेनापि तटस्थेनापि तट एवेति । ननु परिधानानंतरं पूतः पंचभिर्ब्रह्मयज्ञैरद्भिरेवाम्बु यथो
त्तरं देवान्पितॄंश्च तर्पयेदित्यपामेव व्यासेन तर्पणजलप्रक्षेपाधिकरणत्वेनाभिधानात् । बोधायनेनापि ।
वासः परिधानानंतरमप्सु तर्पणविधानात् । हरिहरेणापि जलसमीपस्थेन जल एव प्रक्षेप्तव्यम् ।
यदा चोद्धृत्य जलं तर्पणे तदैव स्थले इत्यभिधानाच्च । उदकेनोदकं कुर्यात् पितृभ्यश्च कदाचन । उन्नी
र्य च स्वयं शुचौ देशे कुर्यादुदकतर्पणमिति । शंखेन तट एव तद्विधानात् विरोधापत्तिरिति चेन्न । अत्र शा
खाभेदेन व्यवस्था । व्यासबोधायनवाक्यं शाखान्तरविषयं । शंखवाक्यं वाजसनेयिपरं । वाजस

नैमित्तिकं स्थलस्थः स्थले कात्यायनेन तथाभिधानात्। यद्वा व्यासबौधायनवाक्यं नदीविषयं। शंखवाक्यं
तडागविषयम्। इति भिन्नविषयत्वाद्विरोधः। प्रेतस्नानपरं वा। मदनपारिजाते। भानौ भौमे त्रयोदश्यां नं
दाभृगुमघासु च। पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणं। पिंडदानमिह तत्तद्वारतिथिनिमित्तकश्राद्धवि
षयं। न त्वयाहापरपक्षादिश्राद्धविषयम्। तीर्थे सांवत्सरे प्रेते पितृयागे महालये। पिंडदानं प्रकुर्वीत यु
गादिमरणे मघे। इति व्यासोक्तेः। अपरार्के। सप्तम्यां रविवारे च गृहे जन्मदिने तथा। भृत्यपुत्रकल
त्रार्थी न कुर्यात्तिलतर्पणं। अत्र सप्तम्यां गृहे तिलतर्पणं न कुर्यादित्यन्वयः। एवमुत्तरत्रापि। सप्तम्यां
रविवारे च जन्मर्क्षे दिवसोत्सवे। गृहे निषिद्धं सतिलं तर्पणं तद्बहिर्भवेदिति सत्यव्रतोक्तेः। तेन निषिद्ध
तिथिवारदिनर्क्षेषु गृहे तिलतर्पणं न कुर्यादिति समुदायार्थः। अत्र गृहपदं उद्धृतोदककृत्रिमपरम्।
बहिःपदं नद्यादितीर्थपरमिति परमार्थः। आचारप्रदीपे। रविशुक्रत्रयोदश्यां सप्तम्यां निशि संध्ययोः।
श्रेयोर्थी ब्राह्मणो जातु न कुर्यात्तिलतर्पणं। संध्ययोरिति प्रातःसायंसंध्ययोः। तेन प्रातःस्नाने उदयात्पू
र्वं तिलतर्पणं न कार्यं। जलमध्ये तु कर्तव्यं केवलं कुशवारिणा। प्रातःस्नाने न कर्तव्यं कदाचित्तिलतर्पणं।
इति व्यासोक्तेः। ब्राह्मणपदं तर्पणाधिकारमात्रोपलक्षकम्। हलायुधेपि। द्वादश्यां निशि सप्तम्यां रवि

शुक्रदिने तथा। श्राद्धे जन्मदिने चैव न कुर्यात्तिलतर्पणं। श्राद्धपदं तयाहेतरश्राद्धपरम्। तयाहेत्वाथ
संक्रांतौ ग्रसिते शशिभास्करे। न वारतिथिदोषोस्ति कुर्यात्तिलतर्पणमिति नागदेवाचारप्रदीपोक्तेः।
मदनपारिजातेऽप्येवमाह। तीर्थे तिथिविशेषे च गयायां पितृपक्षके। निषिद्धेपि दिने कुर्यात्तर्पणं तिलमि
श्रितं। तिथिविशेषे अमावास्यादिविशिष्टपर्वणि। नीलवृषोत्सर्गणे च अमावास्या तिलोदकैः। वर्षासु दीप
दानेन पितॄणामनृणो भवेदिति स्मृत्युक्तेः। तथा। अयने विषुवे चैव संक्रांतौ ग्रहणेषु च। उपाकर्मे वृ
षोत्सर्गे युगादौ मृतवासरे। सूर्यशुक्रादिवारेपि न दोषस्तिलतर्पणे। स्कांदेपि। तीर्थमात्रेपि कर्तव्यं तर्पणं
सतिलोदकैः। अन्यथा तर्पयेद्यस्तु स विष्ठायां भवेत्क्रिमिः। विशेषतस्तु जाह्नव्यां सर्वदा तर्पयेत्पितॄन्। न
कालनियमस्तत्र क्रियते सर्वकर्म हि। अत्रसरेतिपदं संध्यारात्र्योरपि सूचकम्। अकालेप्यथवा काले तीर्थ
श्राद्धं तथा नरैः। प्राप्तैरेव सदा कार्यं पितृव्यपितृतर्पणमिति देवीपुराणोक्तेः। तथा। यो नित्यं तर्पयेत्तीर्थे
पितॄन्कृष्णतिलोदकैः। बंधनान्मोचयित्वा तान्स्वयं विष्णुपुरं व्रजेत्। यत्तु रामायणे। मार्दशोर्चं विनाप्यर्कं
तिलहीनं च तर्पणं। सर्वं तत्त्रिजटे तुभ्यं यच्च श्राद्धमदक्षिणं। तथा। तर्पणं तिलहीनं च यच्च दानं विनोदकं।
निरासनं च यत्कर्म तत्सर्वं राक्षसं विदुः। इति। तद्धिहि तद्दिनाकरणे वेदितव्यं। निषिद्धदिनमासाद्य यः कुर्या

१२८ त्रिलतर्पणं । रुधिरं तद्भवेत्तोयं दाता च नरकं व्रजेदिति । ननु कृत्यांतरविधि तत्रैव दोषश्रवणात् । यदिशूद्रो जा
128 ड्यादिना करोति तदा शुक्लतिलैः कार्यम् । यदि कुर्यात्तदा कुर्याच्छुक्लैरेव तिलैरिति काशीखंडोक्तेः । तत्रापवा
दमाहस्मृतिः । श्वेतैस्तिलैश्च तर्पण्या मारणे पैश्च त्रयोदशी । निशि संध्यासु पर्वेष्वेव रवौ शुक्रे च तंडुलैः । संध्या
त्र प्रातः सायं संध्या । मध्याह्ने संध्यायां तद्विधानात् । मरीचिः । मुक्तहस्तं प्रदातव्यं मुद्रां नैव प्रदर्शयेदिति ।
मुक्तहस्तं प्रसारितहस्तं । मुद्रा तर्जन्यंगुष्ठसंयोगः । पितृतीर्थनिरोधनापत्तेः । शंखः । सौवर्णेन पात्रेण
वा राजतेनौदुंवरेण खड्गपात्रेण शंकुना वाप्युदकं पितृतीर्थस्पर्शं दद्यात् । यथांजलिभंगो न भवति
तथापि पितृतीर्थस्पृष्टजलं भवति । तादृशेन सौवर्णादिपात्रेणांजलिस्थेन तर्पयेदित्यर्थः । शंकुर्हि
रणपादिद्युरितकीलकः । आचारचिंतामणौ । सत्यव्रतः । हिमेन सह यद्दत्तं क्षीरेण मधुना तथा । तद
प्यलयतां याति पितॄणां तु तिलोदकं । हिमं कर्पूरं । नारदः । ताम्रपात्रे गृहीत्वा तु क्षीरसर्पिस्तिलान्मधु ।
पातयेत्पितृधर्मेण पितॄणां तृप्तिहेतवे । ननु । ताम्रपात्रे च यद्दत्तं कर्पूरं चंदनं तथा । येस्यापर्यंतिते
न स्वाम मद्यतुल्यं घृतं विना । दीपाग्निना तु श्राद्धेषु धूपं प्रज्वालयेद्बुधः । निराशाः पितरो यांति सर्वे देवग
णैः सह । इतीरा च मजादीरं शंखं च बहु वल्लीपतिं । नीलीरक्तं तु दृष्ट्वैव पितरो यांति दूरतः इति । ताम्रे

गव्यनिषेधात्कथं ताम्रपात्रे क्षीरतर्पणम्। सत्यं। निषेधस्य सामान्यकर्मविषयत्वात् विधिस्तु तर्पणादिविशे
षकर्मविषयस्तेन सामान्याद्विशेषो बलवानिति न्यायेनाविरोधापत्तेः। होमकाले तथा दोहे पाके च परिवेषणे।
स्नाने तर्पणदानेषु ताम्रे गव्यं न दुष्यति इति षट्त्रिंशन्मतञ्च। मरीचिः। रजते मनसा याय्यात्सुवर्णे हस्तनिर्मि
ते। तिलेषु च लणाङ्गच्छेत्ताम्रे तु द्विमुहूर्त्ततः। दर्भैः सप्तमुहूर्त्तैस्तु मंत्रयुक्तं तदक्षयं। रजत इति हस्तधृते इ
त्यर्थः। एवं सुवर्णादिष्वपि याय्यात्तिष्ठन्निति शेषः। तथा च मनुः। राजतैर्भाजनैरेषामथवा रजतान्वितैः।
वार्यपि श्रद्धया दत्तमक्षयायोपकल्पते। इति तात्कालिकपितृतर्पणेऽक्षयतृप्तिकामनया राजतेन पात्रेण पितॄं
स्तर्पयेदित्याशयः। मरीचिः। विना रूप्यसुवर्णेन विना ताम्रतिलैरपि। विना दर्भैश्च मंत्रैश्च पितॄणां नो
पतिष्ठति। शातातपः। खड्गमौक्तिकहस्तेन कर्त्तव्यं पितृतर्पणं। मणिकांचनदर्भैर्वा न शुद्धेन कदाचन।
नात्र रजतादिसमुच्चयो विवक्षितः। मणिकांचनदर्भैर्वेति विकल्पविधानात्। यदाह पुनः स एव। नामगोत्र
स्वधामंत्राः पितॄणां प्रापकास्तथा। इति गोत्रसंबंधनामव्याहरणपूर्वकं स्वधाशब्दान्तं पितृभ्यो दद्यात्। अत्राहुः।
अत्र रजतादिभिरशून्यो हस्तः कार्यो न रजतादिपात्रस्वीकारः। तथासति। तर्जन्यां रजतं धार्यमित्यादिविधाय
कवाक्यबाधापत्तेः। तत्र रजतादिपात्रप्रशंसावैयर्थ्यापत्तेः। न च रजतादिपात्राणां श्राद्धप्रकरणपठितत्वादर्घ्य

१२९ दानविषयत्वमेवेति वाच्यं। सौवर्णेन पात्रेणेत्यारे तर्पणप्रकरणे शंखेनाभिधानात्। तेन वाक्ये कृतया
129 सौवर्णादिपात्राणां पितृकर्मांगत्वोपदेशेन पितृतर्पणविषयतोपपन्नेरिति। वारणे यत्नायचरन् इ
त्यस्याधानप्रकरणोक्तवाक्यस्य क्रतुसंयोगात्। तदुक्तम्। अनामिकाधृतं हेम तर्जन्यां रूप्यमेव च। क
निष्ठिकाधृतं खड्गं तेन पूतो भवेन्नरः। इति हेमादिधारणस्य पुरुषार्थताप्रतिपादनपरत्वाच्च। शंखादि
वाक्योक्तहिरण्यादिपात्राणां तर्पणकरणत्वोपदेशेन कृत्वर्थप्रतिपादनपरत्वात्। योगी। तृप्यत्विति स
मुच्चार्य तृप्यतामित्यथापि वा। विधिज्ञस्तर्पयेन्नोयं देवादीनामशेषतः। यदि स्याज्जीवत्पितृकस्तान्
दिव्यपितॄंस्तथा। येभ्यो वापि पिता दद्यात्तेभ्यो वापि च दापयेत्। एतांश्च वक्ष्यमाणांश्च प्रमीतपितृको द्वि
जः। वसुरुद्रादित्यादीन्नमस्कारस्वधान्वितान्। एते सर्वस्य पितर एवायताश्च मातरः। आचार्यान्स्वा नवा: ५८
न्विनश्चैव पितृप्रभृतिनामतः। नमस्कारेत्यादिकं वक्ष्यमाणानां सर्वेषां विशेषणमसंकोचात्। तेन वस्व
धादीनामिव वस्वपित्रादीनामपि वक्ष्यमाणपदार्थानां स्वधा नम इत्येव त्यागः। स्वमात्रादिषु च सर्वेषां स्व
धाकारमात्रम्। माता मातृष्वसा चैव मातुलानी पितृष्वसा। दुहिता च स्वसा चैव शिष्यर्त्विक्ज्ञाति
बांधवाः। नामतस्तु स्वधाकारैस्तर्प्यास्युरनुपूर्वशः। इति वाचस्पतिः। तर्पणक्रममाह शंखः।

पितृपक्षेयावंतोनामज्ञायंतेतावत्पितृपक्षाणामुदकतर्पणंकृत्वागुरूणांकुर्यात् ।गुरूणांकृत्वामातृप
क्षाणांकुर्यात् ।मातृपक्षाणांकृत्वासंबंधिबांधवानांकुर्यात् ।तेषांकृत्वासुहृदांकुर्यात् । यमः ।अपि
नःसकुलेजातोयोनोदद्याज्जलांजलीन् ।नदीषुबहुतोयासुशीतलासुविशेषतः। हारीतः ।देवाश्च
पितरश्चैवकांक्षंतःसरितंप्रति ।अदत्तेषुनिराशास्तेप्रयांतिचयथागतं ।सरितंप्रत्यागच्छंतंजलादिकांक्षंते ।
एवंचैकाहेनानानदीलाभेप्रतिनदितर्पणंकर्तव्यमितिवाचस्पतिः। तथाप्यन्यंतरे । यत्रयत्रचयोयस्य
तत्रतत्रोपतिष्ठते ।बहुगोषुयथानष्टांवत्सोविंदतिमातरं । मनुः ।त्रींस्त्रीञ्जलांजलीन्दद्यादुच्चैरुच्चरतांतु
ततः ।गोशृंगमात्रमुद्धृत्यजलमध्येजलंक्षिपेत् ।गोशृंगमात्रमितितुतीर्थंजलस्योच्चैस्तुनिर्देशः ।गोशृं
गंदशांगुलं । दक्षः ।प्रादेशमात्रमुद्धृत्यसलिलंप्राङ्मुखःसुरान् ।उदङ्मुखोमनुष्यांश्चपितॄन्द
क्षिणतस्तथा । तर्पयेदितिशेषः। तर्पणक्रमेकात्यायनः ।ब्रह्माणंतर्पयेत्पूर्वंविष्णुंरुद्रंप्रजापतिं ।
देवांश्छंदांसिवेदांस्तुऋषींश्चैवमुनींस्तथा ।पुराणाचार्यान्गंधर्वानितराचार्यपश्चिमान् । संवत्सरंसा
वयवंतर्पयेच्छ्रद्धयान्वितः ।देवीरप्सरसोदेवानुगांश्चैवनागांस्तथा ।सागरान्पर्वतांश्चैवसरितोमानुषां
स्तथा ।सनकंचसनंदनंचतृतीयंचसनातनं ।कपिलमासुरिंचैववोढुंपंचशिखंतथा ।ततोऽपसव्यं ।

१३०
130
कव्यवाडनलं सोमं यममर्यमणं तथा। अग्निष्वात्तान्सोमपांश्च बर्हिषदो यमांस्तथा। यमाय धर्मराजाय
मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च। उदुंबराय दध्नाय नीलाय परमेष्ठिने। वृको
दराय चित्राय चित्रगुप्ताय वै नमः। एकैकस्य तिलैर्मिश्रांस्त्रींस्त्रीन्दद्याज्जलांजलीन्। यावज्जीवकृतं पापं
तत्क्षणादेव नश्यति। जीवत्पितृकपुत्रस्तु होता नन्यांश्च हीतरः। मंत्रैश्च देयमुदकं पितॄणां प्रीतिवर्ध
नं। उदीरतामंगिरसः आयांत्वित्यूर्जमित्यपि। पितृभ्य इति ये चेह मधुवात इति त्र्यृचं। पितॄन्ध्याय
ता ९८ न्नासिंचेद्वै जपन्मंत्रान्यथाक्रमं। तृप्यध्वमिति च त्रिर्वै प्रांतः प्रांजलिरानतः। नमो वः इति जप्त्वा
वै ततो मातामहान्सखीन्। तर्पयेदानृशंस्यार्थं धर्मं परममास्थितः। उदीरता मंगिरस। आयांतु
न। ऊर्जं वहंतीः। पितृभ्यः स्वधा। ये चेह। मधुवात इति त्र्यृचं जपन्नासिंचेत्। तृप्यध्वमिति
त्रिः। नमो वः इत्युक्त्वा मातामहान्। आचार्यगुरुशिष्यर्त्विग्ज्ञातिसंबंधिबांधवाः। अजनपि
तास्तु देहान्ते रुधिरं च पिबंति वै। इत्यधिकार्थं तर्पयन्नल्पायुः स्यादिति भावः। तेनैषा सिद्धांतः।
पुत्रवतामाचार्यादीनां तर्पणं काम्यं। अपुत्रवतां च नित्यमिति। सावयव इति संवत्सरविशेष
णं। चतुर्विध इति भूतग्रामविशेषणं। ब्रह्माणमित्युपक्रम्य भूतग्राम इति ननु विरुद्धो

पसंहारेणप्रयोगंदर्शयति । तत्र ॐब्रह्मादयस्तृप्यतामित्यादिरूपेणतर्पणवाक्यंकर्तव्यम् । यथायोगीयाज्ञवल्क्यः ।
अन्वारब्धेनसव्येनपाणिनादक्षिणेनतु । देवादींस्तर्पयेद्धीमानुदकांजलिभिःपितॄन् । एकहस्तेनतोयेनन
कुर्यात्पितृतर्पणं । पितरोनप्रशंसंतिनप्रशंसंतिदेवताः । कार्ष्णाजिनिः । श्राद्धेविवाहकालेचपाणिनैके
ननिर्वपेत् । तर्पणेतूभयंकुर्यादेषएवविधिःस्मृतः । ततोनिवीत्यभिधानात् । पूर्वमुपवीतित्वमायाति ।
यथोक्तंतेनैव । ब्रह्मादीनुपवीतीतुदेवतीर्थेनतर्पयेत् । निवीतीकायतीर्थेनमनुष्यान्सनकादिकान् । काय
तीर्थंकनिष्ठामूलं । यथा । पंचतीर्थानिविप्रस्यकरेतिष्ठंतिदक्षिणे । ब्राह्मंदैवंतथापैत्र्यंप्राजापत्यंचसौम्यकं ।
ब्राह्मंपश्चिमरेखायांदैवमंगुलिमूर्द्धनि । प्राजापत्यंकनिष्ठायांमध्येसौम्यंप्रकीर्त्तितं । अंगुष्ठस्यप्रदेशिन्या
मध्येपित्र्यंप्रकीर्त्तितं । कुर्यादहरहस्त्वेवंसम्यक्स्नात्वाविधानतः । अत्रापिसनकस्तृप्यतामितिप्रयोगोनांज
लिद्वयं । यथा । एकैकमंजलिंदेवाद्वौद्वौतुसनकादयः । अर्हंतिपितरस्त्रींस्त्रीन्स्त्रियश्चैकैकमंजलिमित्यत्र
स्त्रीपदंमात्रादित्रयेतरपरमित्यवसीयते । नागदेवाचारप्रदीपे । सालंकायनः । मातृमुख्याश्चयाःस्त्रियस्ता
सांदद्याज्जलांजलीन् । त्रींस्त्रींश्चैवततश्चान्यास्तासामेकैकमंजलिं । पुनस्तत्रैव । मातापितामहीचैवतथैवप्रपि
तामही । एतासांपितृवद्दद्याच्छेषास्त्वेकैकमंजलिं । अन्येतुमात्रादित्रयेपंजलित्रयदानमाश्वलायनानामित्या

१२९ हुः । अपरे तु काम्यम् । ततोऽपसव्यमिति पितृधर्मोपलक्षणं । तेन दक्षिणाभिमुखपातितवामजानुत्वं अ
(२) पत्र । अपसव्यं ततः कृत्वा स्थित्वा वै दक्षिणामुखः । पितॄंस्तर्पयितुं दर्भैः पितृतीर्थेन तर्पयेदिति ।
पैठीनसिवाक्यात् । कव्यवाडादितर्पणं जलित्रयं पितृधर्मकत्वात् । कव्यवाड्डासावनलश्चेति षुत्पत्त्या कव्य
इत्येका ४ वाडनलो देवता । हव्यवाहो देवानां कव्यवाहः पितॄणामिति श्रुतेः । तथा । कव्यवाड् गुणविशिष्ट एवान
(३) लः पितृगणांतर्गतः इति वाचस्पतिः । अन्ये देवताद्वयं मन्यंते । कव्यवाडनलयो द्विवा यमा इति गोभिल
वचनात् । यमांश्चेत्येके एके आचार्या यमान् पितृपरीयामाहुः । यमाय [redacted] नमः इत्यादि तर्पण वाक्यं
सिद्ध्यति । एषावृत्तिमाह । एकैकस्येति फलमाह । यावदिति । यमतर्पणं तु । यज्ञोपवीतिना कार्यं प्राची
नावीतिना यथा । देवत्वं च पितृत्वं च यमस्यैवं द्विरूपतेति । यद्यप्येवं तथापि पितृराजत्वेन शिष्टाचार
त्वेन च पितृधर्मकत्वोररीकर्तव्या । एवं चैकेषां मते यमतर्पणमपि नित्यं । कात्यायनमते तु काम्यम् ।
तेन चतुर्दश्यादिषु नित्यत्वेनाभिधानात् । माध्यंदिनैरपि तत्र पितृविधिना कार्यं । दिवोदासेप्येवमेव ।
तथा स्कंदपुराणे । कृष्णपक्षे चतुर्दश्यामंगारकदिनं यदा । तदा स्नात्वाम्भसि तोये तर्पयेद्यम नामभिः । वृद्ध
मनुः । यां कांचित्सरितं प्राप्य कृष्णपक्षे चतुर्दशीं । यमुनां च विशेषेण प्रयतो नियतेंद्रियः । एकैकस्य तिले

मिश्रांस्त्रीस्त्रीन्कुर्यात्जलांजलीन् । दीपोत्सवे च चतुर्दश्यां कार्यं च यमतर्पणं । इत्यादिनैमित्तिकत्वश्रवणात् ।
जीवत्पितृक इति जीवो जीवन्नित्यर्थः । तेन जीवत्पितृकोपि एतान्यमादिचित्रगुप्तांतान् तर्पयेत् । अन्यांस्त्व
तर इति । इतरः प्रमीतपितृको वक्ष्यमाणेनपीत्यर्थः । उपस्थायार्कमुद्यंतं तर्पयित्वात्मनः कलाः । देवा
न्ऋषीन्पितॄन्नृश्चान्विप्रानभ्यर्च्य चात्मना इति । धेनूनां रुक्मशृंगीनां दशैव हि दिने दिने । इति श्रीभागव
ते श्रीकृष्णाह्निके दर्शनात् । कलाः अंशान्देवान्पितॄन्दिव्यान् तर्पयित्वेत्यन्वयः । यत्तु । जीवत्पिता न कुर्वी
त तर्पणं यमभीष्मयोः । कुशैस्तिलैस्तर्पणान्यैश्च कुर्यात्तर्पणमिच्छयेति । कुशतिलनिषेधात् । शुक्लैर्देव
विधिना कर्तव्यमित्यवसीयते । अन्यथा याज्ञवल्क्यविरोधापत्तेः । क्वचित् । जीवत्पितापि कुर्वीत तर्पणं
यमभीष्मयोरित्येवंरूपः पाठः । तत्र न काचिदनुपपत्तिः । मंत्रपाठस्तु प्रतिपुरुषं कार्यः । अनेन मंत्राणां कु
रणत्वावगमात् । प्रत्यंजलि तु न वाक्यं । सकृत्पठितेनैव वाक्येनांजलित्रयदानसिद्धेः । न चानुपस्थितां
जल्योः कथमग्रे दानमिति वाच्यं । भविष्यंतीनां समिधां प्राग्याग इव त्यागवत्तर्पणस्यापि यागत्वात् कुशवत्
155 देवतोद्देशकत्यागस्यैव यागत्वात् । इदमस्तु बोधसन्निधिना मानसं प्रत्यक्षीभावेन प्रयोगः । उदीरितामंगिर
सग्रायं त्विन्द्रूजेमित्यपि । पितृभ्य इति ये चेह मधुवाता इति तृचमिति योगीयाज्ञवल्क्यवचनात् ।

१३२
132

पाठक्रमापवादे बीजाभावात् । तथा जपन्प्रतिषिंचेदिति स्वस्य जपाव्यवधाने तर्पयेदित्यर्थः । तत्र यजु
षां सकृदेव पाठः इति केचित् । अन्ये तु । मंत्रे तु देयमुदकं पितॄणां प्रीतिवर्धनं । इति वचनान्मंत्राणां पि
तृतर्पणाकरणप्रतीतेरन्यवाक्येनाव्यवधानात् । आवृत्तिर्युक्तैव । अत एव मातामहानित्यत्रापि प्रत्येक
मेव मंत्रान्वयादावृत्तिः । अन्यथा मिलितेषु मंत्रान्वयः । प्रत्येकं च तर्पणार्थं यस्यापेक्षितं इति न स्यात् ।
नमो व इत्युक्त्वा मातामहांस्तर्पयेदित्यत्र वाक्यभेदापत्तेरित्याहुः । अत्रेदं प्रतिभाति । नमो व इत्युक्त्वा मा
तामहांस्तर्पयेदित्यत्रान्यथाप्रतिपत्त्या प्रतिपुरुषमेव मंत्रान्वयः । तथैव प्रकृतत्वात् । तेन च यजुषां प्रति
प्रतिपुरुषं ६ सकृदेव मंत्रपाठे न त्वावृत्तिः । प्रमाणाभावात् । एवं च पित्रादित्रये मंत्रेणाव्यवधानात् । वाक्यमावर्त्तते ।
मातामहादित्रये तु तदभावान्न वाक्यार्थावृत्तिरपीति । केचिन्मातृतर्पणं मोटकांतरेणाहुः पठंति च । पिं
डार्थं येऽस्तृता दर्भास्तैः कृतं पितृतर्पणं । सूत्रोच्छिष्टे धृता ये च तेषां त्यागो विधीयते । इत्यत्र पितृपदं
पुरुषपरं व्याचक्षते । तन्न चतुरस्रं । तथात्वे अनेकमोटकासक्तेः । कल्पनागौरवात् । शास्त्रे पितृपदेन
तर्पणविधानात्तेन पितृशब्देन मात्रादयो गृह्यन्ते । एवं कल्पनालाघवात् । यथोक्तं । कल्पनालाघवं
यत्र तत्पक्षं रोचयामहे । तदेवैकतरत्रापि निपुणं संप्रधार्यतामिति । तेन पितॄंस्तर्पयित्वा तेनैव मोटकेन मा

मात्रादयोपितर्पणी इति परामर्शः। केचित्तर्पणेपि मंत्राणामस्य व्याहृतियोगमिच्छंति। ॐ पितरो देवता त्रिष्टु
प्छंदः प्रजापतिर्ऋषिः सरस्वत्याश्विनौ देवौ उशंतस्त्वा वहेत्यस्य पितरो देवताः त्रिष्टुप्छंदः प्रजाप
नुन इतित्र्यं ३= तिर्ऋषिः। उदीरतामंगिरस आयांत्विति ऊर्जमित्यपि। एतदृचमिति प्रोक्तं पित्रावाहनकर्मणि। पितरो
देवता त्रिष्टुप् ऋषिःछंदः प्रजापतिः। ऊर्जं वहंतीः प्रजापत्यर्षिदेवता विराट् पितृभ्य इति ये चेह पितरो देव
तादयोः ऋषिः प्रजापतिः पूर्वाविराट् पूर्वांतयोत्तरा विश्वेदेवा देवताश्च गायत्रीछंदः उच्यते। ऋषिर्गौतम उ
द्दिष्टो मधुवाता इति तृचः। नमो वः पितृदैवत्यं प्राजापत्यर्षिमेव च। अत्र देवर्षितर्पणीयवादेयाः। देवान्स
र्वान्नृषीन्सर्वांस्तर्पयेतान्द्वतोदकैः इति पद्मपुराणात्। अत्र तिलास्त्विह यवाः। यवाद्भिस्तर्पयेद्देवानिति प
रिशिष्ट दर्शनात्। व्यासः। शुक्लैस्तु तर्पयेद्देवान्मनुष्यान् शबलैस्तिलैः। पितॄंस्तु तर्पयेत्कृष्णैस्तर्पयन्सर्व
दा द्विजः। इत्यत्र यवशुक्लतिलयोर्विकल्पः। देवतर्पणानंतरं मरीच्यादयो दश देवक्रमेण तर्पणीयाः म
रीचिमत्र्यंगिरसौ पुलस्त्यं पुलहं क्रतुं। प्रचेतसं वसिष्ठं च भृगुं नारदमेव चेति। देवतर्पणानंतरं याज्ञव
ल्क्येनाभिधानात्। अथ पितुः संन्यासादिना तर्पणानर्हत्वे जीवत्पितृकोपि पितामहादितर्पणं कुर्वीत।
यदि स्याज्जीवत्पितृक एतान्दिव्यान्पितॄंस्तथा। येभ्यो वापि पिता दद्यात्तेभ्यो वापि च दापयेदिति याज्ञवल्क्योक्तेः।

१३३ पुत्रस्याधिकारप्रतीतेः। एवंजीवन्मातृकेन पितामह्यादितर्पणं न कार्यं। जनन्यां विद्यमानायां यजेद्यस्तु पि
133 तामहीं। मातृघ्नः स तु विज्ञेयो नांदीश्राद्धादृते ध्रुवं। ब्राह्मणादिहते ताते पतिते संगवर्जिते। व्युत्क्रमाच्च
मृते देयं येभ्य एव ददात्यसौ। इति छंदोगपरिशिष्टवचनेन जीवतः पितुरनधिकारस्य पुत्रेणावेक्षणीय
त्वसिद्धेः। ब्राह्मणादिहतोऽत्र नारायणबलिक्रियार्हो ज्ञेयः। पतितो म्लेच्छादिक्रियापन्नः। संगवर्जितः
प्रव्रजितः। व्युत्क्रमात्स्वयं शिरश्छेदादिना। तत्र म्लेच्छस्य विष्णुद्वारेण पुत्रादिना सर्वकर्म कर्त्तव्यम्।
तदुक्तम्। माता म्लेच्छत्वमापन्ना पिता वापि कदाचन। न श्राद्धं सूतकं नैव। ईदृशशब्दानां समभ्याहृत
पाश्रिते ६= पदार्थान्वितस्यार्थबोधकत्वमुत्पत्तेः। पदजन्यपदार्थोपस्थितैरेव शाब्दबोधानुकूलत्वमिति नैयायिकसि
द्धांतः। अत एव चैषां शब्दाध्याहारनयः। शाब्दी ह्याकांक्षा शब्देनैव पूर्यते इति महोऽपि। आयं तु नः पि
तर एते पितर इति मंत्रयोर्दर्शनात् प्रामाणिकता। एके बहुपुरुषतर्पणानंतरं तत्स्त्रीतर्पणमन्यंते।
पितॄन्मातामहांश्च तर्पयित्वैषां स्त्रियः तर्प्याः। त्रीन्पितृतस्त्रीन्मातृतः पत्नीश्चेति गोभिलसूत्रात्। पि
तृभ्यः पितृपदे। मातृतः मातृपदे। अपरे त्वथाहुः। अथ दक्षिणतः प्राचीनावीती पितॄन्स्वधान
मस्तर्पयामि। पितामहान्स्वधानमस्तर्पयामि। मातॄः स्वधानमस्तर्पयामि। मातृत्रयं। मातामहान्स्वधा

नमस्तर्पयामि । मातामहीः स्वधानमस्तर्पयामि । इत्यपरार्के बोधायनवाक्यात् । आचारादर्शे । श्रीदत्ते
नापि बोधायनसूत्रानुमत्या तर्पणं लिखितं । तस्मादेवाचारप्रदीपे सत्यव्रतः । पितॄणां तर्पणं कृत्वा मातॄ
णां तदनंतरं । ततो मातामहानां च पितृव्यादीं स्ततः पुनः । तथा । पितृभ्यः प्रथमं दद्यात्ततो मातृभ्य एव च ।
ततो मातामहानां च तत्पत्नीनां ततः परं । व्यासः । पित्रे पितामहानां च मात्रे दद्याज्जलांजलीन् । माताम
हाय तु भर्तृभ्यो मातामहकुले तथा । तथा । पित्रादित्रयपत्नीनां पृथग्देयं ततो जलं । ततो मातामहानां च
क्रमेण वहितर्पणे । मरीचिः । अंते मातामहान्कृत्वा मातॄणां यः प्रयच्छति । उदकं पिंडदानं च स नरकं स तु गच्छ
ति । अत्र शाखाभेदेन व्यवस्था । षट्पुरुषतर्पणानंतरं ततः स्त्रीतर्पणं वाजसनेयिपरं । याज्ञवल्क्येन पितृतर्प
णानंतरं ततो मातामहांस्तथैव त्रिस्तथा मात्रे प्रमथे इत्याद्युक्तं । तत्र श्रुतस्यापि स्त्रीतर्पणस्य मातामहानं
तरं वाध्यते बहिरंगत्वात् । स्मृत्यंतरानुज्ञानाच्च । विष्णुपुराणे । मातृतर्पणानंतरमेव त्विष्यमित्रायम
पते इत्युक्तेः । पितृतर्पणानंतरं मातृतर्पणं । ततो मातामहानां च ततो मातामहीनां इदं शाखांतरपरम् ।
वाचस्पतिरप्येवमेव । यत्तु संग्रहकारः । तातं वा त्रितयं सपत्नजननी मातामहादित्रयं सस्त्रि स्त्रीतनयादि
तातजननीस्वभ्रातरस्तत्स्त्रियः । ताताम्बात्मभगिन्यपत्यधवयुक् जाया पिता सद्गुरुः शिष्याप्ताः पितरो मह

१२६ लयविधौतीर्थेन यातर्पणं। इदमपि यथोक्तविषयम्। स्त्रीनामन्च देयंतमुच्चार्य। देवीनामन्चस्त्रीणामितिना
१३४ मग्रकरणेगोभिलवचनात्। रविः। आचार्यगुरुबंधूनांकुर्यादुदकतर्पणं। सुहृत्संबंधिभूतानांततःकुर्या
त्तुतर्पणं। आचार्येति। आचार्यः उपनीयसांगवेदाध्यापकः। गुरुर्निषेकादिक्रियाकर्त्ता मंत्रोपदेशश्च।
बांधवः पितृष्वस्त्रीयादिः। सुहृदोमित्राणि। आचार्यादिलक्षणं यथा। उपनीयचयश्शिष्यंवेदमध्याप
येत्तथा। संकल्पंसरहस्यंचतमाचार्यप्रचक्षते। निषेकादीनिकर्माणियः करोतियथाविधि। संभावयतिचा
न्नेनसविप्रोगुरुरुच्यते। अत्रान्नसंभावनंसतिसंभवे। याज्ञवल्क्यः। सगुरुर्यः क्रियांकृत्वावेदमस्मैप्रय
च्छति। स्मृत्यंतरे। यस्तुमंत्रप्रदातास्यात्सविद्यांप्रयच्छति। गुरुतावपिकुर्वीततयोः पिंडंचतर्पणं। अत्र
निषेकादिकर्तृत्वेगुरुत्वं। तद्रहितोपनीयाध्यापके आचार्यत्वं। उपनयनवर्ज्जनाध्यापके उपाध्यायत्वं।
पितुः पितृष्वसुःपुत्राः पितुर्मातृष्वसुःसुताः। पितुर्मातुलपुत्राश्चविज्ञेयाः पितृबांधवाः। मातुःपितृष्व
सुःपुत्रामातुर्मातृष्वसुःसुताः। मातुर्मातुलपुत्राश्चविज्ञेयाआत्मबांधवाः। आत्मपितुःस्वसुःपुत्राः
आत्ममातृस्वसुःसुताः। आत्ममातुलपुत्राश्च पुंस्त्वः। बांधवानांकृत्वासुहृदांकुर्यात्। सुहृदोमि
त्राणि। मित्रायाप्यसवर्णायजलंनदेयं। सवर्णेभ्योजलंदेयंनासवर्णेकदाचनेति योगिवाक्यात्।

केचित्सवर्णपदं समानोत्कृष्टजातिपरं व्याचक्षते । तन्मते । समानोत्कृष्टवर्णायैव जलं देयं । यतस्तद्वर्णापत्तिर्दोष
त्वेनाभिहिता स्मृतिषु । अतो हीनस्योत्कृष्टत्वं न दुष्टं । उत्कृष्टस्य हीनत्वं दुष्टमेव । पितुरसवर्णस्यापि तर्पणादि शू
द्रापुत्रेण कार्यं । न ब्राह्मणेन कर्त्तव्यं शूद्रस्यत्वौर्ध्वदेहिकं । शूद्रेण वा ब्राह्मणस्य विना पारशवात्क्वचित् इति
पारस्करवचनात् । अत्रोभयत्र ब्राह्मणशूद्रग्रहणमन्येषां शेषः । ऊर्ध्वदेहिकमिति मरणोत्तरकर्मोपलक्ष
कमिति वाचस्पतिः । यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतं । स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः । भीष्मा
याप्यसवर्णैरपि भीष्माष्टम्यां तर्पणं कार्यं । भीष्माय तु जलं दद्युस्त्रयो वर्णा द्विजातयः । हलायुधः । शुक्लाष्टम्यां तु मा
घस्य दद्याद्भीष्माय यो जलं । संवत्सरकृतं पापं तत्क्षणादेव नश्यति । तथा । माघे मासि सिताष्टम्यां सलिलं भीष्म
वर्मणे । श्राद्धं च ये नरा कुर्युस्ते स्युः संततिभागिनः । तथा । अष्टम्यां च सिते पक्षे भीष्माय सतिलोदकं । अन्नं च वि
धिवद्दद्युः सर्वे वर्णा द्विजातयः । दानमंत्रः । भीष्मः शांतनवः शूरः सत्यवादी जितेंद्रियः । आभिरद्भिरवाप्नोतु
त्रोचि रवा पुत्रपौत्रोचितां गतिं । तथा पाद्मे । वैयाघ्रपादगोत्राय सांकृतिप्रवराय च । अपुत्राय ददाम्येतत्सलिलं भीष्मवर्मणे ।
सव्येनानेन मंत्रेण तर्पणं सार्ववर्णिकं । इत्यत्र सर्वपदं त्रिवर्णपरम् । अत इदं तर्पणं त्रैवर्णिकैः कार्यं । द्विजाति
पुरस्कारेण कथनात् । अथ पद्मपुराणीयतर्पणम् । ब्रह्माणं तर्पयेत्पूर्वं विष्णुं रुद्रं प्रजापतिं । देवा यक्षा

१३ तथा नागा गंधर्वाप्सरसोऽसुराः। क्रूराः सर्पाः सुपर्णाश्च तरवो [illegible] जंभकाः खगाः। विद्याधरा जलधरास्तथैवाका
शगामिनः। निराधाराश्च ये जीवाः पापधर्मे रताश्च ये। तेषामाप्यायनायैतद्दीयते सलिलं [illegible]। मया। कृतो
135 पवीती देवेभ्यो निवीती च भवेत्ततः। मनुष्यांस्तर्पयेद्भक्त्या ऋषिपुत्रानृषींस्तथा। सनकश्च सनंदश्च तृतीयश्च
सनातनः। कपिलश्चासुरिश्चैव वोढुः पंचशिखस्तथा। सर्वे ते तृप्तिमायांतु मद्दत्तेनांबुना सदा। मरीचिमत्र्यंगि
रसौ पुलस्त्यं पुलहं क्रतुं। प्रचेतसं वसिष्ठं च भृगुं नारदमेव च। देवान्सर्वानृषीन्सर्वांस्तर्पयेताक्षतोदकैः। अपस
व्यं ततः कृत्वा सव्यं जान्वाच्य भूतले। अग्निष्वात्तांस्तथा सौम्यान्हविष्मंतस्तथोष्मपान्। कृतालिको बर्हिषद
आज्यपांस्तर्पयेत्क्वचित्। पित्रादीन्नामगोत्रेण तथा मातामहानपि। संतर्प्य भक्त्या विधिवदिमं मंत्रमुदी
रयेत्। येऽबांधवा बांधवा ये येऽन्यजन्मनि बांधवाः। ते तृप्तिमखिलां यांतु यश्चास्मत्तोऽभिवांछति। अत्र ब्रह्मादि
चतुष्कतर्पणे प्रयोगः कात्यायां योगियाज्ञवल्क्योक्तप्रयोगेन तर्पणः। ततो निवीती सनकादीन्। ततः कृताप
सव्यः। अग्निष्वात्तादीन्। ततः स्वपित्रादीन्। तत्रायं प्रयोगः। प्राङ्मुख उपविश्य दर्भाग्रैः कुशत्रयं न
मो पातयित्वा। ॐ भूर्भुवः स्वर्देवा आगच्छंत्विमानस्थाः कृत्वपांजलीन्। इति देवानावाह्य देवतीर्थेन
यवोदकेन पातितदक्षिणजानुर्दैवविधिना ऋजुकुशत्रयेण एकैकांजलिना ब्रह्माद्यस्तृप्यतामित्यादि

प्रकारेण देवास्तर्प्याः । देवासुरास्तथा यक्षा इत्यादि श्लोकं पठित्वैकांजलिर्देयः । उदङ्मुखो निवीती भूत्वा कुशम
ध्ये कायतीर्थेन ॐ भूर्भुवः स्वः सनकादय आगच्छंतु इमं जलांजलिं गृह्णंत्वित्यावाह्य । ततोऽपसव्यं कृत्वा दक्षिणा
मुखः पातितवामजानुः मोटकतिलोदकांजलित्रयेण दक्षिणाग्रकुशत्रयोपरि प्रत्येकमग्निष्वात्तादींस्तर्पये
त् । तद्यथा । अग्निष्वात्तास्तृप्यंतामिदं तिलोदकं तेभ्यः स्वधा नमः । इत्यादिकामनापदे पितृविधिना य
मांस्तर्प्पयेत् । ॐ आगच्छंतु मे पितर इमं गृह्णंत्वपोंजलिमिति पितॄनावाह्य अमुकगोत्रोऽस्मत्पिता अमुकशर्मा
तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः । एवं पितामह प्रपितामहाः । ततः स्वशाखोक्तक्रमेण तर्पयेत् । अद्भिः
स्वधाव्यतिरेकेण नम इति योज्यम् ॥ अथ विष्णुपुराणीयतर्प्पणम् । त्रिरपः प्रीणनार्थाय देवानामपव
र्जयेत् । तथर्षीणां यथान्यायं सकृच्चापि प्रजापते । पितॄणां प्रीणनार्थाय त्रिरपः पृथिवीपते । पितामहे
भ्यस्तु तथा प्रीणयेत्प्रपितामहान् । मातामहाय तत्पित्रे तत्पित्रे च समाहितः । दद्यात्पैत्रेण तीर्थेन काम्यं चा
न्यच्छृणुष्व मे । मात्रे प्रमात्रे तन्मात्रे गुरुपत्न्यै तथा नृप । गुरवे मातुलादीनां स्निग्धमित्राय भूपते । इदं चापि
जपे २= पिवेदंवु ददद्दात्मेच्छया नृप । उपकाराय भूतानां कृतदेवादितर्पणः । देवासुरास्तथा यक्षा नागा गंधर्व
राक्षसाः । पिशाचा गुह्यकाः सिद्धाः कूष्मांडास्तरवः खगाः । जलेचरा भूमिचरा वाय्वाधाराश्च जंतवः । तृप्तिमेते

१२९ प्रयांत्वास्य मद्दत्तेनांबुनाखिलाः । नरकेषु समस्तेषु जातनास्थ ये स्थिताः । तेषामाप्यायनायैतद्दीयते सलिलं मया ।
ये वांधवा वांधवा ये ये न्यजन्मनि वांधवाः । ते तृप्तिमखिलां यांतु ये चास्मत्तो भिकांक्षिणः । अत्रैवं प्रयोगः ।
136 ॐ देवास्तृप्यंतामिति वाक्येन देवेभ्योंजलित्रयं । ॐ ऋषयस्तृप्यंतामिति वाक्येन ऋषिभ्योंजलित्रयम् । ॐ
प्रजापतिस्तृप्यतामिति वाक्येन प्रजापतये एकोंजलिः । इति जीवत्पितृकेण तर्पणीयं । पितॄणामिति ।
प्रमीतपितृपरम् । अत्र च मात्रादितर्पणस्य च काम्यत्वाभिधानं फलविशेषकथनार्थम् । नित्यतातु तस्य
स्मरणात् । पित्रादीनां स्त्रियो याश्च ताभ्यो दद्याज्जलांजलीनिति । शातातपः । देवासुरा इत्यादि तर्पणं
कल्पांतरे काम्यतया कातीयादि तर्पणविशेषे पि कर्त्तुमुचितं । इदमेव तर्पणमेभिरेव श्लोकैः । इदं चापि जपेदंबु
दद्यादित्यभिधानात् । छायायां यत्र केचिच्छरदातपार्त्ताः पयः पिपासुः क्षुधितोन्नमन्नं । वालो जनित्रीं जननीं च
वालं योषित्पुमांसं पुरुषश्च योषां । तथा सर्वाणि भूतानि स्थावराणि चराणि च । विप्रादुदकमिच्छंति सर्वा
भ्युदयकांक्षिणः । तस्मात्सदैव कर्त्तव्यमकुर्वन्महतैनसा । युज्यते ब्राह्मणः कुर्वन्विश्वमेतद्धि भर्त्ति च इति छं
दोगपरिशिष्टे । अथादित्यपुराणीयसंक्षेपतर्पणं । ब्रह्मादिस्तंवपर्यंतं जगत्तृप्यतु वे ब्रुवन् । जलांजलि
त्रयं दद्यात्कुर्वन्संक्षेपतर्पणं । अत्र दद्यादिति प्रयोगात्कांक्षायां देवविधिना । ॐ ब्रह्मादिस्तंवपर्यंतं जगत्तृ

प्यंतु । इतिजलांजलित्रयंक्षिपेत् । देशकालानुरोधेनत्वरादिवशादिदंकर्त्तव्यं । सर्वत्रसंक्षेपस्यानुकल्प
त्वात् । अन्येत्वेवमाहुर्देवविधिना । ॐब्रह्मादयोदेवास्तृप्यंतु । मनुष्यविधिनासनकादयोमनुष्यास्तृ
प्यन्ताम् । पितृविधिना । कव्यवाडादयस्तृप्यंतामिदंतिलोदकंतेभ्यः स्वधानमः २ तर्पणौही अस्म
त्पितरस्तृप्यंतामिदंतिलोदकंतेभ्यः स्वधानमः २ इतिपौराणिकतर्पणं सर्वशाखीसर्वसाधारणं । वर्ण २४
संकोचेमानाभावात् । अत्रयेनकल्पेनस्नानंकृतं तत्कल्पोक्तमेवतर्प्पणंकार्यम् । तस्यतेदवारस्याधीतत्वात् ।
नृसिंहपुराणीयस्नानेतर्पणस्याश्रवणात् । तत्रविष्णुपुराणीयतर्पणमेवान्वेति । तर्पणस्यानारभ्याधीतत्वात्
पुराणान्तर तर्पणस्यतत्कालोक्तस्नानेसंदर्शनादन्यत्रानन्वयात् । केचिदादौविनायकतर्पणंकुर्वंति । यथा
योगी । मोदश्चैवप्रमोदश्चसुमुखोदुर्मुखस्तथा । अविघ्नोविघ्नहर्ताच इत्येतेषड्विनायकाः । इतिविनायकतर्पणं ।
काम्यंशाखांतरविषयंवास्तुत्रकारानविधानात् ॥ ॥ अथकातीयतर्पणप्रयोगः ॥ ॥ तत्रपूर्वाभिमुखः
ॐविश्वेदेवास इतिमंत्रस्यमधुछंदऋषिर्विश्वेदेवादेवतागायत्रीछंदोदेवावाहनेविनियोगः । ॐविश्वेदेवाःशृ
णुतेतिमंत्रस्यसुहोत्रऋषिर्विश्वेदेवादेवतात्रिष्टुप्छंदोदेवावाहनेविनियोगः । इतिऋष्यादिकंस्मृत्वा ।
ॐविश्वेदेवासआगतशृणुतामइमंहवं इदंबर्हिर्निषीदत ॥ ॐविश्वेदेवाःशृणुतेमंहवंमेयेअंतरिक्षे

१३७
137

यउपपद्यविष्टाये अग्निजिह्वा उतवायजत्र आसद्यास्मिन्बर्हिषिमादयध्वमित्यावाह्य यवजलेन वामान्वारब्ध
दक्षिणाकरेणादर्भैर्दर्भेषु पूर्वाग्रेषु देवान्यवैस्तर्पयेत् । तद्यथा । ओं ब्रह्मास्तृप्यतां । ओं विष्णुस्तृप्यतां । ओं
रुद्रस्तृप्यतां । ओं प्रजापतिस्तृप्यतां । ओं देवास्तृप्यंतां । ओं छंदांसि तृप्यंतां । ओं वेदास्तृप्यंतां । ओं ऋषय
स्तृप्यंतां । ओं पुराणाचार्यास्तृप्यंतां । ओं गंधर्वास्तृप्यंतां । ओं इतराचार्यास्तृप्यंतां । ओं संवत्सरः सावयवा
स्तृप्यंतां । ओं देव्यस्तृप्यंतां । ओं अप्सरसस्तृप्यंतां । ओं देवानुगास्तृप्यंतां । ओं नागास्तृप्यंतां । ओं सागरा
स्तृप्यंतां । ओं पर्वतास्तृप्यंतां । ओं सरितस्तृप्यंतां । ओं मनुष्यास्तृप्यंतां । ओं यक्षास्तृप्यंतां । ओं रक्षांसि तृप्य
तां । ओं पिशाचास्तृप्यंतां । ओं सुपर्णास्तृप्यंतां । ओं भूतानि तृप्यंतां । ओं पशवस्तृप्यंतां । ओं ओषधयस्तृ
प्यंतां । ओं भूतग्रामश्चतुर्विधस्तृप्यतां । ओं मरीचिस्तृप्यतां । ओं अत्रिस्तृप्यतां । ओं अंगिरास्तृप्यतां । ओं
पुलस्त्यस्तृप्यतां । ओं पुलहस्तृप्यतां । ओं क्रतुस्तृप्यतां । ओं प्रचेतास्तृप्यतां । ओं वसिष्ठस्तृप्यतां । ओं भृ
गुस्तृप्यतां । ओं नारदस्तृप्यतां ॥ ततो निवीती । प्रजापतितीर्थेन आचारादुदङ्मुखः केवलजलांजलि
द्वयेन ओं भूर्भुवः स्वः सनकादय आगच्छंतु इमं गृह्णंत्वपोंजली इत्यावाह्य । ओं सनकस्तृप्यतां २ ओं सनं
दनस्तृप्यतां २ ओं सनातनस्तृप्यतां २ ओं कपिलस्तृप्यतां २ ओं आसुरिस्तृप्यतां २ ओं वोढुस्तृप्यतां २ ओं पं

चशिखस्तृप्यतां २ ततः प्राचीनावीती । सव्यं जान्वाच्य दक्षिणाभिमुखः प्रदक्षिणाग्रकुशेषु प्रत्येक
ति २८ सतिलांजलित्रयेण पितृतीर्थेन । ॐ कव्यवाडनलस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः । २ ॐ सो
मस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः २ ॐ यमस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः २ ॐ अ
र्यमास्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः २ ॐ अग्निष्वात्तास्तृप्यंतामिदं तिलोदकं तेभ्यः स्वधा नमः । २
ॐ सोमपास्तृप्यंतामिदं तिलोदकं तेभ्यः स्वधा नमः २ ॐ बर्हिषदस्तृप्यंतामिदं तिलोदकं तेभ्यः स्वधा न
मः २ । ॐ भूर्भुवः स्वर्यमा आगच्छंतु विमंरत्न हं त्वपोंजलीनित्यावाह्य । ॐ यमाय नमः २ ॐ धर्मरा
जाय नमः २ ॐ मृत्यवे नमः २ ॐ अंतकाय नमः २ ॐ वैवस्वताय नमः २ ॐ कालाय नमः २
ॐ सर्वभूतक्षयाय नमः २ ॐ औदुंबराय नमः २ ॐ दध्नाय नमः २ ॐ नीलाय नमः २ ॐ परमेष्ठि
ने नमः २ ॐ वृकोदराय नमः २ ॐ चित्राय नमः २ ॐ चित्रगुप्ताय नमः २ ॥ ॐ उशंत आयंतु न
इति प्रजापत्य सारस्वता ऋषयः पितरो देवता त्रिष्टुप् छंदः पित्र्यावाहने विनियोगः । ॐ उशंतस्त्वा
निधीमह्युशंतः समिधीमहि उशन्नुशत आवह पितॄन् हविषे अत्तवे ॥ ॐ आयंतु नः पितरः सोम्या
सोऽग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञे स्वधया मदंतोऽधिब्रुवंतु तेऽवंत्वस्मान् इति पितॄनावाह्य ।

ॐ उदीरितामंगिरस आयंतुन इति मंत्रस्य शंखप्रजापती ऋषिः पितरो देवता त्रिष्टुप् छंदः पितृ संतर्प
णे विनियोगः। ॐ उदीरितामवर उत्परास उन्मध्यमाः पितरः सोम्यास असुं यईयुरवृका ऋतज्ञास्ते
नोवंतु पितरो हवेषु। ॐ अद्यामुकगोत्रोऽस्मत्पिता अमुकशर्मा तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः।
इति प्रथमं। ॐ अंगिरसोनः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः तेषां वयं सुमतौ यज्ञियाना
मपि भद्रे सौमनसे स्याम इति मंत्रेण वाक्येन च द्वितीयमंजलिं। ॐ आयंतु नः पितरः सोम्यासोऽग्निष्वा
त्ताः पथिभिर्देवयानैः अस्मिन्यज्ञे स्वधया मदंतोधिब्रुवंतु तेवंत्वस्मान् इति मंत्रेण वाक्येन च तृती
यमंजलिं दद्यात् ३। ॐ ऊर्जं वहंतीरिति मंत्रस्य प्रजापतिऋषिरापो देवता विराट् छंदः। ॐ पितृभ्यः०
ॐ ये चेह इति प्रजापति ऋषिः पितरो देवता विराट् छंदः पितामहतर्पणे विनियोगः। ॐ ऊर्जं वहंतीरमृतं
घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄन्। ॐ अद्यामुकगोत्रोऽस्मत्पितामहोऽमुकश
र्मा तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः। इति प्रथमं। ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहे
भ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः अक्षन्न पितरोमीमदंत पितरोती
तृपंत पितरः पितरः शुंधध्वमिति मंत्रेण वाक्येन च द्वितीयमंजलिं। ॐ ये चेह पितरो ये च नेह यांश्च विद्म

मि

याऽउचन प्रविश्य त्वेवेत्य पतितो जातवेदः स्वधायै यज्ञं सुकृतं जुषस्व इतिमंत्रेणवाक्येनच तृतीयं पिता
महाय दद्यात्। ॐ मधुवाता इतित्र्यचस्य गोतमऋषिर्विश्वेदेवा देवता गायत्रीछंदः प्रपितामहतर्पणे विनि
योगः। ॐ मधुवाताऋतायते मधुक्षरंतिसिंधवः माध्वीर्नः संत्वोषधीः। ॐ अद्यामुकगोत्रोस्मत्पितामा
होऽमुकशर्म्मा तृप्यतामिदं तिलोदकं तस्मैस्वधानमः इतिप्रथमं। मधुनक्तमुतोषसो मधुमत्पार्थि
वꣳ रजः मधुद्यौरस्तुनः पिता इतिमंत्रेणवाक्येनच द्वितीयमंजलिं। मधुमान्नोवनस्पतिर्मधुमाꣳ अ
स्तुसूर्यः माध्वीर्गावोभवंतुनः इतिमंत्रेणवाक्येनच तृतीयमंजलिं प्रपितामहाय दद्यात्। ततः
ॐ तृप्यध्वं तृप्यध्वं तृप्यध्वमिति मिलितं पित्रादिकं त्रिकमुद्दिश्य अंजलित्रयं दद्यात्। ॐ नमोव इति
मंत्रस्य प्रजापतिऋषिः पितरो देवता अनुष्टुप्छंदः मातामहसंतर्पणे विनियोगः। ॐ नमोवः पितरो
रसाय नमोवः पितरः शोषाय नमोवः पितरो जीवाय नमोवः पितरः स्वधायै नमोवः पितरो घोराय
नमोवः पितरो मन्यवे नमोवः पितरः पितरो नमोवो गृहान्नः पितरो दत्त सतोवः पितरो देष्म इतिमंत्रं
पठित्वा ॐ अद्यामुकगोत्रोऽस्मन्मातामहोऽमुक शर्मा तृप्यतामिदं तिलोदकं तस्मैस्वधानमः इतिमा
तामहायांजलित्रयं दद्यात्। अत्रवाक्यं प्रत्यंजलीत्यन्ये। एवमेवप्रमातामहवृद्धप्रमातामहयोरपि प्रत्येकं

१२९ जलित्रयं दद्यात् । ततः प्रत्येकैकांजलिना । ॐ अद्यामुकगोत्रास्मन्माताऽमुकदेवी तृप्यतामिदं तिलोदकं
139 तस्यै स्वधा नमः । एवं पितामहीप्रपितामह्यौ च तर्पयेत् । ततः प्रपितामहादूर्ध्वमपि यावतां नाम न ज्ञायते
तावत एकैकांजलिना नामगोत्रस्वधाकारैस्तर्पयेत् । ततः पितृव्यादीन् । ततः आचार्यगुरुसंबंधिबांधव
सुहृदस्तर्पणीस्तथैव । ततोपसव्येनैव । ॐ ये चास्मत्त उदकमिच्छंति तांस्तर्पमीदं जलं तेभ्यः स्वधा । नमः पा
३त्यं जलिं दद्यादिति केचित् । तथा । देवासुरास्तथा नागा यक्षा गंधर्वराक्षसाः । पिशाचा गुह्यकाः सिद्धाः
कूष्मांडास्तरवः खगाः । जलेचरा भूमिचरा वाय्वाधाराश्च जंतवः । तृप्तिमेते प्रयांत्वाशु मद्दत्तेनांबुनाखिलाः ।
नरकेषु समस्तेषु यातनासु च ये स्थिताः । तेषामाप्यायनायैतद्दीयते सलिलं मया । ये बांधवा बांधवा ये
येन्यजन्मनि बांधवाः । ते तृप्तिमखिलां यांतु ये चास्मत्तोयकांक्षिणः । इदं च काम्यतर्पणमेनिरे वङ्गोके
दैवविधिना कर्त्तव्यं । अन्यत्समानमिति वाचस्पतिः । अत्र शूद्रस्तु नमस्कारेण स्वपितॄंस्तर्पयेत् ।
शूद्रो वर्णश्चतुर्थोपि वर्णत्वाद्धर्ममर्हति । वेदमंत्रस्वधास्वाहावषट्कारादिभिर्विनेति व्यासोक्तेः । अत्र वसिष्ठः ।
स्नानशाटं वा तु दातव्यामदत्तिस्त्रो विशुद्धये । आचारचिंतामणौ । देवतानां पितॄणां च जले दद्याज्जलांजलिं ।
असंस्कृतप्रमीतानां स्थले एव दद्यात् । पराशरः । जलमध्ये तु यः कश्चिद्द्विजातिर्ज्ञानदुर्बलः । निष्पीडयति

यद्वस्त्रस्नानं तस्य तृप्या भवेत्। योगी। वस्त्रनिष्पीडितं तोयं स्नानस्योच्छिष्टभागिनां। भागधेयं श्रुतिः प्राह तस्मा
न्निष्पीडयेत्स्थले। उच्छिष्टभागिनस्तु। असंस्कृतप्रमीतानां त्यागिनां कुलयोषितां। उच्छिष्टभागधेयं स्या
द्दर्भेषु विकरश्च यः। उच्छेषणं भूमिगतमजिह्मस्याशठस्य च। दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षते इति मनुः।
ते नैतानुद्दिश्य पाल्पतकुशार्यां भूमौ वस्त्रनिष्पीडनोदकं देयं। तथा। निष्पीडयति यः पूर्वं स्नानवस्त्रं तु तर्पणात्।
निराशाः पितरस्तस्य यान्ति देवाः सहर्षिभिः। अन्नप्रकरवत्तस्य अपसव्येन पीडनं। मृत्तिकादानमप्यपसव्ये
न। तादृशपीडनांगत्वात्। अंगानां प्रधानदेशकालान्वयस्य न्याय्यात् प्रक्षालनमपि मूलमंत्रेनेति। उत्तरी
तोंगानां प्रधानान्वयस्य न्याय्य वाचस्पतिः। अन्ये तु मृत्तिकादानप्रक्षालनयोरंगत्वे प्रमाणाभावमाहुः। वस्त्रनि
ष्पीडनस्योत्पन्नाशिष्टत्वात् वाजिवत्। अन्नप्रकारवत्। प्राहोच्छिष्टसमीपान्नविकारवत्। तेन दक्षिणामुख
त्वमसंस्कृतप्रमीतोद्देशताच लभ्यते। अतएवात्र स्थलदाननैयत्यं। असंस्कृतप्रमीतानामित्यादिना तत्रैव दा
ननियमात्। एवं त्वास्थलनैयत्येन शुष्कवाससेदं कार्यम्। यजुर्लेशुष्कवस्त्रं स्थले चैवार्द्रवाससा।
सर्वं तन्निष्फलं प्रोक्तं वसिष्ठेनानुवर्यतः कृतमिति दत्तोक्तेः। बृहत्पराशरः। ये चास्माकं कुले जाता अपुत्रा गोत्रि
णो मृताः। ते पिबन्तु मया दत्तं वस्त्रनिष्पीडनोदकं। अयेनात्र योगः। कृतापसव्यः। शुष्कवाससा तु
निष्पीडयेत्स्नानवस्त्रं तिलदर्भसमन्वितं। न तूर्ध्वं न पश्चिमं दत्वा नेत्र्यम्भसि न पात्र्यो। एवं चेत्पीडयेद्वस्त्रं स्नानं तदिति क्रमात्।
अन्यथा द्वेति तस्य सर्वं सुकृतं सर्वं संचितं। लोके त्रिलर्मा नोयोषितो पिवा। अप्राद्धीयास्तु तान्वीस्य सर्वं वस्त्रजलं मयू
२

१४०
140
येणाधरीयवस्त्रांगंचलद्वयं अक्षाल्य भूमौ कुशत्रयोपरि पितृदासादीनुद्दिश्य सतिलं वस्त्रनिष्पीडनोदकं पि
तृतीर्थेन दक्षिणामुखो दद्यात् । यत्र वस्त्रनिःपीडननिषेधः तत्र तदुद्देशेन तर्पणं कुशोत्सर्गः । तत्र मंत्रः । अ
स्मत्कुले मृता ये च गतिर्येषां न विद्यते । ते तृप्तिमखिला यांतु वस्त्रनिष्पीडनोदकैः । वस्त्रनिष्पीडननिषेधे मयोत्सृष्टैः कुशैरिह २=
पराशरः । द्वादश्यां पंचदश्यां च संक्रांतौ श्राद्धवासरे । वस्त्रं निष्पीडयेन्नैव न च क्षारे नियोजयेत् । मनुः ।
एकादश्याममायां च मातापित्रोः क्षयेहनि । न पीडयेत् स्नानवस्त्रं न च क्षारे नियोजयेत् । प्रसंगात् क्षारयोगेन
प्रक्षालननिषेधकालमाह । शनौ भौमदिने श्राद्धे कुहूषष्ठीनिरंशके । वस्त्राणां क्षारसंयोगो दहत्यासप्तमं कुलं ।
तथा । धौतवस्त्रं प्रपीडेत ऊर्ध्वपल्लवसंप्लुतं । पल्लवाधो न पीड्यं ते पीडने त्वशुचिर्भवेत् । योगी । निष्पीड्य स्ना
नवस्त्रं तु आचम्य नियतः शुचिः । देवानामर्चनं कुर्याद् ब्रह्मादीनामनंतरं । अत्र येन कल्पेन स्नानं कृतं तर्पणं
अपि तेनैव कार्यं । स्नानांगत्वात् । उपस्थानादेर्निवेदनान्तस्य स्नानत्वात् । विजातीयप्रयोगस्य व्यवधायक
त्वात् । यत्तु । पीडयित्वा ततः पश्चाज्जपं कुर्यात् सुविस्तरमिति जपः स च्छंदोगविषयः । जलसंध्यावंदनपक्षे वा
जसनेयिनां जपानंतरमेवेदमेतदनुष्ठाने नैवं कुजपी पूयशोणितमित्यस्यापि जपस्यासिद्धिरिति । अद्धेण वस्त्र
निष्पीडनानंतरं सूर्यांजलिदानम् । ततो नमस्कारेणादेवपूजनं । तस्य वैदिकमंत्रपाठनिषेधात् ॥ ॥

अथ तर्पणोत्तरकर्म ॥ आचम्य च ततो दद्यात्सूर्याय सलिलांजलीन् । काशीखंडे । रक्तचंदनमिश्राद्भि
रक्तैः कुसुमैः कुशैः । वेदोक्तैरागमोक्तैर्वा मंत्रैरर्घ्यं प्रदापयेत् । सूर्यस्येति शेषः । अंजलिमंत्रो ब्राह्मे । नमो
विवस्वते ब्रह्मन्भास्वते विष्णुतेजसे । जगत्सवित्रे शुचये सवित्रे कर्मदायिने इति । ततो वलोकयेत्सूर्यं हंसः शु
चिषदित्यृचा । सयाति ब्रह्मणः सद्म तस्माद्वीक्षेत योनया रविं । अदृश्रमस्य मंत्रेण उपस्थाय दिवाकरं । सं
वर्चसेति पाणिभ्यां तोयेन विमृजेन्मुखं । स्वयंभूरित्युपस्थाय सूर्यस्येति प्रदक्षिणं । आवर्त्तेत नमस्कुर्याद्दिशो
दिग्देवता अपीति ब्रह्मादिपूजनानंतरं कार्यं । यथाह कात्यायनः । निष्पीड्य वस्त्रमाचम्य ब्रह्मवैष्णवरौद्रसावि
त्रमित्रावरुणैस्तल्लिंगैरर्चयेद्दृश्यमस्येति हंसः शुचिषदित्युपस्थाय प्रदक्षिणीकृत्य दिशश्च देवताश्च ब्र
ह्माग्नि पृथिव्योषधि वाग्वास्पति विष्णु महद्भ्योऽपांपतये वरुणायेति नमः इति सर्वत्रान्वेति मुखं विमृज्य देवागा
तुविद इति विसर्जयेत्स्नानविधिरेषा तल्लिंगैर्ब्रह्मादिप्रकाशकैरर्चयेद्ब्रह्मादीनिति शेषः । एषा पूजा पुष्पैस्तद
लाभे जलेनापि । अत एव कात्यायनेनादौ सुमनस आहृत्येति सूर्यांजलिदानार्थमेतत्पूजार्थं च पुष्पोपादान
मुक्तं । तथा च योगी । स्नात्वा प्रणवभूतं तु दैवतं तु समाहितः । नमस्कारेण पुष्पाणि विन्यसेत्तु पृथक्पृथक् । एताभ्यो
देवताभ्यश्च नमस्कारादिना जलं । दत्वा नमस्येत्क्रमशस्त्वं तेन सर्वत्र कर्मणां । मंत्रैरिति क्वचनं मिलितदेवतामंत्रानुपादाय

१५१ तेनब्रह्मयज्ञानमितिमंत्रेणब्रह्माणंपूजयेदितिसिद्ध्यति । एवमुत्तरत्रापि दिशश्चेति । चकारान्नमस्कुर्यादित्यनुषज्य
151 ते । नम इतिसर्वत्रेत्युपसंहारात् । दिशश्चदेवताश्चमिलिताएवनमस्याः दिशश्चदेवताश्चेतिसूत्रणात् । तत्रापि
दिगुक्तेनदिग्देवतात्वेननमस्याः नतुप्राचीत्वादित्वेनमानाभावात् । अतिदिशंसर्वदिग्देवतात्वादपिवास्त्व
स्पतिरप्येवमेव । देवताइहदिशामेव । आहतत्तुनमस्कुर्याद्दिशोदिग्देवताश्चापीतियोगीश्ववचनात् । ब्रह्मा
दीमहदंतंओषधीवर्ज्यमेकवचनं । तदुक्तंयोगिना । ब्रह्मणेग्नयेपृथिव्यैओषधीभ्यस्तथैवच । वाचेच
वाचस्पतयेविष्णवेमहतेतथेति । नमोऽप्सांपतयेवरुणायनमोनमः । स्नानविधिरेष इत्युपसंहारः ।
सएतत्पर्यंतंस्नानानुवृत्तिज्ञापनार्थः । पुनःस्नानविधिरेष इति मध्याह्निकस्नानविधिरन्यत्रातिदेशार्थः ।
अन्यत्रवीप्सासंध्यावंदनादिस्नानप्रयोगावरोधार्थं ॥ ॥ तत्रायंपूजाप्रकारः ॥ ॥ ॐब्रह्मयज्ञानंप्रथमंपुर
स्ताद्विसीमतः सुरुचोवेनआवः सबुध्न्या उपमा अस्यविष्ठाः सतश्चयोनिमसतश्चविवः इतिमंत्रेण । ॐब्र
ह्मणेनमः इतिपुष्पादिनापूजयेत् । एवं । ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदंसमूढमस्यपांसुरे इति
मंत्रेण ॐविष्णवेनमः । ॐनमस्तेरुद्रमन्यवउतोतइषवेनमः बाहुभ्यामुततेनमः इतिमंत्रेण ॐरुद्रायनमः ।
ॐआकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतंमर्त्यंच हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन्

इतिमंत्रेण ॐ सवित्रेनमः । ॐ मित्रस्यचर्षणीधृतोवोदेवस्यसानसि द्युम्नंचित्रश्रवस्तमं इतिमंत्रेण ॐ
मित्रायनमः । ॐ इमम्मेवरुणश्रुधीहवमद्याचमृडय त्वामवस्युराचके इतिमंत्रेण ॐ वरुणायनमः ।
इतिब्रह्मादीन्संपूज्य । उत्थायसूर्यायार्घ्यं दद्यात् अनेनमंत्रेण । ॐ नमोविवस्वतेब्रह्मन्भास्वतेविष्णुतेजसे ।
जगत्सवित्रेशुचयेसवित्रेकर्मसाक्षिणे इति । ॐ अदृश्रमस्यकेतवोविरश्मयोजनाँ अनुभ्राजंतो अग्नयोयथा
उपयामगृहीतोसिसूर्यायत्वाभ्राजायैषते योनिस्सूर्यायत्वाभ्राजाय सूर्यभ्राजिष्ठ भ्राजिष्ठस्त्वंदेवेष्वसिभ्राजिष्ठो
हमनुष्येषुभूयासं । ॐ हंसः शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योम
सदब्जागोजाऋतजाअद्रिजाऋतंबृहत् । इत्याभ्यांसूर्यमुपस्थाय । ॐ स्वयंभूरसीतिप्रदक्षिणीकृत्य । ॐ
आदित्यायनमः इतिसूर्यायनमस्कृत्य । ॐ दिग्भ्योनमः । ॐ दिग्देवताभ्योनमः । ॐ ब्रह्मणेनमः । ॐ अग्नये
नमः । ॐ पृथिव्यैनमः । ॐ ओषधीभ्योनमः । ॐ वाचेनमः । ॐ वाचस्पतयेनमः । ॐ विष्णवेनमः । ॐ महद्भ्यो
नमः । ॐ अद्भ्योनमः । ॐ अपांपतयेनमः । ॐ वरुणायनमः । इतिनमस्कृत्य । ॐ संवर्चसापयसासंतनू
भिरगन्महिमनसासꣳ शिवेन त्वष्टासुदत्रोविदधातुरायोनुमार्ष्टुतन्वोयद्विलिष्टमितिजपन् करद्वयेनमुखं
संस्पृश्य । ॐ देवागातुविद इतिमंत्रस्यमनसस्पतिऋषिर्वातोदेवता विराट्छंदो विसर्जने विनियोगः ॥

१४२
142
ॐ देवा गातुविदो गातुं वित्वा गातुमित मनसस्पत इमं देवयज्ञं स्वाहा । वातेधाः । इत्यनेन मंत्रेण देवता वि
सर्जयेत् । तथा । यदप्सु मलविक्षेपैः शौचाचारादि कुर्वता । तत्पापस्य व्यपोहार्थमिमं मंत्रमुदीरयेत् । यन्म
याद्रूषितं तोयं मलैः शारीरसंभवैः । तत्पापस्य व्यपोहार्थमिमं मंत्रमुदीरयेत् । यन्मया दूषितं तोयं मलैः शा
रीरसंभवैः । तत्पापस्य विनिष्कृत्यै यक्ष्माणः प्रीयतामिति । इत्यंजलिप्रक्षेपः । तर्पणस्नानतोयानां लंघ
नं नैव कारयेत् । करोति यस्तु मोहेन ब्रह्मघ्नं तं विनिर्दिशेत् । प्रक्षाल्य तीरदेशं तु गत्वा स्वं धर्ममाचरेत् । गत्वा
गृहमिति शेषः । पुराणांतरे । एवं स्नात्वादि कुर्यादाचम्य सोपानत्को ह्यसंस्पृशेत् । आगतस्तोदपात्रस्तु यत्ने
न शुचिरेव सः । तेनोदकेन द्रव्याणि प्रोक्ष्याचम्य तथा गृहे । ततः कर्माणि कुर्वीत नित्यं वै यानि कानिचित् ।
पात्रादिरहितं तोयमुद्धृतं सव्यपाणिना । न तेन प्रोक्षणं कुर्याद्वस्त्रं संपीडने न च । सौवर्णं राजतं ताम्रं मुख्यं पात्रं प्र
कल्पितं । तदभावे स्मृतं पात्रं सर्ववेते यत्नधारितं । पात्रमत्र कमंडलुः प्रकरणात् । तथा । गृहे वा समुपस्पृश्य
कृत्वा स्वर्णकुशोदकं । कृत्वाचमनमाचांतः पुनः प्रोक्षणमाचरेत् । उपस्पर्शोऽत्र स्नानम् । आचमनस्य पृथगुपा
दानात् । शातातपः । वह्निर्नद्यादिष्वाचांतः सोदकः कश्चिदस्पृशन् । रथ्यागतोपि यत्नेन शुचिरेव हि मानवः ।
तथा । नाधौतस्त्वेकदेशेन स्रच्चर्पमुपस्पृश्याहरेत् । प्रत्याहृतं तु सव्येन प्रोक्षयेद्दक्षिणेन तु । पात्रांतरितं सव्येनानी

तं दक्षिणेन हस्तेनेत्यर्थः। पद्मपुराणे। नालिकानिम्नपात्रेण कांस्यपात्रेण चैव हि। शाल्मलीफलजेनापि
कुर्यान्नाभ्युक्षणं नरः। शातातपः। नद्यादौ सम्यगाचान्तः संयतो गृहमागतः। उद्धृत्य पाणिना तोयं तथा
भ्युक्षणमाचरेत्। पाद्मे। आचम्य विधिवत्सम्यगालिखेत्पद्ममग्रतः। अक्षताभिः सपुष्पाभिः सतिलोदकचं
दनैः। अर्घ्यपात्रे प्रयत्नेन सूर्यनामानुकीर्त्तनैः दातव्येति शेषः। तद्यथा। ॐ नमस्ते विष्णुरूपाय नमस्ते ब्र
ह्मरूपिणे। सहस्ररश्मये नित्यं नमस्ते सर्वतेजसे। नमस्ते रुद्रवपुषे नमस्ते भक्तवत्सल। पद्मनाभ नमस्तेस्तु कुंड
लांगदभूषण। नमस्ते सर्वलोकेश सुप्तानामपि बुध्यसे। सुकृतं दुष्कृतं चैव सर्वं पश्यसि सर्वदा। सर्वदेव नमस्तेस्तु
प्रसीद मम भास्कर। दिवाकर नमस्तेस्तु प्रभाकर नमोस्तु ते। अत्राक्षतास्तंडुलाः सर्वत्र सूर्यार्घ्ये तथा दर्शनात्।
॥ अथ देवपूजा॥ तत्र पद्मपुराणम्। एवं सूर्यं नमस्कृत्य त्रिः कृत्वा च प्रदक्षिणं। द्विजं गां कांचनं स्पृष्ट्वा ततो विष्णुगृहं व्र
जेत्। नारदीये। यो विष्णोरालये विप्रः स्वंचनार्च्यसभक्तिमान्। न भूयः प्रविशेन्मातुः कुक्षिकारागृहं सुधीरि
त्यादिवाक्यविस्तरस्वरसविष्णुपूजा। गृहे विशिष्टस्नानं तु वहिः सर्वदेवपूजायामादौ सूर्यार्घ्यमुक्तं। भविष्य
पुराणे। यावन्न दीयते चार्घ्यं भास्कराय निवेदितं। तावन्न पूजयेद्विष्णुं शंकरं वा महेश्वरं। अथ यत्र जले स्नातः
तत्र जल एवादौ श्रीविष्णुं पूजयित्वा अन्यत्र पूजयेत्। अत्र विष्णुः सूर्यः। तथोक्तमाचारचिंतामणौ ॥ ॥

१४५ आशयस्यचसंस्थस्य प्रतिमास्वचपूजयेत् । विष्णुमिति शेषः । आशयोत्र जलाशयः । यद्वा आशयस्थं हृदयस्थं ।
143 अंतर्यागे इदमेकवाक्यता भवति । तथाग्रे विधानात् । केचित्तु प्रतिष्ठान्तरालाभे जले विष्णुपूजामाहुः । आप
आयतनं यस्य तस्मान्नारायणो हरिरिति विश्वः । तत्प्रकारो यथा । अंगन्यासं मूलमंत्रेण कृत्वा वा गंगाजलांतरे ।
संचिंत्य पीठमंत्रेण तर्पयेच्च सकृत्सकृत् । तस्मिन्कृष्णमावाह्य सकलीकृत्य मानसान् । पंचोपचारान्दत्वा सुधे २४
नुमुद्रां प्रदर्शयेत् । तज्जलं चामृतं ध्यात्वा मूलमंत्रेणाभिमंत्र्य च । अष्टोत्तरशतं कृष्णमूर्ध्नि मार्गे तर्पयेत्सुधीः ।
ततश्च मूलमंत्रेण गायत्र्या पंचविंशतिं । अभिजप्तेनोदकेनाचमनं विधिनाचरेत् । अथ सांप्रदायिकश्चेत्तदा वैदि
कीं संध्यां ह्यनंतरं जपमानसं मंत्रोगतया तांत्रिकीं संध्यामपि कुर्यात् । यथोक्तं । वैदिकीमभिधायैवमथोपासी
त मां त्रिकीं । अचेति जलशायी विलच्चीनंतरं । यथा । मूलमंत्रमथोच्चार्य ध्यायन्कृष्णांघ्रिपंकजं । श्रीकृष्णं
तर्पयामीति त्रिः सम्यक्तर्पयेत्कृती । ध्यानोद्दिष्टस्वरूपाय सूर्यमंडलवर्तिने । कृष्णाय कामगाय आदद्यादर्घ्य
मनंतरं । सा चोक्ता । आदौ मन्मथमुद्धृत्य कामदेवपदं वदेत् । अथ यांते विद्महे पुष्पबाणाय इति पदं व्रजेत् ।
धीमहीति तथोक्त्वा च ततोनंगः प्रचोदयात् । अथार्कमंडले कृष्णं ध्यात्वैतां दशधा जपेत् । नमस्त्वेति तन्मुद्रा
सद्यादर्घ्यं विवस्वते ॥ इति संक्षिप्ततांत्रिकी संध्या ॥ तत्रायं क्रमः । वैदिकस्नानतर्पणानंतरं जले विष्णुपूज

सूर्यायार्घ्यं दत्वा । नत्वा च प्रदक्षिणीकृत्य गां द्विजं धान्यादिकं वा स्पृष्ट्वा गृहमेत्य प्रतिमास्वपि पूजयेदिति । ततो

संध्यां ५२ मंत्रदीक्षितश्चेत् तदा तांत्रिकीमपि कुर्यात् इति । विष्णुपूजा नित्या काम्या उभयत्र प्रमाणादर्शनात् । तथा च । ए

काहमपि न स्थेयं विना केशवपूजनात् । एकाहवर्जनाद्राजन् पुण्यं याति पुराकृतं । कूर्मपुराणे । यो मोहादथवा

लस्यादकृत्वा माधवार्चनं । भुंक्ते स याति नरकं सूकरेष्विह जायते । तथा । अर्चयित्वा तु गोविंदं ये भुंक्ते धर्मवर्जि

ताः । शुनो विष्ठासमं चान्नं नीरं च सुरया समं । केशवार्चा गृहे यस्य न तिष्ठति महीपते । तस्यान्नं नैव भोक्तव्यमभक्ष्य

णां समं स्मृतं । विष्णुपुराणे । भौमान्मनोरथान् स्वर्गं स्वर्गिवंद्यं तथा पदं । प्राप्नोत्याराधिते विष्णौ निर्वाणमपि चोत्तमं ।

स्वर्गिवंद्यमिंद्रपदं । नारसिंहे । यस्तु पूजयते नित्यं नरसिंहं नरेश्वर । स स्वर्गमोक्षभागी स्यान्नात्र कार्या विचारणा ।

तस्मादेकमना भूत्वा यावज्जीवं प्रतिज्ञया । पूजनान्नरसिंहस्य स प्राप्नोत्यभिवांछितं । ब्राह्मणाः क्षत्रिया वैश्याः स्त्रि

यः शूद्रांत्यजातयः । संपूज्यं तं सुरश्रेष्ठं भक्त्या सिंहवपुर्द्धरं । मुच्यंते चाशुभैर्दुःखैर्जन्मकोटिशतोद्भवैः । नरसिं

हपदं विष्णुस्वरूपोपलक्षकं । अग्निपुराणे । ये र्चयंति सदा विष्णुं निष्फलेनांतरात्मना । न ते भूयो निजायंते श्वे

तद्वीपनिवासिनः । श्वेतद्वीपं वैलक्षणोपभोग्यवैकुंठविशेषः । एवमिह पूजापि नित्या । तथा विष्णुपुराणे । श्रीसूर्य

स्योदकांजलिं मुक्त्वा । ततो गृहार्चनं कुर्यादभीष्टसुरपूजनं । जलाभिषेकपुष्पाणां धूपादीनां निवेदनं इत्यभिधानात् ।

गृहार्चनं यमः। ॐ धात्रे नमः। ॐ विधात्रे नमः। इत्याद्यागमप्रसिद्धं। द्वारपार्श्वदेहल्योर्ध्वौदुंबरमंडलासनानि तं
पूज्यो पविश्य श्रीविष्णुपूजां कुर्यात्। अभीष्टसुरपूजनमिष्टदेवतापूजा। अत्र च शिवदुर्गादिपूजा काम्या तत्फलविधि
श्रवणात्। तत्पूजायां यावज्जीवप्रतिज्ञया संकल्पे सति नित्यताभिधानात्। यच्चामीषां पूजायां अकरणे निंदार्थवा
दः। स कृतेष्टदेवतापदे नित्यतया तदकरणे दुष्टत्वात् इति श्रीदत्तवाचस्पत्यादयः। अन्ये तु केवलविष्णुपंचाय
तनपूजनं भागवतस्मार्त्तरूपाधिकारिभेदेन व्यवस्थापयंति। तत्र भागवता नाम भागवतोक्तधर्मप्रधानाः। स्मृ
त्युक्तधर्मप्रधानाः स्मार्त्ताः। इति विवेकः। तथादित्यपुराणे। पूजयेत्केवलं विष्णुं देवान्वा तत्पदानुजे। मांत्रि
कः शास्त्रविमुखो हरावेकांतिको नरः। गरुडपुराणे याज्ञवल्क्यः। विष्णुर्ब्रह्मा च रुद्रश्च विष्णुर्देवो दिवाकरः।
तस्मात्पूज्यतमं नान्यमहं मन्ये जनार्दनात्। तथा च श्रीभागवते। यथा तरोर्मूलनिषेचनेन तृप्यंति तत्स्कंधभु
भुजोपशाखाः। प्राणोपहाराच्च यथेंद्रियाणां तथैव सर्वार्हणमच्युतेज्या। हरिवंशे। हरिरेव सदा पूज्यो भग
वान् लोकमंगलैः। विष्णुमंत्रं सदा विप्राः पठध्वं ध्यात केशवं। तथा भारते। नान्यं देवं नमस्कुर्यान्नान्यं मंत्रमुदीरयेत्।
चक्रांकितः सदा तिष्ठेन्मद्भक्तः पांडुनंदन। श्रीभगवद्गीतास्वपि। कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यंतेऽन्यदेवताः। तं तं नि
यममास्थाय प्रकृत्या नियताः स्वया। अंतवत्तु फलं तेषां तद्भवत्यल्पमेधसां। देवान्देवयजो यांति मद्भक्ता यांति मामपि।

मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु । मामेवैष्यसियुक्त्वैवमात्मानंमत्परायणः । तथाकर्णावाक्यम् । नान्यं
वदामिनशृणोमिनवाश्रयामिनान्यंभजामिनस्मरामिनचिंतयामि । भक्त्यात्वदीयचरणांबुजमादरेणश्रीश्रीनि
वासपुरुषोत्तमदेहिदास्यं । महापुराणेपि । मुमुक्षवोघोररूपान्हित्वाभूतपतीनथ । नारायणकलाःशांताभ
जंतिह्यनसूयवः । रजस्तमःप्रकृतयःसमशीलाभजंतिवै । पितृभूतप्रजेशादीन्श्रियैश्वर्यप्रजेप्सवः । तथा
तत्रैव । अकामःसर्वकामोवामोक्षकामउदारधीः । तीव्रेणभक्तियोगेनभजेतपुरुषंपरं । यत्तुवाराहपुराणे ।
विष्णुरुद्रांतरंकुर्याद्यःश्रीगोर्यंतरंतथा । तन्नास्तिकानांमूर्खाणांकार्यंशास्त्रविगर्हितं । एतत्तुपूजाकालेभेदविं
तनपरत्वकं । यद्वा । भेदःप्रवृत्तिमार्गपरः । अभेदोनिवृत्तिपरः । यथाहलायुधे । प्रवृत्तिमार्गसंस्थस्तुदीक्षाभे
देनपूजयेत् । निवृत्तिमार्गयातस्तुभेदवादंविवर्जयेदिति । यथाधिकारंव्यवस्थापनीयं । अथेष्टदेवतापूजादीक्षि
तैःशौचेपिकार्या । यथामदनपारिजातेब्रह्माण्डवचनं । शैवीवावैष्णवीदीक्षायस्यचाग्निपरिग्रहः । यतिश्चब्रह्म
चारीचनाशौचंतस्यविग्रहे । जपोदेवार्चनविधिःकार्योदीक्षासमन्वितैः । अशौचेनैवविद्येतसूतकेमृतके
तथा । जपोत्वेष्टदेवतार्चनंनैयत्येनक्रियमाणेष्टदेवतापूजाअस्पृश्याशौचेसोपिमानसः । साचस्पर्शवतीशिष्टा ।
१५५ तथा । शिवविष्ण्वर्चनेदीक्षायस्यचाग्निपरिग्रहः । श्रौतेकर्मणितत्कालेस्नानंशुद्धिमवाप्नुयात् । पराशरमाधवीये ।

१४५ सव्रती मंत्रपूतश्च आहिताग्निश्च यो द्विजः । राजतश्च सूतकं नास्ति यस्य चेच्छति पार्थिवः । मंत्रदीक्षितो मंत्रपूतः ।
पाद्मे माघमाहात्म्ये । अपवा सर्वदा पूज्यो वासुदेवो मुमुक्षुभिः । सालिग्रामशिलायां चक्रे वज्रकीटादिनिर्मिते ।
145 अधिष्ठानं हि तद्विष्णोर्महापातकनाशनं । पुनस्तत्रैव । मद्भक्तिबलमाश्रित्य मद्भक्तो दीक्षितो यदि । न त्यजेन्म
मकर्माणि सूतके मृतके तथा । ममकर्माणीति विशेषोपादानात् । दीक्षितैरपि तत्कर्ममात्रं कर्त्तव्यं । न
संध्यावंदनादि । यथोक्तं । नव्रतिनां व्रतेन नमंत्रिणां मंत्रेण दीक्षितस्य भगवत्पूजादिवृत्तित्वात्तेन त
स्य सर्वदा तत्करणाभ्यनुज्ञा इत्याशयः । एवं देवीपूजाशौचेन कार्या । कालिकापुराणे । अशुचिर्न महामायां पूजयेत्तु क
दाचन । अवश्यं तत्स्मरन्मंत्रं यो हि भक्तियुतो नरः । दंतरके समुत्पन्ने स्मरणं नैव विद्यते । सर्वेषामेव मंत्राणां स्मरणा
न्नरकं व्रजेत् । इति महामायामिति विशेषोपादानादितरस्यानिषेधः । याज्ञवल्क्यः । श्रांतसंवाहनं रोगिपरिचर्या
सुरार्चनं । विप्रपादोदकोच्छिष्टमार्जनं गोप्रदानवत् । गवाह्निकं देवपूजा वेदाभ्यासः सरित्प्लवः । नाशयंत्याशु
पापानि महापातकजान्यपि । देवमार्गस्नापनयनं देवागारसमूहनं । स्नपनं सर्वदेवानां गोप्रदानफलं स्मृतम् ।
समूहनं मृदुक्षुल्लया मार्जन्या जंतुवधपरिहारेण मार्जनं । भविष्यपुराणे । देवमुल्लंघयेद्यस्तु तत्क्षणात्पुष्प
लोभतः । पुष्पाणि च सुगंधीनि पूजको नेतराणि यत् । ब्रह्महत्यां समाप्नोति पच्यते शाश्वतीः समाः । उल्लंघन

मत्रे देवपुष्पादेः । दृष्टप्रयोजनाय निर्माल्यापनयनकालात्प्रागहरणं । निर्माल्यस्य प्रातःकाले विधानात् । देशका
लानुरोधेन कालांतरेपि तत्करणं दुष्टं । पुष्पलोभत इति दृष्टार्थत्वेन निषेधात् । हलायुधः । प्रातःकाले सदा
कुर्यान्निर्माल्योद्वासनं बुधः । हरेरिति शेषः । वाराहे । निर्माल्यमद्य पुर्लग्नं प्रातरेव विवासयेत् । विवासयेदपनयेत् ।
मू ४= यत्तु पुराणान्तरे । गंधपुष्पादिकं विष्णोः सूर्येस्ते नैव धारयेत् । तुलस्यामिश्रितं तत्तु दिवारात्रं न दुष्यतीति । तद्वि
गंधम्लायमानगंधपुष्पपरं । यत्तु । कश्चिन्मध्याह्ने निर्माल्यापनयनं दृश्यते । तत्तु । प्रातः पूजितस्य पुनर्मध्याह्ने षो
डशोपचारादिभिः पूजने क्रियमाणे निर्माल्यापनयनविषयं । देवांतरविषयं वा । अन्यथा बहुवाक्यविरोधापत्तेः ।
तथा । सनिर्माल्यो हरिर्दृष्टो दृष्टा कन्या रजस्वला । त्रषाणीः पशवो वद्धाः घ्नंति पुण्यं पुराकृतं । अत्र स निर्माल्य नि
र्माल्यापनयनकालोत्तरकालेन्यथा तत्क्षणोल्लंघनेन दोषापत्तेः । हरिरिति विशेषोपादानाद्देवांतरे दिनांतरेपि सनि
र्माल्यत्वमदोषाय । पांचरात्रे । यः प्रातरुत्थाय कृताभिषेको निर्माल्यमीशस्य निराकरोति । न तस्य दुःखं न दरि
द्रता च नाकालमृत्युर्न च रोगमात्रं । ईशस्य हरेश्च करणात् । पुनस्तत्रैव । अरुणोदयवेलायां निर्माल्यं शल्यतां
व्रजेत् । प्रातस्तु स्यान्महाशल्यं घटिकामात्रयोगतः । अतिशल्यं विजानीयात्ततो वज्रप्रहारवत् । अरुणोदयवे
लायां शल्यं तत्स्मते हरिः । घटिकार्द्धमतिक्रांते तूपपातकमावहेत् । मुहूर्ते समतिक्रांते पूर्णपातकमुच्यते । ततः

श्रंगीपातकमुच्यते । प्रातर्निर्माल्यनयने ॥ २

१४६ परंब्रह्मवधो महापातकपंचकं । प्रहरे शृंगितां याति द्वुद्वं पातकमावहेत् । मुहूर्त्ते समतिक्रांते प्रायश्चित्तं ततो न हि ।
निर्माल्यनिराकरणं उशीरकूर्चादिना मार्जनं । उशीरकूर्चकं दत्वा सर्वपापैः प्रमुच्यते । दत्वा गोवालजं कूर्चं
146 सर्वपापाद्व्यपोहतीति विष्णुधर्मोत्तरात् । गोरत्रचमरी । दत्वा चामरजं कूर्चं श्रियमाप्नोत्यनुत्तमां इति वैष्णव
सर्वस्वोक्तेः । नित्यपूजा तु मध्याह्ने कार्या । ततो रहस्ये नमित्यादिना मध्याह्नसंध्यावंदनानंतरं तद्विधानात् ।
नारदीये । प्रातर्मध्यंदिने सायं विष्णुपूजां समाचरेत् । यथा संध्यास्त्रयो नित्या विष्णुपूजा तथा बुधैः । प्रशक्तो वि
स्तरेणैव प्रातः संपूजयेत्केशवं । मध्याह्ने चैव सायाह्ने पुष्पांजलिमपि क्षिपेत् । मध्याह्ने विस्तरेणैव संत्तेवेशाथ
वा हरिं । हरिं पूज्य भोजनं कुर्यादन्यथा नरकं व्रजेत् । नैमित्तिकेषु सर्वेषु तत्तत्कालविशेषतः । पूजयेद्देवदेवेशं
द्रव्यं संपाद्य यत्नतः । यत्तु । मैत्रं प्रसाधनं स्नानं दंतधावनमंजनं । पूर्वाह्ण एव कर्तव्यं देवतानां च पूजनं ।
तत्काम्यपूजापरं । यद्वायतनस्थितदेवपूजापरं प्रतीयते । स्वर्गोपचिताहंतास्रजनी प्रातः सर्वे कृताह्निकाः ।
विविधस्रक्समंभारदिव्यांकितवैरनुसेविताम् इति । यद्भारतवचनं तदप्रत्याख्येयं कर्मानुरोधेन । नान्यगत्या
मध्याह्निकानां मध्याह्नात्प्रागपि करणमदुष्टमिति ज्ञापकं । तथैव मदनपारिजाते । यथा कथंचित्कर्तव्यं
नित्यं कर्म विजानता । न प्राप्तस्यापि लोपोस्ति पैत्र्यकस्य विशेषतः । तथा । दिवोदितानि कर्माणि प्रमादादकृतानि च ।

यामिन्याः प्रहरं यावत्तावत्सर्वाणि कारयेत् । अत्र देवपूजायां सर्ववर्णाधिकारो विष्णुः । क्षमा शौचं दमः सत्यं दानमिं
द्रियनिग्रहः । अहिंसा गुरुशुश्रूषा तीर्थानुसरणं तथा । आर्जवं लोभशून्यत्वं देवब्राह्मणपूजनं । अनभ्यसूया च
तथा धर्मः सामान्य उच्यते । तथा । आगमोक्तेन मार्गेण स्त्रीशूद्रैरपि पूजनं । कर्त्तव्यं श्रद्धया विष्णोः सर्वैश्वर्यप्रदा
यकं । स्मृत्यर्थसारे बौधायनवाक्यम् । शूद्राणां चैव भवति नाम्ना वै देवतार्चनं । सर्वे चागममार्गेण कुर्युर्वेदानुसा
रिणः । नाम्ना चतुर्थीनमोंतेन देवतानाम्नेत्यर्थः । तथा । स्त्रीणामप्यधिकारोस्ति विष्णोराराधनादिषु । भविष्यपु
राणे । अयं विनैव मंत्रेण पुण्यराशिः प्रकीर्त्तितः । स्यादयं मंत्रयुक्तश्चेत्पुण्यं शतगुणोत्तरं । तस्माददीक्षितेना
पि पूजा कार्या । दीक्षितस्य फलं भूयस्त्वं । दीक्षामंत्रविहीनोपि कुर्यादर्चनं नरः । इति तत्रैवोक्तेः । पाद्मे । अदीक्षि
तस्य वामोरु कृतं सर्वमनर्थकं । पशुयोनिमवाप्नोति दीक्षाहीनो मृतो नरः । तस्माद्द्रयाविशेषेण दीक्षा भागवतीज
नैः । गुरोर्भागवतात्पुण्यात्सर्वाभीष्टप्रदायिनी । अनर्थकं परमार्थसाधकं । तथा । दीयते हीश्वरं ज्ञानं क्षिप्यते पापपं
जरं । आप्यते वै स्वयं धाम तेन दीक्षोच्यते बुधैः । मंत्रमुक्तावल्यां । आचार्यमुखतो मंत्राः सिध्यंते वाचिरेण तु । आचा
र्यरहितो मंत्रः पुंसोनर्थस्य कारणं । यदृच्छया श्रुतं वापि छिन्नेनापि स्थलेन वा । पत्रस्थितायां गोक्तायां वर्जयेत्त
दनर्थवत् । मंत्रमार्गानुसारेण साक्षात्कृत्वेष्टदेवतां । गुरुश्चेद्बोधयेच्छिष्यं मंत्रदीक्षोच्यते तु सा । तल्लक्षणं श्रीभागवते ।

१४७ 147

तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमं । शाब्दे परे च निष्णातं ब्रह्मण्युपरताशयं । तथा । महाकुलप्रसूतोपि सर्वय
ज्ञेषु दीक्षितः । सहस्रशाखाध्यायी वा न गुरुः स्यादवैस्नवः । उपायेन मया लोभात्सर्वेषु स्याद्द्विजोत्तमः । अत्रैके श्रुति
कन्यायो द्रष्टव्यः ॥ ॥अथ शिष्यलक्षणं मंत्रमुक्तावल्यां ॥ ॥शिष्यः शुद्धान्वयः श्रीमान्विनीतः प्रियदर्शनः ।
सत्यवाक्पुण्यचरितो दंभधीर्दंभवर्जितः । कामक्रोधपरित्यागी भक्तश्च गुरुपादयोः । इत्यादिलक्षणैर्युक्तः शि
ष्यो भवति नान्यथा । स्त्रीणां तु लक्षणं तादृक् न शास्त्रेण विचार्यते । मुख्यं तु लक्षणं स्त्रीणां व्यभिचारादिवर्जनं ।
विष्णुयामले दीक्षाधिकारिणः । ब्राह्मणान्क्षत्रियान्वैश्यान्शूद्रांश्च स्त्रियोपि वा । विष्णुभक्तिरतान्साधून्दी
क्षयेद्विधिना गुरुः । गोपालार्चनचंद्रिकायां । वेदपाठे यथा शूद्रो नाधिकारी विधीयते । तथैवादीक्षितश्चापि
पूजायां न प्रशस्यते । अथ दीक्षाकाललक्षत्रैव । मधुमासे भवेद्दुःखं माधवे रत्नसंचयः । मरणं भवति ज्येष्ठे ह्या
षाढे बंधुनाशनं । सम्पद्धिः श्रावणे नूनं भवेद्भाद्रपदे क्षयः । आश्विने सर्वसिद्धिः स्यात्कार्तिके ज्ञानवृद्धिदा ।
शुभकृन्मार्गशीर्षे च पौषे ज्ञानविनाशिनी । माघे मेधादिवृद्धिः स्यात्फाल्गुनः सर्वसौख्यकृत् । मलमासे
भवेद्दुःखमतो वर्ष्यं विवर्जयेत् । रवौ गुरौ बुधे सोमे शुक्रे पक्षे तथा कवौ । दीक्षा च शुभदा ज्ञेया नान्यवा
रेषु शोभना । पूर्णिमा पंचमी चैव षष्ठी वापि विशेषतः । द्वितीया सप्तमी वापि दशमी च त्रयोदशी ।

द्वादशी च प्रशस्ता स्यात्कृष्णपक्षे त्रयोदशी। कृष्णाष्टमी च शुभदा दीक्षायां तिथयः स्मृताः। अथ नक्षत्राणि। उत्तरात्रितयं पु
ष्यं मघा चित्रा च रेवती। अनुराधा धनिष्ठा च मूलं विष्णुः पुनर्वसुः। एतास्तु तारकाः सर्वाः सर्वतंत्रेषु शोभनाः। तथा। अश्वि
नी रोहिणी स्वाती वरुणार्कदिदेवतं। ज्येष्ठा च शुभदा प्रोक्ता तारका मंत्रसंग्रहे। शुभानि करणान्याहुर्दीक्षायां च विशेष
तः। शुक्रे केवलसंयुक्ते शुक्रे देवगुरौ तथा। शुक्लपक्षे पक्षे कृष्णे वा दीक्षा सर्वशुभावहा। पुण्यक्षेत्रे कुरुक्षेत्रे देवीपीठचतुष्टये।
प्रयागे श्रीगिरौ काश्यां कालाकालं न शोधयेत्। न तिथिर्न व्रतं होमो न स्नानं न जपः क्रिया। दीक्षायाः कारणं किंतु
स्वेच्छा प्राप्ते हि सद्गुरौ। चंद्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये। मंत्रमात्रप्रकथनमुपदेशः स उच्यते॥ ॥
अथ शिष्यस्य विधिनिषेधाः। तत्र विष्णुयामले। गुरुः परीक्षयेच्छिष्यं संवत्सरमतंद्रितः। नियमान्विहितान्वर्ज्यान्कथ्याव
ये च चतुःशतं। ब्राह्मे मुहूर्ते उत्थानं महाविष्णोः प्रबोधनं। नीराजनं च वाद्येन प्रातःस्नानं विधानतः। विशुद्धाहतयु
ग्वस्त्रधारणं देवतार्चनं। गोपीचंदनमृत्स्नायाः सर्वदा चोर्ध्वपुंड्रकं। पंचायुधानां विधृतिश्चरणामृतसेवनं। तुलसी
मणिमालादिभूषाधारणमन्वहं। निर्माल्योद्वासनं विष्णोस्तच्चंदनविलेपनं। सालिग्रामशिलापूजा प्रतिमासु च
भक्तितः। निर्माल्यतुलसीभक्ष्यस्तुलस्याश्चये विधिः। विधिना तांत्रिकी संध्या शिखाबंधो हि कर्मणि। विष्णुपादोदके
नैव पितृणां तर्पणं क्रिया। महाराजोपचारैश्च लशय्यासज्जनं हरेः। विष्णुभक्तविरोधेन नित्यनैमित्तिकी क्रिया।

१४८ मूलतश्च छ्याद्रिकरणं न्यासाः सर्वे यथाविधि । नवीनफलपुष्पाद्यैर्भक्तितः सन्निवेशनं । तुलसीपूजनं नित्यं श्रीभाग
148 वतपूजनं । त्रिकालं विष्णुपूजा च पुराणश्रुतिरन्वहं । विष्णोर्निवेदितानां वै वस्त्रादीनां च धारणं । सर्वेषां पुण्यकार्या
णां स्वामिदृष्ट्या प्रवर्त्तनं । गुर्वाज्ञाग्रहणं तत्र विश्वासो गुरुणोदिते । यथासमुद्र रचनं गीतनृत्यादिभक्तितः । शंखा
दिध्वनिमांगल्यं लीलाद्यभिनयो हरेः । नित्यहोमविधानं च बलिदानं यथाविधि । साधूनां स्वागतं पूजा शेषनैवेद्य
भोजनं । तांबूलशेषग्रहणं विष्णवैः सह संगमः । विशेषधर्मजिज्ञासा दशम्यादिदिनत्रये । व्रतेन नियमतः स्वस्थः संतो
षो येन केनचित् । सर्वयात्रादिकरणं वासराष्टकसद्विधिः । विष्णोः सर्वर्तुचर्या च महाराजोपचारतः । सर्वेषां वैष्ण
वानां च व्रतानां परिपालनं । गुरावीश्वरभावश्च तुलसीसंग्रहः सदा । शयनाद्युपचारश्च स्मरस्कंदादि चिंतनं । सं
ध्ययोः शयनं नैव न शौचं मृत्तिकां विना । निष्ठताचमनं नैव न च गुर्वासनासनं । गुर्वग्रे पादविस्तारः छायापालंघ
नं गुरोः । शक्तौ स्नानक्रियाहानिर्देवतार्चनलेपनं । देवतानां गुरूणां च प्रत्युत्थानाभिवादनं । गुरोः पुरस्ता
त्पांडित्यं मूढपादक्रिया तथा । अमंत्रतिलकारामो नीलीवस्त्रादिधारणं । स्वभक्तैः सह मंत्रादि श्रसच्छास्त्रपरि
ग्रहः । तुच्छस्वर्गहरवा शक्तिर्मद्यमांसनिषेवणं । मादकान्नसेवा च मत्सराद्यन्नभोजनं । शाकं तुंबीकलिं
गादि तथा भक्तान्नसंग्रहः । अवैष्णवव्रतारंभः तथा जपमवैष्णवं । अभिचारादिकरणं शक्तो मोहोपचारकं ।

१४६

शोकादिपारवश्यंचद्विविधेकादशीव्रतं। शुक्लाकृष्णाविभेदश्चव्रतसद्यापरोव्रतेतथा। शाकौफलादिभुक्तिश्चश्राद्धंचै
कादशीदिने। द्वादश्यांचदिवास्वापस्तुलस्यवचयस्तथा। नत्रविष्णोर्दिवास्नानं श्राद्धंहर्यनिवेदितैः। रुद्राक्षंतुलसी
श्राद्धेतयाश्राद्धमवैस्वं। चरणामृतपानेनशुद्ध्यर्थमाचमनक्रिया। काष्ठासनोपविष्टेनवासुदेवस्यपूजनं। पूजाका
लेसदालापः करवीरादिपूजनं। आयसंधूपपात्रादितिर्यक्पुंड्रप्रमादतः। एकहस्तप्रणामादिह्यकालेस्वामिदर्श
नं। पर्युषितादिदुष्टानामन्नादीनांनिवेदनं। संख्याविनामंत्रजपहस्तयामंत्रप्रकाशनं। सदाशक्तोमुखेलोपेगौणकाल
परिग्रहः। प्रसादग्रहणंविष्णोर्वर्जयेद्वैष्णवःसदा। चतुःशतंविधानेनतान्निषेधान्श्रावयेन्मुहुः। अंगीकारेकृतेवा
हंतन्नीराजनपूर्वकं। देवपूजांकारयित्वादत्तकर्णमनुंजपेत्। मनुंमंत्रमित्यर्थः। अथशिष्यप्रार्थना। त्रायस्वभो
जगन्नाथगुरोसंसारवह्निना। दग्धंमांकालदष्टंचत्वामहंशरणंगतः। अथदीक्षाप्रकारः। मुहूर्तेसर्वतोभद्रेनवकुं
भंविधायच। शोधितंगंधपुष्पाभ्यामर्चितंवस्त्रसंयुतं। सर्वौषधीपंचरत्नपंचपल्लवसंयुतं। ततोदेवार्चनंकृत्वाहुती
रष्टोत्तरशतं। जुहुयादितिशेषः। शिष्यंस्वलंकृतंविद्यामुपाग्निमुपवेशयेत्। मंत्रितंप्रोक्षणीतोयैःशांतिकुंभजले
स्तथा। मूलमंत्रेणाष्टशतंमंत्रितैरभिषेचयेत्। अथसंपादयेन्मंत्रंहस्तंशिरसिधारयेत्। नमोस्त्वित्यस्तनान्दद्यादथ
शिष्योर्चयेद्गुरुं। इतिसंक्षेपदीक्षा। अत्राप्यशक्तःकश्चिद्दीक्षामभ्यर्थ्यसादृतं। तदंबुनाभिषिच्याष्टवारमूलेनकेकरं।

१४५ निधायाथजपेत्कर्णे ह्युपदेशोत्वयंविधिः । इत्युपदेशः । पाद्मे । ततः पुंड्रं तथानाम मंत्रोयागश्च पंचमः । अमी परम
संस्काराः परमैकांतहेतवः । शंखचक्रोर्ध्वपुंड्रादिधारणं दासलक्षणं । एवं संस्कृतो दासो भवति । लब्धदीक्षितस्य कृ
145 त्यं शारदायां । गुरोर्लब्धात्मविद्यामष्टकृत्वो जपेच्छुचिः । गुरुविद्यादेवतानामैक्यं संभावयन्धिया । शरीरमर्थं प्राणां
श्च सर्वं तस्मै निवेदयेत् । स्वप्नलब्धे स्त्रियादत्ते मालामंत्रे त्रिवीजके । वैदिकेषु च सर्वेषु सिद्धादीन्नैव शोधयेत् ।
मंत्रशोधनप्रकारस्तु आगमांतरात् ज्ञातव्यः । नात्र ग्रंथगौरवभयाल्लिखितः । इति प्रासंगिकं परिसमाप्य प्रकृति
रनुसंधीयते । अथ सर्वदेवताराधनमाह । शातातपः । भूमावप्सु तथाग्नौ च दिवि सूर्ये च देवता । नित्यमन्न
हिरण्ये वा ब्राह्मणेषु च गोषु च । पूजयेदिति शेषः । प्रतिमायां तु सर्वदेवपूजा प्रशस्ता । ध्यानाद्यविरुद्धा मिय
मेव । अथ प्रतिमाभेदाः । मत्स्यपुराणे । सौवर्णी राजती वापि ताम्री रत्नमयी तथा । शैली दारुमयी वापि लोह
संघमयी तथा । रीतिका धातुयुक्ता च ताम्रकांस्यमयी तथा । शुभदारुमयी वापि देवतार्चा प्रशस्यते । लोहसंघ
मयी २= मयीत्यनेनैव धातुनिर्मिता । ताम्रकांस्यमयी ताम्रकांस्यमयधातुनिर्मिता । ताम्रीति पृथगुपादानात् । शुभदारु
मयीति चंदनागुरुनिर्मिता । दारुमयीति प्रागुक्तत्वात् । देवतार्चा देवप्रतिमा । महापुराणेपि । शैलीदारुमयी
लौही लेप्या लेख्या च सैकता । मनोमयी मणिमयी प्रतिमाष्टविधा मता । लौहीति सर्वधातूपलक्षणं । मनोमयी

तिध्यानमयी । सम्यक्प्रतिष्ठिता यस्याः प्रसज्जने पुरुषः परं प्रत्यवैतीति प्रोचः । नच्याहुस्तु कृत्रिमाकृत्रिमभेदेन द्व्यव
स्थापयंति । तेन कृत्रिमायाः प्रतिमायाः कलान्यासेन पूज्यता । इतरायाः स्तदंतरेणापि । साच चला प्रासादस्था वाह्य
स्थेति च भेदात्त्रिविधा । तत्र च लामधिकृत्य । मत्स्यपुराणे । अंगुष्ठपर्वादारभ्य वितस्तिर्यावदेव तु । गृहेषु प्रतिमाः कार्या
नाधिकाः शस्यते बुधैः । आषोडशात्तु प्रासादे कर्तव्या नाधिका ततः । देवीपुराणे । सप्ताङ्गुलं समारभ्य यावच्च द्वाद
शांगुलं । गृहे ह्यर्चा समाख्याता प्रसादे चाधिका मता । लक्षणसमुच्चये । मानांगुलप्रमाणेन दशपंचांगुला तथा ।
प्रासादे प्रतिमा पूज्या नाधिका हि प्रशस्यते । क्वचिद्धस्तप्रमाणा सा क्वचिच्च त्रिदशांगुला । त्रिदशांगुला त्रिंशदंगुलेति
वाह्यस्थानपरं । पुनस्तत्रैव । चतुर्धेति पुनर्भेदैः सप्तधा संस्थितैः स्थितैः । संस्थानभेदास्तत्रैव । ऊर्ध्वासीना खगारू
ढा वाहनस्था दलोत्थिता । चलती चेति सप्तैताः प्रतिमाः सर्वकामदाः । खगाः पक्षी कोशस्था । दलोत्थिता । अर्धोत्थिता ।
चलती । गच्छन्ती । एते सप्त संस्थानभेदाः । प्रासादस्थायां वाह्यस्थायां च ज्ञेयाः । देवीपुराणे । ऊर्ध्वस्थिता गृहे
कार्या सदा देवी चतुर्भुजा । अन्यथा तु न कर्तव्या कृता भयकरी यतः । तथा चतुर्भुजा कार्या प्रासादे वा गृहे तथा ।
ऊर्ध्वस्थिता गृहे घोरा रौद्री चापि नरेश्वर । सजटा न गृहे पूज्या शैलजाष्टभुजा तथा । ऊर्ध्वदृष्टिरधोदृष्टिस्ति
र्यग्दृष्टिरथापि वेति । इति देवीपुराणे । ऊर्ध्वस्थाष्टभुजैव गृहे निषिद्धा । चतुर्भुजाया विहितत्वात् । देवीति

१५०
150

विशेषोपादानादित्यादिविधिनिषेधलक्षणं देवीप्रतिमाविषयं प्रतीयते। तत्रापि कृत्रिमाविषयं कर्त्तव्येत्युपदेशात्। सका
मविषयं वा तथैव शिष्टाचारदर्शनाच्च। भविष्यपुराणे। दिवामूर्त्तिषु सर्वासु रात्रौ वह्निषु पूजयेत्। प्राक्पश्चिमोद
गास्यश्च प्रातःसायं निशासु च। यथासंख्यमन्वयः। रात्रौ वह्निषु वह्निसमीपे पूजयेदित्यर्थः। यद्वा सूर्यपूजाम
धिकृत्य रात्रौ वह्निषु पूजयेत्। यद्वा रात्रौ वह्निषु वह्न्याधारे पूजयेदिति केचित्। शिवपूजापि सर्वदोदङ्मुखे
न कार्या। शंकराराधनं तद्वत्सदा कुर्यादुदङ्मुखः इति वचनात्। कालिकापुराणे। दक्षिणभागेषु सर्वेषु कौवे
री दिक् शिवप्रिया। तस्मात्तन्मुख आसीनः पूजयेत्तु सदाम्बिकां। तथा। शुचिः सुवस्त्रधृक् प्राज्ञो मौनी ध्यान
परायणः। गतकामभयक्रोधो रागमात्सर्यवर्जितः। आत्मानं पूजयित्वा च सुगंधसितवाससा। सम्मुहूर्ते य
जेद्देवान्स्वकीयासनसंस्थितान्। आत्मानमिति चंदनादिना तिलकं विधाय सितवस्त्रं च परिधापयेत्यर्थः। नार
दपंचरात्रे। शुद्धिः पंचविधा कार्या विष्णुसेवनतत्परैः। पत्रपुष्पादि वल्लनां कुर्याज्जलादिशोधनं। लेपस्य ताल
नादेव मूर्त्तिशुद्धिं ततश्चरेत्। अत्रादावासन उपविश्य। आत्मशुद्धिं विधायाथ मूर्त्तिशुद्धिं च पूर्ववतः। मूर्त्ति
शुद्धिर्निर्माल्यापनयनादिना सर्वतो गुरूपदेशात्। तत्रेयं प्रक्रिया। एवमदीक्षितोपि शुचिः। शुचिनीचास
नोपविष्टः शुचिवस्त्रयुग्मधरो मौनी तद्ध्यानपरायणः। कामरागभयक्रोधमात्सर्यद्वंद्वरहितः तन्मनाः

शुचौ सूपलिप्ते निःशब्दंपशब्दरहिते देशे दक्षिणपार्श्वे पुष्पचंदनादि । वामपार्श्वे जलपात्रघंटादीपादि । शुद्धदे
शे हस्तप्रक्षालनपात्रं । देवस्य दक्षिणे शंखं । अन्यत्पूजोपकरणं यथासन्निवेशमासाद्य जलपूर्णपात्रमग्रतो धृ
त्वा । यथालाभं वस्त्रालंकारयज्ञोपवीतादीनि धृत्वा अर्घपात्रस्थजलेन स्थानं द्रव्याणि च प्रोक्ष्य संबोधनांतेन
देवतानाम्ना आगच्छेति देवतामावाह्य स्थापयित्वासनपाद्याचमनीयानि दत्वा स्नापयित्वा यथालाभं वस्त्र
यज्ञोपवीतालंकारगंधपुष्पधूपदीपनैवेद्यादीनि दत्वा देवं प्रदक्षिणीकृत्य प्रणम्य स्तुत्वा भगवन्भगवति वा
क्षमस्वेति विसर्जयेत् । आगमिकास्तु । देवो भूत्वा यजेद्देवं नादेवो देवमर्चयेत् । एवमाह श्रुतिः साक्षाद्दत्तोव
शं न्यसेद्बुधः । इत्यनुसारात्सर्वदेवपूजायां भूतशुद्धिमाहुः । तथाहि । देवो भूत्वा देवानर्चयेदिति । साध्वेवं
सोहमिति मंत्रेण जीवात्मानं नाभितो हृदिस्थे परमात्मनि संयोज्य । ततः पृथिवीं जले । ततो जलं तेजसि ।
ततस्तेजो वायौ । ततो वायुमाकाशे प्रवेश्य । यमिति वायुबीजेन षोडशवारजप्तेन देहं संशोध्य । रमिति वह्नि
बीजेन द्वात्रिंशज्जप्तेन देहं दाहयित्वा । वमिति चंद्रबीजेन चतुःषष्टिजप्तेन चंद्रमंडलादमृतं स्रावयित्वा ।
तेन तद्भस्म प्लाव्य । पुनर्नवीनमभूतं देहं चिंतयित्वा । भूतादि व्योमादिभ्यो वहिः कृत्वा हंस इति मंत्रेण पर
मात्मनो जीवं नाभिपद्मं न्यसेदिति । अर्घं देवीपुराणे । षट्त्रिंशदंगुलं पात्रं मुत्तमं परिकीर्तितं । मध्यमं तु त्रिभा

~~स्मा~~ गोनं कनिष्ठं द्वादशांगुलं । वस्वंगुलविहीनं तु न पात्रं कारयेत्क्वचित् । त्रिभागोनं चतुर्विंशत्यंगुलं । वस्वंगुलिविहीनं स्यादं
१५१ गुलिमानहीनं । पैठीनसिः । सीसकायसपाषाणहीनभग्नपात्राणि च वर्ज्यानि । हीनानि प्रमाणतः क्षुद्राणि ।
151 आचारचिंतामणौ । विष्णुं प्रजापतिं वापि शिवं वा भास्करं तथा । तल्लिंगैः पूजयेन्मंत्रैः सर्वदेवान्समाहितः । स्तुत्वा प्र
णवपूर्वं तु तन्नाम्ना तु समाहितः । नमस्कारेण पुष्पाणि विन्यसेत्तु पृथक्पृथक् । दक्षः । देवतापुष्पदानेन जायते
श्रीसमन्वितः । ऊर्ध्वां गतिमवाप्नोति यश्च धूपप्रदो भवेत् । लोके प्रकाशो भवति चक्षुष्मांश्चैव दीपदः । विष्णुधर्मोत्तरे ।
फलानि दत्वा देवेभ्यः सकलां विंदते श्रियं । गीतवाद्यप्रदानेन सौख्यं प्राप्नोत्यनुत्तमं । वस्त्रदानेन लोकेस्मिन्सुरेशस्त्व
भिजायते । प्रोक्षणीयप्रदानेन रूपवानभिजायते । प्रोक्षणीयप्रदानं गीतनृत्याभिनयादीनां देवसमीपे करण
मर्घ्यं । तथा वस्त्रदानेन लोकेस्मि देवीपुराणे । रक्तबिल्वाक्षतैः पुष्पैर्दधिदूर्वाकुशैस्तिलैः । सामान्यः सर्वदेवानां
मर्घ्योयं परिकीर्तितः । अभावे दधिदूर्वादेर्मानसं वा प्रकल्पयेत् । जलमेव साक्षादुपकल्प्यार्घस्वभावमात्रं कर्तव्यमिति ।
पाद्ये श्यामाकदूर्वा च विष्णुक्रांतादिरिष्यते । गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः । दूर्वा चेति क्रमाद्दद्यात् द्रव्याष्टक
मुदीरितं । गंधः कुंकुमं । अक्षतास्तंडुलाः । विष्णुः । न नक्तंगृहीतोदकेन कर्म कुर्यात् । चंदनकुंकुमागुरुमृगमद
जातीफलवज्जलमनुलेपनं च दद्यात् । पुष्पाणि तु स्कांदे । उत्तमं स्वार्जितं पुष्पं मध्यमं वन्यमुच्यते । अधमं तु क्रय

क्रीतं पारक्यं त्वधमाधमं । देवालयनियुक्तं च यद्धत्ति पुराणं पुराकृतं । तस्मात्सर्वप्रयत्नेन देवोद्यानं च वर्जयेत् । देवारा
मोद्भवं पुष्पं गृहे देवापनार्पयेत् । स्वार्जितं । स्वारामोद्भवं । देवोद्यानं । परदेवोद्यानं । अरण्य गिरिस्वाराम संभ
वानि विकसितानि केशकीटरहितानि अपर्युषितानि अच्छिद्राणि अशुचीनि सुरभीणि प्रोक्षितानि विहितानि पत्रा
णि च प्रवदंति । याचितं निष्फलं पुष्पं क्रयक्रीतं च निष्फलं । अभिवादनकाले अभिवाद्याभिवादनकाले स्वतरकर
स्थं दुष्टमिति । अग्रभागत्यागात्प्रोक्षणाच्चेदं पुष्पं कर्मार्हं भवतीत्यन्ये । विष्णुधर्मोत्तरे । समित्पुष्पकुशादीनि वह
न्तो योभिवादयेत् । तदा रिक्तं चैव नान्यद्धि निर्माल्यं तद्भवेन्नयो रिति । देवोपरि धृतं पुष्पं वाम हस्ते धृतं च यत् । अ
धोवस्त्रधृतं यच्च जलेन्तः क्षालितं च यत् । देवतालयनिर्गच्छतीति पुष्पं निर्माल्यतां गतं । देवोपरि धृतं मस्तकोपरि
धृतं । अंतर्जले क्षालितं अधोवस्त्रधृतं तच्च पुष्पं हरिभक्तिसंग्रहे निषिद्धतया गणितं । नित्यपूजायां स्वामिपरोक्ष
मपि ग्रहणमदोषाय । वानस्पत्यं मूलफलं दार्वग्न्यर्थं च गोमत्यां । देवतार्थं च कुसुमं मस्तेयं मनुरब्रवीत् । तुल
सीपत्रविल्वपत्रपंकजानां पर्युषितदोषो नास्ति । तथा पारिजाते । जलं पर्युषितं त्याज्यं पत्राणि कुसुमानि च ।
तुलस्यगस्त्यविल्वादिगांगं वारि न दुष्यति । विष्णुधर्मोत्तरे । तुलस्यां विल्वपत्रेषु जलजेषु च सर्वशः । न
पर्युषितदोषोस्ति मालाकारगृहेषु चेति । जलजं कमलं । अत्रापवादमाह स्कांदे । पालाशं दिनमेकं तु पंक

र्जंचदिनत्रयं । पंचाहंविल्वपत्रंचसप्ताहंतुलसीदलं । पालाशंदिनमेकमपर्युषितमितिशेषः । एवमुत्तरत्रापि । पर्युषि
तमपिमाल्याकारगृहस्थितमदुष्टमितिशैवागमे तस्यपुष्पाकारत्वात् । आकराःशुचयःसर्वेवर्जयित्वासुराकर
मितिवचनात् । हारीतः । स्नानंकृत्वाचयेकेचित्पुष्पंचिन्वंतिमानवाः । देवतास्तन्नगृह्णंतिभस्मीभवतिकाष्ठव
त् । मध्याह्नस्नानविषयमेतत् । प्रातःस्नानानंतरंद्वितीयदिनभागेपुष्पावचयस्यदक्षेणविहितत्वात् । समा
नकर्तृकोयंत्वितिकेचित् । तुलसीतुस्नानानंतरमेवग्राह्या । अस्नात्वातुलसींछित्वादेवतापितृकर्मणि । तत्स
र्वंनिष्फलंयातिपंचगव्येनशुध्यतीति । पाद्मेवैशाखमाहात्म्येदर्शनात् । आचार्यविवेकः । पुष्पावचयंस्नानानं
तरेणापिकुर्यात् । तुलसींस्नात्वैवचिनुयादिति । कलिकानिषेधस्तुसूर्यदेवीनामेवश्रूयते । तथाप्याचारा
नुग्रहात्सर्वदेवविषयः । धूपेगुग्गुल्वादिःसद्घृतः । केवलोवागुरुः । दीपघृतंतिलतैलंवा । नैवेद्यंभक्ष्यभोज्यप्र
शस्तं । दिवोदासे । चंदनागुरुणीचोभेतथैवोशीरपद्मकं । तुरुष्कंगुग्गुलुंचैवघृताक्तंपुरतोदहेत् । तुरुष्कःसि
ह्लसः । आचारचिंतामणौ । सपर्याबहुधाप्रोक्तातासामेकांसमाश्रयेत् । गंधादिकानिवेद्यांतापूजापंचोपचा
रिका । पाद्यार्घ्यमधुपर्काश्चचतुर्थ्याचमनीयकं । गंधपुष्पेधूपदीपौनैवेद्यंचंदनंतथा । एषाद्विपंचोपचारापूजा
तुकथिताबुधैः । अष्टादशोपचारश्चततःप्रोक्तामनीषिभिः । आसनावाहनेचार्घ्यंपाद्यमाचमनंतथा ।

मधुपर्काचमनस्नानवसनाभरणानि च। गंधपुष्पे धूपदीपौ नैवेद्यं वंदनं तथा। अष्टादशोपचाराश्च ततः प्रोक्ता मनी
षिभिः। आसनावाहने चार्घ्यं पाद्यमाचमनं तथा। स्नानं वस्त्रोपवीतं च भूषणानि च सर्वशः। गंधपुष्पे तथा धूपं दीपम
न्नेन तर्पणं। माल्यानुलेपनं चैव नमस्कारविसर्जने। ततः षट्त्रिंशोपचाराः अद्वयाविबुधैः स्मृताः। आसनाभ्यंजने
तद्वदुद्वर्तनं निरूपणं। संमार्जनं घृते नैव स्नापनावाहने ततः। पाद्यार्घ्याचमनीयं च स्नानीयं मधुपर्कको। पुनराचम
नीयं च वस्त्रयज्ञोपवीतके। अलंकारो गंधपुष्पे धूपदीपौ तथैव च। तांबूलानि च नैवेद्यं पुष्पमाला तथैव च। अनुलेपनं
शय्या च चामरं व्यजनं तथा। आदर्शदर्शनं चैव नमस्कारोथ नर्तनं। गीतवाद्ये च दानानि स्तुति होमप्रदक्षिणं। दंत
काष्ठप्रदानं च ततो देवविसर्जनं। उपचारा इमे ज्ञेयाः षट्त्रिंशत्सुरपूजने। चतुःषष्ट्युपचाराश्च कथिता हरिपूजने।
चतुःषष्ट्युपचाराः काम्यपूजायां। एते विकल्पा यथाविभवं सर्वदेवसाधारणाः। प्रथमो नियतः नित्यपूजायां लो
पि न नियतः मानाभावात् देवपूजा तु दक्षिणहस्तेनैव। कर्मोपदिश्यते यत्र कर्तुरंगं न चोच्यते। दक्षिणस्तत्र विज्ञे
यः कर्मणां पारगः करः। इति छंदोगपरिशिष्टात्। तत्रापि देवतीर्थेन मार्जनार्चनबलिकर्मभोजनानि देवतीर्थेनेति।
११५ हारीतात्। तत्राप्यासीनेन। यथा मरीचिः। आसीन ऊर्ध्वः प्रह्वो वा नियमो यत्र नेदृशः। तदासीनेन कर्तव्यं न प्रह्वेण न
तिष्ठता। यत्र निवीती प्राचीनावीतीति। अनयोर्न विधिः। तत्रोपवीती। एवं च यत्र देवकर्मोद्देशेनोपवीतत्वं श्रुतं तत्रापि

१५३ देवमुपलक्षणं। पितृमनुष्यकार्यातिरिक्तं दैविकं। सर्वमेव दैवमिति गोभिलः। दिवोदासे। यत्र दिङ्नियमो नास्ति जप
153 होमादिकर्मणि। तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्री सौम्यापराजिता। अपराजिता ऐशानी। बौधायनः। भोजनं हवनं दानमु
पहारः प्रतिग्रहः। बहिर्जानु न कार्याणि तद्वदाचमनं स्मृतं। देवपित्र्यमन्त्राद्युपढौकनमुपहारः। तथा मदने। कर्त्रि
णानामनुक्तौ च दक्षिणांगं भवेत् सदा। कुत्सिते वामहस्तः स्याद्दक्षिणः स्यादकुत्सिते। वर्द्धमानसंग्रहे। अक्रिया त्रि
विधा प्रोक्ता विद्वद्भिः कर्मकारिणां। अक्रिया च परोक्ता च तृतीया चायथाक्रिया। अक्रियाऽकरणं। परोक्ता पर
शाखाकरणं। अयथाक्रिया विहितेतरप्रकारेण करणं। प्रधानस्याक्रिया यत्र सांगं तत्क्रियते पुनः। तदन्यस्यांक्रि
यायां तु नावृत्तिर्न तु तत्क्रिया। अत्र तत्क्रिया तदंगमात्रक्रिया सापि नास्ति। किंतु विष्णुस्मरणमेव कार्यं। तत्रैव मान
क्रियायामुक्तायामनुक्ते मानकर्त्तरि मानकृद्यजमानः स्यादिति दुषामेष निश्चयः॥ ॥ अथ पंचायतनपूजा॥ ॥
तत्र कालिकापुराणे। शिवं भास्करमग्निं च केशवं कौशिकीमपि। मनसाऽनर्चयन्याति देवलोकादधोगतिं। मनसा
नर्चयन् भक्तिमकुर्वन्नित्यर्थः। भक्तेश्च ग्रहणत्वेन सम्मतिः। वरं प्राणपरित्यागः शिरसो वापि कर्तनं। नत्वसंपूज्य भुंजीत
कौशिकीं केशवं शिवं। कौशिकी दुर्गा। समयप्रदीपे। श्रीमेधाज्ञानवात्सल्यमुमायामान्महामते। योगं ज्ञानं यशः की
र्तिं महादेवादवाप्नुयात्। आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात्। ज्ञानं महेश्वरादिच्छेन्मोक्षमिच्छेज्जनार्दनात्।
आरोग्यं सप्रतापत्वं भास्करात्प्राप्यते ध्रुवं। गतिमिष्टां यथाकामं प्रददाति त्रिविक्रमः। विघ्नो न जायते तस्य यजेद्यस्तु विनायकम्। मत्स्यपुराणे। ५१

देवीपुराणे । महागणपतेर्यागात्सिद्धिं प्राप्नोति मानवः । सर्वं जगद्वशीकुर्यान्महागणपतिः सदा । स्वर्गापवर्गसं
सिद्धिर्दुर्गायागात्प्रवर्त्तते । यागपूजा । अपवर्गसिद्धिर्मोक्षमार्गप्रवृत्तौ ज्ञानदानद्वारा । साक्षान्मोक्षदातृत्वं भगवत
एव । अथ पाठक्रमः । किं तु सर्वादौ सूर्यपूजा । अपूज्य प्रथमं सूर्यमपरान्यः प्रपूजयेत् । न तद्गृह्णन्ति तत्पाद्यं तस्य ती
च्छन्ति देवताः इति ब्राह्मे । देवता इत्यपंच । पद्मपुराणे । आदित्यं गणनाथं च देवीं रुद्रं यथाक्रमं । नारायणं विशु
शं०वा ५= द्धाख्यमंते च कुलदेवताः । तथा । ब्रह्माणं विष्णुमीशानं सूर्यमग्निं गणाधिपं । दुर्गां सरस्वतीं लक्ष्मीं गौरीं वा नित्यमर्च
येत् । तथा । रविर्विनायकश्चंडी ईशो विष्णुस्तु पंचमः । अनुक्रमेण पूज्यंते व्युत्क्रमेण महद्भयं इति क्रमेण पूजयेत् ।
सर्वान्तरं विष्णुपूजा सर्वेश्वरत्वात् । तत्परिचारकतया देवाः प्रथमत एव पूज्याः इति परामर्शः । तदुक्तं जटामल्लप्रका
शे ॥ शंभोर्मध्यगते हरीनहरभूदेव्यो हरौ शंकरे भास्येनागहतारवौ हरगणेशाजांबिकाः स्थापिताः । देव्यां विष्णुशि
वैकदंतरवयो लंबोदरेऽप्यीश्वरे नार्याः शंकरभागतोतिहरवदा व्यस्तास्तु ते हानिदाः ॥ यस्य य इष्टदेवः स तेन मध्ये
स्थाप्यः । सर्वसाधारणतया पूजने विष्णुरेव मध्ये स्थाप्यः । तदावरणतया ईशादिकोणेषु देवाः परितः स्थापनी
याः । पूजाक्रमस्तु पूर्वोक्त एव । श्लोकार्थस्तु पंचसु पूज्यदेवतासु पूजनकाम्याहितत्वेन शिवादौ मध्ये स्थापिते शि
शानामेष क्रमः । शंभोर्मध्यगते हरीनहरभूदेव्यः । तथा चेशाने हरिः । आग्नेये इनः सूर्यः । नैर्ऋत्ये गणे

ईशानकोणादारभ्य ।

१५८ 154 शः। वायव्ये दुर्गेति क्रमः। हरौ मध्यगते शंकरे भास्वेनाशाहुता। ईशाने शंकरः। आग्नेये गणेशः। नैरृत्ये इनः सूर्यः। वायव्ये अगहुता दुर्गा। रवौ मध्यगते हरगणेशाद्र्यम्बिकाः। ईशाने हरः ईशाने। गणेशः आग्नेये। विष्णुर्नैरृत्ये। दुर्गा वायव्ये। देव्यां मध्यगतायां विष्णुशिवैकदंतरवयो विष्णुरीशाने। शिवः आग्नेये। गणेशः नैरृत्ये। दुर्गा वायव्ये इत्येवं स्थापनीयाः। अत्रेशान्यादिकल्पना पूज्यपूजकांतरालरूपा प्राचीमभिसंधाय द्रष्टव्या। तदुक्तं आगमे। पूज्यपूजकयोर्मध्ये प्राची प्रोक्ता विचक्षणैः। प्राच्येव शाचीसोदिशामुक्त्वा वै देवतार्चनं। तथा॥ भवानी तु यदा मध्ये ऐशान्यामच्युतं यजेत्। आग्नेय्यां पंचवक्त्रं च नैरृत्यां गणनायकं। वायव्यां तपनं चैव पूजाक्रम उदाहृतः। यदा तु मध्ये गोविंद ऐशान्यां शंकरं यजेत्। आग्नेय्यां गणनाथं च नैरृत्यां तपनं तथा। वायव्यामंबिकां चैव भोगमोक्षफलात्मिकां। शंकरस्तु यदा मध्ये ऐशान्यामच्युतं यजेत् आग्नेय्यां तपनं चैव नैरृत्यां गणनायकं। वायव्यां पार्वती चैव स्वर्गमोक्षप्रदायिनी।

हरिः		सूर्यः
	शंभुः	
दुर्गा		गणेशः

शंकरः		गणेशः
	हरिः	
दुर्गा		सूर्यः

हरः		गणेशः
	रविः	
दुर्गा		विष्णुः

विष्णुः		शिवः
	देवी	
रविः		गणेशः

विष्णुः		ईश्वरः
	गणेशः	
दुर्गा		रविः

आदित्यश्चयदामध्ये ऐशान्यां शंकरं यजेत् । आग्नेय्यां गणनाथं च नैरृत्यां केशवं तथा । वायव्यामर्पितां देवी
स्वर्गमोक्षप्रदायिनी ४ गणनाथो यदामध्ये ऐशान्यां तदा । आग्नेय्यामीश्वरं चैव नैरृत्यां तपनं तथा ।
वायव्यां पार्वतीं चैव प्रजयेन्मोक्षसाधकः ५ अथ सूर्यपूजा तत्र भविष्यपुराणे । अग्निहोत्रादिभिर्युक्ताय
स्ताश्च बहुदक्षिणाः । सूर्यसेवेतेर्च ने जातु कोटयंशेनापि नो समाः । मेरुमंदिरतुल्योपि राशिः पापस्य दारु
णः । आसाद्य भास्करं मर्त्यस्तन्नाशयति तत्क्षणात् । अदद्यादेगवां लक्षं दोग्ध्रीनां वेदपारगे । एकाहम
र्चयेद्भानुं तस्य पुण्यं ततोधिकं । आपः क्षीरं कुशाग्राणि घृतं दधि तथा मधु । रक्तानि करवीराणि तथा र
क्तं च चंदनं । अष्टांग एष अर्घोयं ब्रह्मणा परिकीर्तितः । हरिनाथीयस्य तिहारे । दारवेणार्घपात्रेण दत्वा
चतुर्ग ५८ र्घं यत्फलं लभेत् । तस्माच्छतगुणं पुण्यं मृत्पात्रेण नराधिप । ताम्रपात्रार्घदानेन पुण्यं दशगुणं स्मृतं । प
लाशपत्रपात्राभ्यां ताम्रपात्रसमं भवेत् । रौप्यपात्रेण विज्ञेयं लक्षांशो नात्र संशयः । सुवर्णपात्रविन्यस्त
मर्घं कोटिगुणं भवेत् । एवं स्नानेषु नैवेद्ये वलिपूजादिषु क्रमात् । मृन्मयपात्रं हस्तघटितं केवलकुला
लचक्रघटितस्याम्हरत्वेन निषेधात् । ताम्रसुवर्णरौप्यशंखशुक्तिपात्रं भिन्नमपि देयं । अथ पंचोपचाराः ।
तत्र गंधे भविष्यत्पुराणम् । चंदनागुरुकर्पूरकुंकुमोशीरपद्मकैः । अनुलिप्तो नरो भक्त्या दाति मनसेप्सितं ।

पद्मकं पद्मकाष्ठं । अनुलिप्तः प्रकारणात्सूर्यः । कालेयकं तुरुष्कं च रक्तचंदनमेव च । धामात्मनः सचे
१५५ ष्टानि तानि शस्तान्यपाकुरु । कालेयकं कृष्णागुरुः । कालियकाष्ठमित्यन्ये । तुरुष्कं सिह्लकं । अथ पुष्पाणि ।
155 तत्रैव । पुष्पैररण्यसंभूतैः पत्रैर्वा गिरिसंभवैः । अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जंतुवर्जितैः । आत्मारा
मोद्भवैर्वापि भक्त्या संपूजयेद्रविं । पुष्पजातीविशेषेण लभेत्पुण्यमतोऽधिकं । पुष्पैरिति बहुत्वश्रवणा
त् । यद्यपि पूजायामनेकपुष्पपत्रजात्यावि सिद्ध्यति तथापि तत्तदर्चने तत्तत्फलार्थितया समुच्च
यो न विरुद्धः । अत्र बहुवचनं कपिंजलाधिकरणन्यायेन त्रित्वपरमधिकफलार्थितयाधिकदानमप्यवि
रुद्धं । पुनस्तत्रैव । करवीरैकपुष्पं च योऽर्काय विनिवेदयेत् । दशसुवर्णस्य निष्काणां लभते फलं ।
अर्चितेन च पश्चाद्वै लतं देव द्विगुणं भवेत् । भक्त्या पूजयते योऽर्कमर्कपुष्पैः सितासितैः । तेजसा सोऽर्कसंका
शो ह्यर्कलोके महीयते । जपापुष्पसहस्रेण करवीरं विशिष्यते । करवीरसहस्रेभ्यो विल्वपत्रं विशि
ष्यते । विल्वपत्रसहस्रेभ्यः पद्ममेकं विशिष्यते । वीरपद्मसहस्रेभ्यो बकपुष्पं विशिष्यते । बकपुष्पसह
स्रेभ्यः कुशपुष्पं विशिष्यते । कुशपुष्पसहस्रेभ्यः शमीपुष्पं विशिष्यते । सर्वासां पुष्पजातीनां प्रवरं नी
लमुत्पलं । नीलोत्पलसहस्रेण नीलोत्पलशतेन च । रक्तैश्च करवीरैश्च यस्तु पूजयते रविं । कल्पकोटि

सहस्राणि कल्पकोटिशतानि च । वसेदर्कपुरे श्रीमान् सूर्यतुल्यपराक्रमः । शमीपुष्पं बृहत्योऽथ कुसुमं तुल्यमुच्य
ते । करवीरसमाः ज्ञेया जातीवकुलपाटलाः । श्वेतमंदारकुसुमं सितपद्मं च तत्समं । नागपैचेकपुन्नागमुकु
लाश्च समाः स्मृताः । अहरं तिष्ठते जाती करवीरमहर्निशं । केशकीटावपन्नानि शीर्णपर्युषितानि च । स्वयं
पतितपुष्पाणि त्यजेदुपहृतानि च । मुकुलैर्नार्चयेद्भानुं मपक्वं न निवेदयेत् । फलं च क्रिमिविद्धं यत्प्रयत्ना
नु विवर्जयेत् । यत्नपक्वमपि ग्राह्यं कदलीफलमुत्तमं । अलाभे न तु पुष्पाणां पत्राण्यपि निवेदयेत् ।
पत्राणामप्यलाभे तु तृणगुल्मौषधैरपि । औषधीनामलाभे तु भक्त्या भवति पूजितः । प्रत्येकमुक्तपुष्पेण
दशसौवर्णिकं फलं । स्रजोभिर्मुनिशार्दूल तदेव द्विगुणं भवेत् । मुकुराणि कदंबानि रात्रौ देयानि भानवे ।
दिवाशेषाणि पुष्पाणि दिवारात्रौ च मल्लिका । गंधवंत्यपवित्राणि कुसुमानि विवर्जयेत् । गंधहीनमपि
ग्राह्यं पवित्रं यत्कुशादिकं । तथा । मल्लिकामालती चैव दूर्वा काशो तिमुक्तिकः । पाटला करवीरं च ज
पा जायंतिरेव च । कुब्जकं तगरं चैव कर्णिकारं कुरंडकं । चंपको वेणिकः कुंदो वालो बर्बरमल्लिका । अ
शोकतिलकोरोध्रस्तथा चिंचाटरूषकः । शतपत्राणि चान्यानि चक्राहूं च विशेषतः । अगस्त्यपर्किंशुकं
तद्वत्सूर्जायां भास्करस्य तु । विल्वपत्रं शमीपत्रं पत्रं भृंगारजस्य तु । तमालपत्रं च हरेः सदैव तपनप्रियम् ।

१५६
156

तुलसीकाष्ठं तुलसीतथार्क्तचंचंदनं । केतकीपुष्पपत्रंच सद्यःतुष्टिकरंरवेः । कुष्मलोन्मत्तकंकांची तथाच गिरिकर्णिका । नकंटकारिकापुष्पं तथान्यद्गंधवर्जितं । नचाम्रतकजैःपुष्पैरर्चनीयो दिवाकरः । येषांनप्रतिषेधोस्ति नगंधवर्जितानिच । तानिपुष्पाणिदेयानि भानवेलोकभानवे । अरण्योद्भवानिसर्वाणि । एवंचारण्यपरामोद्भवयोर्विधानादन्यारामभवानिनिषिद्धानि । तदुक्तंनारदीयेराद्रसीशपथे । पारक्यारामजातैस्तुकुसुमैरर्चयेत्सुरान् । तेनपापेन लिप्येहंयदेत दन्यतंभवेदिति । पद्मंश्वेतेतरं । श्वेतपद्मस्याग्रेकरवीरसमत्वकथनात् । रक्तमन्त्रकंकुमंकंटकारिका । निषेधश्चबृहत्कंटकारिकाविषयः । नागोनागकेसरः । मुकुरोविचिकिलःप्रहरमिति । अवचयोत्तरंजातीपुष्पंप्रहरपर्यंतंपूजार्हमेव । एवमन्यत्रापि । यद्दातिष्ठतेननिर्माल्यतांयातीत्यर्थः । मुकुलंकलिका । स्रजोमिरित्यर्थः । मुकुरात्मीति । मुकुरकर्दंवयोरात्रावन्येषांदिवा । मल्लिकायास्तुभयत्रदानं प्रशस्तमित्यर्थः । अतिमुक्तकः । माधवी । जयाजयंतीयावंतीपुष्पविशेषः । तगरः पिंडतगरः । शिवेविवर्जयेत्कुंदंउन्मत्तंचहरेत्तथा । देवीनामर्कमंदारौसूर्यस्यतगरंतथा । इतिशातातपः । कुरंटकः पीतम्लातः । वर्वरमल्लिका वर्वरीतिप्रसिद्धा । अटरूषकोवासकः । कुष्मलोगुंजा । उन्मत्तकं धत्तूरकं । वाराहक्रांता

गिरिकर्णिका । कुटजमाम्रातकं । तथा । देवोपरिधृतं यच्च वामहस्ते च यद्धृतं । अधोवस्त्रेधृतं यच्च जलांतः क्षालितं च यत् ।
तद्वर्ज्यमिति शेषः । देवोपरिधृतं मल्लकोपरिधृतं । समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत् इति नित्याधिकारे वि
हितत्वात् । एतन्नित्यपूजापरं । तत्पुष्पार्चनादौ क्रीतमपि देयमिति कोशकारः । तथा च विष्णुधर्मोत्तरे । धर्मार्जित
धनक्रीतैर्यः कुर्याद्देवतार्चनं । उद्धरिष्यत्यसंदेहं तथा पूर्वांस्तथापरान् । असंभवे नित्यपूजापि क्रीतेन कार्या । तथा च नित्य
पूजाविधौ पुष्पेन दोषः क्रयचौर्ययोरिति शिष्टाः । वैसवसवत्वे । अधो मुखार्पणेनेष्टं पुष्पांजलिविधौ न तत् । पत्र
पुष्पादिकं सर्वं यथोत्पन्नं प्रदापयेत् । तत्रादि पुष्पपत्रार्चने तु पुष्पपत्राणि गणा इत्यावारत्रयेणाद्द्यात् । नवैवे
कमेव मानाभावात् । फलाविशेषाच्च । प्रतिपुष्पपत्रमंत्रत्यादाने फलाधिक्यं । निषिद्धं तु सर्वथा नोपादेयमिति ।
तथा । त्रुटिमात्रं तु यो दद्यादाग्नेयं कृतपंकजं । भास्करस्योत्तमांगेषु तस्य पुण्यफलं शृणु । इंद्रस्यार्द्धासने तिष्ठे
द्यावदिंद्राश्चतुर्दश । आग्नेयं हिरण्यं ॥ अथ धूपाः ॥ तत्र सघृतं गुग्गुलं कृष्णागुरु सघृतं महिषाख्यगुग्गु
लु श्रीवास घृत विल्व देवदारु सौगंधिक तरुष्क कस्तूरी युक्तागुरूणि । कुंदुरुः सल्लकीरसः । श्रीवासः सर
लद्रवः । सौगंधिकः सोधेल इति प्रसिद्धः । तुरुष्कः सिह्लकः । नमेरुः छायाप्रधानो वृक्षविशेषः ॥ दीपाः ।
सघृताः । तदभावे सतैलाः । तत्र ब्रह्मपुराणे । मांसीचर्पटतिलहसौदुमलयं रत्नाच मुस्तानखं गोलंकंदरकं

१५७ गसाल तगरं सर्वैः समं गुग्गुलुं। संधायात्र शशांक नाभिघुसृणं चालोड्यित्वा परं सर्वं सिह्लरसेन मर्दितमिदं धूपं पि
157 नाकिप्रियं। मोलं गिल्लो। कुंदरकं — । दीपाधिकारे भविष्यपुराणं। नासिद्ध दद्यान हिंसेत न च तैल विवर्जि
तान्। कुर्वीत दीपहंता च मूकः कोंधश्च जायते॥ अथ नैवेद्यानि। तत्र संयाव कृसरा पूपपायस गुडसंयुत मोदक र
साल शाली तंडुल पक्व षष्टिको दनयव गोधूम तिल मुद्ग माष फलमूलादीनि पक्वान्नं वैश्वदेवाग्रे उद्धृत्य दातव्यमि
ति श्रीदत्ताचारादर्शे। रसालं दधि खंड संयोगजं। तदुक्तं सूपकार तंत्रे। अर्धाढकं सुचिर पर्युषितस्य दध्नः खंडस्य
षोडश पलानि शशिप्रभस्य। सर्पिः पलं मधुपलं मरिचं द्विकर्षं शुंठ्याः पलार्धमपि चार्धपलं चतुर्णां। सूक्ष्मे पटे ललल
नया म्रदुमाणि घृष्टा कर्पूर धूलि धवलीकृत भांड संस्था। एषा वृकोदरकृता सरसा रसाला ह्यास्वादिता भगवताप
मधुमथेन। सूर्याधिकारे भविष्यपुराणम्॥ प्रणम्य दंडवद्भूमौ नमस्कारेण योर्चयेत्। स यां गतिमवाप्नोति न तां क
तुशतैरपि। भविष्ये। उक्तं च। नमस्कारप्रियः सूर्यो ह्यलंकारप्रियो हरिः। अभिषेकप्रियः शंभुः श्रीब्रह्मा भो
जनप्रियः। न केवलं नमस्कारप्रियत्वात्। भविष्ये। यथा न लंघयेत्कश्चित्स्नपनं भास्करस्य च। तथा कार्यं प्रयत्ने
न लंघितं त्वसुभावहं। तामिस्रं नरकं कर्त्ता लंघयेद्यः स रौरवं। प्रलेपस्य तु कर्त्ता वै कर्त्ता वै स्नपनस्य वा। कल्पतरो
प्रतिष्ठाकांडे। कारयेच्चैव शास्त्रज्ञैश्चित्रकर्मार्कमंदिरे। विचित्रं यानमारुह्य चित्रभानुगृहं व्रजेत्। यावत्स देवरू

पाणिग्रहस्रूपाणि लेखयेत्। तावद्युगसहस्राणि सूर्यलोके महीयते। जीर्णो देवोऽथ प्रासादो यैः कृतोऽनंतकृतो
द्विजैः। अशोच्या हि महात्मानो धूतपापा महामुने। मूलात्कृतगुणं पुण्यं प्राप्नुयाज्जीर्णकारकः। तस्मात्सर्वप्रयत्नेन
जीर्णस्योद्धारमाचरेत्। जीर्णं देहं यथा देही त्यक्त्वा चान्यं समाश्रयेत्। प्रासादं देवता जीर्णं त्यक्त्वान्यत्र व्रजेत्तथा। त
था। प्रतिमां लक्षणवतीं यः कारयति मानवः। दिवाकरस्य तल्लोकमक्षयं प्रतिपद्यते। ये भविष्यंति ये जाताः श्रीक
ला(?)ः पुरुषाः कुले। तांस्तारयति संस्थाप्य देवस्य प्रतिमां रवेः। अथ श्रीदुर्गापूजा। तत्र भविष्यपुराणं। अग्निहोत्रादि
कर्माणि वेदा यज्ञाः सदक्षिणाः। चंडिकार्चाचनस्यैते लक्षांशेनापि नो समाः। तथा। यः सदा पूजयेद्दुर्गां प्रणिनेहा
त्रिभावतः। स योगी स मुनिर्ज्ञेयो मोक्षस्तस्य मुक्तिः करे स्थिता। अग्निहोत्रपरे विप्रे वेदवेदांगपारगे। सुवर्णानां सुव
र्णस्य शते दत्ते च यत्फलं। तत्फलं लभते राजन्पूजयित्वा तु चंडिकां। सुवर्णस्य हेम्नः। सुवर्णानां तोलकानां। आपः
क्षीरं कुशाग्राणि अक्षता दधि तंदुलाः। सहा सिद्धार्थका दूर्वा कुंकुमो रोचना मधु। अर्घ्योऽयं कुरुशार्दूल द्वादशांगमुदा
हृतः। अक्षता यवाः। सहा सहदेव औषधी। तथा। नागकेसर कर्पूर मुरामांसी सवालुका। उद्वर्तने समाख्याता
मार्त्तण्डस्य सर्वतः प्रियाः। तत्पूजायां गंधाः। चंदनागुरुकर्पूरकुंकुमानि शुभानि च॥ अथ पुष्पाणि॥ देवीपुराणे
ब्रह्मोवाच। शृणु शक्र प्रवक्ष्यामि पुष्पाध्यायं समासतः। ऋतुकालोद्भवैः पुष्पैर्मल्लिकाजातिचंपकैः। सितरक्तै

१५९ श्च कुसुमैस्तथा पद्मैश्च पांडुरैः। किंशुकैस्तगरैश्चैव किंकिरातैः सचंपकैः। वकुलैश्चैव मंदारैः कुंदपुष्पैः सिलिंटकैः। क नीद०वा०पा०
158 रवीरार्कपुष्पैश्च शांशपैश्चापराजितैः। सितैरक्तैस्तथा पीतैः कुसुमैश्चैव चतुर्विधैः। धत्तूरकातिमुक्तैश्च वंधूकागस्त्यसंभ
सुरभी०वा०पा०२= वैः। मदनैः सिंधुवारैश्च सुरभिर्मरुवकैस्तथा। लताभिर्ब्रह्मवृक्षस्य दूर्वांकुरैश्च कोमलैः। मंजरीभिः कुशाग्राणां च बिल्व
पत्रैः सुशोभनैः। अनुक्तैः शोभनैः सर्वैर्जलजैः स्थलसंभवैः। पत्रैः पुष्पैर्यथालाभं सर्वौषधिमयैः शुभैः।
धान्यानां सर्वपत्रैश्च पुष्पैश्चैव प्रपूजयेत्। शुभं वा यदि वाऽशुभं वापि फलपुष्पनिवेदनं। भक्त्या निवेदयेत्सर्वं नाशुभं किंचि
दाप्नुयात्। ऋतुकालोद्भवैरिति विशेषणमनार्तवदोहदबीजानि तस्य पुष्पनिषेधार्थं। सितरक्तनीलपांडुराणि
पद्मविशेषाणि। मंदारैरिति मंदारार्कयोर्दुर्गायां विधानात्। देवीनामर्कमंदाराविति देवीपदं दुर्गेतरपरम्।
सामान्यविशेषन्यायात्। दुर्गायां तु विहितनिषिद्धाविति केचित्। नीलो रोध्रः। सितरक्तपीतकृष्णान्यपराजिताविशे
षणानि। सुरभी मल्लकी लताभिर्माधवीप्रभृतिभिः। ब्रह्मवृक्षः पलाशः। अनुक्तैरनिषिद्धैः। धान्यानामिति। सर्व
धान्यानां पत्रैः पुष्पैश्च देवीं पूजयेदित्यर्थः। तथा। केतकीं चातिमुक्तश्च वंधूकवकुलान्यपि। कर्णिकारः कदंबश्च सिंधु
क२= वारं समृद्धये। पुन्नागश्चंपकश्चैव यूथिका वनमल्लिका। तगरार्जुनमल्ली च बृहती शतपत्रिका। सुरसा वर्वरी भद्रा सुरभी
करणमल्लिका। मदनो मरुपत्रश्च शतधा पुण्यवृद्धये। कदंबैरर्चयेद्रात्रौ मल्लिकोभयतः शुभा। दिवा शेषाणि पुष्पाणि

यथालाभेन स्रजयेत् । केशकीटापविद्धानि शीर्णपर्युषितानि च । स्वयं पतितपुष्पाणि त्यजेदुपहतानि च । मुकुलै
र्नार्चयेद्देवीम पक्वं न निवेदयेत् । फलं क्वथितविद्धं वा कालपक्वमपि त्यजेत् । बकमल्लिका बकपुष्पा मल्लिकेत्यर्थः ।
बकश्च मल्लिका चेत्यर्थः । सुरसा तुलसीविशेषः । मरुपत्रो मरुवकः । अकालपक्वमसमयपक्वं । एतानि केतकादीनि
मरुवकांतानि पुष्पं प्रवरदानपुण्यशतगुणपुण्यजनकानीति वाक्यार्थः । भविष्यपुराणे । मल्लिकामुत्पलं
पद्मं शमीपुन्नागचंपकं । अशोकं कर्णिकारं च द्रोणपुष्पं विशेषतः । करवीरं शमीपुष्पं कुंकुमं नागकेसरं । यः प्र
यच्छति पुण्यार्थं पुण्याण्येतानि भारत । चंडिकायै नरश्रेष्ठ भक्तिश्रद्धासमन्वितः । स कामानखिलान्प्राप्य चंडिकानु
चरो भवेत् । धूपदीपनैवेद्यानि प्रागुक्तान्येव । भविष्ये । सौवर्णं त्वदितिं राजन्भगवत्यै प्रयच्छति । गोसहस्र
फलं प्राप्य सूर्यलोके महीयते । तथा स्वर्णतिलकं दुर्गायै यः प्रयच्छति । स गच्छति परं स्थानं यत्र सा परमा कला ।
तथा । सर्वयज्ञोपवासेषु सर्वतीर्थेषु यत्फलं । तत्फलं लभते वीर प्रणम्य शिरसा सतीं । सती दुर्गा । एवं प्रकुरु
ते यश्च तस्य पुण्यफलं शृणु । दश पूर्वान्परांस्तात आत्मानं चैकविंशकं । उद्धृत्य स्वकुलं यावद्ब्रह्मलोके मही
यते । गच्छेद्भगवती यत्र परापरसुपूजिता । तत्र कल्पांतरं यावद्भुक्त्वा भोगान्मनोरमान् । पुनः कालादिहाया
तः पृथिव्यामिकराड्भवेत् ॥ अथ शिवपूजा ॥ तत्र भविष्यपुराणे ॥ लिंगे देवो महादेवः सर्वदेवव्यवस्थितः ।

१५९ 159

अनुग्रहायलोकानांतस्मान्नित्यंप्रपूजयेत् ।योनपूजयतेभक्त्यालिंगंत्रिभुवनेश्वरं ।नस्वर्गोराज्यमोक्षाणांत्रिश्चभव
तिभाजनं ।तस्मात्सौम्यमनाभूत्वायावज्जीवंप्रतिज्ञया ।अर्चयेतसदादेवमापन्नोपिमहामुने ।वरंप्राणपरि
त्यागःशिरसोवाविकर्त्तनं ।नत्वसंपूज्यभुंजीतभगवंतंत्रिलोचनं ।स्फुटंनिर्वपतेयत्तुयावज्जीवंशिवार्चनं ।
मनुष्यचर्मणानद्धःसरुद्रोनात्रसंशयः ।पाद्मे ।नमःशिवायमंत्रेणकुर्वतेयेजपंसदा ।श्रृण्वंतियमल्लो
कस्यकथामपिनतेनराः ।प्रसंगेनापियेवैशपरंभेनापिप्रलोभतः ।येसेवंतेमहादेवंनतेपश्यंतिभास्करिं ।
शिवभक्तिंप्रकुर्वाणायेद्विषंतिजनार्दनं ।तिष्ठंतिनिरयेपापायावत्कल्पसुदारुणं ।शिवपूजनंतुलिंगेप्रशस्तं ।
स्कंदपुराणे ईश्वरवाक्यम् ।नतुष्याम्यर्चितोभक्त्यातथादेविनगात्मजे ।लिंगेर्चितोयथात्यर्थंपरितुष्यामिपार्वति ।
सर्वेन्द्रियप्रमुक्तोपिमुक्तोवासर्वपातकैः ।सप्रयातिशिवंदेविलिंगंयोर्चयतीहमे ।लिंगपुराणे ।अनेकजन्मसा
हस्रंभ्राम्यमाणस्तुयोनिषु ।कःसमाप्नोतिवैमुक्तिंलिंगार्चनमृतेनरः ।हरहर्योरधिष्ठानंशिवनाभिशिलास्मृता ।
पाद्मे ।सालिग्रामशिलालिंगेयःकरोतिममार्चनं ।तेनार्चितःकार्त्तिकेयगणानामेकसप्ततिः ।नवाप्रनैवे
द्यादेरग्राह्यत्वं ।अनर्हंममनैवेद्यंपत्रंपुष्पंफलंजलं ।सालिग्रामशिलालिंगेसर्वंयातिपवित्रतामिति ।
स्ववर्णधर्मपरित्यागिनःशिवपूजायामनधिकारः ।स्वधर्मंयःपरित्यज्यपरधर्मरुचिर्भवेत् ।चकोरनयने

घोरः समूढः शूद्रसन्निभः। तेनाहं पूज्यमानोपि गंधं जिघ्रामि कौणपं। तामर्चां नर्चितो हित्वा तस्याहं स्पर्शना
दपि। व्रजाम्यायतनं हित्वा यत्रासौ पापनिश्चयः। वर्णत्रयस्य शुश्रूषां मुक्त्वा शूद्रः करोति यः। स्वधर्मस्य स्थि
तिं ज्ञात्वा तस्य गृह्णाम्यहं बलिं मिति स्कांदे शिवोक्तेः। ब्राह्मणस्य स्वधर्मपरित्यागिनोप्यत्राधिकारः। तदुक्तं
तेनैव। विप्रस्य तु सदेवाहं शुचेरप्यशुचेरपि। गृह्णाम्यलिं न त्वन्यासामपि प्रियाणामपि दर्शनात्। पुनस्तत्रैव।
वेदमंत्रधरैर्विप्रैरहं तुष्येर्चितः सदा। न विप्राणां करस्पर्शैर्नो द्विजामि वरानने। शूद्रकर्मरतेनापि स्पृश्यमानो
द्विजन्मना। हृष्यामि तेन सततं पूज्यमानश्च सुंदरि। अत्रायमाशयः। शूद्रः स्वधर्मनिरतोधिकारी पूजायां
स्पर्शे। इतरस्य तत्राप्यनधिकारः। क्षत्रियवैश्ययोः स्वधर्मस्थयोरुभयत्राधिकारः। विप्रस्य जात्यैव सर्वत्रा
धिकारः। अनधिकारिणां विप्रद्वारा पूजनं न परित्यागः। ब्रह्मपुराणे। नाधिकारोस्ति विप्राणां भौमानां
देवपूजने। कृत्या भरतशार्दूल क्ष्माधिपत्ये विशेषतः। भौमा मनुष्याः। क्ष्माधिपत्ये देवभूमिप्रभुत्वे। पुनस्तत्रै
व। यस्तु पूजयते देवान्ब्राह्मणो द्रव्यलोभतः। कृत्या भरतशार्दूल स याति नरकं ध्रुवं। देवालयेषु सर्वेषु वर्जयि
त्वा शिवालयं। अधिकारः स्मृतो राजन्भोजकानां न संशयः। भोजकास्तत्र देवताधिकृताः। विधिं विना च यो
रुद्रं पूजयेद्द्विज नियोजितः। स याति नरकं घोरं स्वामी चाशु विनश्यति। सिद्धांतज्ञैः शिवस्तस्मात्पूजनीयो हरिस्तथा।

॥८० स्वामिपूजांकारयिता। भविष्ये। यःकृत्वापार्थिवंलिंगंपूजयेच्छुभवेदिकं। इहैवधनवान्श्रीमानंतेरुद्रोभिजा
160 यते। पार्थिवलिंगमधिकृत्यब्रह्मपुराणं। हरोमहेश्वरश्चैवशूलपाणिःपिनाकधृक्। पशुपतिःशिवश्चैव
महादेवेतिकीर्त्तयेत्। मृत्तिकाग्रहणेचैवघट्टनेचप्रतिष्ठने। आवाहनेचस्नपनेपूजनेचविसर्जने। हरादीनि
चनामानिमहादेवांतानिकीर्त्तयेत्। अष्टमूर्त्तिपूजांप्रतिभविष्येविष्णुवाक्यम्। साधुसाधुद्विजश्रेष्ठसाधु
पृष्टोस्मिसुव्रत। शृणुष्वावहितःसर्वंशिवमंत्रगणंपरं। ॥ॐशर्वायक्षितिमूर्त्तयेनमः। ॐभवायजलमूर्त्तयेन
मः। ॐरुद्रायाग्निमूर्त्तयेनमः। ॐउग्रायवायुमूर्त्तयेनमः। ॐभीमायाकाशमूर्त्तयेनमः। ॐपशुपतयेयजमानमूर्त्त
येनमः। ॐमहादेवायसोममूर्त्तयेनमः। ॐईशानायसूर्यमूर्त्तयेनमः। मूर्त्तयोष्टौशिवस्यैताःपूर्वादिक्र
मयोगतः। आग्नेय्यांताःप्रयोज्याश्चवेद्यांलिंगेशिवंयजेत्। ॐशिवमिति। ॐनमःशिवायमंत्रेणशिवं
लिंगेप्रपूजयेत्। ततोवामावर्त्तेनमूर्त्तीरष्टापिपूजयेत्। इतिवाक्यार्थः॥ तत्रायंप्रयोगः॥ ॐअद्यामु
कमासीयामुकतिथौऐहिकधनवत्त्वश्रीमत्त्वांतकालिकरुद्रत्वभवनकामःपार्थिवशिवलिंगपूजनमहंक
रिष्ये इतिसंकल्पंकुर्यात्। वामावर्त्तेनाष्टमूर्त्तीःपूजयेत्। तथामलकमात्रंतुकृत्वालिंगंहिरण्मयं। संपूज्य
रत्नजटितंशिवलोकेमहीयते। मृद्भस्मगोशकृत्पिष्टताम्रकांस्यमयंतथा। कृत्वालिंगंसकृत्पूज्यवसेत्कल्पा

युतं दिवि। देवीपुराणे। वार्क्षं विघ्नप्रदं लिंगं स्फाटिकं सर्वकामदं। नर्मदातीरजं श्रेष्ठमन्यद्वापि हि लिंगवत्।
कृत्वा पूजय विप्रेंद्र लप्स्यसे चेप्सितं फलं। लिंगवत् लिंगाकारं। अत्र लिंगमतिकर्कशमतिक्षुद्रमतिस्थूलं चि
पिटाकारं पिंडिकाविषमवर्णं अंजपिंडिकं मानोन्मानहीनपिंडिकं च निषिद्धं। वाणलिंगं कपिलमपि न निषि
द्धं। पक्वजंबूफलाकारं प्रशस्तं। भविष्ये। वाणलिंगानि राजेंद्र ख्यातानि भुवनत्रये। न प्रतिष्ठा न संस्कारस्तेषा
मावाहनं तथा। एवमेव प्रपूज्यानि शिवरूपाणि भारत। इति पुराणांतरे। गृहे लिंगद्वयं नार्च्यं गणेशत्रयमेव च।
शक्तित्रयं तथा शंखं मत्स्यादि दशकांकितं। द्वे चक्रे द्वारिकायास्तु नार्च्ये सूर्यद्वयं तथा। एतेषां पूजनान्नित्यमु
द्वेगं प्राप्नुयाद्गृही। सालिग्रामाः समाः पूज्या विषमा न कदाचन। विषमे एक एवेज्यः समे द्वे षड्विवर्जयेत्।
अथ पंचोपचाराः। तत्र भविष्यपुराणे। चंदनाच्चागुरोर्ज्ञेयं पुण्यमष्टगुणं नृप। कृष्णागुरोर्विशेषेण द्विगु
णं फलमादिशेत्। तस्माच्छतगुणं पुण्यं कुंकुमस्य विधीयते। चंदनागुरुकर्पूरैः सूक्ष्मपिष्टैः सकुंकुमैः। शिव
स्यार्चां समालभ्य कल्पकोटिं वसेद्दिवि। अर्चा प्रतिमा। इयं लिंगस्याप्युपलक्षिका॥ ॥अथ पुष्पाणि॥ ॥पुष्पै
रारण्यसंभूतैः पत्रैर्वा गिरिसंभवैः। अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जंतुवर्जितैः। आत्मारामोद्भवैर्वापि पुष्पैः सं
पूजयेच्छिवं। तपःशीलगुणोपेते पात्रे वेदस्य पारगे। दत्वा शतं सुवर्णानां यत्फलं तदवाप्नुयात्। अर्कपुष्पं [illegible]ः

स्मृ
१६१
161

तथैकस्मिन् शिवाय विनिवेदिते । दत्वा दत्वा हरसिस्य यत्फलं [illegible] तदवाप्नुयात् । अर्कपुष्पसहस्रेभ्यः
करवीरं विशिष्यते । करवीरसहस्रेभ्यो बिल्वपत्रं विशिष्यते । बिल्वपत्रसहस्रेभ्यो द्रोणपुष्पं विशिष्यते । द्रोणपु
ष्पसहस्रेभ्य अपामार्गं विशिष्यते । शमीपुष्पसहस्रेभ्यो नीलोत्पलदलं वरं । तथा । पद्मपत्रसहस्रेभ्यो वकपत्रं वि
शिष्यते । वकपत्रसहस्रेभ्य एकं धत्तूरकं वरं । धत्तूरकसहस्रेभ्यः शमीपुष्पं विशिष्यते । अपामार्गमपि कुसुम
मिह विवर्जितं । पद्मेति पद्मसहस्रं सहस्रपत्रमेतादृशं यत्पद्मं तेन कमलमित्यर्थः । तथा । करवीरसमा ज्ञे
या जाती वकुलपाटलाः । श्वेतमंदारकुसुमं सितपद्मं च तत्समं । नागचंपकपुन्नागधत्तूरकुसुमाः स्मृताः ।
तत्समं करवीरसमं । नागो नागकेसरः । तथा । केतकी चातिमुक्तं च कुंदो यूथी मदंतिका । शिरीषसर्ववंधू
ककुसुमानि विवर्जयेत् । कुंदं तु वर्षप्राप्तिश्शिवस्य जायां व्रतरूपायां प्रारब्धायां माघमासे विहितं । अन्यथा तु मा
घे निषिद्धं । तथा । गंधवंत्यपवित्राणि कुसुमानि विवर्जयेत् । गंधहीनमपि ग्राह्यं पवित्रं यत्कुशादिकं । कनकानि
कदंवानि रात्रौ देयानि शंकरे । दिवाशेषाणि पुष्पाणि दिवारात्रौ च मल्लिका । प्रहरं तिष्ठते जाती कर्णिकारमहर्नि
शं । केशकीटापविद्धानि शीर्णपर्युषितानि च । स्वयं पतितपुष्पाणि त्यजेदुपहतानि च । मुकुलैर्नार्चयेद्देव
मपक्वं न निवेदयेत् । पत्राणामप्यलाभे तु भक्त्या भवति पूजितः । प्रत्येकमुक्तपुष्पेषु दशसौवर्णिकं फलं । मं

त्रान्वितेषु तेष्वेव द्विगुणं फलमिष्यते। बिल्वपत्रैरखण्डैस्तु यो लिंगं पूजयेत्सकृत्। सर्वपापविनिर्मुक्तः शिवलो
के महीयते। बृहतीकुसुमैर्भक्त्या यो लिंगं सकृदर्चयेत्। गवामयुतदानस्य फलं प्राप्य शिवं व्रजेत्। अपवित्रा
णि कपिलनील्यादीनि कनकानीति। कनकं धत्तूरं। कदंबं कनकं च रात्रौ शिवपूजायामतिप्रशस्तं। शेषाणि
दिवातिप्रशस्तानि। मल्लिका तु भयत्रातिप्रशस्तेत्यर्थः। देयानि। दो अवखंडने इत्यस्य प्रयोगः। तेन खंडनीया
नीति सागरः। तन्न। शृंगारकरणक कथित विरोधात्। रात्रिस्फोटितस्य तदुत्तर मल्लिगिनियोगे पर्युषिततया वा
धसापेक्षत्वविध्यापत्तेः। केशापविद्धं केशसंयुक्तं। शीर्णं समयादन्यथा तस्यानं। प्रयत्नात्पक्क मूष्मादिनापक्कं।
अखंडैर्निश्छिद्रपत्रत्रयैः। गोलक्षफलमक्षयस्वर्गः। अक्षयत्वं चाभूतसंप्लवपर्यंतस्थायित्वं। गवामयुतदा
नफलं शक्रेण सह मोदनं। तथा। अशोकश्वेतमंदारकर्णिकारबकानि च। करवीरार्कमंदारशमीतगरकेसरं।
पुष्पैरेतैर्यथालाभं यो नरः पूजयेच्छिवं। स यत्फलमवाप्नोति तदेकाग्रमनाः शृणु। सूर्यकोटिप्रतीकाशैर्वि
मानैः सर्वकामिकैः। दोधूयमानैश्चमरैः शिवलोके महीयते। करवीरो बकश्चैव अर्क उन्मत्तकस्तथा। पलाशो
बृहती चैव तथा च गिरिकर्णिका। तथा काशस्य पुष्पाणि मंदारश्चापराजिता। शमीपुष्पाणि चान्यानि कुब्जकं शं
खिनी तथा। अपामार्गस्तथा पद्मं जातीपुष्पं सवोकनं। चंपकोशीरतगरं तथा वै नागकेसरं। पुन्नागं किंकिरा

१६२ तं च द्रोणपुष्पं तथा शुभं। शिंशिपोदुंबरश्चैव जयामल्लीतथैव च। पुष्पाणि यत्नतस्तस्य तथा बिल्वदलं शुभं।
162 कुसुंभस्य च पत्राणि तथा वैकंकतस्य च। नीलं च कुमुदं चैव तथा रक्तोत्पलानि च। सुरभीणि च सर्वाणि स्थ
लजान्यंबुजानि च। एतान्यानि शिरसा देवि यो मे भक्त्या निवेदयेत्। केसरो बकुलः। उन्मत्तको धत्तूरकः।
गिरिकर्णिका कुरजं। शिखिनी चूलयेति प्रसिद्धा। कोकनं मोरते इति प्रसिद्धं। किंकिरातं कुरंटक २६८
पुष्पं। उशीरं वीरणं इति प्रसिद्धं। जया जयंती यत्नतस्तस्य पलाशस्य। नीलं नीलोत्पलं। सर्वाणीति
निषिद्धेतरविषयं। वसंते सर्वाण्यपि देयानि। वसंते तु ऋतौ प्राप्ते सर्वैः पुष्पैर्मनोरमैः। पूजिते तु महादे
वे अश्वमेधफलं लभेत्। मासपूजायां देवीपुराणे। वैशाखे मासि कर्त्तव्या पूजा पाटलिका सदा। सर्वा
न्कामानवाप्नोति ज्येष्ठे पद्मार्चनैः सदा। आषाढे बिल्वकह्लारैरीहितं लभते फलं। नवमल्लिकया पूजा न
भो मासि महाफला। करवीरैश्चंपकैरेवं नभस्ये सर्वकामदा। पूजा पंकजमालत्या इषेभ्युदयदायिनी। शत
पत्रिकया पूजा कार्त्तिके सर्वकामिकी। मार्गे नीलोत्पलैः पूजा पौषे चैव तु कुब्जकैः। माघे तु कुंदकुसुमैर्म
रुवकेन फाल्गुने। शतपत्रैस्त्वथा चैत्रे यः कुर्यात्सुरसत्तम। लभते सर्वयज्ञानां सर्वदानफलं तथा। सर्वत्रे
ति सर्वत्रान्वीयते। तेन मासं प्राप्य पूजा लभ्यते। नभाः श्रावणः। नभस्यो भाद्रः। इषः आश्विनः। मार्गे

पूजेत्यत्रापिसर्वकामिकीत्यनुषज्यते ॥ ॥अथधूपाः॥ ॥तत्रशिवपुराणम्। गुग्गुलंघृतसंयुक्तंशिवेयश्च
निवेदयेत्। रुद्रलोकमवाप्नोतिगाणपत्यंचविंदति। भविष्यपुराणे। दधित्थंघृतसंयुक्तंदग्ध्वाबिल्वमथा
पिवा। अग्निष्टोमस्ययज्ञस्यफलंप्राप्नोतिमानवः। दधित्थःकपित्थः। विल्वंविल्वफलं ॥ ॥अथदीपाः
तत्रैव ॥ ॥घृतप्रदीपदानेनतथाचैवौषधीरसैः। दीपंप्रज्वाल्यदेवेशभक्त्यास्वर्गतिमाप्नुयात् ॥ ॥
अथनैवेद्यम् ॥ ॥भविष्ये। गुडखंडघृतानांचभक्ष्याणांचनिवेदने। घृतेनपाचितानांचनेकांशशतगुणं
फलं। स्तुतिजप्योपहारैश्चशिवेतत्फलमाप्नुयात्। सर्वेषामेवपुष्पाणामलिसंख्यायशस्विनि। ममाग्रे
गायतःपुंसःपुण्यसंख्यानविद्यते। शंकरोगीतवाद्येनह्युपवासेनकेशवः। चंडिकाबलिदानेनस्तोत्रपा
ठेनभास्करः। इत्युक्तत्वात्। तथा। नमस्कृत्यमहादेवमश्वमेधफलंलभेत्। प्रणम्यदंडवद्भूमौनमस्कारे
णचार्चयेत्। सयांगतिमवाप्नोतिनतांक्रतुशतैरपि। तथा। जानुभ्यामथपाणिभ्यांशिरसाचविचक्ष
णः। कृत्वाप्रणामंसर्वेशेसर्वान्कामानवाप्नुयात्। तीर्थकोटिसहस्राणितीर्थकोटिशतानिच। महादेव
प्रणामस्यकलांनार्हंतिषोडशीं। तथा। कृत्वाप्रदक्षिणांभक्त्याशिवस्यायतनेनरः। अश्वमेधसहस्रस्यइष्ट
स्यलभतेफलं। वृद्धंचपरिशिष्टे। एकंविनायकेकुर्याद्द्वेसूर्येत्रीणिशंकरे। चत्वारिकेशवेदद्यात्सप्ताश्वत्थे

१६५ प्रदक्षिणा:। लिंगपुराणे। सव्यंव्रजेत्तथासव्यंप्रणालंनैवलंघयेत्। आदित्यपुराणे। प्रदक्षिणात्रयंकु
र्याच्छिवस्यायतनेनर:। अश्वमेधसहस्रस्यफलंप्राप्नोतिमानव:। बहुकरणमप्यविरुद्धं। प्रदक्षिणंप्र
कुर्वीतशतमष्टोत्तरंतथा। नमस्कारान्प्रकुर्वीततावत्संख्याञ्शिवेनर:। इतिस्कांदोक्ते:। बृहन्नारदीये।
शिवप्रदक्षिणोमर्त्य:सोमसूत्रंनलंघयेत्। तथा। अपसव्यंयति:कुर्यात्सव्यंतुब्रह्मचारिण:। सव्यापस
व्यंगृहिणोनित्यंशंभो:प्रदक्षिणं। तृणै:काष्ठैस्तथापर्णै:पाषाणैर्वेष्टिकादिभि:। अंतर्धानंपु
न:कृत्वासोमसूत्रंतुलंघयेत्। सोमसूत्रप्रमाणमपितत्रैव। प्रासादविस्तारसमानसूत्रंसोमसूत्रे
दिशिसोमसूत्रं। सूत्राद्बहिर्लंघनतोनदोष:स्याद्दोषआभ्यंतरलंघनेन। सोमस्यदिशि मंडपादुदीच्यां
दिशि। प्रासादविस्तारसमानसूत्रंपरित्यज्यबहि:प्रदक्षिणकरणेनास्तिदोष:। विशेषांतरमुक्तंतत्रैव।
वृषंचंडंवृषंचैवसोमसूत्रंपुनर्वृषं। चंडंचसोमसूत्रंचपुनश्चंडंपुनर्वृषं। सोमसूत्रप्रणालिकाइति।
सोमसूत्रद्वयंयत्रयत्रवाविष्णुमंदिरे। अपसव्यंनकुर्वीतकुर्वन्किल्बिषमश्नुते। तथा। एकांचंडंवारवे
तस्व: २८ सप्ततिस्रोदद्याद्विनायके। चत्वारिकेशवेदद्याच्छंकरेर्धप्रदक्षिणं। इत्यत्रयच्छिवेर्द्धप्रदक्षिणंतत्प्र
णालालंघनापेक्षयार्धमितिप्रतीयते। स्कांदे। शिवनिर्माल्यभोक्तार:शिवनिर्माल्यलंघका:। शिवनि

माल्यदातारो दर्शनात्तेषां हि पुण्यहृत् ।। शिवैकभक्तानां न निषेधः । पादोदकं च निर्माल्यं भक्तैर्धार्यं विशे
षतः । इत्यग्निपुराणात् । कालिकापुराणे । स्पृष्ट्वा रुद्रस्य निर्माल्यं सवासा आप्लुतः शुचिरित्यपालनि
र्माल्ये देवमाल्यापनयनमिति विहितत्वात् । आदित्यपुराणेऽपि च । निर्माल्यं धारयेद्भक्त्या शिरसा पार्वतीपतेः ।
राजसूयस्य यज्ञस्य फलं प्राप्नोति निश्चयं । लोभादिना तु न धार्यं । लोभान्न धारयेच्छंभोर्निर्माल्यं न च भक्ष
येत् । न स्पृशेदपि पादेन लंघयेन्नापि नारदेति । सर्वैरपि चंडांशं त्यक्त्वैव धार्यं । क्वचिच्चंडांशाभावोऽप्युक्तो
ऽग्निपुराणे । बाणलिंगे जले लोहे सिद्धलिंगे स्वयंभुवि । प्रतिमासु च सर्वासु न दोषो माल्यधारणे । सालि
ग्रामशिलासंसर्गात्तु सर्वैरपि सर्वमपि सेवनीयं । तथा स्कंदपुराणे । अग्राह्यं शिवनिर्माल्यं पत्रं पुष्पं फलं
जलं । सालिग्रामस्पर्शसंगात्सर्वं याति पवित्रतामिति । अथ स्पर्शाधिकारिणो बृहन्नारदीये । प्रायश्चि
त्तविहीनानि कर्माणि शृणु भूपते । समस्तपापतुल्यानि महानरकदानि वै । यः शूद्रेणार्चितं लिंगं
विष्णुं वा प्रणमेन्नरः । न तस्य निष्कृतिर्नास्ति प्रायश्चित्तशतैरपि । योषिद्भिः पूजितं लिंगं विष्णुं वापि नमे
न्नरः । स कोटिकुलसंयुक्त आकल्पं रौरवे वसेत् । इति कलान्यासपूर्वकपूजितपरं प्रतीयते । पुनस्तत्रैव ।
स्त्रीणामनुपनीतानां शूद्राणां च मनुजेश्वर । स्पर्शने नाधिकारोऽस्ति विष्णोर्वा शंकरस्य चेति निषेधः ।

मोदंते सह रुद्रेण ते नराः शिवसन्निधौ । महारवेष्टकाशैलैर्यः कुर्यान्तु शिवालयं ५२

१६४ प्रतिष्ठितस्पर्शविषयः । यथा तत्रैव । यदाप्रतिष्ठितं लिंगं मंत्रविद्भिर्यथाविधि । तदाप्रभृतिशूद्रश्च यो
षिद्वापि न संस्पृशेत् । पाद्मे । तृणैः काष्ठैश्च पाषाणैर्ये कुर्वंति शिवालयं । त्रिःसप्तकुलसंयुक्ताः शिव
164 लोके महीयते । मृण्मयात्कोटिगुणितं फलं दार्विष्टकामये । इष्टिकाद्दिगुणं पुण्यं शैलेये स्फाटिकालये ।
इति शिवपूजा ॥ ॥ अथ विष्णुपूजा ॥ तदाधारमाह नृसिंहपुराणे । अप्स्वग्नौ हृदये सूर्ये स्थंडिले प्र
तिमासु च । षट्स्वेतेषु हरेः सम्यक्पूजनं मुनिभिः स्मृतं । सम्यगिति विषमां प्राशस्त्यं । तेनाधारान्त
रेऽपि सालिग्रामादौ पूजा न विरुध्यते । स्थंडिलं परिष्कृता भूमिः । प्रतिमासु प्रागुक्तासु सप्तविधासु ।
एतदाधारपरिगणनं नरसिंहपुराणे । वक्ष्यमाणपूजार्थं वे । अर्चनं संप्रवक्ष्यामीत्युपक्रम्य तयोरेव
वक्ष्यमाणत्वात् । तेन सकलदेशीयमहाजनाचारसिद्धा परत्र चक्रसालिग्रामशिलानामप्याधार
ता । कल्पांतरेणाविरुद्धा । यथा वाराहपुराणे भगवद्वाक्यं । कुड्ये लेख्ये च मां कश्चित्पटे कश्चित्तु
मानवाः । पूजयेद्यदि वा चक्रे मम तेजोंशसंभवं । चक्रे सालिग्रामशिलाचक्रे । तथा । पद्मेहं पूजनं
शालं शास्त्रे चैवाथ स्थंडिले । सर्वत्र संप्रतिष्ठामि पूज्यमानस्त्वहं ततः । पाद्मे । कृत्वा ताम्रमये पात्रे योऽ
र्चयेन्मधुसूदनं । फलमाप्नोति पूजायाः प्रत्यहं शतवार्षिकं । आधारविशेषे विधिविशेषमाह ।

हविषाग्नौजलेपुष्पैर्जपेनरविमंडले।ध्यानेनहृदयेवाद्यैर्गंधाद्यैःस्थंडिलादिषु।श्रीभागवते।
स्वर्योग्निर्ब्राह्मणागावोवैष्णवाःखंमरुज्जलं।भूरात्मासर्वभूतानिभद्रपूजापदानिमे।सूर्येतुविद्य
यात्रय्याहविषाग्नौयजेतमां।आतिथ्येनतुविप्राग्र्येगोष्वंगयवसादिना।वैष्णवेबंधुसत्कृत्याहृदये
ध्याननिष्ठया।वायौमुख्यधियातोयेद्रव्यैस्तोयपुरस्कृतैः।स्थंडिलेमंत्रहृदयैर्भोगैरात्मानमात्मनि। नि २ =
क्षेत्रज्ञंसर्वभूतेषुसमत्वेनयजेतमां।गारुडे।मनोधृतिर्धारणास्यात्समाधिर्ब्रह्मणिस्थितिः।अ
मूर्तिश्चेत्स्थिरानस्यात्ततोमूर्तिंविचिंतयेत्।सच्चतुर्विंशतिमूर्तिःसालिग्रामशिलास्थितः।द्वा चतुर्विंशतिमूर्तेण
रकादिशिलासंस्थोध्येयःपूज्योथवाहरिः।मनसोऽभीप्सितंप्राप्यदेवोवैमानिकोभवेत्।पाद्मे।नित्या वा.पा. ६ =
र्चनेनहरेर्येनपित्रर्थंमुनिसत्तम।गयायांपिंडदानंतुकृतंतेनदिनेदिने।तथा।पितॄनुद्दिश्ययैःपूजाकेश
वस्यकृतानरैः।हित्वातेनारकींपीडांदिवंयांतिपितामहाः।यमुद्दिश्यहरेःपूजाक्रियतेमुनिसत्तम।उद्धृ
तोनरकाद्दुःखात्सयातिपरमंपदमिति।पित्रर्थमपिक्रियमाणाविष्णुपूजासर्वेणैवकार्या।एकादशाह
शय्यादिदानवत्।अथसालिग्रामप्रशंसा।तत्रलिंगपुराणेशिववाक्यं।कामासक्तोपियोनित्यंभक्ति
भावविवर्जितः।सालिग्रामशिलांपुत्रपूजयेत्सोऽच्युतोभवेत्।कामासक्तापिक्रुद्धोपिसालिग्रामशिलार्चनं।

१६५ 165 भक्त्या वाथ यदि वाऽभक्त्या कृत्वा मुक्तिमवाप्नुयात् । लिंगकोटिसहस्रैस्तु पूजितैर्यत्फलं भवेत् । तत्फलं को
टिगुणितं सालिग्रामशिलार्चने । द्वादशैह शिलायो वै सालिग्रामसमुद्भवाः । अर्चयेद्वैष्णवो नित्यं तस्य
पुण्यं निबोध मे । कोटिलिंगसहस्रैस्तु पूजितैर्जाह्नवीतटे । काशीवसेद्युगान्यष्टौ दिने नैकेन तद्भवेत् ।
ततो वह्नीर्स्वयति सालिग्रामशिलास्तुयः । नहि ब्रह्मादयो देवाः संख्यां जानंति तत्फले । सालिग्रामशिला
ग्रे तु ये कुर्वंति ममार्चनं । तत्र दानं च होमं च सर्वं कोटिगुणं भवेत् । सालिग्रामसमीपे तु क्रोशमात्रं समंततः ।
कीकटोपि वा. ६= कीटकेपि मृतो याति वैकुंठभुवने नरः । कीकटो गयाप्रदेशः त्रिशंकुच्छायावाप्तः । मात्स्ये । सालिग्रा
मसमुद्भूताः शिलाश्चक्रांकमंडिताः । यत्र तिष्ठंति वसुधे तद्देशं योजनत्रयं । तथा तत्रैव । सालिग्राम
शिलाचक्रं यो दद्याद्दानमुत्तमं । भूचक्रं तेन दत्तं स्यात्सशैलवनकाननं । सालिग्रामशिलाग्रे तु यः श्राद्धं कु
रुते नरः । तस्य ब्रह्मादिकं स्थानं तृप्ताश्च पितरो दिवि । सालिग्रामशिलाग्रे तु यच्छ्राद्धं क्रियते नृभिः । भवं
ति पितरस्तृप्ताः कालसंख्या च नैव हि । शिरसा विष्णुनिर्माल्यं तर्पणं चरलोदकैः । देवानां च पितॄ
णां च महापातकनाशनं । पाद्मे । विष्णुपादोदकेनैव पितॄणां तर्पणक्रिया । स्कांदे । सालिग्रामनम
स्कारो व्याजेनापीह यैः कृतः । मद्भक्ता अपि ते नैव मां नमस्यंतु मानवाः । मद्भक्तिवलम्भयिष्टामत्रभुं न

नमंतिये। वासुदेवेनमद्भक्ताःकिंनुतेत्वतिपाविनः। अन्नंहिममनैवेद्यंपत्रंपुष्पंफलंजलं। सालिग्रा
मशिलालग्नंसर्वंयातिपवित्रतां। बृहद्विष्णुपुराणेगौरीश्वरसंवादेपाषंडिप्रश्ने। यत्संपर्कान्ममज
लंपत्रंपुष्पंचचंदनं। सर्वंपवित्रतामेतिनचतेषामनादरः। भविष्यतिवरारोहेमन्मायामोहितान्नराणां।
तेतुपाषंडिनःप्रोक्ताःसर्वधर्मबहिष्कृताः। हेमाद्रौ। कुंकुमंचंदनंपत्रंनैवेद्यंकुसुमंजलं। सालिग्राम
शिलालग्नंतीर्थकोटिशताधिकं। सालिग्रामोद्भवंदृष्ट्वान्यस्तंहृदिजनाधिप। तंनेहितुंशक्नुवंतिस
र्वतोयमकिंकराः। हलायुधेस्कांदवचनं। केशवार्चागृहेयस्यनतिष्ठतिमहीतले। तस्यान्नंनैवभोक्त
व्यमभक्षणसमंस्मृतं। अर्चासालिग्रामादिविष्णुप्रतिमा। सालिग्रामशिलापूजांविनायोश्नातिकिं
चन। सर्वांडालोहिविष्टायामाकल्पंजायतेक्रिमिः। सालिग्रामशिलेतिपदंविष्णुस्वरूपमात्रोप
लक्षकं। एतानिचात्रगुणफलानि आधारविशेषाधिकारात्। अधिकरणसाद्गुण्यगत्वात्। पाद्मेदेव
दूतविकुंडलसंवादेमाघमाहात्म्ये। अपिपापसमाचाराःकर्मण्यनधिकारिणः। सालिग्रामार्चकावैश्प
नैवयांतियमालयं। पाद्मेकार्त्तिकमाहात्म्येषष्ठाध्यायेनारदशौनकसंवादे। सालिग्रामशिलायांतु
सदाश्रीकृष्णपूजनं। नित्यंसन्निहितस्तत्रसालिग्रामेजगद्गुरुः। पुनस्तत्रैव। स्कंधेकृत्वातुयोध्वानंवह

१६६ 166

तेशैलनायकं । तेन चूर्णं भवेत्सर्वं त्रैलोक्यं सचराचरं । स्वमंत्रेणावुधैः पूज्यः स्वकेर्ध्यानैः स्वमुद्रया । हरिस्तत्र स
माविष्टः सर्वदा नात्र संशयः । अथ चिह्नविशेषेण विष्णोर्विशेषनामानि । चक्राकारेण पंक्तिः सा यत्र रेखाम
यी भवेत् । सुदर्शन इत्येव ख्यातः पूजाफलप्रदः । उपर्यधश्च चक्रे द्वे नातिदीर्घमुखे विले । मध्ये च रेखालं
बैका स च दामोदरः स्मृतः । यस्य दीर्घमुखस्थूलैकचयिते लक्षणैर्युतं । रेखा च केसराकारा नरसिंहो मतो हि सः ।
वाराहकृतिरामग्नश्चक्ररेखास्वलंकृता । वाराह इति संप्रोक्तो वामनो वरदोपमः । नागवत्कुंडलीभूता
रेखापंक्तिः स शेषकः । पर्यंकाकारेनु यंगीच द्वे मध्ये चापि रेखके । गरुडः स तु विज्ञेयश्चतुश्चक्रैर्जनार्दनः ।
हयग्रीवो यथालंवा रेखाकारा शिला भवेत् । तथा सोसा हयग्रीवः पूजितो ज्ञानदो भवेत् । चतुश्चक्रः
सूक्ष्मविलो वनमालांकितोदरः । लक्ष्मीनारायणः श्रीमान्भुक्तिमुक्तिफलप्रदः । कूर्माकारश्च चक्रांका
शिला कूर्मः प्रकीर्तितः । एवं मत्स्यादयो ज्ञेयाः सालिग्रामा मनीषिभिः । अनंतचक्रो बहुभिश्चिह्नैरप्युपल
क्षितः । अनंतः स तु विज्ञेयः सर्वपूजाफलप्रदः । गंडकी सरितां श्रेष्ठा चक्रतीर्थं च तत्र हि । सालिग्रामाभि
धं क्षेत्रं तत्र तेषां समुद्भवः । चक्रं च केवलं यत्र पद्मेन सह संयुतं । केवला वनमाला वा हरिर्लक्ष्म्या सह स्थितः ।
विदिक्षु दिक्षु सर्वासु यस्योर्ध्वं दृश्यते मुखं । पुरुषोत्तमः स विज्ञेयो भुक्तिमुक्तिफलप्रदः । दृश्यते शिखरे लिंगं

सालिग्रामसमुद्भवं। तस्य योगेश्वरो नाम ब्रह्महत्यां व्यपोहति। आरक्तं पद्मनाभाख्यं पद्मछत्रसमन्वितं। तुलस्या पू
जयेन्नित्यं दरिद्रस्त्वीश्वरो भवेत्। वामपार्श्वे तथा चक्रे रेखा चैव तु दक्षिणे। दक्षिणावर्तचक्रश्च वनमालाविभूषि
ता। या शिला कृष्णसंज्ञा सा धनधान्यसुखप्रदा। वैखानससंहितायां नारदः। द्वारदेशे समे चक्रे दृश्यते नांत
रीयके। वासुदेवः स विज्ञेयः शुक्लाभश्चातिशोभनः। नानावर्णोऽनंतः स्यान्नागभोगेन चिह्नितः। अनेकमू
र्त्तिसंयुक्तः सर्वकामफलप्रदः। प्रद्युम्नः सूक्ष्मचक्रस्तु पीतदीप्तिस्तथैव च। शिखरं छिद्रबहुलं दीर्घाकारं तु तद्भवेत्।
अनिरुद्धस्तु नीलाभो वर्तुलश्चातिशोभनः। रेखात्रयं तु तद्द्वारं पृष्ठं पद्मेन लांछितं। अत्रायमाशयः। गंडिकीसरि
च्चक्रतीर्थसालिग्रामक्षेत्रोद्भवशिलायाः पूज्यतमत्वं। तत्तद्वाक्येन तत्तत्स्वदोषपादानात्। इत्यादिलक्षणैर्युक्तास्त्र
त्रेऽपि भेदाः संति। ग्रंथगौरवेण नात्र प्रपंच्यते। आह्निकप्रदीपे। स्निग्धा कृष्णा पांडुरा च पीता नीला तथैव च।
रक्ता रूक्षा च वक्रा च महास्थूला त्वलांछिता। कपिला कर्बुरा भग्ना बहुचक्रैकचक्रिका। बृहन्मुखी बृहच्चक्रा
लग्नचक्राथवा पुनः। अधोमुखी भग्नचक्रा पूजिता दुःखदायिनी। स्कांदे। स्निग्धा सिद्धिकरी मंत्रे कृष्णा की
र्त्तिं ददाति च। पांडुरा पापदहनी पीता पुत्रप्रदायिनी। नीला संदिशते लक्ष्मीं रक्ता रोगप्रदायिनी। रूक्षा चोद्वेगदा
नित्यं वक्रा दारिद्र्यदायिनी। स्थूला निहंति चैवायुर्निष्फला तु अलांछिता। कपिला कर्बुरा भग्ना बहुचक्रैकच

१६५ क्रिका । दुःखदासा तु विज्ञेया नारसिंही तथैव च । भग्ना भग्नचक्रा । बहुचक्रैकचक्रिकेति । यत्र मुखं विना चक्रा
167 णि दृश्यंते तद्विषयमिदं । अन्यथा त्रिविक्रमानंतपूजाविरुद्ध्येत । तथा । यथा यथा शिला सूक्ष्मा तथा तथा
महत्फलं । तथा चामलकीतुल्या सूक्ष्मा चातीतु या भवेत् । तस्यामेव शिलायां तु श्रिया सह वसेद्धरिः ॥
कपिलो नारसिंहस्य पृथुचक्रः सुशोभनः । ब्रह्मचर्येण पूज्यस्तु अन्यथा विघ्नदो भवेत् । इति सकामपरं ।
निष्कामस्य सालिग्रामशिलामात्रपूज्यता । तथा पाद्मे । खंडितं त्रुटितं भग्नं पार्श्वभिन्नं सुभेदितं ।
सालिग्रामसमद्भूतं शैलं दोषावहं नहि । वाराहे । ये केचिद्वैष्णवपाषाणा विष्णुचक्रेण मुद्रिताः । तेषां
स्पर्शनमात्रेण मुच्यते सर्वकिल्बिषैः । यत्तु । लग्नं भग्नं च पूजयेदित्यत्र लग्नं लग्नचक्रं । भग्नं भग्नचक्रं ।
चक्रेतरप्रदेशभग्नस्यापि पूज्यत्वं । चक्ररूपेण हरिसान्निध्यं । शिलारूपा रमा प्रोक्ता चक्ररूपी जनार्द
नः । इति विष्णुपुराणात् । सेव्या निजैर्निजैर्मंत्रैरेवं स्वस्वेष्टमूर्त्तयः । सालिग्रामात्मके रूपे निय
मो नैव विद्यते । स्मृत्यंतरे । सालिग्रामाः समाः पूज्या विषमा न कदाचन । समेषु न द्वयं पूज्यं
विषमेष्वेक एव हि । एक एवेति विधिः । विषमेष्वेक एवेज्यः समे द्वे षड्विवर्जयेदिति ब्रह्मोक्तेः ॥
अत्र पद्यादौ वैखानससागरोक्तः । गृहे लिंगद्वयं नार्च्यं गणेशत्रयमेव च । दुर्गात्रयं तथा नार्च्यं

सालिग्रामशिलात्रयं । एकएवरविः पूज्योद्वेवाशक्तीः प्रपूजयेत् । सालिग्रामांश्चसंपूज्य वर्जियित्वा शिलात्रयं । विरु
द्धपूजनादेवस्यभद्रंप्राप्नुयाद्गृही । चत्वारोब्राह्मणैः पूज्याः त्रयोराजन्यजातिभिः । वैश्यैर्द्वावेवसंपूज्यौतथैकः शू
द्रजातिभिः । इदमपिसकामपरंप्रतीयते । पाद्मेउत्तरखंडे । शृणुदेविप्रवक्ष्यामितदर्चावसथंहरेः । स्थाप
नं हिस्वयंव्यक्तंद्विविधंतत्प्रकीर्तितं । शिलामृद्दारुलोहाद्यैःकृत्वाप्रतिकृतिंहरेः । श्रौतस्मार्त्तागमोक्तेनविधिना
स्थापनंहियत् । तत्स्थापनमितिप्रोक्तंस्वयंव्यक्तंहिमेशृणु । यस्मिन्सन्निहितोविष्णुः स्वयमेवनृणांभवेत् ।
पाषाणदार्वोरात्मेशः स्वयंव्यक्तंहितत्स्मृतं । दुर्लभत्वेत्स्वयंव्यक्तमूर्त्तेः श्रीवैष्णवोत्तमः । यथाविधिप्रति
ष्ठाप्यकृत्रिमांमूर्त्तिमर्चयेत् । स्वयंव्यक्ताः कृत्रिमाश्चमूर्त्तयोद्विविधाः स्मृताः । स्वयंव्यक्ताः स्वयंकृष्णः
कृत्रिमस्तुप्रतिष्ठया ॥ अथशालिग्रामपूजाधिकारिणः । तत्र [illegible] स्कंदपुराणेशालिग्राममाहात्म्ये ॥ ॥
ब्राह्मणक्षत्रियविशांस्त्रीशूद्राणामथापिवा । सालिग्रामेधिकारोस्तिनान्येषांतुकदाचन । अन्येषामनुलोम
जप्रतिलोमजादीनां स्त्रीशूद्रयोरधिकारोत्रपूजनेनचस्पर्शे । तदुक्तंतत्रैव । द्विजातेरेवपूज्योहंशुचेरप्य
शुचेरपि । स्त्रीशूद्राभ्यांकरस्पर्शोवज्रादपिचदुःसहः । वृहन्नारदीये । प्रायश्चित्तविहीनानिकर्माणिशृ
णुभूपते । समस्तपापतुल्यानिमहानरकदानिवै । यःशूद्रःसंस्पृशेल्लिंगंविष्णुंवापिनमेन्नरः । इहैवार्स्यत [illegible]

१६८ दुःखानिपश्यत्यामुष्मिकानितु। संस्कृतंप्रतिष्ठितंपूजितंवेतिपाठः। पुनस्तत्रैव। ब्राह्मणःपिहरंविष्णुं
168 नस्पृशेत्स्त्रीयदिऋच्छती। सनाथाप्सतनाथावातस्यानास्तीहनिष्कृतिः। इदमपिसालिग्रामशिलाप्रतिष्ठि
तश्रीमूर्त्तिपरं। पुनरपितत्रैव। यदाप्रतिष्ठितंलिंगंमंत्रविद्भिर्यथाविधि। तदाप्रभृतिशूद्रश्चयोषिद्वा
पिनसंस्पृशेत्। प्रकरणाद्विष्णुमपि। स्त्रीणामनुपनीतानांशूद्राणांचनरेश्वर। स्पर्शनेनाधिकारो
स्तिविष्णोर्वाशंकरस्यच। शूद्रोवाऽनुपनीतोवास्त्रियोवापतितोपिवा। केशवंवाशिवंवापिस्पृष्ट्वानरक
माप्नुयुः। द्विजैरित्यनेन स्त्रीशूद्रानुपनीतैरस्पर्शवतीपूजाकार्या। तत्पूजानिषेधेस्कंदवचनाविरो
धापत्तेः। यावद्वचनंहिवाचनिकमितिन्यायविरोधाच्च। सांप्रदायिकास्तु स्त्रीशूद्रपदपरीक्षितमद्यप
स्त्रीशूद्रपरंमन्यमानाःसांप्रदायिकविधिनाविष्णुमंत्रदीक्षितानांसत्स्त्रीशूद्राणामपिप्रतिष्ठितश्रीमू
र्त्तेःस्पर्शवतीपूजामिच्छंति। मद्यपशूद्रेणपूजापिनकार्या। मद्यपस्तुसमासाद्यममकर्मपरायणः।
तस्यपापंप्रवक्ष्यामिशृणुसुंदरितत्वतः। एकजन्मभवेद्गृध्रःशृगालःसप्तजन्मसु। इतिवराहोक्तेः।
मद्यपःशूद्रः। दीक्षितोपिपिबेन्मद्यंप्रायश्चित्तंनविद्यते। अत्रदीक्षितःशूद्रः। द्विजातेःसदानिषेधा
त्। प्रसक्तःप्रतिषिध्यतेनाप्रसक्तइतिन्यायात्। अत्रायमाशयः। अप्रतिष्ठितश्रीमूर्त्तिलिंगपूजा

सत्स्त्रीसच्छूद्रानुपनीतद्विजातिभिः स्पर्शवत्यपि कार्या। स्पर्शनिषेधपरं तु सालिग्रामप्रतिष्ठितश्री
मूर्त्तिलिंग[illegible]स्य स्पर्शनिषेधपरं। न तु विष्णुत्वेन साधारण्यमिति शिष्टाः। अथ द्वारवतीचक्रमहि
मा। प्रह्लादसंहितायां। साधारणीवै सर्वे मत्साच्छालिग्रामशिलास्ववत्। साम्चाच्वी द्वारिकाचक्रांकितो
पेनैव सर्वदा। सालिग्रामोद्भवं शैलं द्वारिकायां समुद्भवं। कलिकालेपि राजेंद्र न जहाति जनार्दनः।
मात्स्ये। द्वारवत्याः शिला देवि मुद्रिता मम मुद्रया। यत्रापि नीयते तत्स्यात्तीर्थं द्वादशयोजनं। हला
युधे। सालिग्रामशिलायुक्तां द्वारिकायाः शिलां तथा। नित्यं पूजयसे भूप भुक्तिमुक्तिफलप्रदां।
तथा। शालिग्रामशिला यत्र यत्र द्वारवती शिला। उभयोः संगमं यत्र मुक्तिस्तत्र न संशयः। शिलेति विशेषोपादा
नान्नास्थिचक्राणां पूजेतेति प्रतीयते। चक्रसंख्यया तन्नामानि प्रह्लादसंहितायां॥ एकः सुदर्शनो द्वाभ्यां ल
क्ष्मीनारायणः परः। त्रिभिस्त्रिविक्रमो नाम चतुर्भिश्च जनार्दनः। पंचभिर्वासुदेवश्च षड्भिः प्रद्युम्न उच्यते। सप्तभि
र्बलदेवश्च अष्टभिः पुरुषोत्तमः। नवभिश्च नवव्यूहो दशभिर्दशमूर्त्तिकः। एकादशानिरुद्धो हि द्वादशाद्वाद
शात्मकः। सुदर्शनाद्यास्तु शिलाः पूजिताः सर्वकामदाः। एकः एकचक्रयुक्तः। एवमुत्तरत्रापि। नारदः।
एतद्वै चक्रतीर्थं तु या शिला चक्रचिह्निता। मुक्तिदा पापिनां लोके म्लेच्छदेशेपि पूजिता। गालवः। सुखदासम

१६५ चक्रांकाद्वादशीचोक्तामामता।वर्तुलाचतुरस्राचनराणांचसुखप्रदा।त्रिकोणाविषमाचैवछिद्राभग्नातथैव
च।अर्द्धचंद्राकृतिर्यातुपूजाहीनभवेत्तुसा।फलंनोत्पद्यतेतत्रपूजितायांकदाचन।प्रह्लादसंहितायां।
165 कृष्णाभ्रस्तुप्रदानित्यंकपिलाचभयावहा।रोगार्त्तिकर्बुरादद्यात्पीताचित्तविनाशिनी।धूम्राभावित्तनाशाय
भग्नाभार्याविनाशिका।सछिद्राचत्रिकोणाचतथाविषमचक्रिका।अर्द्धचंद्राकृतिर्यातुपूजाहीनभवेत्तुसा।
अथप्रसंगतःशालिग्रामशिलाजलमहिमास्कांदे।शालिग्रामोद्भवोदेवोदेवोद्वारवतीभवः।उभयोःस्ना
नतोयेनब्रह्महत्यानिवर्त्तते।पाद्मे।सस्नातःसर्वतीर्थेषुसर्वयज्ञेषुदीक्षितः।सालिग्रामशिलातोयै
र्योभिषेकंसमाचरेत्।गंगागोदावरीरेवानद्योमुक्तिप्रदास्तुयाः।निवसंतीहतीर्थानिसालिग्रामशिलाजले।
तत्रैवगौतमांबरीषसंवादे।येषांधौतानिगात्राणिहरेःपादोदकेनवै।अंबरीषगृहेतेषांदासोहंवशगःसदा।
हरेःस्नानावशेषंतुजलंयस्योदरेस्थितं।अम्बरीषप्रणम्योच्चैःपादपांशुःप्रगृह्यतां।गर्जंतितावदन्यानिती
र्थानिभुवनत्रये।यावन्नप्राप्यतेतीर्थंसालिग्रामाभिषेकजं।जन्मप्रभृतिपापानांप्रायश्चित्तंयदीच्छसि।
सालिग्रामशिलावारिपापहारिनिषेव्यतां।नरसिंहपुराणे।गंगाप्रयागगयपुष्करनैमिषाणिपुण्यानि
यानिकुरुजांगलयामुनानि।कालेनतीर्थसलिलानिहरंतिपापंपादोदकंभगवतस्तुपुनातिसद्यः।सत्रल

चारीसव्रती आश्रमी च सदा शुचिः। विष्णुपादोदकं यस्य मुखे शिरसि विग्रहे। स्मृत्यंतरे। देहः शुध्यति वा आला
ऽंतरात्मोदकं हरेः। नित्ये नैमित्तिके काम्ये पीत्वा भुक्त्वा न दुष्यति। अत्र नित्ये नैमित्तिके काम्ये एकभक्तादौ विष्णुपा
दोदकं पीत्वाऽनंतरं भुक्त्वा न दुष्यति। न व्रतभंगदोषभाग्भवति। कृत्वेति पाठे नित्ये एकादशीव्रतादौ। नैमि
त्तिके सांवत्सरिकश्राद्धादौ। काम्ये तीर्थस्नानादौ। विष्णुपादोदकं पीत्वानंतरं तत्कृत्वा न दुष्यति। तत्कर्म
फलेहीनो न भवति। ननु। अभुक्तो भुक्तवत्तोयं भुक्ते तोयमभुक्तवत्। इति जलपाने भोजनसाम्यकथनात्।
कर्मानर्हता प्रतीयते इति चेन्न। निषेधवाक्यं सामान्यजलपाननिषेधात्सामान्यं विष्णुपादोदकपानविधाय
कं विशेषः। सामान्याद्विशेषो बलवानिति न्यायेन शुद्धिकारकोऽस्याच तत्पानेन दुष्यतीत्यर्थः। यथा। न हिं
स्यात्सर्वभूतानि इति सामान्यशास्त्रम् अग्नीषोमीयं पशुमालभेतेति विशेषशास्त्रेण बाध्यते। सर्वत्ररागजाप्राप्ति
र्निषिद्धेति न्यायात्। विष्णुर्वैयाशिलाधीर्गुरुषु नरमतिर्वैष्णवे जातबुद्धिः। विष्णोर्वा वैष्णवानां कलिमलम
थने पादतीर्थेम्बुबुद्धिः। विष्णोर्नाम्नि मंत्रे सकलकलुषहे शब्दसामान्यबुद्धिर्विष्णौ सर्वेश्वरे शे तदितर
समधीर्यस्य वा नारकी सः। इति दोषदर्शनादपि। तच्च पूजांते पेयं उत्तरांगत्वात्। पावनार्थत्वाच्च। अत एवै
कादश्यादावपि तत्पानमविरुद्धं। श्राद्धादिकर्मणः प्रागपि युक्तं। यत्तु द्वादश्यां लत्वे पारणत्वेन पानदर्शनात्।

१५० भोजनस्थानीयंमन्वाना उपवासदिनेश्राकूर्मिश्चनपिबंति । तेषांतामानाभावात् । तत्रजलेनपारयेदिति
170 दर्शनाच्च । अशितानाऽशितायस्मादापोविद्वद्भिरीरिताः । केवलेनांभसाविशुद्धिर्यतेव्रतधारणमितिस्मृतेः ।
अन्यथाचमनेतिव्याप्तेः अतएवोक्तरूपत्वात्तएवसाधीयान् । विष्णुवाजपेयिनोऽप्येवमेववर्णयांबभूवुः ।
आह्निकप्रदीपे । सूतकेमृतकेवापि अशौचंनैवविद्यते । येषांपादोदकंमूर्ध्निप्राशनंयेचकुर्वते । अंत
कालेपियस्येहदीयतेपादयोर्जलं । सोपिसद्गतिमाप्नोतिसदाचारैर्बहिष्कृतः । अपेयंपिबतेयस्तुभुंक्तेयश्चा
पभोजनं । अगम्यगामिनोयेचपापाचाराश्चयेनराः । तेपिपूताभवंत्याशुसदापादाम्बुसेवनात् । तथा ।
अपवित्रंयदश्नीयात्पानीयंवापिपापिनां । भुक्त्वापीत्वाविशुद्धिःस्यात्पीत्वापादोदकंहरेः । अत्रायमाशयः ।
नकेवलंसालिग्रामशिलाजलमहिमायं किंतुसामान्यतोविष्णुप्रतिमामात्रोदकस्य । तत्रतत्रयथातथोक्तेः ।
सालिग्रामेतु इयानेवविशेषः । यथाकथंचिज्जलंस्पृष्टं पापनोदकंभवति । प्रतिमायांतुकलान्यासेन
पूजितायां तज्जलंविष्णुपादोदकत्वेनपापहारीत्यर्थः । विलयंयातिपापानिपीतेपादोदकेहरेः । किंपुनः ।
विष्णुपादोदंशालिग्रामशिलोद्भवं । विशेषेणहरेत्पापंब्रह्महत्यादिकंप्रिये इतिशिवोक्तेः ॥ स्कांदेसालि
ग्रामशिलामाहात्म्येशिववचनं । दृष्टिपूतंचयत्तोयंविष्णुनाप्रभविष्णुना । तद्धिपापहरंपुत्रकिंपुनःपादयोर्जलम् ॥

विष्णुरहस्ये । विष्णुपादोदकं पीत्वा पश्चाद्दद्याद्विशंकया । पश्चात्वामतिसंमोहाद्ब्रह्महत्यां स विंदति । गारुडे ।
पादोदकं पिबेन्नित्यं नैवेद्यं भक्षयेद्धरेः । शेषा च मस्तके धार्या इति वेदानुशासनं । तत्पानविधिस्तत्रैव । सालि
ग्रामशिलातोयमपीत्वा यस्तु मस्तके । धत्ते परं प्रकुर्वीत ब्रह्महत्यां स विंदति । तथा । सालिग्रामशिलातोयं
पिबेत्सोमं करेण तु । अस्नानादेर्दवं प्रोक्तं स्नानादह्न समाचरेत् । तथा । विष्णुपादोदकं पीत्वा कोटिजन्मा
घनाशनं । तदेवाष्टगुणं पापं भूमौ बिंदुनिपातनात् । स्मृतिचंद्रोदये । आयसे च तथा कांस्ये काष्ठे चालाबुके
तथा । उद्धृत्य पादसलिलं मद्यतुल्यं विनिर्दिशेत् । पीतमिति शेषः । तथा । श्रीविष्णोः पादसलिलं करे कृत्वा
मुखे क्षिपेत् । अदत्वापि पिबेत्तोयं रौरवे नरके वसेत् । अदत्वा विष्वक्सेनादिभ्य इति शेषः । अदत्वेति पाठेऽ
यमर्थः । विष्णोः पादोदकं पीत्वा अदत्वा तोयं पिबति शुद्ध्यर्थमाचमति । ब्रह्मलोमंत्रो हलायुधे । अकालमृत्यु
हरणं सर्वव्याधिविनाशनं । विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहं । स्कंदपुराणे । कृत्वा पादोदकं
शंखे वैष्णवानां महात्मनां । यो ददाति तिलैर्मिश्रं चांद्रायणफलं लभेत् । पादोदकं पादक्षालनसंभावनया
दत्तमुदकमिति । प्रासंगिकमुक्त्वा प्रकृतिरनुसंधीयते । तत्र स्कांदे । सालिग्रामशिलायास्तु प्रतिष्ठा नैव
विद्यते । महापूजां तु कृत्वादौ पूजयेत्तां ततो बुधः । बृहद्वामने । प्रतिष्ठादिविधानेन विनैव वसते हरिः ।

सदातत्रशिलामात्रेचक्रचिह्नवराननेः। गोविंदार्णवे। सालिग्रामार्चनेभूप नावाहन विसर्जने।इतिहरेः।
१८१ सदासान्निध्येनसदासालिग्रामेनावाहनविसर्जनेस्तः। केचित्तर्कबलेनदेशिकसन्निधेपि वोढृसान्निध्यार्थं
सालिग्रामेऽप्यावाहनविसर्जनेमन्यंते। वचनप्राप्तेस्तर्कस्याकिंचित्करत्वात्। वचनप्राप्तत्वान्नगौरवम्।
१७१ नहिवचनस्यातिभारोस्तीतिन्यायात्॥ स्कांदे। सालिग्रामशिलायास्तुमूल्यंयःकुरुतेनरः। विक्रेता स्व
नुमंता च यःपरीक्षानुमोदकः। सर्वेतेनरकंयांतियावदाभूतसंप्लवं। अथ वैगुण्यात् सालिग्रामे महापू
जा अन्यत्रश्रीमूर्तौतुपुनःसंस्कारः। यथोक्तंहयग्रीवपंचरात्रे। चंडालमद्यसंस्पृष्टा दूषितावह्निनातथा।
अपुण्यजनसंस्पृष्टाविप्रक्षतजदूषिता। सापुनःसंस्कार्येतिशेषः। ब्रह्मपुराणे। खंडितेस्फुरितेदग्धे
भ्रष्टेमानविवर्जिते। यागहीनेपशुस्पृष्टेपतितेदुष्टभूमिषु। अन्यमंत्रार्चितेचैवपतितस्पर्शदूषिते। दश
स्वेतेषुनोचक्रुःसन्निधानंदिवौकसः। यागहीने प्रतिष्ठाहीने। पशुस्पृष्टेगर्दभादिनिंदितपशुस्पृष्टे।
अन्यमंत्रार्चिते कलान्यासपूर्वकन्यासमंत्रार्चिते। तथापंचरात्रे। खंडितास्फुरिताभग्नायस्मादर्चा दग्धा २=
भयावहा। तस्मात्समुद्धरेत्तांतुपूर्वोक्तविधिनानरः। खंडिताभग्नावयवैकदेशा। स्फुरिताजर्जरिता।
भग्नाभग्नैकावयवा। दग्धेतिपाठे। दग्धाअग्निस्पृष्टा। पूर्वोक्तविधिनाहिरण्मयवाहनादिविधानेनोद्धरेत

स्थानानिःसारयेत्। संस्कारस्तु पूर्वद्रव्यत्वेन। पश्चात्प्रतिमात्वेन। तथा श्रीदत्तसमयप्रदीपे विष्णुः॥
द्रव्यवत्कृतशौचानां देवार्चानां भूयः प्रतिष्ठापने नास्ति दुष्टानां तस्य यावन्मात्रं परित्याज्यं शेषस्य कंडनतालने
कुर्यात्। अस्यायमर्थः। देवार्चानां देवप्रतिमानामस्पृश्यस्पर्शादिदोषदुष्टानां प्रकृतिद्रव्यस्य ताम्रादेर्यथो
क्तशुद्धिं कृत्वा पुनः प्रतिष्ठापनात् पूज्यत्वमित्यर्थः। ताम्रादीनां देवतासन्निधितन्निधी अस्पृश्यशुद्धिहे
तू चांडालादिस्पर्शे तदसन्निधिः आम्लादियोगे पुनस्तत्सन्निधिरिति परमार्थः। ननु प्रतिष्ठायां पंचा
मृतकलशैः प्रतिमायां स्नानमुक्तं। तत्पूर्वदिने रात्रावधिवासनं। तत्र गव्यदुग्धपूरितायां कुंडिकायां क्षी
रसमुद्रभावनया देवस्थापनं। तच्च ताम्रप्रतिमायां कथं विधेयं। ताम्रे गव्यनिषेधात्। यदुक्तं। ताम्रपात्रे
न पयः पेयं कांस्यपात्रे च यन्मधु। आर्द्रकं गुडसंयुक्तं सद्यो मद्यं घृतं विना इति निषेधस्य सामान्यतः प्राप्त
त्वात्। विधेस्ताम्रप्रतिमादौ विशेषविधिना प्राप्तत्वात्। सामान्याद्विशेषो बलवानिति न्यायेन नैव दोषः।
होमकार्ये तथा दोहे पाके च परिवेषणे। स्नानतर्पणदानेषु ताम्रे गव्यं न दुष्यति। षट्त्रिंशन्मताच्च। गव्यमिह दु
ग्धदधिघृतं। होमोऽत्र विशेषविधिनोक्तः। दोहे गोदोहने। पाके च स्थाल्यां। परिवेषणे दर्व्यां। स्नाने
देवतास्नाने। पुरुषस्यापि कर्मविशेषप्राप्तस्नानविशेषे च तर्पणे पितृतृप्तिकामनया क्षीरादियुततिलतोय

१७२ तर्प्पलोदाने विशेषविधिप्राप्त क्षीरपूरितताम्रपात्रे द्रव्यविशेषं निःक्षिप्य कर्त्तव्यतया विहिते । ननु । ताम्रप्रति
मैवं न भवतीति चेन्न । सौवर्णी राजती वापि ताम्री रत्नमयी तथा । शैली दारुमयी वापि लोहसंघमयी तथेति ।
172 मात्स्योक्तेः । भविष्यपुराणेऽपि । मङ्गुष्ठमात्रो शाकुन्त्यैष ताम्रकांस्यमयं तथा । कृत्वा लिंगं सकृत्पूज्य वसेत्क
ल्पायुतं दिवि । अत्र केचिद्वाक्यैकवाक्यतया घृतं विनेत्यत्र च घृतसंयोगं विनेति वर्णयंति । घृतार्क्कघृता
क्रमयं । ताम्रे घृतं न दुष्यतीत्याहुः तन्न । चतुरस्रं सामान्यसंकोचे मानाभावाद्विशेषवाक्ये वैयर्थ्याच्च ।
ननु प्रतिष्ठितं पूजयेदिति विधिना देवतापूजायाः प्रतिष्ठापूर्वकत्वप्राप्त्यवबोधनात्प्रतिष्ठायाश्च देवताऽ
हंकाररलक्षणसान्निध्युत्पादकत्वात्पुनरावाहनप्रयोगोऽनर्थकः । तेनापि हि सर्वगततया पूर्वोक्तलक्षण
सन्निधिरेव जननीय इति । न च प्रतिष्ठावाहनयोर्मिलितयोरेव सन्निधिजनकत्वं निरपेक्षयोस्तयोर्विधा
नात् । सालिग्रामे स्थावरे च नावाहनविसर्जने इति । यत्र स्थावरे आवाहनं निषिध्यते तत्र प्रतिष्ठामात्रात्
पूज्यत्वं स्यात् । अत एव विसर्जनमपि न न्याय्यं । तेन हि यदि तत्सन्निधिर्व्यावर्त्तनीयः
तदा ततः प्रभृत्युपहता प्रतिष्ठितादिविधिपूज्यत्वं स्यात् । आवाहनमंत्रेण पुनः सन्निधापने प्रतिष्ठावि
धिरकिंचित्कर उभयतोऽप्यभिचारात् । एतेन प्रतिष्ठया देवतासन्निधियोग्यतामात्रं क्रियते । आवाहने

ननु तत्सन्निधिरित्यपास्तं । स्थावरस्थले आवाहननिषेधात् । सान्निध्यस्तुत्यन्तेर पूज्यताप्रसंगात् । सत्यं
सन्निहितेव देवता आवाहने ननु तस्याः स्वकर्त्तृकपूजादौ अपरवात्संवा आवर्त्तने नावधानप्रार्थनमात्रं
क्रियते यथास्वैकप्रवणोभूत्वा पूजादिग्रहणीयादिति । अत एव विसर्जने स्वाहृद्यानुसानरूपं क्रियते
ननु तेनाधिष्ठानात्सान्निध्यं निवर्त्तते । यद्यपि पराणि योज्यस्य भगवतः स्वाहृद्यापारतंत्र्यं वास्वकृतस्य
ध्यं न भवति । तथापि तस्मिन्नाराध्यबुद्ध्या पूजकेनेदृशी भावना कार्या । अत एवैते उपचाराः । राजादेरिव
प्रीतिजनकत्वात् । न ह्यारम्बलेह फललाभ इति न केवला दृष्टिकल्पना । यत्र तु विशिष्य धर्महेतुत्वमुक्तं
दीपादौ तत्रानन्यगतत्वात् तदयंगीकृयते । न सर्वत्रेत्यलमनेन विचारविस्तारेण ॥

१८३ अथ पूजोपचारफलं । तत्र स्कंदपुराणे । गृहीत्वा गोमयं जातु मंडलं केशवाग्रतः । मनुर्वियोगं नाप्नोति संतति
धनस्य च । करोतीति शेषः । पाद्मे । यावंति जलविंदूनि लिप्यमानस्य सुंदरि । तावद्वर्षसहस्राणि
173 स्वर्गलोके महीयते । नरसिंहपुराणे । आगम्यागमने चैव श्रमस्तस्य च भक्षणे । सर्वं तन्नाशमाप्नोति मं
डयित्वा हरेर्गृहं । तत्रैव दूतान्प्रति यमवाक्यं । सम्मार्जनं च ये दूता गोमये नोपलेपनं । करोति भवने विष्णो
स्तस्य त्याज्यं कलत्रयं । तथा । नरसिंहस्य गेहे नित्यं यः सम्मार्जनमाचरेत् । समस्तपापनिर्मुक्तो विष्णुलो
के महीयते । गोमयेन मृदा तोयैर्यः सम्मार्जनमाचरेत् । चांद्रायणफलं प्राप्य विष्णुलोके महीयते ।
आगच्छ नरसिंहेत्याह्वानावाहनात्तु पुष्पकैः । एतावतापि राजेंद्र सर्वपापैः प्रमुच्यते । स्नाप्यते येन भक्त्या
च नरसिंहे नराधिप । सर्वपापविनिर्मुक्तो विष्णुलोके महीयते । सर्वौषधिप्रदानेन वाजिमेधफलं लभे
त् । मुरामांसी वचा कुष्ठं शैलेयं रजनीद्वयं । शटी चंपकमुस्ता च सर्वौषधिगणः स्मृतः । स्कंदपुरा
णे । शंखस्थितेन तोयेन यः स्नापयति माधवं । कपिलाशतदानस्य फलमाप्नोति मानवः । नाद्यं तडा
कजं वापि वापीकूपसमुद्भवं । गांगेयादधिकं शंखे एवमाह जनार्दनः । शंखपात्रं तु श्रीविष्णोः पूजायां
तु शुभावहं । शिवादन्यत्र देवेभ्यो ह्यविहंच सर्वदा । न शिवं शंखवारि स्नाति वाचनात् । तथा । शंखे

कृत्वातुपानीयंगंधपुष्पाक्षतान्वितं। अर्घ्यंददातिदेवस्यसप्तसागरधराफलं। प्राप्नोतीतिशेषः।
गं २ पुनस्तत्रैव। कृत्वाशंखोदकंशंखेयःस्नापयतिकेशवं। नरनारायणोत्पत्त्यामुच्यतेयोनिसंकटात्।
शंखेतीर्थोदकंकृत्वायःस्नापयतिकेशवं। बिंदुमात्रेणद्वादशंपाकुलानांतारयेच्छतं। कुप्रपुष्पोद
कस्नानाद्ब्रह्मलोकमवाप्नुयात्। रत्नोदकेनसावित्रंकौबेरंहेमवारिणा। नरसिंहंतुसंस्नाप्यकर्पूरागुरुवारिणा।
इंद्रलोकेमोदयित्वापश्चाद्विष्णुपुरंव्रजेत्। कपिलाक्षीरमादायशंखेकृत्वाजनार्दनं। गवायुतसहस्रस्यस्नाप
यित्वालभेत्फलं। अन्यगोसंभवंक्षीरंशंखेकृत्वातुनारद। यःस्नापयतिदेवेशंलभेत्पारायणंफलं। पारा
यणंवेदाध्ययनजं। स्कांदे। क्षीराद्दशगुणंदध्नाघृतेनचदशोत्तरं। घृताद्दशगुणंक्षौद्रंक्षौद्राच्चेक्षवजंतथा।
इक्षोर्दशगुणंपुष्पंवर्धतेचयथोत्तरं। पुष्पोदकंरत्नोदकं। मंत्रोदकंचगंधाढ्यंतथैवचप्रसन्नम। अत्रदुग्ध
दधिघृतादिगव्यानि। यदुक्तंविष्णुधर्मोत्तरे। द्वादशंपंचदशंपंचगव्येनहविषाहरेः। स्नपनेदैत्यशार्दूल
महापातकनाशनं। दध्यादीनांविकाराणांक्षीरतःसंभवोयथा। तथैवसर्वपापानिक्षीरस्नानंततोहरेत्।
यःकरोतिहरेरर्चांमधुनास्नापितांनरः। अग्निलोकेसमोदित्वापुनर्विष्णुपुरंव्रजेत्। पंचामृतेनदेवेशंयः
स्नापयतिभक्तितः। ब्रह्मकूर्चविधानेनविष्णुलोकेमहीयते। ब्रह्मकूर्चविधानमत्रपृथक्प्रपंचहरणाय

१७४ तत्रक्रमः। क्षीरेणपूर्वंकुर्वीतदध्नापश्चाद्घृतेनच। मधुनाचाथखंडेनक्रमोज्ञेयोविचक्षणैः। अथाभ्यंगादौ
174 पंचामृतमानमाह। देवानांप्रतिमायत्रघृताभ्यंगक्षमाभवेत्। पलानितत्रदेयानिअध्यर्धपंचविंशतिः। अ
शीतरंपलशतंस्नानेदेयंचसर्वदा। द्वेसहस्रपलानांतुमहास्नानेविसंख्यया। दातव्यंयेनसर्वाणिदिक्षुनिर्याति
तद्घृतं। अत्रघृतप्रतिमेतिउपलक्षणं। तेनदुग्धादावपिलिंगादावपिचैयमेवसंख्या इत्येतत्सर्वदेवसाधा
रणं। घृताभ्यंगक्षमाभवेदिति। यस्यांतद्योगंतत्रकुर्यादित्यर्थः। तच्चित्रलेख्यादौस्नानाभ्यंजनेनस्यात्तां।
अतःकाम्येनिवर्त्तते। नित्येस्नानमात्रंनिवेदयेदितिनित्योपचारेषुगृहीतत्वात्इति। विष्णुधर्मोत्तरे। तु
लसीमिश्रतोयेनस्नापयंतिजनार्दनं। पूजयंतिचभावेनधन्यास्तेभुविमानवाः। नारसिंहे। पुष्पोदकेनगो
विंदंस्नाप्यभक्त्यानरोत्तमं। सावित्रलोकमासाद्यविष्णुलोकेमहीयते। यःपुनःपुष्पतैलेनपुष्पौषधिपुते
नच। अभ्यंगंकुरुतेविष्णोस्तस्यप्रीतोभवेत्सदा। यवगोधूमचूर्णैश्चउद्वर्त्योष्णेनवारिणा। प्रक्षाल्यदेवदेवे
शंवारुणंलोकमाप्नुयात्। स्कांदे। विष्णुस्नानार्द्रगात्रंचवस्त्रेणपरिमार्जति। तस्यभक्त्याहृषीकेशःकुरुते
पापमार्जनं। अथवस्त्रं। अग्निपुराणे। दुकूलपट्टकौशेयरांककार्पासकादिभिः। वासोभिःपूजयेद्देवंस्वशु
भैरात्मनःप्रियैः। तथा। वस्त्राणिसुपवित्राणिसारवंतिमृदूनिच। रूपवंतिहरेर्दत्त्वासदृशानिनवानिच।

यावद्वस्त्रस्य तंतूनां परिमाणं भवत्यपि। तावद्वर्षसहस्राणि विष्णुलोके महीयते। विष्णुधर्मोत्तरे। शंकवो मृग
रोमाश्च कदस्याश्च तथाशुभाः। यो दद्याद्देवदेवाय सोऽश्वमेधफलं लभेत्। नारसिंहे। नीलीरंजितवस्त्रं यो म
ह्यं मह्यं निवेदयेत्। नवमत्वालितं चैव रौरवे स वसेच्चिरं वसेत् इति। वस्त्रमिह कर्पासं। ऊर्णीयां पट्टवस्त्रे वा नीली
रागो न दुष्यतीत्युक्तेः। यज्ञोपवीतदानेन वेदवेदांतगो भवेत्। तथा। यज्ञोपवीतदानेन हरेर्भोत्रा ब्राह्मणोथवा।
भवेद्विप्रश्चतुर्वेदी शुद्धधीर्नात्र संशयः। नरसिंहपुराणे। त्रिवृत्सूत्रं च पीतं च पट्टसूत्रादिनिर्मितं। यज्ञोपवीतं
गोविंदे दद्वेदांतगो भवेत्। त्रिसूत्रं चेति पाठः। त्रिवृत् नवगुणं। त्रिवृत् नवगुणमिति श्रुतेः। नंदीपुराणे।
अलंकारं च यो दद्याद्विप्राय च हराय च। सोमलोके रमित्वादौ विष्णुलोके महीयते। स्कांदे। स्वशक्त्या देवदेवेशं भू
षणैर्भूषयंति ये। हेमजै रत्नजैः शुभ्रैर्मणिजैश्च सुशोभनैः। तेषां फलं शतानंदो न रुद्रो वासवादयः। जानंति मुनयो
नैव वर्जयित्वा तु माधवं। तथा छत्रं प्रतीच्छंति गुरुविप्रहरे च ये। न ते षां पतते घोरमग्निवर्षं सुदारुणं। अथ गंधाः।
चंदना २८ तत्र नरसिंहपुराणे। कुंकुमागुरुश्रीखंडकर्पूरेणाच्युताकृतिं। आलिप्य मनुजा राजेंद्र कल्पकोटिं वसेद्दिवि। अग्नि
पुराणे। चंदनागुरुश्रीखंडकुंकुमोशीरपद्मकैः। अनुलिप्तो हरिर्भक्त्या वरान्भोगान्प्रयच्छति। नारदीये। सचंदनं
सकर्पूरं कुंकुमागुरुमिश्रितं। मृगनाभिसमायुक्तं जातीफलविमिश्रितं। तुलसीचंदनोपेतं महाविष्णोः सुखावहं।

१७५ 175

गारुडे । कस्तूरिकाया द्वौ भागौ चत्वारश्चंदनस्य च । कुंकुमस्य त्रयश्चैव शशिनः स्याच्चतुःसमं । कर्पूरं चंदनं दर्पः
कुंकुमं च चतुःसमं । सर्वगंधमिति प्रोक्तं समस्तसुरवल्लभं । यत्तु विष्णुधर्मोत्तरे । शारिद्रुं पद्मकं कुर्याद्दत्वा स्वं रक्त
चंदनं । उशीरं विप्र विभ्रंशमन्येष्वर्थेषु रुपद्रवमिति । यत्तु केवलानि निषिद्धानि मिलितानां विहितत्वात् । गारुडे ।
यो ददाति हरेर्नित्यं तुलसीकाष्ठचंदनं । युगानि स वसेत्स्वर्गे ह्यनंतानि नरोत्तम । सर्वेषामपि देवानां तुलसीकाष्ठचंदनं ।
पितॄणांच विशेषेण सदाभीष्टं हरेर्यथा । मृत्युकाले तु संप्राप्ते तुलसीवृक्षचंदनं । भवेद्यस्य शरीरे हि तु हरिर्भूत्वा हरिं व्रजेत् ।
तावत्कस्तूरिकामोदः कर्पूरस्य सुगंधता । यावन्न दीयते विष्णोस्तुलसीकाष्ठचंदनं । तुलसीदललग्नेन चंदनेन जना
र्दनं । विलेपयति यो नित्यं लभते वांछितं फलं । न तेन सदृशो लोके वैष्णवो भुवि विद्यते । यः प्रयच्छति कृष्णस्य तुलसीकाष्ठ
चंदनं । तुलसीचंदनलिप्तांगाः कुर्वते हरिपूजनं । पूजितेन दिने केन लभते शतवार्षिकं । पुण्यमिति शेषः । पाद्मे ।
यो हि भागवतो भूत्वा कलौ तुलसिचंदनं । नचार्पयति वै विष्णोर्न स भागवतो नर इति । अथ पुष्पाणि । तत्र हारीतः ।
तुलस्यौ पंकजे जात्यौ केतक्यौ करवीरकौ । शस्तानि दश पुष्पाणि तथा रक्तोत्पलानि च । स्कांदे । तुलसीं ये विचि
न्वंति धन्यास्ते करपल्लवाः । केशवार्थे कलौ ये तु रोपयंतीह भूतले । किं करिष्यति संहृष्टो यमोऽपि सह किंकरैः ।
दलैस्तुलस्याः देवेशः पूजितो येन दुःखहा । भवतीति शेषः । पुनस्तत्रैव । मणिकांचनपुष्पाणि तथा मुक्तामयानि

च । तुलसीदलमात्रस्य कलां नार्हन्ति षोडशीं । तुलसीमंजरीमिश्रं कुर्याद्धरिहरार्चनं । न स गर्भगृहं याति मुक्ति
भागी भवेन्नरः । पाद्मे देवदूतविकुंडलसंवादे । आरोप्य तुलसीं वैश्य संपूज्य तद्दलैर्हरिं । वसंति मोदमानास्ते य
त्र देवश्चतुर्भुजः । तावद्गर्जंति पुष्पाणि मालत्यादीनि भूरिशः । यावन्न प्राप्यते पुष्पा तुलसी विष्णुवल्लभा । त
था । तावद्गर्जंति रत्नानि कौस्तुभादीनि भूतले । यावन्न प्राप्यते कृष्णा तुलसी पत्रमंजरी । तुलसीगौरकृष्णाख्या
तयाभ्यर्च्य जनार्दनं । नरो याति तनुं त्यक्त्वा वैष्णवीं शाश्वतीं गतिं । पाद्मे वृंदावाहदेवोपाख्याने । सत्वप्रीतिकरं
वाक्यं कोपलस्याल्लु तामसः । भावद्वयं हरेर्जातं तस्माद्दासीद्वयं ह्यभूत । श्यामापि तुलसी विष्णोः प्रिया गौरी विशेष
तः । विष्णुरहस्ये । यत्फलं सर्वपुष्पेषु सर्वपत्रेषु न । तुलसीदलेन देवर्षे प्राप्यते केशवार्चनात् । गरुडं प्रति वाहदे
ववाक्यं । तुलसीं प्राप्य यो नित्यं न करोति ममार्चनं । तस्याहं प्रतिगृह्णामि न पूजां शतवार्षिकीमिति । यद्यपि
सामान्यतो विष्णुपूजायां प्राशस्त्यं श्रूयते तथापि विशेषतः सालिग्रामशिलापरत्वेन प्रतीयते । यदुक्तं पाद्मे ।
तुलसीदलपूजायां मया वक्तुं न शक्यते । अत्यंतं तव लभा सा हि सालिग्रामाभिधे हरे । पातिव्रात्येन वृंदा दै
हरिमाराध्य कर्मणा । पूर्वजन्मन्यसौ लेभे कृष्णसंयोगमुत्तमं । अस्या एव हि शापेन माधवो भक्तवत्सलः ।
सालिग्रामशिलाभावं प्राप्तश्चित्स्वरूपविग्रहः । यथा हि वाहदेवस्य वैकुंठे भोगविग्रहः । सालिग्रामशिला

१७६ 176

रूपं स्थावरं भुवि विद्यते । तस्याल्लक्ष्मीवसंपन्ना तुलसी भोगविग्रहा । अपरं स्थावरं रूपं भुवि लोकहिताय वै । यत्तु स्कांदे ।
तुलसीं प्रति वासुदेववचनं । करवीरप्रसूनं वा मल्लिका वाथ चंपकं । उत्पलं शतपत्रं वा पुष्पमन्यत्समेष्यवा । त्वत्प
त्ररहितं चेत्तु पुष्पं वा पत्रमेव च । स्वर्णेन कृतं पुष्पं राजतं रत्नमेव च । मम पादाब्जपूजायां अनर्हं भवति ध्रुवं ।
इदमपि तुलसीसंभवप्रशंसापरं । अन्यथा पुष्पपूजाविधायिकानेकवाक्यवैयर्थ्यापत्तेः । गारुडे । तुलसीदल
जां मालामेकां दृष्ट्वा विशेषतः । मुच्यते सर्वपापेभ्यो यद्यपि ब्रह्महा भवेत् । धत्तेति शेषः । तन्मूलमृत्तिकां चां
गे कृत्वा स्नाति दिने दिने । दशाश्वमेधावभृथस्नानजं लभते फलं । तुलसीदलसंमिश्रं तोयं गंगासमं विदुः ।
यो वहेच्छिरसा नित्यं धृता भवति जाह्नवी । तुलसीदलसंमिश्रं यत्तोयं शिरसा वहेत् । सर्वतीर्थाभिषेकस्तु तेन
प्राप्तो न संशयः । तुलसीकाननच्छाया यत्र यत्र भवेद्द्विज । तत्र श्राद्धं प्रकर्त्तव्यं पितॄणां तृप्तिहेतवे । पितृपिंडा
र्चनं श्राद्धे यैः कृतं तुलसीदलैः । तर्पिताः पितरो तस्य यावच्चंद्रार्कमेदिनी । तुलसीमृत्तिका यत्र काष्ठं पत्रं
च वेश्मनि । तिष्ठति मुनिशार्दूल न दूरे वैष्णवं पदं । तुलसीमृत्तिकायुक्तो यदि प्राणान्विमुंचति । याति वि
ष्णुतिकं नित्यं यदि पापशतैर्युतः । प्रयाणकाले यस्यास्ये दीयते तुलसी यदि । निर्वाणं याति पक्षीन्द्र पापको
टियुतोपि सन् । स्कांदे द्वारिकामाहात्म्ये । शरीरं दह्यते येषां तुलसीकाष्ठवह्निना । न तेषां पुनरावृत्तिर्विष्णु

लोकात्कथंचन। ग्रस्तो यदि महापापैरगम्यागमनादिभिः। मृतः शुद्ध्यति दाहेन तुलसीकाष्ठवह्निना।
दत्वा तु तुलसीकाष्ठं सर्वांगेषु मृतस्य च। पश्चाद्यः कुरुते दाहं सोपि पापात्प्रमुच्यते। तीर्थं यदि न संप्राप्तं
कीर्तनं स्मरणं हरेः। तुलसीकाष्ठदग्धस्य न तस्य पुनरावृत्तिः। यद्येकं तुलसीकाष्ठं मध्ये काष्ठशतस्य हि।
दाहकाले भवेन्मुक्तिः पापकोटियुतस्य च। गंगांभसो विशेषेण यांति ते यानि पुण्यतां। तुलसीकाष्ठमि
श्राणि यांति ते यानि शुद्धतां। दह्यमानं नरं दृष्ट्वा तुलसीकाष्ठवह्निना। नीयमानो यमेनापि विष्णुलोकं स गच्छति।
जन्मकोटिसहस्रैस्तु तोषितो यैर्जनार्दनः। दह्यंते ते नराः सर्वे तुलसीकाष्ठवह्निना। तुलसीपावकेनैव दीपं यः
कुरुते हरेः। दीपलक्षसहस्राणां पुण्यं भवति दैत्यज। विष्णुधर्मोत्तरे। होमं कुर्वंति ये विप्रास्तुलसीकाष्ठवह्निना।
सिक्थे सिक्थे तिले वापि ह्यग्निष्टोमफलं लभेत्। यो ददाति हरेर्धूपं तुलसीकाष्ठवह्निना। मेरुतुल्यं भवेद्दत्तं न
दत्तं केशवस्य हि। तुलस्या कुरुते यस्तु सालिग्रामशिलार्चनं। द्वात्रिंशदपराधांश्च क्षमते तस्य केशवः। पुराणां
तरे। लिंगमभ्यर्चितं दृष्ट्वा प्रतिमां केशवस्य तु। तुलसीपत्रनिकरैर्मुच्यते ब्रह्महत्यया। अभिन्नपत्रां हरितां हृद्य
मंजरिसंयुतां। क्षीरोदार्णवसंभूतां तुलसीं दापयेद्धरिं। पाद्मे देवदूतविकुंडलसंवादे। तुलसीकाननं वैश्य गृ
हे यस्मिंस्तु दृश्यते। तद्गृहं तीर्थभूतं हि न यांति यमकिंकराः। तावद्वर्षसहस्राणि यावद्बीजदलानि च। वसंति वै

१७८ वैष्णवेलोकेतुलसींरोपयंतिये। रोपणात्पालनात्सेकाद्दर्शनात्स्पर्शनान्नृणां।तुलसीदहतेपापंवाङ्मनःकायसं
चितं। भगवद्वाक्यं। तुलसीपत्रमादाययःकरोतिममार्चनं। नपुनर्योनिमायातिमुक्तिभागीभवेत्तुसः। स्कांदे।तु
177 लसीगंधमादाययत्रगच्छतिमारुतः। दिशश्चविदिशःपूताभूतग्रामश्चतुर्विधः।उपोष्यैकादशींप्राज्ञोपार
णेतुलसीदलं। प्राशयेद्यदिविप्रेंद्रअश्वमेधाष्टकंलभेत्।तुलसीकाननेयस्तुमुहूर्तमपिविश्रमेत्।जन्मकोटि
शतात्पापान्मुच्यतेनात्रसंशयः। गारुडे। मुखेतुतुलसीपत्रंदृष्ट्वाशिरसिकर्णयोः।कुरुतेभास्करिस्तस्यदुःकृ
तस्यापमार्जनं। पाद्मे। अस्नात्वातुलसींछित्वासोपानत्कस्तथैवच। सयातिनरकेघोरेयावदाभूतसंप्लवं।
हलायुधनिबंधे। नददातिगयांगत्वापिंडंपित्रोर्महामुने। तुलसीकाननेश्राद्धंकृत्वासंतारयेत्पितॄन्। पद्म
पुराणे नारदाम्बरीषसंवादे। तुलसीमूलमध्येतुयःक्षिपेत्तर्पणोदकं। भवंतिपितरस्तस्यप्राद्वादशाब्दानिभू
मिप। तुलस्यांतर्पणीयेतुपितॄनुद्दिश्यमानवाः। कुर्वंतितेषांपितरस्तृप्तावर्षायुतंजलैः। दृष्टास्पृष्टारक्षिता
चमहापातकनाशिनी। पाद्मे। कृत्वार्चनार्थेविप्राणांयच्छंतितुलसीदलं। अन्येषामपिभक्तानांयांतितेप
रमंपदं। केचित्तुलस्यंतराभावेभगवद्धिनिवृक्तायाअपि पुनरुपयोगमिच्छंति। वाक्यंपठंतिच। विप्रामं
त्राःकुशावह्निस्तुलसीचखगेश्वर। नैतेनिर्माल्यतांयांतिक्रियमाणाःपुनःपुनः।। अथग्रहणविधिः।।

श्रियं देहि यशो देहि कीर्त्तिमायुस्तथा सुखं । बलं पुष्टिं तथा धर्मं तुलसी देहि मे सदा । श्रियः श्रिये श्रियावासे नि
त्यं श्रीधरसत्कृते । भक्त्या दत्तं मया देवि अर्घं गृहाण नमोस्तु ते । ग्रहणमंत्रः । तुलस्यमृतजन्मासि सदा त्वं के
शवप्रिये । केशवार्थं विचिनोमि वरदा भव शोभने । त्वदंगसंभवैः पत्रैः पूजयामि यथा हरिं । तथा कुरु पवि
त्रांगि कलौ मलविनाशिनि । विष्णुधर्मोत्तरे । रविवारं विना दूर्वां तुलसीं द्वादशीं विना । जीवितस्याविनाशा
य प्रविचिन्वीत धर्मवित् । पक्षे पक्षे तु संप्राप्ते द्वादश्यां मुनिसत्तम । ब्रह्मादयोपि कुर्वंति तुलसीवनपूजनं । मनुः ।
संक्रांतावर्कपक्षांते द्वादश्यां निशि संध्ययोः । ये छिंदंति तुलसीपत्रं तैः छिन्नं हरिमस्तकं । तथा पाद्मे । द्वादश्यां
तुलसीपत्रं धात्रीपत्रं च कार्त्तिके । लुनाति स नरो गच्छेन्निरयानतिगर्हितान् । विष्णुधर्मोत्तरे । न छिंद्यात्तुल
सीं विप्रा द्वादश्यां वैष्णवः क्वचित् । देवार्थं तुलसीच्छेदो होमार्थं समिधां तथा । इंदुक्षये न दुष्येत गवार्थे तु तृणा
स्य च । रुद्रयामले वैष्णवधर्मेषु । द्वादश्यां च दिवास्वापं तुलस्यावचयं तथा । तत्र विष्णोर्दिवास्नानं वर्ज
नीयं सदा बुधैरिति । विशेषतो द्वादश्यां निषेधोत्पत्तदोषबोधकः इति केचित् । नृसिंहपरिचर्यायां । न
स्नानं हरयेद्याद्द्वादश्यां वैष्णवो दिवा । पत्रपूजाफलं सर्वं वाष्कलेयाय गच्छति । इति यद्यपि सामान्यत
एव निषेधस्तथाप्येकादशीजागरसन्निधीकृत श्रीमत्तै विषयः प्रतीयते । रजनीचरमयामदत्तदत्ते

१७८
178
प्रह्लादस्स्नायायामचतुष्टयधारणांगीकारादितिशिष्टाः। यथोक्तं स्कांदे। श्रीविष्णोर्जागरे स्नायोनरोद्वादशी
दिने। तामेवोच्चारयेन्नाद्देस्सयातिनरकंध्रुवं। पुनस्तत्रैव। अपराधसहस्राणि अपराधशतानिच। कमलेकेनदेवे
शंयोऽर्चयेत्कमलाप्रियं। वर्षायुतसहस्रस्यपापस्यकुरुतेक्षयं। पत्रेणैकेनकेतक्याः पूजितोगरुडध्वजः। सह
स्रमब्दंस्सुप्रीतोभवेच्चमधुसूदनः। सुवर्णकेतकीपुष्पंयोददातिजनार्दने। कोटिजन्मार्जितंपापंदहतेगरुड
ध्वजः। तथा। येर्चयंतिजगन्नाथंकरवीरैः सितासितैः। चतुर्युगानिदेवेंद्रप्रीतोभवतिकेशवः। विष्णुधर्मोत्त
रे। बंधुजीवकपुष्पाणिरक्तान्यपिनिवेदयेत्। कृत्रिमाण्यनुलेप्यानिगंधेनापिसुगंधिना। धूपेनपटवासे
नचंदनाद्यनुलेपनैः। कृत्रिमानिसुवर्णपुष्पादीनि। मध्येन्यवर्णीयस्सस्याच्छुक्लस्यकुसुमस्यच। पुष्प
कंतुविज्ञेयंमनोज्ञंकेशवप्रियं। नरसिंहपुराणे। मल्लिकामालतीयातीकेतकाशोकचंपकैः। पुंनागनागब
कुलैः पद्मैरुत्पलजातिभिः। एतैरन्यैश्चकुसुमैः प्रशस्तैरच्युतंनरः। अर्चयन्दशसुवर्णस्यप्रत्येकंफल
माप्नुयात्। अग्निपुराणे। मालतीमल्लिकाचैवयूथिकाचातिमुक्तकः। पाटलाकरवीरंचजयाजायंति
रेवच। कुब्जकस्तगरश्चैवकर्णिकारःकुरंटिकः। चंपकोवातकःकुंदोवाणोवर्वरमल्लिका। अशोकस्तिल
कश्चैवपस्तथाचैवाटरूषकः। अमीपुष्पवराः सर्वेशस्ताः केशवपूजने। पाद्मे। मंजरीसहकारस्यकेशवो

पुष्पांकुरः १८

परिनारद । येर्चयंतिमहाभागा गोकोटिफलभागिनः । कर्दंवपुष्पगंधेन केशवार्चा हि वासिता । जन्मायुता
र्जितं पापं निर्हंति निश्चितं मुने । पद्मान्यंबुसमुत्थानि रक्तनीलोत्पले । सितोत्पलं च कृष्णस्य दयितानि सदा नृप ।
विल्वपत्रं समीपत्रं पत्रं भृंगारजस्य च । तमालपत्रं च हरेः सद्यस्तुष्टिकरं परं । अपवादमाह । शमीपत्राणि दूर्वा च
भृंगराजस्तथैव च । सुप्ते देवे न देयानि निद्राभंगकराणि च । विष्णुरहस्ये । सकृदभ्यर्च्य गोविंदं विल्वपत्रे
ण मानवः । मुक्तिभागी निरातंकः कृष्णस्यानुचरो भवेत् । दूर्वांकुरं हरेर्यस्तु पूजाकाले प्रयच्छति । पूजाफलं
शतगुणं सम्यगाप्नोति मानवः । शमीपत्रैश्च ये देवं पूजयंत्यसुरद्विषं । यममार्गं महाघोरं निस्तीर्णं ते तु नारद ।
योर्चयेत्केतकीपुष्पैः कृष्णं कलिमलापहं । पत्रे पत्रेऽश्वमेधस्य फलं यच्छति भूभुज । स्वयमाहृतपुष्पाणि
भित्ताशी केशवार्चनं । यः करोति स राजेंद्र वंशानामुद्धरेच्छतं । एवं शुभैः सदा पुष्पैः पूजनीयो जनार्दनः ।
निषिद्धैर्दुःखदैर्विष्णुर्नार्चनीयः कदाचन । विष्णुरहस्ये । न शुष्कैः पूजयेद्देवं कुसुमैर्न महीगतैः । नवि
शीर्णदलैः स्पृष्टैर्नाशुभैर्नाविकाशिभिः । पूतिगंधीनि अम्लगंधीनि वर्जयेत् । पाद्मे । गंधवंत्यपवि
त्राणि उग्रगंधीनि वर्जयेत् । गंधहीनमपि ग्राह्यं पवित्रं यत्कुशादिकं । गारुडे । चतुःपथशिवावासश्म
शानस्य च मध्यतः । न गंधफलपुष्पाद्यमाहरेत्तार्चने बुधः । विष्णुधर्मोत्तरे । नार्हे करवीरोत्थैः कुस

~~मेरुवृश्चिते: । पद्मं नविशीर्णादि सा: कृतैर्नालक्षैर्नालिकालिताः~~ मेरुर्वपद्धरि । पतिते मुकुले म्लाने: श्वासे वी
जंतुदूषिते: । आघ्राते रंगसंस्पृष्टे रूषिते श्चैव नार्चयेत् । गृहे करवीरो त्यै रितिगृहे जाते रित्सर्थः । बंधूककरवीरे
तु न गृहे रोपयेत्क्वचित् । इति वामनोक्ते: । अलक्ष्मीपति प्रति ब्रह्मवाक्यं । अगाहस्याकीर्दयो वापि बंधुजीवो गृहेषु
वै । करवीरं विशेषेण नंद्यावर्त्तमथापि वा । मल्लिका च गृहे येषां तद्भार्यं त्वं समाविश । उषिते: पर्युषिते: ।
तथा । नार्के नोन्मत्तकं किंचित्र पेयव गिरिकर्णिकां । न कंटकारिकापुष्पमच्युताय निवेदयेत् । कुटजं शाल्मली
पुष्पं शिरीषं च जनार्दने । निवेदितं भयं शोकं निःस्वतां च प्रयच्छति । करानीतं परानीतं मानीतं चार्कपत्रके ।
एरंडपत्रेष्वानीतं तत्फलं सकलं त्यजेत् । जटामल्लप्रकाशे । येषां च संति पुष्पाणि प्रशस्तान्यर्चने हरेः । पल्लवा (
अपि तेषां स्युः शस्ता अर्चाविधौ हरेः । हलायुधे । जलजानां च पुष्पाणां बिल्वपत्रैश्च चैव हि । एषां पर्युषिताशंका
कार्या पंचदिनोर्ध्वतः । अथ देवपूजायां निषिद्धपुष्पाणां हेतुमाहादिपुराणे । आदिकल्पे इह्लमयं शूर्वे विश्वमजा
यत । देवाश्च स्वस्वरूपेण जाताहि मत्सरान्विताः । येषां परस्परं वैरं तत्सुष्ठं तेषु निंदितं । उद्भूतिः सर्वलोकानां तोया
दन्नस्य संभवः । जीवनं सर्वलोकानां तस्मान्नोयं हरप्रियं । बालोप्युवाः पदृद्धो वागीतज्ञो वाजितो पिवा । श्रुत्वा गीतं
तत्परः स्याह्लायनं तेन तत्प्रियं । यमो निहंता सर्वेषां प्रजानां ब्रह्मणा मतः । तस्मात्तत्कुसुमं सर्वं देवानामप्रियं मतं ।

दंतपातभयं त्रस्तः शुष्कावैरपरः सदा। देवीपुत्रोद्भवं पुष्पं यस्मै दुःखप्रदायकं। तयोन्मादकरं द्रव्यैः साधकानां हितं नहि।
तस्मात्स्वशरीरवीनेष्टे स्वर्णाश्रीवत्सुभे परे। न नागगिरिजा यस्मात्पयो वैरं हृदि स्थितं। तस्मात्क्षीतुलसीनेशाद्दूर्वात
जन्मकारणात्। अहिदूषितसर्वांगकंठे विषधरः स्वयं। विषघ्नात्सरवो येच सर्पघ्नात्तेन शंकरे। कामघ्नी वर्ज्जयेद्दे
व्यायतोपत्सप्रियाशिवा। करिणीगणपेत्याज्यायतः करिमुखो हि सः। दंतपातं स्मरंस्तस्य यो द्विरदः स्फुरपाटने।
रक्तोजातस्तयोर्नित्यं रक्तपुष्पमतिप्रियं। द्विरदो घातकः शिंशुर्जवायनपराशिवा। स्वधायोगात्तदुद्भूता दूर्वांग
णपतिप्रिया। भस्त्वाह्वत्तमयो विष्णुः श्रीजीतातुलसीदलात्। तयोर्योगः सुखकरो लक्ष्मीस्त्री राधिवासिनः। विष
वृद्धिकरावृत्ताः सर्पाह्लादकरास्त्वये। प्रजाविधौ महेशस्य प्रशस्तास्तेर्कपूर्वकाः। शेषतल्पशयानस्य तत्कुसोत्का
संसंगमात्। संतप्तो विग्रहस्तस्य तत्कांत्ये पंकजंप्रियं। कंठे हालाहलं यस्मात्सर्पभूषितविग्रहः। तस्मात्तत्तापशांत्य
र्थं जलजं शिववल्लभं। श्रीकरं धातृजनकं तस्मात्सर्वामरप्रियं। रक्तो रक्तो मुनिश्रेष्ठः पितृदेवार्चनं विना। एका
त्संदर्शनान्नश्येत्सर्पतो यादिवंधकं। उद्देशतस्त्विदं प्रोक्तं प्रकृतं कथ्यतेधुना। आनंत्यात्पुष्पजातीनां देवानाम
पितत्तथा। कात्स्न्येन शक्यते वक्तुं निषेधः प्रोच्यतेधुना। शिवे कुंदं मदंतीं च यूथीं वंधूककेतकीं। जपां रक्तां त्रिसं
ध्ये देसिंदूरं कुरजानितु। मालतीं चुस्तूरांश्चैव हरयारीं वर्वरीं त्यजेत्। अपकारणपक्वानि सर्जपत्रीं विगंधियत्।

१५०. पतितानि संकटानि परस्यानाहृतानि च । उग्रगंधमगंधं च जलदाँदिषु दूषितं । अशुद्धपात्रआरोपितं वासोभिः कुत्सि
तोत्थभिः । आनीतं नार्पयेत्कुंभोद्भमादादपि दोषकृत् । न शर्ल्लं शाल्मलं पुष्पं कूष्मांडादि न शोभनः । द्वारमंडपलेके
शास्यभेदकारी सदा त्यजेत् । कलिकामुकुलैर्नेज्यं विनाचंपकपंकजैः । हस्तात्प्रस्खलितं क्षितौ च पतितं लग्नं
यदापादयोर्येन्मूर्द्ध्नि विधृतं धृतं च वसनेनाभेरधो यद्धृतं । स्पृष्टं दुष्टजनैर्घनैरुपहतं यद्दूषितं कंटकैः ।
तत्त्याज्यं कुसुमं फलं च जलजं भक्तैः शिवप्रीतये । पुष्पपत्रग्रहणमंत्रः । मा नु शोकं कुरुष्व त्वं स्थानत्यागं च मा
कुरु । देवतापूजनार्थाय प्रार्थयामि वनस्पते । ॥ अथ धूपाः । ॥ तत्र वामनपुराणे । तुहिकाख्य कर्णं दारु
सिहूकं सागुरुं शिषं । शंखं जातीफलं श्रीशे धूपानि स्युः प्रियाणि वै । तुहिका मांसी । कर्णो गुग्गुलुः । शंखो न
खी । स्कांदे द्वारिकामाहात्म्ये । स्नानकाले तु देवस्य अगुरुं दहते नरः । प्रविष्टे नासिकारंध्रे पापं जन्मायुतं व्रजेत् ।
नारसिंहे । महिषाख्यं गुग्गुलुं च आज्ययुक्तं सशर्करं । धूपं ददाति राजेंद्र नरसिंहाय भक्तिमान् । स धूपितः सदा
तुष्टः सर्वपापविवर्जितः । अप्सरोगणयुक्तेन विमानेन विराजते । वायुलोकं समासाद्य विष्णुलोके महीयते ।
कृष्णागुरुसमुत्थेन धूपेन श्रीधरालयं । धूपयेद्धैर्यवो यस्तु समुक्तो नरकार्णवात् । विनाम्नागमदं धूपे जीव
जातं विवर्जयेत । तच्चोषधारणमाह गौतमः । तीर्थकोटिशतैर्धौतो यथा भवति निर्मलः । करोति निर्मलं देहं

अश्वमेधसहस्राणि मवाप्नोति कुलं चैव समुद्धरेत्। संवर्तः। देवागारे द्विजानां च दीपं दत्वा चतुष्पथे। मेधावी ज्ञानसंपन्नः चक्षुष्मान्
जायते नरः ४५

धूपशेषस्तथा हरेः। नारदीये। आघ्राणं यद्धरेर्दत्तं धूपोच्छिष्टस्य सर्वतः। उद्भववालदुष्टानां तस्य कर्मविषापहं।
पाद्मे। शंखोदकं हरेर्भुक्तं निर्माल्यं पादयोर्जलं। धूपचंदनशेषस्तु ब्रह्महत्यापहारकः। धूपं चारात्रिकं विष्णोः
कराभ्यां यस्तु वंदते। कुलकोटिं समुद्धृत्य याति विष्णोः परं पदं। तथा। न भयं विद्यते तस्य दिव्यं भौमं रसातलं।
धूपावशेषेण यस्यांगं परिवासितं। ॥अथ दीपाः। ॥तत्र नरसिंहपुराणे। घृतेन वाथ तैलेन दीपं यो
ज्वालयेन्नरः। विष्णवे विधिवद्भक्त्या तस्य पुण्यफलं शृणु। विहाय स कुलं पापं सहस्रादित्यसन्निभः। ज्योतिष्म
ता विमानेन विष्णुलोके महीयते। तन्निर्वापणं निषेधो भविष्ये। तांश्च दत्वा न हिंसेत न च तैलविवर्जितान्।
कुर्वीत दीपहंता च मूकोंधश्च जायते। अंधे तमसि दुःपारे नरके पच्यते किल। भविष्योत्तरे। प्रज्वा
ल्य देवदेवस्य कर्पूरेण तु दीपकं। अश्वमेधमवाप्नोति कुलं चैव समुद्धरेत्॥ अथ नैवेद्यं॥ तत्र विष्णुः।
नाभक्ष्यं नैवेद्यार्थे भक्ष्येष्वपि पंचनखवाराहमांसानि। तथा। जेमनायोपयोज्यानि गव्यं दधि पयो घृतं। माहि
षं चाविकं छागमयज्ञियमुदाहृतं। यज्ञियं जपवैश्यं केवलमिति शिष्टाः। विष्णुधर्मोत्तरे। अभक्ष्यं चापि हृद्यं
वार्ता २= च नैवेद्यं न निवेदयेदिति। कौर्मे। वृंताकं जालिकाशाकं कुसुंभस्मान्तकं तथा। पलांडुं लशुनं शुक्तं निर्यासं चैव
वृंता १= वर्जयेत्। वार्ताकः शुक्लः। चातुर्मास्ये चेति प्रतीयते। जालिकाशाकं शतपुष्पाशाकं। नालिकेति पाठे नीलीशाकं।

१८१ स्वयं शुक्तं मधुरं कालपरिवासेनाम्लीभूतं । दीपिकायां । दुग्धान्नं शूपकं चैव शष्कुलीमोदकं तथा । सूपान्नं
१८१ पायसार्द्धं च भक्ष्यं श्रीकृष्णवल्लभं । नरसिंहपुराणे । हविष्यान्नोदकं दिव्यमाज्ययुक्तं सशर्करं । निवेद्य नरसिंहा
य चापरं पायसं तथा । समाः सतंडुलसंख्याता यावतावत्तु ते नृप । विष्णुलोके महाभाग भुंजन्नास्ते सवैष्णवः ।
181 विष्णुधर्मोत्तरे । मूलकस्य तथा शाकं चिंचाशाकं तथैव च । आर्द्रकस्य तथा शाकं पालकं शाकमेव च । अ
विलोडक शाकं च सदैव हरिवल्लभं । वाराहे । फलेष्वामलकं श्रूज्यं वादरं तिंतिडीफलं । दाडिमी मातुलिंग
स्य वीजपूरकशोद्भवं । कदलीचूतसंभूतं जंबूफलं तथा । अन्यान्यपि प्रशस्तानि भुक्तियुक्तानि सर्वदा ।
पुनसश्चैव । कलिंगस्य फलं चैव द्विविधा कर्कटी तथा । खर्जूरं राम्यनं तांश्चैव विल्वजीरकरूपकं । अक्षो
टोदुंवरं तालं जाम्बीरं ऊंदफलं तथा । कलिंदकफलं चैव वृहतीफलमेव च । उभयानि पटोलानि कुमुदस्य
फलं तथा । मूलकानां फलं चैव करमर्दफलं तथा । कर्मरापस्तु फलान्येते शक्तितः स्थानि माधव । पुंस्त्व
मार्ग । विष्णुः । साज्यशाल्योदन पायस खंड लड्डुक पक्व फल मूल शाक मृणाल व्रीहि माष मुद्ग गवेधुक
गव्य पयो दधि घृताद्यानि निवेदयेदिति शेषः । वौधायनः । पयसा वत्सरं तु तिष्ठेत पक्षे दश द्वादशकी । द
ध्ना चैव शतार्द्धं च घृतेन शतवत्सरं । नैवेद्यं कल्पयेद्विद्वान् तदभावे तु पायसं । केवलं घृतसंयुक्तं पायसं तु

अथ नैवेद्यनिवेदनं । उत्पन्नममृतं दिव्यं यत्क्षीरोदधिमंथनात् । अमृतमन्नरूपेण भगवंस्तत्प्रगृह्यतां । नैवेद्यमितिशेषः ५८

प्रकल्पयेत् । हलायुधः । यद्यदाभद्यतेभद्यंतत्तथैवप्र दापयेत् । अन्यथा तत्प्रसादेन न तत्फलमवा
प्नुयात् । यथा पंचनखंखंडनक्षालनादिना पक्वान्नादेर्भक्ष्यार्हता भवेत्तथा तद्देयमित्यर्थः । अथ नै
वेद्यपात्रमाह स्कंदपुराणे । नैवेद्यपात्रं वक्ष्यामि केशवस्य महात्मनः । हैरण्यं राजितं कांस्यं ताम्रं मृण्मयमे
व च । पालाशं पद्मपत्रं वा पात्रं विष्णोरतिप्रियं । वाराहे भूवाराहसंवादे । सौवर्णं राजतं कांस्यं येन दीयेत
प्रापणं । तानि सर्वाणि संत्यज्य ताम्रं तु मम रोचते । दीक्षितानां विशुद्धानां मम कर्मपरायणैः । सदा ताम्रेण
कर्तव्यमेवं भूमि मम प्रियं । प्रापणं नैवेद्यं । गारुडे । नैवेद्यं तुलसीमिश्रंर्घंटाद्यैर्जयनिःस्वनैः । नीराज
नं च हरयेद्याद्दापोशनं ततः । स्कंदपुराणे । सुनीरं करकोपेतं कुंभं कृष्णाग्रतो न्यसेत् । कल्पांते न जलापेक्षां कुर्व
ति च पितामहाः । अथ नैवेद्यप्रतिपत्तिः । तदुक्तं हरि[illegible]तिसारे । ब्रह्मांगलग्नं विष्वग्भ्यो वै दमवं च प्रदीयते ।
रुद्रांगलग्नमग्नौ च दहेत्सर्वं च तत्क्षणात् । शिष्टेभ्यस्तु यदेवेभ्यो यत्तु दीनेषु निःक्षिपेत् । विष्वग्भ्यस्तु यतद्देयं ब्रह्म
णाय निवेदितं । वैष्णवं सात्वतेभ्यश्च मत्स्यमांसभोभ्यश्च शांभवं । सौरं मगेभ्यः शाकेभ्यस्तापिने यन्निवेदितं । स्त्रीभ्य
श्च देयं मातृभ्यो यत्तु किंचिन्निवेदितं । भूतप्रेतपिशाचेभ्यो यत्तु दीनेषु निःक्षिपेत् । विष्णुरपि । सूर्याय निवेदितं
मगाय देयं । देव्यै निवेदितं कुमार्य्यै देयं । शिवाय निवेदितं तल्लिंगधारिणे देयं । विष्वक्सेन निवेदितं सात्वताय देयं

१८२ ब्राह्मणाय वा । अत्रेयं प्रक्रिया । ब्रह्मांगलग्नमित्यादिना स्नानद्युतादेः प्रतिपत्तिः । विश्रंभपत्रयेत्यादिना दत्तनै
वेद्यादेः । सात्वतो देवलकः । यः पंचमः ख्यातः । यथा ब्रह्मांडे । पंचमः सात्वतो नाम विष्णोरायतनान्यपि ।
182 पूजयत्याज्ञया राज्ञो यदि स्यात्संयतेंद्रियः । महर्षिभिस्तु तत्रोमानित्युक्त लक्षणः । मगः शाकद्वीपीयो ब्राह्म
ता०४= णः । शाकद्वीपे ततो विप्रो मग इत्युच्यते बुधैरिति वा । हायिनेबुद्धाय । कश्चिन्निष्यादौ बुद्धपूजा विहिता ।
मात्स्य इति देवीमात्रोपलक्षणं । भगवन्निवेदितं तु सात्वताय ब्राह्मणाय वा दत्वा स्वयमपि भुंजीत न च स्वयंप्र
हरोदत्वापहारापत्तिरिवाच्यं । तस्य दानविषयत्वात् । नैवेद्यं तु स्वस्वत्वापरित्यागेन तदास्तापनस्यानिवेदि
तं । स्वामिसंबंधतया तदीयतर्पणेन वा । तच्च तदनुज्ञया तद्बुद्धिपूर्वत्वेन च लब्धं सात्वताय दत्वा स्वयं च भुंजीत ।
तदसंन्निधौ विष्वक्सेनादिवैष्णवे देशे जलेग्नौ वा विनिक्षिपेत् इति पुराणोक्तेः । यद्वा पारिभाषित सात्व
तप्रतिपत्तिः । साधारणस्थावरप्रतिमादत्तस्य । यदुक्तं विष्णुरहस्ये । यद्योनिरत्ति नैवेद्यं दातुश्चानभधान
तः । दाता तद्योनिमाप्नोति तस्माद्देयं तदुत्तमे इति वैष्णवद्विजात्यपेक्षया तस्य हीनत्वात् । तदितरन्निवेदि
तं तस्मैन दद्यादित्याशयः । यत्तु वाक्येषु सात्वतप्रशंसा श्रूयते तत्सात्वतपरमन्यथासिद्धं । तदुक्तं वाच
कं । तद्यथा । तच्छब्देन सत्वमूर्त्तिर्भगवाननुपास्यतया विद्यते यस्य स सत्वात् तस्मादेव सात्वतः ।

तथा । नैवेद्यमुपभुंजीत दत्वा तद्भक्तिशालिने । महापुराणेपि । निवेदितं तद्भक्ताय दद्याद्भुंजीत वा स्वयं । पुन
स्तत्रैव षष्ठस्कंधे । स्वधाम्नि देवमुद्वास्य तन्निवेदितमग्रतः । अद्यादात्मविशुध्यर्थं सर्वकामर्द्धये तथा । अनर्पित
भक्षणे दोषमाह कूर्मपुराणे । अनर्पयित्वा गोविंदे ये भुंक्ते धर्मवर्जितं । श्वनो च्छिष्टसमं चान्नं नीरं च सुरयासमं ।
ब्रह्मांडे । पत्रं पुष्पं फलं तोयमन्नपानाद्यमौषधं । अनिवेद्य न भुंजीत यदाहाराय कल्पितं । भारतेपि । यज्ञ
शिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः । भुंजते ते त्वघं पापा ये पचंत्यात्मकारणात् । यज्ञो वै विष्णुरिति श्रुतेः ।
गारुडे । पादोदकं पिबेन्नित्यं नैवेद्यं भक्षयेद्धरेः । शेषाश्च मस्तके धार्या इति वेदानुशासनम् । तथा । उच्छिष्ट
मवशेषं च भक्तानां भोजनद्वयं । हलायुधे स्कंदपुराणवाक्यम् । नैवेद्यशेषं तुलसीविमिश्रं विशेषतः पादज
शिष्टं लेन सिक्तं । योश्नाति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यं । तथा ब्रह्मांडे । षड्भिर्मासोपवासैश्च य
त्फलं परिकीर्त्तितं । विष्णोर्नैवेद्यशिष्टान्नं तत्फलं भुंजतां भवेत् । श्रुतिश्च । एक एव नारायण आसीत् नब्र
ह्मा नेमे द्यावापृथिव्यौ सर्वे देवाः सर्वे पितरः सर्वे मनुष्या विष्णुना अशितमश्नंति । विष्णुना घ्रातं जिघ्रंति ।
विष्णुना पीतं पिबंति । तस्माद्विद्वांसो विष्णुपहृतं भक्षयेयुरिति । तथा विष्णुधर्मोत्तरे । भुक्तं दाशितशेषं तु
यो हि भुंक्ते दिने दिने । सिक्थे सिक्थे लभेत्पुण्यं चांद्रायणशताधिकं । तथा गौरीं प्रति शिववाक्यं । अग्निष्टोमसह

१८५ होमश्च वाजिमेधशतैरपि । यत्फलं लभते देवि विष्णोर्नैवेद्यभक्षणात् । तत्फलं लभते इति शेषः ॥ श्रीभागवते
कृष्णं प्रत्युद्धववाक्यं । त्वयोपभुक्तस्रग्गंधवासोऽलंकारचर्चिताः । उच्छिष्टभोजिनो दासास्तव मायां जयेमहि । बहु
183 च परिशिष्टे । पवित्रं विष्णुनैवेद्यं सुरसिद्धर्षिभिः स्मृतं । अन्यदेवस्य नैवेद्यं भुक्त्वा चांद्रायणं चरेत् । विष्णुस्मृतौ ।
अनिवेद्य च यो भुंक्ते हरये परमात्मने । मज्जंति पितरस्तस्य नरके शाश्वतीः समाः । भोक्तव्यं हरिनैवेद्यं कोटिचांद्रा
यणं लभेत् । विहाय हरिनैवेद्यं कोटिचांद्रायणं चरेत् । तत्फलं लभते नित्यं सर्वदा सर्वदा प्रिये । विष्णुधर्मोत्तरे ।
प्राशोभ्यो न तु हुयादन्नमनिवेदितमुत्तमं । तुष्यंति सर्वदा प्राणा मन्निवेदितभक्षणात् । पाद्मे गौतमः । अंबरीष नवं
वस्त्रं फलमन्नं रसादिकं । कृत्वा कृष्णोपभोग्यं हि सदा सेव्यं च वैष्णवैः । ब्रह्मांडे । अनिवेद्य प्रभुंजानः प्राय
श्चित्ती भवेन्नरः । तस्मात्सर्वं निवेद्यैव विष्णोर्भुंजीत नान्यथा । कूर्मपुराणे । मध्याह्ने विधिवद्विष्णुं संपूज्य वैष्ण
वोत्तमः । नैवेद्यं शिरसा कृत्वा श्लोकमेतदुदीरयेत् । यस्योच्छिष्टं हि वांछंति ब्रह्माद्या ऋषयोऽमलाः । सिद्धाद्या
श्च हरेस्तस्य वयमुच्छिष्टभोजिनः । यस्य नाम्ना विनश्यंति महापातककोटयः । तस्य श्रीकृष्णनाथस्य वयमु
च्छिष्टभोजिनः । उच्छिष्टभोजिनस्तस्य वयमद्भुतकर्मणः । येन लीलावराहेण हिरण्याक्षो निपातितः । वैष्णवच
रणामृतनैवेद्यदानमंत्रस्तु । बलिर्विभीषणो भीष्मः कपिलो नारदोऽर्जुनौ । प्रह्लादो जनको व्यास अंबरी

षल्पयेच्च। विष्वक्सेनो ध्रुवोऽक्रूरः सनकाद्याः शुकादयः। वासुदेवप्रसादान्नं सर्वेभ्यस्तु वैष्णवाः। त
था। अथ भुक्तवते दद्याज्जले कर्पूरवासिते। आचमनं तु तांबूलं चंदनैः करमार्जनं। पुष्पांजलिं ततः कृत्वा
भक्त्यादर्शं प्रदर्शयेत्। समर्प्य मुकुटादीनि भूषणानि विचक्षणः। मुखवासं ततो दत्वा गृहीत्वा योपविश्य च।
कुर्याद्वार्त्तां महत्पुण्यां वैष्णवानां सुमंगलां। पूगजातीफले दत्वा जातीपत्रं तथैव च। लवंगमथ कक्कोलमेला
कतिलकं तथा। तांबूलानां किशलयं दत्वा स्वर्गमवाप्नुयात्। सौभाग्यमतुलं लोके तथा रूपमनुत्तमं। स्नानवस्त्रोप
वीतनैवेद्यानंतरमाचमनीयं। तथा। अर्घ्ये स्नाने तथा वस्त्रे उपवीतोपहारयोः। ततो विराडित्यनया दद्यादाचम
नं बुधः। अनुलिप्य जगन्नाथं तालवृन्तेन वीजयेत्। वायुलोकमवाप्नोति पुरुषस्तेन कर्मणा। चामरे वीजयेद्यस्तु
देवदेवं जनार्दनं। तिलप्रस्थप्रदानस्य फलं प्राप्नोत्यसंशयं। भविष्यपुराणे। दत्वा देवाय चामरं मणिदंडविभू
षितं। हेमरूप्यादिकं दंडं तस्य पुण्यफलं शृणु। चामरव्यग्रहस्ताभिर्दिव्यस्त्रीपरिवारितः। महाभोगविमानस्थ
श्चिरं देवपुरे वसेत्। दर्पणस्य प्रदानेन नरूपवान्दर्पवान्भवेत्। दर्शयित्वा तथा तं च नाभोगत्वमिजायते। अथ श्री
रात्रिकं। बहुवर्त्तिसमायुक्तं ज्वलंतं केशवोपरि। कुर्याद्यारात्रिकं यस्तु कल्पकोटिदिवं वसेत्। नीराजनं च यः पश्ये
द्देवदेवस्य चक्रिणः। सप्तजन्म भवेद्विप्रो ह्यंते च परमं पदं। कर्पूरेण च यः कुर्याद्भक्त्या केशवमूर्द्धनि। आरार्त्तिकं

१८४ मुनिश्रेष्ठ प्रविशेद्दिवि सुमव्ययं । मंत्रहीनं क्रियाहीनं यत्कृतं पूजने हरेः ॥ सर्वं संपूर्णतामेति कृते नीराजने हरौ ।
184 नीराजनजलं यत्र यत्र पादोदकं हरेः । तिष्ठते मुनिशार्दूल वर्धंते तत्र संपदः । तन्मंत्रः । ॐ आरात्रिं पार्थिवं रजः
पितुरप्रायि धामभिः दिवः सदांसि बृहती वितिष्ठस आत्वेषं वर्तते नमः ॥ अथ प्रदक्षिणानमस्कारः ॥
एवं कृत्वा तु कृष्णस्य यः कुर्याच्च प्रदक्षिणं । सप्तद्वीपवतीपुण्यं लभते तु पदे पदे । विष्णोर्विमानं यः कुर्यात्सकृद्भक्त्या प्र
दक्षिणं । अश्वमेधसहस्रस्य फलमाप्नोति मानवः । नारदीये । विष्णोः प्रदक्षिणं कुर्वन्यस्तत्रावर्तते नरः । तदेवावर्त
नं तस्य पुनर्नावर्तते भवे । प्रदक्षिणा न कर्तव्या विमुखस्य हि कारणात् । उत्थायोत्थाय कर्तव्यं दंडवत्प्रणिपातनं ।
हलायुधे । न देवं पृष्ठतः कृत्वा प्रणामं क्वचिदाचरेत् । वरमुत्थाय कर्तव्यं न तथा भ्रमणं चरेत् । पश्चात्कृत्वा
तु यो देवं भ्रमित्वा प्रणमेन्नरः । तस्यैहिकफलं नास्ति न परत्र दुरात्मनः । यथा । एकोपि कृष्णस्य कृतः प्रणामो
दशाश्वमेधावभृथेन तुल्यः । दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय । प्रदक्षिणाश्च तत्तद्देवयाः ।
यथा । एकां चंड्यां रवौ सप्त तिस्रो दद्याद्विनायके । चतस्रः केशवे दद्याच्छिवे त्वर्द्धां प्रदक्षिणां । एका हस्तप्रमाणैस्तु
एकां चैव प्रदक्षिणा । अकाले दर्शनं चैव हंति पुण्यं पुराकृतं । विष्णुः । पुरतो वासुदेवस्य दंडवत्पतितो भुवि । प
तंति पातकाः सर्वे नोत्तिष्ठंति पुनः सह । सकृद्दानन मेयस्तु विष्णवे शर्मकारिणे । शाठ्योपमं विजानीयात्कदाचिद

पिनालपेत्। सकृद्वेति वाशब्दोऽप्यर्थे। तेन वा पदं बहुत्वापकं। न तु सकृन्निषेधकं। कृत्वा प्रदक्षिणां भूमौ प्र
णमेद्दण्डवन्मुहुः। पश्यन्दृष्ट्वालुवन्वाचा मनसा च हरिं स्मरन्। वाराहे। वस्त्रप्रावृतदेहस्तु यो नरः प्रणमेत मां।
स दासः जायते मूर्खः सप्तजन्मनि भामिनि। इत्यत्र वस्त्रावरनिषेधो धरीयव्यतिरिक्तवस्त्रविषयः। तस्य निषे
द्धमप्राप्यत्वात्। राजसादिविषयो वा। प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्चयेत्। स यां गतिमवाप्नोति न तां
क्रतुशतैरपि। जन्मप्रभृति यत्किंचित्पुमान्वै धर्ममाचरेत्। सर्वं निष्फलतामेति हस्तेकेनाभिवंदनात्। दोर्भ्यां
पद्भ्यां च जानुभ्यामुरसा शिरसा दृशा। मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः। तथा। पद्भ्यां कराभ्यां शिरसा
पंचांगः प्रणतिः स्मृता। अष्टांग उत्तमः प्रोक्तः पंचांगो मध्यमः स्मृतः। अथ गीतनृत्यादिमाहिमा॥
ततः प्रमुदितैर्भक्तैस्तालवीणादिभूषितैः। कारयेद्गीतनृत्यादि कुर्याद्वा नेराजनं। तथा विष्णुधर्मोत्तरे।
विष्णुं पलज्ञो यो धीते गायते नृत्यते पि च। कुलकोटिसमायुक्तो लभते मामकं पदं। यो नृत्यति प्रहृष्टात्मा
भक्तिभावैरनेकधा। स निर्दहति पापानि मन्वंतरकृतान्यपि। नारदोऽपि। नृत्यतां श्रीपतेर्गेहे तालिकावादनै
र्भृशं। उड्डीयंते शरीरस्थाः सर्वे पातकपक्षिणः। कृष्णं संतोषयेद्यस्तु सुगीतैर्मधुरस्वरैः। सामवेदफलं प्रा
प्य क्रीडते विष्णुसन्निधौ। नारदीये। विष्णोर्गीतं च नृत्यं च नटनं च विशेषतः। ब्रह्मन्ब्राह्मणजातीनां कर्तव्यं

नित्यकर्मवत्। वाराहे। ब्राह्मणो वासुदेवार्थं गायमानोऽनिशं परं। नव वर्षसहस्राणि कुबेरभवने वसेत्। जीवना
य तत्करणनिषेधने श्रीविष्णुः। गीतनृत्यादि कुर्वीत द्विजदेवाग्नितुष्टये। न जीवनाय भुंजीत विप्रः पापभिया
क्वचित्। अथ षड्त्रिंशोपचारक्रमप्राप्तं दानं दिवसाद्यभागकृत्ये प्रातःपूजाप्रसंगे निरूपितं पुनर्नात्र निरूप्य
ते। अथ घंटावादनमाहात्म्यं स्कंदपुराणे भगवद्वाक्यं। यस्तु वादयते घंटां वैनतेयेन चिह्नितां। धूपे नीराज
ने दीपे पूजाकाले विलेपने। ममाग्रे प्रत्यहं वत्स प्रत्येकं लभते फलं। मखायुतं गोनियुतं चांद्रायणशतोद्भवं।
विधिबाह्याकृता पूजा सफला जायते नृणां। वैनतेयांकितां घंटां सुदर्शनयुतां यदि। ममाग्रे स्थापयेद्यस्तु
देहे तस्य वसाम्यहं। तथा पाद्मे। सर्ववाद्यमयी घंटा केशवस्य सदा प्रिया। वादनाल्लभते पुण्यं यज्ञकोटि
समुद्भवं। सर्वे दोषाः प्रलीयंते घंटावादे कृते सति। देवतानां मुनींद्राणां पितृणामुत्सवो भवेत्। स्कंदपुराणे।
वादित्रनिनदैरुच्चैर्गीतमंगलनिःस्वनैः। यः स्नापयति देवेशं जीवन्मुक्तो भवेत्तु सः। वादित्राणामभावे तु पू
जाकाले तु सर्वदा। घंटावादो नरैः कार्यः सर्ववाद्यमयी यतः। तथा तत्रैव। स्वकरेण प्रकुर्वीत घंटानादं तु भक्ति
तः। मदीयार्चनकाले तु फलं कोट्युदयं कलौ। घंटादंडस्य शिखरे चक्रं स्थापयते तु यः। गरुडं वै प्रियं विष्णो
स्थापितं भुवनत्रयं। घंटानादं सचक्रं तु ह्यंतकाले शृणोति यः। पापकोटियुतस्यापि न स्पृशंते यमकिंकराः।

सर्वे दोषाः प्रलीयंते घंटानादे हरेः कृते । पुनस्तत्रैव । यस्याग्रे राजगृहे नास्ति शंखं वा पुरतो हरेः । कथं भाग
वतो नाम गीयते तस्य देहिनः ॥ ॥ अथ शंखपूजा ॥ तत्रैव गारुडपुराणे । त्रैलोक्ये यानि तीर्थानि वासुदेवस्य
चाज्ञया । शंखे वसंति विप्रेंद्र तस्माच्छंखं प्रपूजयेत् । हलायुधः । दर्शनादेव शंखस्य किं पुनः स्पर्शने कृते ।
विलयं यांति पापानि हिमवद्भास्करोदये । भूमौ न स्थापयेच्छंखं कदाचिदपि मानवः । विष्णुपूजावसाने तु शं
खमेवं समर्चयेत् । पूजामंत्रः । त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः स्वयं । निर्मितः सर्वदेवैश्च पांचजन्य करे ५८
नमोऽस्तु ते । शंखतोयं समादाय भ्रामयेत्केशवोपरि । अपराधसहस्रं मे क्षमस्व मधुसूदन । शंखस्थितं तु यत्तो
यं भ्रामितं केशवोपरि । देहलग्नं मनुष्याणां ब्रह्महत्यामपोहति । भ्रामयित्वा हरेर्मूर्ध्नि चंदनं शंखवारिणा ।
श्रोत्रयेद्वैष्णवो यस्तु नाशुभं तद्गृहे भवेत् । स्कांदे । शंखस्थितं तु यत्तोयं भ्रामितं केशवोपरि । वंदते शिरसा नित्यं
गंगास्नानेन तस्य किं । अर्घ्यं कृत्वा तु शंखेन यः करोति प्रदक्षिणं । प्रदक्षिणीकृता तेन सप्तद्वीपा वसुंधरा । कृत्वा
पादोदकं शंखे वैष्णवानां महात्मनां । यो दद्यात्तुलसीमिश्रं चांद्रायणफलं लभेत् । गारुडे । विलेपयंति देवं शं
शंखे कृत्वा तु चंदनं । परमात्मा परां प्रीतिं करोति शतवार्षिकीं । अथ स्तोत्रपाठमहिमा स्कांदे । गीतं वाद्यं च नृ
त्यं च तथा पुस्तकवाचनं । पूजाकाले तु राजेंद्र सर्वदा केशवप्रियं । गीतवाद्याद्यभावे तु विष्णोर्नामसहस्रकं । स्तुत्वा

१८६ 186 स्तोत्रसहस्राणिपठनीयंमहामुने । तेनैकेनमुनिश्रेष्ठपठितेनसदाहरिः । प्रीतिमायातिदेवेशोयुगकोटिश
तानिच । विष्णोर्नामसहस्रंतुप्रातःकालेपठेन्नृपः । सदेवसपुराणानांफलमाप्नोतिमानवः । हलायुधे ।
सालिग्रामशिलाग्रेतुगीताभ्यासंकरोतियः । संवत्सरसहस्राणिवसतेब्रह्मणःक्षये । तपोलोकेः । तथा ।
आब्रह्मस्तंबपर्यंतंजगत्तृप्तिंकरोतियः । विश्वरूपंसदाध्यायन्विभूतिंयःपठेद्द्विजः । गीताध्यायंपठेद्यस्तुश्लो
कार्द्धंश्लोकमेवच । सर्वपापविनिर्मुक्तोयातिविष्णोःपरंपदं । स्कांदे । महाभागवताख्यस्यपुराणस्यैकमक्षरं ।
यःपठेत्परयाभक्त्यागोप्रदानफलंलभेत् । पाद्मे । अंबरीषशुकप्रोक्तंनित्यंभागवतंशृणु । पठस्वस्वमुखे
नापियदीच्छसिभवक्षयं । लिखित्वातच्चयोदद्याद्धेमसिंहसमन्वितं । प्रोष्ठपद्यांपौर्णमास्यांसयातिपरमंपदं ।
यःपठेत्प्रयतोनित्यंश्लोकंभागवतंकलौ । आस्फोटयंतिवल्गंतितेषांप्रीताःपितामहाः । श्लोकार्धंश्लोकमेकं
वावरंभागवतंगृहे । शतशोथसहस्रैश्चकिमन्यैःशास्त्रसंग्रहैः । अथसंग्रहणोस्कंदपुराणे । कथंसवैष्णवो
ज्ञेयःशास्त्रंभागवतंगृहे । गृहेनतिष्ठतेयस्यश्वपचादधिकोहिसः । श्लोकंभागवतंवापिश्लोकार्द्धंपादमेवच ।
लिखितंतिष्ठतेयस्यगृहेतस्यसदाहरिः । गीतानामसहस्रंचस्तवराजोह्यनुस्मृतिः । गजेंद्रमोक्षणंचैवंगृहे स्तोत्रंकृतो २=
विष्णु १ यस्यसवैष्णवः ॥ अथजपः ॥ अष्टाक्षरंप्रवक्ष्यामिमंत्राणांमंत्रमुत्तमं । यंजपन्मुच्यतेजंतुर्जन्मसंसारबंधनात् ।

हृत्पुंडरीकमध्यस्थंशंखचक्रगदाधरं।एकाग्रमनसाध्यात्वाविष्णुंकुर्याजपंद्विजः।एकांतेविजनेस्थानेविष्ण्वा
ग्रेवाजलांतिके।जपेदष्टाक्षरंमंत्रंचित्तेविष्णुंनिधायवै।अष्टाक्षरस्यमंत्रस्यऋषिर्नारायणःस्वयं।छंदश्च
देवीगायत्रीपरमात्माचदेवता।शुक्लवर्णंच ॐकारं नकारंरक्तवर्णकं।मोकारंवर्णतःकृष्णं नाकारंरक्त
मेव।राकारंकुंकुमाभंच यकारंपीतमुच्यते।णाकारंकज्जलाभंच यकारंबहुवर्णकं।ॐनमोनारायणा
येतिमंत्रःसर्वार्थसाधकः।भक्तानांजपतांतातस्वर्गमोक्षफलप्रदः। तथा। स्नातःशुचिर्जपेद्यस्तुनमोनारा
यणंशतं।सगच्छेत्परमंदेवंनारायणमनामयं।कृत्वोर्ध्ववाहुमप्यत्रसत्यपूर्वंब्रवीमिवः।हेपुत्रशिष्याःशृणु
तनमंत्रोऽष्टाक्षरात्परः।अष्टाक्षरोमहामंत्रःसर्वपापहरःपरः।सर्वेषांविष्णुमंत्राणांराजत्वेपरिकीर्तितः।
अष्टाक्षरंमहामंत्रंयेजपंतिनरोत्तमाः।तान्दृष्ट्वाब्रह्महाशुद्ध्येत्तेयतोवैष्णवाःस्वयं।शंखिनश्चक्रिणोभूत्वाव्र
जाप्युर्वनमालिनः।वसंतिवैष्णवेलोकेविष्णुरूपेणतेनराः॥ अथन्यासः॥ ॐनमोअंगुष्ठाभ्यांनमः।ॐ
नातर्जनीभ्यांनमः।ॐरामध्यमाभ्यांनमः।ॐयअनामिकाभ्यांनमः।ॐणाकनिष्ठकाभ्यांनमः।ॐय
करतलकरपृष्ठाभ्यांनमः॥एवं॥ॐनमोहृदयायनमः।ॐनाशिरसेस्वाहा।ॐराशिखायैवौषट्।ॐय २=
कवचायहुं।ॐणानेत्राभ्यांवौषट्।ॐयअस्त्रायफट्।अंगन्यासःकरन्यासोवर्णन्यासःसमुद्रकः।देवता

१८५ ऋषयःछंदस्तेननारायणःस्मृतः। अथध्यानेवृहत्पराशरः। आदित्यमंडलेदेवंध्यात्वाविष्णुमुपासीतयः। स
187 यातिपरमंस्थानंनात्रकार्याविचारणा। पाद्मे। ध्येयःसदासवितृमंडलमध्यवर्त्तीनारायणःसरसिजासनस
न्निविष्टः। केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखचक्रः। अनेनमंत्ररत्नेनगंधपुष्पनि
वेदनैः। सकृत्प्रपूज्यमानोपिसंतुष्टोऽस्मिप्रजापतेइति। अष्टाक्षरमंत्रइत्युपलक्षणं। यस्ययदिष्टमंत्रःसएव
तेनजाप्यइत्याशयः॥ अथपुरुषसूक्तपूजाक्रमः॥ अग्निपुराणे। प्रथमांविन्यसेद्वामेद्वितीयांदक्षिणेक
रे। तृतीयांवामपादेतुचतुर्थींदक्षिणेन्यसेत्। पंचमींवामजानौतुषष्ठींवैदक्षिणेन्यसेत्। सप्तमींवामकाये
तुअष्टमींदक्षिणेन्यसेत्। नवमींनाभिमध्येतुदशमींहृदयेतथा। एकादशींकंठदेशेद्वादशींवामबाहुके।
त्रयोदशींकंठदेशेदक्षिणेतुतथास्यतुचतुर्दशीं। अक्ष्णोःपंचदशींचैवविन्यसेन्मूर्ध्निषोडशीं। यथादेहेतथा
देवेन्यासंकृत्वाऽर्चयेन्नरः। तथा। नरसिंहपुराणे। जलेदेवंनमस्कृत्यततोगच्छेद्गृहंपुनः। पौरुषेणतुसू
क्तेनततोविष्णुंसमर्चयेत्। अनुष्टुभस्यसूक्तस्यत्रिष्टुभस्यचदेवता। पुरुषोयोजगद्बीजमृषिर्नारायणःस्मृतः।
आद्ययावाहयेद्देवमृचातुपुरुषोत्तमं। द्वितीययासनंदद्यात्पाद्यंचैवतृतीयया। चतुर्थ्यार्घ्यःप्रदातव्यःपंच २=
म्याचमनीयकं। षष्ठ्यास्नानंप्रकुर्वीतसप्तम्यावस्त्रमेवच। यज्ञोपवीतमष्टम्यानवम्यागंधमेवहि। पुष्पंदश

म्या दातव्यमेकादशपाद्य धूपकं । द्वादशपादीपकं दद्यात्त्रयोदशपाद्यवहं तथा । चतुर्दशपांजलिं कुर्यात्पंचदशपा
प्रदक्षिणं । षोडशपोद्वासनं कुर्याच्छेषकर्माणि पूर्ववत् । शेषकर्माणीति । अथात्तु भगवान्विष्णुः पुनरागमना
यच । पुनः संदर्शनार्थाय इतिवाच्यं पुनः पुनरित्यर्थः ॥ तथा । दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव वा । अ
र्चितं स्याज्जगदिदं तेन सर्वं चराचरं । एतत्पठन्केवलमेव सूक्तं दिने दिने भावितविष्णुभक्तिः । स सर्वदुःखानि वि
हाय वै परं पदं प्रयात्यच्युततुष्टिकृन्नरः । सूक्तेन विष्णुविधिना समुदीरितेन योऽन्नेन नित्यमजमादिमनंतमू
र्त्तिं भक्त्यार्चयेच्च पठयेच्च स विष्णुदेहं विप्रो वसेद्धरिवरेण कृतार्द्धदेहः । पंचरात्रविधानेन स्थंडिले वापि पूजयेत् ।
जलमध्यगतो वापि पूजयेज्जलमध्यतः । अभावे धौतवस्त्रस्य पवित्रा यास्तथा द्विजाः । जलेऽपि हि जलेनैव मं
त्रैरेवार्चयेद्धरिं । कलावागममार्गप्राधान्यमाह विष्णुयामले । कृते श्रुत्युक्तमार्गस्तु त्रेतायां स्मृतिभाषि
तः । द्वापरे तु पुराणोक्तः कलावागमसंभवः । अशुद्धाः शूद्रकल्पा हि ब्राह्मणाः कलिसंभवाः । तेषामाग
ममार्गेण स्यात्सिद्धिर्न श्रुतिकर्मणा । बृहत्पराशरः । देवार्चनं प्रवक्ष्यामि यदुक्तं मुनिभिः पुरा । वैदिकैरेव तन्मं
त्रैर्यस्य ये स्तस्य तैरपि । ब्रह्माणं वै धर्ममंत्रैर्विष्णुं सौः शंकरं स्वकैः । अपराननपि तथा देवानर्चयेत्स्वीयमंत्रकैः ।
मंत्रन्यासं पुरा कृत्वा स्वदेहे देवतासु च । गायत्र्योंकारन्यस्तांगः पूजयेद्विष्णुमव्ययं । हस्तन्यासं पुरा कृत्वा स्व

१८८
188
त्वाविष्णुंसनातनं।शिखाबंधंचदिग्बंधंसंचिंत्यविष्णुमात्मनि।करयोःपादयोर्जान्वोःकट्यांनाभौहृदिक्रमात्।
कंठेबाह्वोर्मुखेनेत्रेमूर्द्ध्निवामांगतोन्यसेत्।आसनेस्मृतिः।वंशाश्मदारुधरणीतृणपल्लवनिर्मितं।वर्जये
दासनंविद्वान्दारिद्र्यव्याधिदुःखदं।दारुकंकेवलंनिषिद्धं।कुशाद्यंतरितस्यविधानात्।कृष्णाजिनंकंबलंच
नान्यदासनमिष्यते।नारदपंचरात्रे।वंशासनेदरिद्रःस्यात्पाषाणेपापसंभवः।धरण्यांदुःखसंभूतिर्दौ
र्भाग्यंदारुजासने।तृणासनेयशोहानिःपल्लवेचित्तविभ्रमः।कृष्णाजिनेज्ञानसिद्धिर्मोक्षसिद्धिस्तुव्याघ्र
जे।तथातत्रैव।अभिचारादिकेनीलंरक्तंवश्यादिकर्मणि।धनदंशांतिदंमोक्षंसर्वार्थंचित्रकंबलं।तथा
भागुरिः।कौशेयंकंबलंवापिअजिनंपट्टमेवच।दारुजंतालपर्णंचआसनंपरिकल्पितं।कृष्णाजिनंगृही
तरपरं।दारुजंविष्णुपूजाव्यतिरिक्तकर्मविषयं।काष्ठासनोपविष्टेनवासुदेवस्यपूजनं।इत्यागमेऽपराधोक्तेः।
गोपालार्चनचंद्रिकायांच।पीठासनोपविष्टोवापूजयेद्धानिरासनः।तृणमयेधूपदहनंदीपंचकुरुतेऽर्चने।
इत्यपराधमध्येगणितत्वात्।दिवोदासे।गोमयंमृण्मयंभौमंनैवंपालाशमेवच।लोहबद्धंतथाऽश्मा
सनंपरिवर्जयेत्।तथा।शमीचकाश्मरीशालकदंबवारणोऽपरस्तथा।पंचासनानिशस्तानिश्राद्धेदेवार्च
नेतथा।देवार्चनंविष्णुव्यतिरिक्तदेवपूजनं।पुलस्त्यः।पालाशंवटवृक्षोत्थमाश्वत्थंशाककवृक्षजं।स्मृति

कोदुंबरं पीठं मध्यकं च विवर्जयेत्। भिन्नपीठानि वर्ज्यानि पितृदैवतकर्मणि ॥ अथ मंदिरस्य विष्णुपूजने वि
शेषविधिः तत्र प्रातरुत्थाय शुचिर्भूत्वा विष्णुं विज्ञापयेत्। यथोक्तं। यदुद्यमादिकं कर्म तत्त्वया प्रेरितो हरेः।
करिष्यामि त्वदाज्ञेयमिति विज्ञापनं मम। प्रातः प्रबोधितो विष्णो हृषीकेशेन हि त्वया। यद्यत्कारयसीशा
न तत्करोमि तवाज्ञयेति। विज्ञाप्य स्तुत्वा वादित्रादिना प्रबोध्य मुखप्रक्षालनार्घ्यं जलं दद्यात्। ततो दंत
काष्ठपादुकामृद्भागं निवेदयेत्। यथोक्तं। पादुकायाः प्रदानेन गतिमिष्टामवाप्नुयात्। दंतकाष्ठप्रदानेन
नरः सौभाग्यमृच्छति। जिह्वोल्लेखनिकां दत्वा विरोगत्वमिजायते। मृद्भागदाने देवस्य भूतिमाप्नोत्यनुत्तमां।
ततो नमस्कृत्य मंगलनीराजनं कुर्यात्। यथा विष्णुधर्मोत्तरे। पठित्वा च प्रियान् श्लोकान्महावादित्रनिःस्व
नैः। प्रभोर्नीराजनं कुर्यान्मंगलाख्यं जगद्धितं। नीराजनमिदं सर्वैर्द्रष्टव्यं शुचिविग्रहैः। परमश्रद्धयोत्था
य दृष्टं वा स तदा नरैः। नारदपंचरात्रे। स्वागतं देव देवेश सन्निधो भव केशव। गृहाण मानसीं पूजां यथा
र्थपरिकल्पितां। पूर्वं शंखं प्रतिष्ठाप्य ततः पूजनमाचरेत्। पूजां समाप्य तत्सर्वं विष्वक्सेनाय स्थापयेत्।
यथोक्तं वैष्णवतंत्रे। समर्प्य विष्वक्सेनाय पुष्पं दंडवत्प्रणिपत्य च। मंचके स्थापयेद्विष्णुं सोपवर्हे शेषशोभिते।
गंधादिभिः समभ्यर्च्य प्रार्थयेज्जगदीश्वरं। कुरुष्व शयनं विष्णो कृपां कुरु ममोपरि। ततः स्वयं महाविष्णु

१८५ हरिं कृत्वा समाहितः। स्मरन्पादांबुजं विष्णोः कुर्यात्प्रशयनं बुधः॥ अथ श्रीमन्महाभागवतपुराणीयपूजाविधिः।
१४९ तत्रोद्धवं प्रति श्रीभगवानुवाच। न ह्यंतोनंतपारस्य कर्मकांडस्य चोद्धव। संक्षिप्तं वर्णयिष्यामि यथावदनुपूर्व-
शः। वैदिकस्तांत्रिको मिश्र इति मे त्रिविधो मखः। त्रयाणामीप्सितेनैव विधिना मां समर्चयेत्। वैदिको मिश्र-
को वापि विप्रादीनां च विद्यते। तांत्रिको विष्णुभक्तस्य शूद्रस्यापि प्रकीर्त्तितः। यथा स्वनिगमेनोक्तं द्विजत्वं प्रा-
प्य पूरुषः। यथा यजेत मां भक्त्या श्रद्धया तन्निबोध मे। अर्चायां स्थंडिलेऽग्नौ वा सूर्येऽप्सु हृदि वा द्विजे।
द्रव्येण भक्तियुक्तोर्चेत्स्वगुरुं माममायया। पूर्वं स्नानं प्रकुर्वीत धौतदंतोंगशुद्धये। उभयोरपि च स्नानं
मंत्रैर्मृद्ग्रहणादिना। संध्योपास्त्यादिकर्माणि विधिना चोदितानि मे। पूजां तैः कल्पयेत्सम्यक् संकल्पः
कर्मपाविनी। शैली दारुमयी लौही लेप्या लेख्या च सैकता। मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता। चला-
चलेति द्विविधा प्रतिष्ठा जीवमंदिरं। उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने। अस्थिरायां विकल्पः स्या-
त्स्थंडिले तु भवेद्द्वयं। स्नपनं त्वविलेप्यायामन्यत्र परिमार्जनं। द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायिनः।
भक्तस्य च यथालब्धैर्हृदि भावेन चैव हि। स्नानालंकरणं प्रेष्ठमर्चायामुद्धवार्चने। स्थंडिले तत्त्वविन्यासो
वह्नावाज्यप्लुतं हविः। सूर्ये चाभ्यर्हणं प्रेष्ठं सलिले सलिलादिभिः। श्रद्धयोपहृतं द्रव्यं भक्तेन मम वार्य्यपि।

गंधो धूपः सुमनसो दीपो न्नाद्यं च किं पुनः । शुचिः संभृतसंभारः प्राग्दर्भैः कल्पितासनः । आसीनः प्रागुद
ग्वार्च्चेदर्च्चायामथ संमुखः । कृतन्यासः कृतन्यासां मदर्च्चां पाणिनामृजेत् । कलशं प्रोक्षणीयं च यथा
वदुपसाधयेत् । तदद्भिर्देवयजनं द्रव्याण्यात्मानमेव च । प्रोक्ष्य पात्राणि त्रीण्यद्भिस्तैस्तैर्द्रव्यैश्च साधयेत् ।
पाद्यार्घाचमनीयार्थं त्रीणि पात्राणि दैशिकः । हृदा शीर्ष्णाथ शिखया गायत्र्या चाभिमंत्रयेत् । पिंडे वायु
ग्निसंशुद्धे हृत्पद्मस्थां परां मम । अण्वीं जीवकलां ध्यायेन्नादान्ते सिद्धभाविताम् । तयात्मभूतया पिंडे व्याप्ते
संपूज्य तन्मयः । आवाह्यार्च्चादिषु स्थाप्य न्यस्तांगं मां प्रपूजयेत् । पाद्योपस्पर्शार्हणादीनुपचारान्प्रकल्प
येत् । धर्मादिभिश्च नवभिः कल्पयित्वासनं मम । पद्ममष्टदलं तत्र कर्णिकाकेसरोज्ज्वलं । उभाभ्यां वेद
तंत्राभ्यां मह्यं तूभयसिद्धये । सुदर्शनं पांचजन्यं गदासीषुधनुर्हलं । मुसलं कौस्तुभं मालां श्रीवत्सं चानुपूज
येत् । नंदं सुनंदं गरुडं प्रचंडं चंडमेव च । महाबलं बलं चैव कुमुदं कुमुदेक्षणं । दुर्गां विनायकं व्यासं विष्वक्से
नं गुरून्सुरान् । स्वे स्वे स्थाने त्वभिमुखान्पूजयेत्प्रोक्षणादिभिः । चंदनोशीरकर्पूरकुंकुमागुरुवासितैः ।
सलिलैः स्नापयेन्मंत्रैर्नित्यदा विभवे सति । स्वर्णघर्मानुवाकेन महापुरुषविद्यया । पौरुषेणापि सूक्तेन
सामभी राजनादिभिः । वस्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः । अलंकुर्वीत सप्रेम मद्भक्तो मां यथोचितं ।

१९० पाद्यमाचमनीयंचगंधंचसुमनोक्षतान्।धूपदीपोपहाराणिदद्यान्मेश्रद्धयार्चकः।गुडपायससर्पींषिश
ष्कुल्यापूपमोदकान्।संयावदधिसूपांश्चनैवेद्यंसतिकल्पयेत्।अभ्यंगोन्मर्दनादर्शदंतधावाभिषेचनं।
178 अन्नाद्यंगीतनृत्यादिपर्वणिस्युरुतान्वहं।अग्निमाधायपितरः समूह्येत्पाणिनोदितं।परिस्तीर्याथप
र्युक्षेदन्वाधाययथाविधि।प्रोक्षण्यासाद्यद्रव्याणिप्रोक्ष्याग्नौभावयेतमां।तप्तजांबूनदप्रख्यंशंखच
क्रगदांबुजैः।लसच्चतुर्भुजंशांतंपद्मकिंजल्कवाससं।स्फुरत्किरीटकटककटिसूत्रवरांगदं।श्री
वत्सवक्षसंभ्राजत्कौस्तुभंवनमालिनं।ध्यायन्नभ्यर्च्यदारूणिहविषाभिघृतानिच।प्रास्याज्यभा
गावाघारौदत्वाचाज्यप्लुतंहविः।जुहुयान्मूलमंत्रेणषोडशर्चावदानतः।धर्मादिभ्योयथान्यायं
मंत्रैःस्विष्टकृतंबुधः।अभ्यर्च्याथनमस्कृत्यपार्षदेभ्योबलिंहरेत्।दत्वाचमनमुच्छेषंविष्वक्सेनाय
कल्पयेत्।मुखवासंसुरभिमत्तांबूलाद्यमथार्हयेत्।उपगायन्गृणन्नृत्यन्कर्माण्यभिनयन्मम।म
त्कथाःश्रावयन्शृण्वन्मुहूर्तंक्षणिकोभवेत्।स्तवैरुच्चावचैःस्तोत्रैःपौराणैःप्राकृतैरपि।स्तुत्वाप्रसीद
भगवन्नितिवंदेतदंडवत्।शिरोमत्पादयोःकृत्वाबाहुभ्यांचपरस्परं।प्रपन्नंपाहिमामीशभीतंमृत्यु
ग्रहार्णवात्।इतिशेषांमयादत्तांशिरस्याधायसादरं।उद्वासयेच्चेदुद्वास्यंज्योतिर्ज्योतिषितत्पुनः।

अर्चादिषु यदा यत्र श्रद्धा मां तत्र चार्चयेत्। सर्वभूतेष्वात्मनि च सर्वात्माहमवस्थितः। एवं क्रियायोगपथैः
पुमान्वैदिकतांत्रिकैः। अर्चन्नुभयतः सिद्धिं मत्तो विंदत्यभीप्सितां। मदर्चां संप्रतिष्ठाप्य मंदिरं कारयेद्दृ
ढं। पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाश्रितां। प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयं। पूजादिना ब्रह्म
लोकं त्रिभिर्मत्साम्यतामियात्। पूजादीनां प्रवाहार्थं महापर्वस्वथान्वहं। क्षेत्रापणपुरग्रामान्दत्वा मत्साम्य
तामियात्। यः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः। वृत्तिं स जायते विड्भुग्वर्षाणामयुतायुतं। कर्तुश्च सारथे
र्हेतोरनुमोदितुरेव च। कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलं। मामेव नैरपेक्ष्येण भक्तियोगेन विंदति।
भक्तियोगं स लभत एवं यः पूजयेत मां। तदिदं व्याख्यायते। कर्मकांडस्य पूजाविधानस्य नास्त्यन्तो ग्रंथतः पा
रं चानुष्ठानतो यस्य स तस्य वैदिका एव मंत्रा वैदिकान्येवांगानि यस्मिन्स वैदिकः। एवं तांत्रिकः। मिश्रोष्टाक्षरा
दिः। यदा त्रैवर्णिको यजेत तदा विशेषमाह। यदा गर्भाष्टमैकादशद्वादशाब्दादिकाले स्वनिगमे स्वाधिकार
प्रवृत्तेन वेदेनोक्तं। द्विजत्वमुपनयनं। अर्चायां प्रतिमादौ स्नाने विशेषमाह। उभयैर्वैदिकैस्तांत्रिकैः स्नानं
कुर्यात्। संध्योपास्त्यादीनि कर्माणि वेदतंत्रोदितानि सतैः सह पूजां कुर्यात्। शूद्रस्तांत्रिकाण्येव। अन्ये
षामुभयानि न तु तानि परित्यजेदित्यर्थः। सम्यक्परमेश्वरविषये संकल्पो यस्य स तथा मत्तः सन्। सर्वपावनी

१९१
191

सर्वकर्मभ्यः पापेभ्यो वा पावनीं पवित्रकरीं । अर्चाभेदानाह । शैली शिलामयी । लौही सुवर्णादिमयी । लेप्या
मृच्चंदनादिमयी । लेख्या पटादौ । हृदि पूजायां मनोमयी । प्रकर्षेण तिष्ठत्यस्यामिति प्रतिष्ठा प्रतिमैव ।
जीवस्य भगवतो मंदिरं । यद्वा प्रतिष्ठया कलान्यासेन भगवन्मंदिरं भवतीति प्रतिमाभेदेन विशेषमाह । उद्वा
सो विसर्जनं । अस्थिरायामर्चने विकल्पः । सालिग्रामेन कुर्यात् । अन्यत्र कुर्याद्वा न वेति । अविलेख्यायाम्
एमय लेख्यव्यतिरिक्तायां अन्यत्र विलेप्यायां विलेख्यायां च परिमार्जनमेव । नंदीपुराणे । स्थिरालिंगेऽन
ले तोये हृदये सूर्यमंडले । आवाहनादि चत्वारि कुर्यान्नोद्वासनं तथा । सकामनिष्कामभेदेन व्यवस्थामाह ।
द्रव्यैरिति । प्रकर्षेण सिद्धैः सुशोभनैः अमायिनो निष्कामस्य भक्तस्य यथालब्धैश्चंदनादिसर्वथा न ल
भ्यते । तत्र हृदि भावेन भावनया हृदि वा हृदि चेत्पूजा । तदभावेन मनोमयैर्द्रव्यैरित्यर्थः । पूजाप्रकारमाह ।
संभृताः संभारा येन सः प्रागग्रैर्दर्भैर्यद्वा प्रागेव संभृतसंभारः सन्नासीत् । न त्वासीनः सन् पश्चात्तत्संभा
रार्थं वारंवारमुत्तिष्ठेदित्यर्थः । प्राङ्मुख उदङ्मुखो वा आसीनः । अर्चायां स्थिरायां सन्मुखः । अर्चामुख
उपविशेत् । अनंतरं गुर्वादीन्नमस्कारपूर्वकं यथोपदेशं स्वस्मिन्कृतन्यासः । कृतन्यासां कृतो मूलमंत्रादि
न्यासो यस्यां तां अर्चां आमृजेत् । निर्माल्याद्यपकर्षणादिना शोधयेत् । कलशं पूर्णकुंभं । प्रोक्षणी

यं प्रोक्षणार्घोदक पात्रं उपसाधयेत्। चंदनपुष्पादिभिः संस्कुर्यात्। तदद्भिः प्रोक्षणीयाद्भिर्देवयजनं देव
पूजास्थानं। पाद्यार्घार्थं त्रीणि पात्राणि कलशोदकैः पूरितानि तैस्तैर्द्रव्यैः साधयेत्। तत्र पाद्यादिद्रव्याणि।
पाद्ये श्यामाकदूर्वाब्जविष्णुक्रांतादिरिष्यते। गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः। दूर्वा चेति क्रमादर्घ्यद्र
व्याष्टकमुदीरितं। जातीलवंगकंकोलैर्मतमाचमनीयकं। तानि च त्रीणि पात्राणि यथाक्रमं। ओं भूः हृदया
य नमः। ओं भुवः शिरसे स्वाहा। ओं स्वः शिखायै वौषट् इति हृदादिमंत्रैः प्रत्येकं पुनर्गायत्र्या सर्वाण्यभिमंत्र
येत्। तदनंतरं पिंडे देहे वाय्वग्निसंशुद्धे इति कोष्ठगतेन वायुना शोषिते। आधारगतेनाग्निना दग्धे पुन
र्ललाटस्थचंद्रमंडलादमृतमये जाते तस्मिन्हृत्पद्मस्थां परंज्योतिर्जीवकलां श्रीनारायणमूर्तिं ध्यायेत्।
कथंभूतां नादांते सिद्धभावितां। प्रणवस्याकारोकारमकारबिंदुनादाः पंचांगानि तत्र नादांते सिद्धैः आप्तां।
तथा च श्रुतिः। यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः। तस्य प्रकृतिलीनस्य यः परः स महेश्वरः। त
यात्मभूतया स्वेनैव भावेन चिंतितया। अमृतमये पिंडे दीपप्रभया गृहमेव व्याप्नेहति तस्मिन्नादौ मानसैरुपचारैः
संपूज्य तन्मयः सन्नर्चादिष्वावाहनस्थापनमुद्रया स्थापयित्वा कथं पूजयेत् तत्राह। दयाद्वैतेति द्वाभ्यां धर्मादिभि
र्मीमांसानां तत्र पंचकल्पयित्वोभाभ्यां वेदतंत्राभ्यां उभयसिद्धये वेदतंत्रोक्तभुक्तिमुक्तिसिद्धये प्राप्तये। अथ

१९८ मर्थः। धर्मज्ञानवैराग्यैश्वर्याण्यासनपर्यंकस्याग्नेयादिचतुष्कोणेषु पादाः। अधर्मादीनि पूर्वादिदिक्षु गा
192 त्राणि। त्रयो गुणाः पट्टिकाः। तत्र पूर्वादिक्रमेण मध्ये च विमलोत्कर्षिणी ज्ञान क्रिया योगा प्रकाशते ईशानानु
ग्रहेति नव शक्तयः। एवं यथोपदेशं धर्मादिभिर्नवभिश्च शक्तिभिरासनं कल्पयित्वेति कर्णिकाकेसरैस्तत्र
स्थसूर्यादिमंडलत्रयेणोज्ज्वलमित्यर्थः। आयुधादिपूजामाह। सुदर्शनमिति त्रिभिः। तत्रन्यस्तांगमित्या
वरणपूजासहिता। आसनेनैव शक्त्यावरणमप्युक्तं। तत्र सुदर्शनादिमुसलांतान्यायुधान्यष्टदिक्षु कौस्तु
भमालाश्रीवत्सानुरसि नंदादीन्पार्षदानष्टदिक्षु। गरुडं पुरतः कृत्वा दुर्गादीनि कोणेषु गुरून्वामतः
सुरानिंद्रादिलोकपालान् पूर्वादिदिक्षु एवमेतान्देवस्याभिमुखं श्रीदत्तादिभिरर्घ्यादिभिः पूजयेदित्य
र्थः। पाद्यादीनुपचारान्गुणविधिभिः प्रपंचयति। चंदनेति षड्भिः। मंत्रानाह स्वर्णेति स्वर्णधर्मा
नुवाकः। महापुरुषविद्या जितंते पुंडरीकाक्ष इत्यादि सूक्तं। सहस्रशीर्षेति नीराजनादीनि समानि।
वस्त्रेष्वलंकारगुणं विधत्ते। वस्त्रेति। पत्राणि कपोलवक्षःस्थलादिषु लिखिता पत्रभंगः। मस्तकस्थे
तस्त्रेम यथा भवति तथा। यथोचितमलंकुर्वीतेत्युक्तार्थं। धर्मसाधारणं श्रद्धालक्षणं गुणं वि
धत्ते। पारमिति। नैवेद्ये वैभवलक्षणं। विधत्ते गुडपायसेति। शष्कुल्यः तैलपक्वविशेषाः।

अरूपाणां मंडूकादीनां समूहः । रूपवंजनानि मृतिविभवे इतिशेषः । कालभेदेन गुणं विधत्ते । अभिषेच
नेपंचामृतादिस्नपनं । अन्नाद्येति । अन्नं भोज्यं आद्यं भक्ष्यं पर्वणि एकादश्यादौ । अन्वहं प्रत्यहं वा विभवे स
तीति सूचितं । फलस्य सत्वार्थिनो अनावपि पूजाप्रकारमाह । विधिनाखपह्नोक्तप्रकारेण मेखलाभिरु
पलक्षिते विहिते निर्मिते । यदुक्तं । विस्तारोच्छ्रायतस्तिस्रो मेखलाश्चतुरंगुलाः । हस्तमात्रो भवेत्कुंडं तस
योनिर्वेदिका तथेत्यादि । उद्दीप्तं प्रज्वलितमग्निं परितः परितः समूहेत एकत्र मेलयेत् । दर्भैः परिस्तीर्य
परितः प्रोक्षयेत् । अन्वाधाय अन्वाधानसंज्ञकं व्याहृतिभिः समित्प्रक्षेपादिरूपं कर्म कृत्वा अग्नेरुत्तर
तो द्रव्याणि होमोपयोगीनि आसाद्य निधाय । प्रोक्षणिका प्रोक्षणीपात्रोदकेन तु प्रोक्ष्य अग्नौ माध्यायेत् ।
शंखादिभिरुल्लसंतः शोभमानाश्चत्वारो भुजा यस्य । स्फुरितं किरीटादि यस्य तं । हविषा घृतेन अभिघृता
नि संसिक्तानि दारूणि शुष्कसमिधः । प्राश्य प्रक्षिप्य । आघारौ तत्संज्ञकौ भागौ एवमाज्यभागौ च हुत्वा ।
तदर्थाज्याहुती हुत्वेत्यर्थः । तत्राघारौ प्रजापतये स्वाहा सोमाय स्वाहेत्येवं होमरूपौ मूलमंत्रेणाष्टादशादि
ना । यथा षोडशर्चो यस्मिन् तेन पुरुषसूक्तेन च । अवदानतः । प्रत्यर्चं आहुतिग्रहणे इत्यर्थः । पुरुषसूक्ते प॰ २८
नाराथणपदं । सप्तमूलमंत्रः । तेनैव प्रत्यर्चमवदानतो होम इति । हुत्वा षोडशभिर्मंत्रैः षोडशान्नस्वाहु

१६७ ती: । पुन: षोडशभिर्मंत्रैर्दद्यात्पुष्पाणि षोडश । तच्च सर्वं जपेद्भूय: पौरुषसूक्तमुत्तमं । षण्मासात्सिद्धिमाप्नो
ति ह्येवमेव समर्चयन् । इत्यग्निपुराणोक्तै: । मंत्रै: स्वाहांतै: नाममंत्रैर्यथाम्नायं पूजाक्रमेणैव । अ
123 ग्नये स्विष्टकृते च हुत्वा । ततो बहिःस्थं भगवंतमभ्यर्च्य प्रणम्य नमस्कृत्य पार्षदेभ्यो नंदादिभ्योऽष्टदिक्षु ब
लिं हरेत् । तत: पूजास्थानमागत्य भगवतोऽग्रे समुपविश्य यथाशक्ति मूलमंत्रं जपेत् । उभयत्र भगवतो
भोजनसमाप्तिं ध्यात्वाचमनं दत्वा शेषां विष्वक्सेनादिभ्य: कल्पयित्वा तदनुज्ञया पश्चात्स्वयं भुंजीत ।
तत: सुरभिमत् सुगंधवत्तांबूलाद्यं मुखवासं दत्वाऽथ पुनरप्यर्चयेत् । पुष्पांजलिनार्चयेत् । स्तव
स्तोत्रप्रणामैरर्चयेदर्शयति । पौराणै: प्राकृतैरिति । कथं प्रणमेदित्यपेक्षायामाह । शिरइति । बाहुभ्यां
दक्षिणोत्तराभ्यां परस्परं हरेर्दक्षिणोत्तरौ पादौ गृहीत्वा यद्वाऽपृष्ठत: परस्परं निहत्ताभ्यां कृतापराध इव ।
प्रपन्नमित्यादि विज्ञप्याच प्रणमेत् । तत: शेषाग्रहणपूर्वकं वैकल्पिकोद्वासनप्रकारमाह । इत्यनयैव
प्रार्थनया शेषां निर्माल्यं मया दत्तं ध्यात्वा शिरस्याधाय कृत्वा यद्युद्वासयेत्तर्हि प्रतिमायां यन्त्रस्थलं ज्योति
स्तत्पुनरपि हृत्पद्मस्थज्योतिष्पीठाद्वासनीयं । एतेष्वधिष्ठानेषु किं मुख्यमित्यपेक्षायामाह । अर्चादिष्विति ।
यदा यत्र श्रद्धा तदा तत्र तत्राधिष्ठाने मुख्यामुख्यत्वं । कुत: सर्वभूतेष्विति । उभयत: इहामुत्रच समर्थं प्र

त्याह मदर्चामिति त्रिभिः । पुष्पोद्यानानि च कारयेत् । पूजायात्रोत्सवाश्रितान् । पूजा प्रत्यहं । यात्रा वि
शिष्टपर्वणि बहुजनसमागमः । उत्सवः वसंतादिमहोत्सवः । तदाश्रितान् क्षेत्रादीन्दत्वा पूजायात्रोत्सवाश्रिता
न इत्यस्य विवरणं । पूजादीनामिति । प्रवाहार्थं संततानुवृत्त्यर्थं । मत्सार्ष्टितां मत्समानैश्वर्यं प्रतिष्ठादीनां व
त्सत्समस्तादीनां फलमाह । प्रतिष्ठयेति । मत्साम्यतां मयासाम्यमित्यर्थः । सकामं प्रत्युक्तं । अहैतुकमक्तं प्रत्याह ।
मामेवेति । अहैतुकभक्तियोग एव कथं भवति तदाह भक्तियोगं इति । दातुः फलमुक्तं । अपहर्तारं निंदति ।
विद्भुक् विष्ठाभोगी कृमिः कर्तुर्यत्फलं तदेवान्येषामित्याह । कर्तुरिति सारथ्येः साहाय्यकारिणः हेतोः प्रयोजकस्य
अनुमोदितुश्च प्रेत्य तत्फलमित्यन्वयः । कुतः कारयितुः । यतः कर्मणा ते भागार्हाः । तत्रापि विशेषमाह । भू
यसि कर्मणि सारथ्यादीनां भूयः अधिकं फलमिति । पद्मपुराणेप्ययमेव पूजाप्रकार एकपाठे कक्रमत्वात्तथ
नु लिखितः ॥ ॥ अथ श्रीभागवतपुराणीयपूजाप्रयोगः । तत्र विधिवत्स्नानादिकं कृत्वा स्वगृहमागत्य सम्यक्
चरणौ प्रक्षाल्य द्विराचम्य श्रीविष्णुं स्मृत्वा पूजास्थानमागत्य कंबलाद्यासने उत्तराभिमुखः पूर्वाभिमुखो वा
उपविशेत् । तत्र दक्षिणपार्श्वे पुष्पाणि । वामपार्श्वे जलं । पृष्ठदेशे हस्तप्रक्षालनपात्रं । देवस्य दक्षिणे शंखं ।
आधारोपरि शंखं । वामे घंटां । अन्यत्पूजोपकरणं पुरतो निधाय । जलपूर्णपात्रमग्रतो धृत्वा तज्जलेन सर्वं

१९४ प्रोक्षयेत्। तथाक्रमदीपिकायां। ततो दैशिकः स्नानपूर्वविधानं विधायात्मपूजावसाने विधिज्ञः। स्ववामा
194 ग्रतः शंखमर्घ्यपाद्याचमनाद्यानि पात्राणि हंसपूरितानि निधायावनतः पुष्पगंधाक्षताद्यं करस्थालनपृ
ष्ठतस्यापि पात्रं प्रदीपावलीदीपिते सर्वमन्यत्स्वदृग्गोचरे साधनं चादधीत। गुरुसन्निधावादौ तत्पूजनं का
र्यं। प्रथमं तु गुरुः पूज्यस्ततश्चैव ममार्चनं। कुर्वन्सिद्धिमवाप्नोति ह्यन्यथा निष्फलं भवेदिति भगवदुक्तेः।
तत्सन्निधौ करसंपुटं कृत्वा वामे गुं गुरुभ्यो नमः। दक्षिणे गं गणपतये नमः। ततः तालत्रयं दिग्बंधनं च
कुर्यात्। ततो भूतशुद्धिं च कुर्यात्। तद्यथा। जीवात्मानं हृदयादुत्थाप्य ब्रह्मरंध्रे शिरसि विचिंत्य ततः पृ
थिवीं जले जलं तेजसि तेजो वायौ वायुमाकाशे प्रवेश्य यमिति वायुबीजेन षोडशवारजप्तेन देहं संशोष्य
रमिति वह्निबीजेन द्वात्रिंशज्जप्तेन देहं दाहयित्वा वमिति चंद्रबीजेन चतुःषष्टिजप्तेन चंद्रमंडलादमृतं स्रा श्रमत ५८
वयित्वा तेन तद्भस्म न्याप्लाव्य पुनर्नवीनभूतं देहं चिंतयित्वा। भूतानि व्योमादिभ्यो बहिः कृत्वा हंसइति
मंत्रेण परमात्मनो जीवं नाभिपद्मे न्यसेदिति। तत्र श्रीनारायणमूर्त्तिं ध्यायेत्। प्रथमतस्तं मानसैरुप
चारैः संपूज्य तन्मयः सन्पुनरर्च्चां यामेकीकृत्वा पूजयेत्। तस्मात्सर्वप्रयत्नेन मानसं यजनं कुरु। श्रीदेवे
व प्रकर्तव्यं पश्चाद्द्रव्यैः हविस्तरैरिति गोपालार्च्चनचंद्रिकायां। ततश्च मूलमंत्रेण द्विशःपुष्पांजलित्रयं।

निजेष्टदेवतामूर्त्तौ: परमेकं विभावयेत् । ततः शंखं प्रजयेत् । यः प्रजयति शंखेन सर्वैश्वर्यफलं लभे
त् । दैत्यान्विनश्वरं देवं शंखमावाहयाम्यहं । त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे । नमितः सर्वदेवैश्च
पांचजन्य नमोस्तुते । इति शंखं संपूज्य गायत्र्या पूरयेत् । धेनुमुद्रां च दर्शयेत् । ततः सहस्रशीर्षादिनास्व
स्मिन्देवे न्यासं कुर्यात्तद्यथा ॐ सहस्रशीर्षेति वामकरे । पुरुष एवेति दक्षिणकरे । २ एतावानस्येति वाम
पादे ३ त्रिपादूर्ध्वेति दक्षिणपादे ४ ततो विराडिति वामजानौ ५ तस्माद्यज्ञादिति दक्षिणजानौ ६ तस्मा
दिति वामकुक्षौ ७ तस्मादश्वादिति दक्षिणकुक्षौ ८ तं यज्ञमिति नाभौ ९ यत्पुरुषमिति हृदये १० ब्राह्म
णोस्येति कंठे ११ चंद्रमा मनस इति वामस्कंधे १२ नाभ्या इति दक्षिणस्कंधे १३ यत्पुरुषेणेति मुखे १४
सप्तास्येति चक्षुषोः १५ यज्ञेन यज्ञमिति शिरसि १६ पुनः श्रीमूर्त्तिस्वशान्न्यासभावनया सहस्रशी
र्षेत्यादिकं सर्वं पठेत् । ततः कलशजलेन प्रोक्षणीपात्रं पूरयित्वा चंदनपुष्पादिभिः संपूज्य तत्तीर्थावाहनं
कुर्यात् । यथा । गंगे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिंधुकावेरि जलेस्मिन्सन्निधिं कुरु । तज्जलेन पा
द्यार्घ्याचमनीयानि पात्राणि पूरयित्वा तत्तद्द्रव्यैर्भावयेत् । द्रव्याभावे तद्भावनां कुर्यात् । यदुक्तं । एकस्मिन्नपि पात्रे वै
पाद्यादीन्परिकल्पयेत् । सर्वोपचारवस्तूनामभावे भावनैव हि । पुनस्तानि च पात्राणि । ॐ भूः हृदयाय नमः ।

१९५ ओंभुवः शिरसेस्वाहा । ओंस्वः शिखायैवषट् । इतिहृदादिमंत्रैः प्रत्येकंपृथक्पृथगभिमंत्र्य पुनर्गायत्र्यासर्वाण्य
भिमंत्रयेत् । ततः पूजाधारपात्रेचंदनादिनाष्टदलंकमलंसकर्णिकंविलिख्यपीठपूजांकुर्यात् । तद्यथा । आ
ग्नेयादिषुकोणेषु ओंधर्मायनमः । ओंज्ञानायनमः । ओंवैराग्यायनमः । ओंऐश्वर्यायनमः इत्यासनपाद
भावनयापूर्वादिचतुर्दिक्षु । ओं अधर्मायनमः । ओंअज्ञानायनमः । ओं अवैराग्यायनमः । ओंअनैश्वर्याय
नमः । इत्यासनगात्रभावनया । ततः संसत्वायनमः । रंरजसेनमः । तंतमसेनमः इत्यासनपट्टिकाभावनया ।
पुनरासनपूर्वादिक्रमेण । मध्येचनवशक्तीः पूजयेत् । तद्यथा । ओंविमलायैनमः । ओंउत्कर्षिण्यैनमः ।
ओंज्ञानायैनमः । ओंक्रियायैनमः । ओंयोगायैनमः । ओंप्रह्वैनमः । ओंसत्यायैनमः । ओंईशानायैनमः ।
ओं अनुग्रहायैनमः । ततः आसनोपरिसूर्यचंद्राग्निमंडलेभ्योनमः इतिपूजयेत् । ततआयुधादिपूजा त
द्यथा । पूर्वादिषुदिक्षु । ओंसुदर्शनायनमः । ओंपंचजन्यायनमः । ओंगदायैनमः । ओंअसनयेनमः ।
ओंइषवेनमः । ओंधनुषेनमः । ओंहलायनमः । ओंमुसलायनमः । उरसि ओंकौस्तुभायनमः । ओंमाला
यैनमः । श्रीवत्सायनमः । ओंमुखेवेणवेनमः । पुनरष्टदिक्षु । ओंनंदायनमः । ओंसुनंदायनमः । ओंचं
डायनमः । ओंप्रचंडायनमः । ओंमहाबलायनमः । ओंबलायनमः । ओंकुमुदाय । ओंकुमुदेक्षणायनमः ।

ॐ पुरतः गरुडाय नमः । पूर्वादिचतुष्कोणेषु । ॐ दुर्गायै नमः । ॐ विनायकाय नमः । ॐ व्यासाय नमः ।
ॐ विष्वक्सेनाय नमः । ततः पूर्वादिक्रमेण । ॐ इंद्राय नमः । ॐ अग्नये नमः । ॐ यमाय नमः । ॐ
नैर्ऋतये नमः । ॐ वरुणाय नमः । ॐ वायवे नमः । ॐ कुबेराय नमः । ॐ ईशानाय नमः । ततः पु
रुषसूक्तेन विष्णवे प्रतिमंत्रमुपचारान्दद्यात् । तद्यथा । ॐ सहस्रशीर्षेति विष्णो इहागच्छ १ ॐ पुरुष ए
वेति इदमासनमत्र तिष्ठ २ ॐ एतावानिति इदं पाद्यं विष्णवे नमः ३ ॐ त्रिपादिति एषोऽर्घः ॐ विष्णवे नमः ४
ततो विराडिति इदमाचमनीयं । ॐ विष्णवे नमः ५ ॐ तस्मादिति इदं स्नानीयं ॐ विष्णवे नमः । अत्र पूर्ववदा
चमनदानम् । तत्र अंगमार्जनं तिलकं च कृत्वा विष्णुमासनोपरि स्थापयेत् । ततः ॐ तस्माद्यज्ञादिति इदं व
स्त्रं ॐ विष्णवे नमः ७ अत्राप्याचमनं । ॐ तस्मादश्वा इति इमे यज्ञोपवीते ॐ विष्णवे नमः ८ ॐ तं यज्ञमिति ए
ष गंधः ॐ विष्णवे नमः ९ ॐ यत्पुरुषमिति तुलसीपुष्पं ॐ विष्णवे नमः १० इति त्रिः पूजयेत् । ॐ ब्राह्मणो
ऽस्येति एष धूपः ॐ विष्णवे नमः ११ ॐ चंद्रमामेति एष दीपः ॐ विष्णवे नमः १२ ॐ नाभ्या इति एष चरुः ॐ विष्ण
वे नमः १३ तत्राप्ययं प्रकारः । ॐ भूर्भुवः स्वरोमित्यनेन मंत्रेण परिषिच्य पुनः प्रणवेन प्रोक्ष्य मूलमंत्रेणाष्टवा
रमभिमंत्र्य धेनुमुद्रयामृतीकृत्य मूलमंत्रं पठित्वा इदं नैवेद्यं विष्णवे निवेदयामि । चुलुकोदकं दत्वा ऽमृतोप

१९६ त्वरणमसि स्वाहेति मंत्रेण ततो वामकरेण ग्रासमुद्रां प्रदर्श्य दक्षिणेन पंच प्राणाहुतीर्दर्शयेत्। तत्रायं मंत्रः।
[illegible] निवेदयामि भगवन् जुषाणेदं हविर्हरे। नैवेद्यार्पणमंत्रोयं सर्वांचास्तु निजेच्छया। तत्रैवं भगवतो
196 भोजनप्रकारं ध्यायेत्। ब्रह्मेशाद्यैः परितः ऋषिभिः सुपविष्टैः समेतो लक्ष्म्याशिंजद्वलयया सादरं वीज्यमानः। नर्मक्री पकल ४२
डाप्रहसितमुखो हासयन् पंक्तिभोक्तॄन् भुंक्ते पात्रे कनकघटिते षड्रसं श्रीरमेशः इति। ततः तत्रैव स्वेष्टमंत्रं जपेत्। ततः कि
मपि स्तोत्रं च पठेत्। ततो घंटावादनपूर्वकं कर्पूरादिवासितैर्जलैर्गंडूषाचमनं दंतशुद्धिं मुखवासं च दत्वा नीराजनं
कुर्यात्। ॐ यस्य स्मृत्येति पुष्पांजलिमुद्रादीनि च दद्यात्। १४ सप्तास्यासन्निति प्रदक्षिणां कुर्यात् १५ ॐ यज्ञेन
यज्ञमिति विष्णो क्षमस्वेति विसर्जयेत् १६ यदि सालिग्रामशिलायां विष्णुपूजा तदा नावाहनविसर्जने कुर्यादिति
विशेषः। विशेषफलार्थिना विष्णुनिवेदनानंतरमग्नावपि विष्णुपूजनं कर्तव्यं। तत्प्रकारः प्रागुक्त एव। अथ तद
न्नं वैश्वदेवेभ्यो दत्वा स्वयं च भुंजीत। तदभावे किंचिदग्नौ जले वा विष्वक्सेनायुद्देशेन त्यक्त्वा भुंजीत॥ अथाष्टादर
पूजा॥ तत्र विधिवत्स्नानादिकं कृत्वा पूजास्थानमागत्य पुंडरीकाक्षमुच्चार्य पुष्पादीनि पूजोपकरणानि सिंचेत्।
ततः करसंपुटं कृत्वा वामे गुं गुरुभ्यो नमः। दक्षिणे गं गणपतये नमः। पश्चात् ॐ विष्वक्सेनाय नमः। पुरतः ॐ
गरुडाय नमः इति नमस्कृत्य। मंत्रस्य ऋष्यादिकं स्मृत्वांगन्यासकरन्यासं च विधाय अस्त्राय फडिति करतलत्र

यं कृत्वा नखच्छोरिकयादिसंबंधनं कुर्यात् । ततः स्नानपात्रं चंदनेन विलिप्य तत्राष्टदलकमलं लिखित्वा त्रस्थि
रो भवेति विष्णुं स्थापयेत् । ततोऽर्घ्यपात्रे जलं कृत्वा हस्ताभ्यामाच्छाद्य मूलमंत्रेणाभिमंत्र्य तेन जलेन स्नानद्रव्याणि
सिक्त्वा स्वेष्टरूपं ध्यायेत् । ॐ भूर्भुवः स्वर्भगवन्निहागच्छेह तिष्ठेत्यावाहनस्थापने कृत्वा धेनुमुद्रां प्रदर्श्य पाद्यं चंद
नादि कृत्वा दाय मूलमंत्रं पठित्वा एतानि पाद्यार्घ्याचमनीयानि ॐ भगवते विष्णवे नमः इत्यर्घ्यं दद्यात् । इद
मनुलेपनं । एतानि पुष्पाणि । एष धूपः । एष दीपः । इदं नैवेद्यं । ॐ नमो भगवते विष्णवे नमः इति दद्यात् । ततो मंत्र
जपं कुर्यात् । ततः स्तोत्रादि पठित्वा नमस्कारं च कृत्वा ॐ क्षमस्वेति विसर्जयेत् । अथ प्रसंगतो हरिमंदिरादिकरण
प्रशंसा । तत्राग्निपुराणे । ये ध्यायंति सदा प्रीत्या करिष्यामि हरेर्गृहं । तेषां विलीयते पापं पूर्वजन्मशतोद्भवं ।
विष्णुधर्मोत्तरे । सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु । विष्णोरालयविन्यासप्रस्थानादेव नश्यति ॥ स्कांदे । आरंभे
कुसुमधिष्ण्यस्य सर्वजन्मसु यत्कृतं । पापं विलयमायाति नरकाद्धरते पितॄन् । प्रासादपादे कुसुमस्य यावन्ति चिंतिरे
णुकाः । तावद्वर्षसहस्राणि स वसेद्विष्णुसद्मनि । विष्णुरहस्ये । बाल्ये प्रक्रीडमानो ये पांसुभिर्भवनं हरेः । वासुदेव
स्य कुर्वंति तेऽपि तल्लोकगामिनः । पाद्मे देवदूतविकुंडलसंवादे । ब्रह्मविष्णुमहेशानां प्रासादं मठमेव वा । कृत्वा तु
सुचिरं कालं तत्र लोके वसंति वै । जीर्णं च्छादयंति ये वै स्पतत्फलं द्विगुणं भवेत् । तद्द्विदार्यपृथक्कुर्यात्स गच्छेन्निरयं महत् ।

१९७ वामनपुराणे । यः कारयेद्वै मंदिरं माधवस्य पुण्यांल्लोकान्स जयेच्छाश्वतान्वै । दत्वारामान्फलपुष्पाणि रम्यान्भो
गान्भुंक्ते कामतः स्वर्गसंस्थः । पितामहस्य पुरतः कुलान्यष्टौ तु यानि तु । तारयेदात्मना सार्धं विष्णोर्मंदिरकारकः ।
198 नारसिंहे । यः कुर्याच्छोभनं वेश्म नरसिंहस्य भक्तिमान् । स सर्वपापनिर्मुक्तो विष्णुलोकमवाप्नुयात् । प्रतिमाल
क्षणोपेतं नरसिंहस्य कारयेत् । सर्वपापानि संत्यज्य चिरं विष्णुपुरे वसेत् । प्रतिष्ठां नरसिंहस्य यः करोति यथावि
धि । निःकामो नरशार्दूल देहबंधात्प्रमुच्यते । सकामो नरसिंहस्य पुरे प्राप्य प्रमोदते । मन्वंतराण्यनेकानि ल
क्षसंख्यो विमुच्यते । नरसिंहप्रतिष्ठाप्य यः पूजामाचरेन्नरः । तस्य कामः प्रसिद्ध्यंति पुत्रपौत्रादयो दिवि । विधि
वत्स्थापयेद्यस्तु कारयित्वा जनार्दनं । न जातु निर्गमस्तस्य विष्णुलोकात्कदाचन । आदित्यपुराणे । लेपनात्कारना
श्चैव यः करोति पुनर्नवं । देवस्यायतनं कृत्वा न भवेत्कालजं भयं । नरसिंहपुराणे । यस्तु संमार्जनं कृत्वा त्वास कुर्या १=
कलधरे हमो त्तमानेति ४= वेश्माजिरे प्रमान् । स पापकलहं देहं मयमाप्नोति सत्वरः । विष्णुधर्मोत्तरे । अभ्युक्षणं च यः कुर्यात्पानीयेन हरे
र्गृहे । स शांततापो भवति नात्र कार्या विचारणा । गोमयं गृह्य वै भूमिं मम वेश्मोपलेपयेत् । यावत्तस्तु परं तत्र
समंतादुपलेपयेत् । तावद्वर्षसहस्राणि मद्भक्तो जायते तथा ॥ अथ संक्षेपतः पंचायतनपूजाप्रयोगः । तत्रादौ
कृतनित्यस्नानः पूजास्थानमागत्याचम्य विष्णुं स्मृत्वा पूर्वाभिमुखः । पूजोपचारवस्तूनि यथास्थानं संस्थाप्य

मिषिच्य तन्नद्देवतां ध्यायन्पूजयेत्। तत्रादौ सूर्यपूजा। तंदुलादिकमादाय। ओंभूर्भुवः स्वः भगवन्सूर्य इहा
गच्छ इहतिष्ठ। आकृष्णेनेति मंत्रं पठित्वा एतानि पाद्यार्घ्याचमनीय मधुपर्काचमनीयानि। ओंनमो भगवते सू
र्याय नमः। ततः कृत्वा नत्वा च। भगवन्सूर्य त्वमस्वेति विसर्जयेत्। तन्नैवेद्यादिकं संगायप्रतिपादयेत्।
अथ गणेशपूजा। तत्र तंदुलादिकमादाय। ओंभूर्भुवः स्वः ओंभगवन्गणपते इहागच्छ इहतिष्ठेत्याह। ओंगणा
नांत्वेति मंत्रेण एतानि पाद्यार्घ्याचमनीयस्नानानि मधुपर्कपुनराचमनीयानि ओंभगवते गणपतये नमः। दूर्वा
क्तेनमंत्रेण इदमनुलेपनं। ओंगणानांत्वा गणपतिं हवामहे प्रियाणांत्वा प्रियपतिं हवामहे निधीनांत्वानि
धिपतिं हवामहे वसोमम आहमजानि गर्भधमात्वमजासि गर्भधम्। ओंनमो भगवते गणपतये इतित्रिः शुज
येत्। एषधूपः ओंभगवते गणपतये नमः ओं एष दीपः ओंभगवते गणपतये नमः इदं नैवेद्यं। ओंभगवते
गणपतये नमः। ओंभगवन्गणपते त्वमस्वेति विसर्जनम्॥ अथ दुर्गापूजा॥ तत्र तंदुलादिकमादाय। ओं
भूर्भुवः स्वः दुर्गे इहागच्छ इहतिष्ठेत्यावाह्य। ओंअम्बेअम्बिकेऽम्बालिके नमानयति कश्चन। ससस्त्यश्वकः
सुभद्रिकां कांपीलवासिनीम् इत्यादि मंत्रेण एतानि पाद्यार्घ्याचमनीय मधुपर्क पुनराचमनीयानि ओंभगव
त्यै दुर्गायै नमः। दूर्वोक्तेनमंत्रेणामनुलेपनं। ओंभगवत्यै दुर्गायै नमः इमानक्षतान् ओंभगवत्यै दुर्गायै नमः।

ॐभगवत्यै दुर्गायै नमः पुष्पाणि। तथा धूपः तथा दीपः ॐभगवत्यै दुर्गायै नमः ४१

१९८ इदं नैवेद्यं। ॐभगवत्यै दुर्गायै नमः इति पुष्पांजलिना त्रिः पूजयेत्। ॐभगवत्यै दुर्गायै नमः ततः स्तुत्वा नत्वा
1.98 ॐभगवति दुर्गे क्षमस्वेति विसर्जयेत्। केचिदत्राग्निपूजनमपीच्छंति। अथ शिवपूजा। तत्र तंदुलादिकमादाय
ॐभूर्भुवः स्वः शिव इहागच्छ इह तिष्ठेत्यावाह्य। ॐत्र्यम्बकमितिमंत्रेण एतानि पाद्यार्घाचमनीयस्नानमधुपर्कपु
नराचमनीयानि ॐभगवते शिवाय नमः इत्यनेन मंत्रेण ॐभगवते शिवाय नमः इति पुष्पांजलिना त्रिः पूजयेत्।
एष धूपः ॐभगवते शिवाय नमः। एष दीपः ॐभगवते शिवाय नमः। इदं नैवेद्यं ॐभगवते शिवाय नमः। ततः
स्तुत्वा नत्वा ॐभगवन् शिव क्षमस्वेति विसर्जयेत्। ॥ अथ पार्थिवलिंगपूजा ॥ ॐहराय नमः इति मृदमाद्द्या
त्। ॐमहेश्वराय नमः इति संघट्टयेत्। ॐशूलपाणये नमः इति प्रतिष्ठापयेत्। ॐपिनाकपाणये नमः इ
त्यावाहयेत्। ॐपशुपतये नमः इति स्नापयेत्। ॐशिवाय नमः इति पूजयेत्। ॐमहादेवाय नमः इति विसर्जयेत्।
शिवाय निवेदितं भस्मांगेभ्योदेयं कूपे वा निःक्षिपेत्। द्रव्यमन्नं फलं तोयं शिवस्वं न स्पृशेत्क्वचित्। निर्माल्यं लंघ
येन्नैव सर्वं कूपे विनिःक्षिपेत्। मक्षिकापादमात्रं तु शिवस्वमुपजीवति। मोहाल्लोभात्स पच्येत कल्पांतं नरके नरः
इति पाद्मोक्तेः ॥ शिवस्वं शिवस्वीकृतं शिवप्रीतये ब्राह्मणेभ्यः प्रदानतया दीयमानं न दुष्यतीत्यर्थः ॥ अथ संक्षेप
तो विष्णुपूजा ॥ तत्र पुष्पादिकमादाय ॐभगवन् विष्णो इहागच्छ इह तिष्ठेत्यावाह्य। ॐविष्णोरराटमसीति मंत्रे
ॐभूर्भुवः स्वः

ए एतानि पाद्यार्घ्याचमनीयस्नानीयमधुपर्कपुनराचमनीयानि ॐ भगवते विष्णवे नमः । पूर्वोक्तेन मंत्रेण इदमनु
लेपनं । ॐ भगवते विष्णवे नमः इमानक्षतान् । ॐ भगवते विष्णवे नमः पूर्वोक्तेन मंत्रेणेदं पुष्पं । ॐ भगवते विष्णवे न
मः इति पुष्पांजलिना त्रिः प्रपूजयेत् । एष धूपः ॐ भगवते विष्णवे नमः । एष दीपः ॐ भगवते विष्णवे नमः इदं नैवेद्यं
ॐ भगवते विष्णवे नमः । ततः स्तुत्वा नत्वा ॐ भगवन् विष्णो क्षमस्वेति विसर्जयेत् । विष्णुपूजायामक्षता यवाः । अन्यत्रा
खंडितास्तंडुलाः । नाक्षतैरर्चयेद्विष्णुं न तुलस्या गणेश्वरं । दूर्वाभिर्नार्चयेद्दुर्गां न केतक्या सदाशिवं । अक्षतास्तंडुलाः । दूर्वायाना ५
अथ तिथोरपराधाः ॥ तत्र वाराहपुराणे । धरणीप्रश्ने वाराह उवाच । यस्तु भुंजीत राजान्नं वसुधात्रे तु भुंजे पुरा ।
भुंक्त्वा पद्मत आपि राजान्नं च वसुंधरे । दशवर्षसहस्राणि पच्यते नरके वने । दंतकाष्ठमखादित्वा यस्तु मामुपसर्पति ।
सर्वकालकृतं कर्म तेनैकेन च नश्यति । दंतकाष्ठं निषिद्धदिने । दंतकाष्ठमखादित्वा दंतकाष्ठाहवासरे इति हलायु
धोक्तेः । गत्वा तु मैथुनं भद्रे यो ह्यस्नातो मामुपस्पृशेत् । रेतः पिबति वर्षाणां सहस्राणि चतुर्दश २ दृष्ट्वा तु मृतकं भद्रे नरं पं
चत्वमागतं । मम शास्त्रं बहिः कृत्वा अस्माकं यः प्रपद्यते । पितरस्तस्य रुष्यो स्थिता तथैव च पितामहाः । श्मशाने जंबुका
भूत्वा भक्षयंति शवं तथा । मृतकं दृष्ट्वा अस्नात्वा । बहिः कृत्वा अनादृत्य अस्माकमित्यस्मात् । ४ नारीं रजस्वलां स्पृष्ट्वा
यो मां स्पृशति निर्भयः । रागमोहसमायुक्तः कामेन च वशीकृतः । वर्षाणां च सहस्रैकं रजः पिबति निर्घृणः । अथ वाजा

१९५ यत्ने भूमिदरिद्रो मूर्खएव च । ५ स्पृष्ट्वा तु मृतकं भूमौ यो मे क्षेत्रे प्रतिष्ठति । दशवर्षसहस्राणि चांडालो जायते नरः । ति
ष्ठतीत्यत्र स्नानमकृत्वेति शेषः । दरिवर्जितेपुनः पुनः प्रविशति । ६ स्पृष्ट्वा स्नात्वा मतो यो पि वात कर्म प्रमुंचति । वर्षं पुरीषसं
175 युक्तं स पिबेत्तु न संशयः । ७ मक्षिकापंचवर्षाणि सप्तवर्षाणि मूषकः । श्वा चैव त्रीणि वर्षाणि नव वर्षाणि कच्छपः । पुरी
षं यः प्रमुंचेत मम कर्म समाचरन् । दिव्यवर्षसहस्राणि रौरवे नरके स्थितः । पुरीषं भक्षयेत्तत्र स्वापराधात्तु नित्यशः । ८
त्यक्त्वा तु मम शास्त्राणि वाक्यमन्यत्प्रभाषते । कूर्मो भवति स श्रोणि जातीस्त्रप्तचसप्त च । त्यक्त्वा मदीय शास्त्राण्यनादृत्य प्रभा
षते प्रमाणयति जाती जन्मानि ९ भूषितो नीलवस्त्रेण यस्तु मां प्रतिपद्यते । शतानि पंचवर्षाणां कृमिर्भूत्वा स तिष्ठति ।
नील मत्यंत मलिनं । १० अविधानेन वा स्पृश्य यस्तु मामुपसर्पति । स मूर्खः पापकर्मा वै मम विप्रियकारकः । तेनेदं तु व
रारोहे गंधमाल्यं सुगंधपि । आपरांश्च नग्न्हामि मिष्टं चापि कथं च न । अस्पृश्य आचम्य आपराणि वेदं । ११ व्यभिचारं
च मे कृत्वा यो हि मामुपसर्पति । दशवर्षसहस्राणि दशवर्षशतानि च । कृमिर्भूत्वा यथान्यायं तिष्ठते पुरुषाधमः । व्य
भिचारोत्र न तस्जामध्ये देवतांतरपूजनं । १२ यस्तु क्रोधसमायुक्तो मम कर्म परायणः । स्पृशेत्तु मम गात्राणि चित्तं कृ
त्वा चलाचलं । न चाहं योगमिच्छामि कुन्द्रस्य च यशस्विनि । इच्छामि शांतं दांतं वै भूमिभागवतं शुचिं । अन्यच्छ्रुतेप्रव
दामि तच्छृणुष्व वसुंधरे । योनि दोषां श्च लभते कुन्द्रो भागवतः शुचिः । मूषको दशतं यावत् सर्पो वर्षशतं पुनः । त्रिंश

वर्षसहस्राणि सृगालो जायते नरः। १३ अकर्मण्येन पुष्पेण यो मामर्चयते नरः। पतनं तस्य वक्ष्यामि तच्छृणुष्व व
सुंधरे। नाहं तत्प्रतिगृह्णामि न चैते वै मम प्रियाः। पतंति नरके घोरे रौरवे तदनंतरं। अकर्मण्यं विस्पृष्टं पूजानिषिद्धं १४
रक्तवस्त्रेण संयुक्तो यस्तु मामुपसर्पति। रजस्वला तु नारी च रक्तो यत्र प्रवर्तते। तेनाहो रजसा स्पृष्टः कर्मदोषेण जायते।
रजस्वलेति रजस्वलायामाधानेन जायते इत्यर्थः १५ यस्तु मामंधकारेपि विना दीपेन सुंदरि। स्पृशते च विना मंत्रै
रवशो रागमोहितः। पतनं तस्य वक्ष्यामि तच्छृणुष्व वसुंधरे। यस्य क्लेशं समासाद्य क्लिश्यते च नराधमः। अंधो भूत्वा म
हाभागे जन्मैकं स तु तिष्ठति। सर्वाशी सर्वभक्षो वै मानवश्चैव जायते १६ यस्तु कृष्णेन वस्त्रेण मम कर्मपरायणः। भूमिक
र्माणि कुर्वीत तस्य वै पतनं शृणु। शृणुष्व पंच वर्षाणि काष्ठमलश्च जायते। कृष्णं कज्जलाभं। १७ वायसोच्छिष्टवस्त्रेण
यो मे कर्माणि कारयेत्। अशुचिर्भागवतो भूत्वा मम कर्मानुसारतः। सोऽस्मिन्पतति संसारे वायसोच्छिष्टहारकः। कार
येत्करोतीत्यर्थः १८ शुनोच्छिष्टं तु यो दद्यान्मम कर्मपरायणः। श्वा चैव पंच वर्षाणि शशो जायेत पंच च। दद्यान्म
ह्यमित्यर्थः। १९ भुक्त्वा वराहमांसं तु यस्तु मामुपसर्पति। वराहो दश वर्षाणि भूत्वा वै चरते वने। २० जालपादं
भक्षयित्वा यस्तु मामुपसर्पति। जालपादस्ततो भूत्वा वर्षाणि दश पंच च। कुंभीरो दश वर्षाणि शत वर्षाणि क
च्छपः। जालपादः सराटिः। २१ स्पृष्ट्वा तु दीपकं स्पृष्ट्वा यस्तु मां स्पृशते नरः। अप्रज्वाल्यैव हस्तोच्च मम कर्मपरा

यणाः । जायते षष्टिवर्षाणि कुंभीगात्रपरिस्रुतः । चांडालस्य गृहे तत्र एवमेतन्न संशयः । गात्रपरिस्रुतो गलन्मदः २२ ।
२०० श्मशानं ये नरो गत्वा स्नात्वा मामुपसर्पति । जम्बुको जायते भूमे वर्षाणि नव पंच च । गृध्रस्तु सप्त वर्षाणि जायते नंतरं खगः । २३
पिण्याकं भक्षयित्वा तु यस्तु मामुपसर्पति । उलूको दश वर्षाणि वकश्चैव समानवः । जायते वृषभस्तत्र मम कर्मपरायणः ।
पिण्याकस्तिलखलिः । २४ यो वै वराहमांसेन मम कुर्वीत आपणं । तस्माद्दोषात्प्रपद्येत संसारे च वसुंधरे । वराहगा
त्ररोमाणि यावन्मात्राणि संति वै । तावद्वर्षसहस्राणि नरके पतते शुभे । यावंति तत्र सिक्तानि भाजनानि तु तानि वै । मद
त्रेयेन लिप्तानि आपणार्थं कुकर्मणा । तावद्वर्षसहस्राणि सौकरीं योनिमाप्नुयात् । आपणं नैवेद्यम् । सिक्तानि मांसप्रलि
प्तानि । २५ मद्यपस्तु समासाद्य भवनं विशते मम । दशवर्षसहस्राणि दरिद्रो जायते पुनः । यस्तु भागवतो भूत्वा कामरा
गेण पीडितः । दीक्षितो वा पिबेन्मद्यं प्रायश्चित्तं न तस्य वै । समासाद्य गृहीत्वा पीत्वा स्पृष्ट्वा वा इति ज्ञेयं विषयो निषेधः शुद्धि ५=
प्रसक्तः प्रतिषिध्यते नाप्रसक्त इति न्यायात् । २६ यः पारक्येन वस्त्रेण अवधूतेन चावनि । प्रचारयेत्तु मां नरर्वो मम
कर्मपरायणः । मृगो जायेत स्त्रोणि वर्षाणि त्रीणि सप्त च । पारक्येन परकीयेन । अवधूतेनाच्छुचिना । २७
अदत्वा यो नवान्नानि मम कर्मपरायणः । भुंक्ते श्रमेण वान्नानि परदत्तानि कानि चित् । पितरस्तस्य नश्यंति दश वर्षाणि
पंच च । २८ अदत्वा गंधमाल्यानि यो मे धूपं प्रयच्छति । मृतो सौ जायते भूमे यातुधानो न संशयः । २९ उपानद्गूढ

पादस्तु मम स्थानं विशेत्तु यः । चर्मकारस्तु जायेत वर्षाणि च त्रयोदश । ततो जन्मपरिभ्रष्टः स्तकरो जायते नरः । २०
भेरीशब्दमकृत्वा तु यस्तु मां प्रतिबोधयेत् । बधिरो जायते भूमे एकं जन्म न संशयः । भेरीति वाद्यमात्रोपलक्षणं ।२१
अभुक्तमन्नं भुक्त्वा वै अजीर्णेन परिप्लुतः । उद्गारे त्वसमाप्ते यो यस्तु मामुपसर्पति । जन्मैकं भवेच्छ्वा वै जन्म चैकं
स वानरः ।२२ तथा वाराहे । अवेक्ष्यमवपक्वान्नं यो मह्यं विनिवेदयेत् । अवेक्ष्यमवेक्ष्य पश्यत्सु मत्स्यं जाविरधाति यः ।
दिनांतरितपक्वान्नं यो मह्यं विनिवेदयेत् । भक्त्वा एमो न [illegible] कुरुते नक्तं न हरिवासरे । उर्द्धवृक्षपलाशस्थैः पु
ष्पैः कुर्यान्मम चार्चनं न मित्याद्यन्येपि संति नेह ग्रंथगौरवभयाल्लिख्यते । पक्वान्नं सिद्धान्नं । नरसिंहनिर्माल्यलंघनं ।
भगवन्निद्विरथ्यारोहणाशक्तिः सततं तु प्रतिनारदवाक्यम् । अतः परं तु निर्माल्यं न लंघय महीपते । नरसिंहस्य देव
स्तथान्येषां दिवौकसां ॥ अथागमे भागवदपराधाः ॥ यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे । देवोत्सवाद्य
सेवा च अप्रणामस्तदग्रतः । उच्छिष्टे वाप्यशौचे वा भगवद्वंदनादिकं । एकहस्तप्रणामश्च तत्पुरस्तात्प्रदक्षिणं ।
पादप्रसारणं चाग्रे तथा पर्यंकबंधनं । शयनं भक्षणं वापि मिथ्याभाषणमेव च । उच्चैर्भाषणमिथो जल्पो रोद
नानि च विग्रहः । निग्रहानुग्रहश्चैव न्तृषु च क्रूरभाषणं । कंबलावरणं चैव परनिंदा परस्तुतिः । अश्लीलभाष
णं चैव मधोवायुविमोक्षणं । शक्तौ गौणोपचारस्तु अनिवेदितभक्षणं । तत्तत्कालोद्भवानां च फलादीनामनर्पणं ।

२०१
24

शार्ङ्गीरोगोत्सवचारे । विनियुक्तावसिष्टस्य प्रदानं व्यंजनादिकं । पृष्ठीकृत्वासनं चैव परेषामभिवादनं । गुरोर्मौनं नि
जस्तोत्रं देवतानिंदनं तथा । अपराधा इमे विष्णो द्वात्रिंशत्परिकीर्त्तिताः ॥२२॥ अथ वैष्णवलक्षणमहिमा च लिख्यते ॥
एकादशीव्रते सक्तः पक्षयोरुभयोरपि । शंखचक्रगदापद्ममत्स्यकूर्मांकपत्रवान् । शिवलिंगार्चनेरतश्चतुर्दश्युप
वासवान् । विप्रातिथ्यग्निगुरुषु भक्तश्चाचारवान् शुचिः । संध्योपवासी ह्यवचाः सालिग्रामार्चनेरतः । अमत्सरः
शुभमनाः जितयोगो जितेंद्रियः । तीर्थवासी स्तुतिपरो हरेर्देवाद्यनिंदकः । विष्णुभक्तिरतो मंत्री श्रीमान्वैष्णव
उच्यते । तथा स्कांदे । समात्मा सर्वजीवेषु निजाचारादविप्लुतः । विष्ण्वर्पिताखिलाचारः स हि वैष्णव उच्यते ।
परमापदमापन्नो हर्षे वा समुपस्थिते । नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी । विष्णुपुराणे । न चलति नि
जवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे । न हरति न च हंति किंचिदुच्चैः स्थितमनसं तमवेहि विष्णुभक्तं ।
लिंगपुराणे । यत्रास्ते विष्णुभक्तश्च तत्र नारायणः स्थितः । विष्णुरेव हि तेषां वै देवता परमा स्मृता । विष्णुभक्ति
समायुक्तान् श्रौतस्मार्त्तप्रवर्त्तकान् । प्रीतो भवति यो दृष्ट्वा वैष्णवोसौ प्रकीर्त्तितः । तथा । गंधपुष्पादिकं सर्वं शि
रसा यो न धारयेत् । विष्णवे योगमित्येवं मत्वासौ वैष्णवोत्तमः । भोजनाच्छादनं सर्वं यथाशक्त्या करोति यः ।
विष्णुभक्तस्य सततं स वै भागवतः स्मृतः । पद्मपुराणे । न यमं यमलोकं च न दूतान्घोरदर्शनान् । पश्यंति वैष्णवाः

नतेस्मर्मगोचराः। दुराचारो दुष्कृलोपि सदापापरतोपिवा। भवद्भिः सर्वथा त्याज्यो ४८

नूनं सत्यं सत्यमयोदितं। आहास्मान्यमुनाभ्राता सादरं हि पुनः पुनः। भवद्भिर्वैष्णवास्त्याज्यो यो विष्णुं भजते नरः। वैष्णवो यद्गृहे भुंक्ते येषां वैष्णवसंगतिः। तेपि वः परिहार्याः स्युस्तत्संगहतकिल्बिषाः। इति वैश्यपानुशाहस्त्वस्मान् देवोदंडधरः सदा। अतो न वैष्णवो याति राजधानीयमस्य हि। विष्णुभक्तिविहीनानां पापिष्ठानां विशांवर। उपायो नास्ति नास्त्यन्यः संतर्तुं नरकाम्बुधिं। श्वपाकमिव नेक्षेत लोके विप्रमवैष्णवं। वैष्णवो वर्णबाह्योपि पुनाति भुवनत्रयं। नरकेपि चिरं मग्नाः पूर्वजा येकुलद्वये। नरैर्वैष्णवैः यांति ते स्वर्गं यदर्चितिस्तुतो हरिं॥ इत्याचाररत्नाकरे चतुर्थभागकृत्यम्॥ ॥ अथ पंचमभागकृत्यम्॥ तत्र दक्षः। पंचमे च तथा भागे संविभागो यथार्हतः। पितृदेवमनुष्याणां कीटानां चोपदिश्यते। संविज्यते स्मिन्निति संविभागः। संविभज्य प्रतिपादनम्। यथार्हतः यथायोग्यं। कीटपदमिहोपलक्षणम्। मनुः। खंडनी पेषणी चुल्ली ह्युदकुंभी प्रमार्जनी। पंचसूनागृहस्थस्य चुल्ली पेषण्युपस्करः। खंडनी चोदकुंभश्च कीटानां ध्मापनेन चुल्ली। पेषणेन पतितप्राणिवधादिना पेषणी। क्षेपणादिना मार्जनी। अवहननेन कंडनी। सकीटजलाहरणेनोदकुंभः। एते पंचगृहस्थस्य सूनाः स्मृताः। सूना सदृशा वधजन्यदोषहेतुत्वात्। अत एतान्वाहयन्। व्यापारयन् सूनादोषैर्युज्यते इत्यर्थः। एतच्चोपलक्षणं। हारीतेन कुतावतरणावघाहनविद्योभणाविक्षेपणाश्रतग्रहणपानावेलावि

पंचसूनागृहस्थस्य तेन स्वर्गं न गच्छति ४९

स्पृष्टद्रुतगमनाक्रमणादीनामपि सूनात्वेन कथनात् । द्रुतावतरणं शीघ्रजलप्रवेशः । अवगाहनं पुनःपुनर्जले
गमनागमनं । विक्षोभणमालोडनम् । विक्षेपणमितस्ततो जलप्रक्षेपः । अप्रहतग्रहणं वस्त्रादिनिवारणेन ज
लग्रहणं । अवेलागमनमंधकारादौ गमनं । अविस्पष्टमुन्मार्गादि । द्रुतं शीघ्रम् । आक्रमणं स्पर्शादीनां ।
वृषभेणेति कल्पतरोर्व्याख्या । पंचमहायज्ञान्कुर्वन्नेव सूनादोषापनोदकमाह । मनुः । होमैर्देवान्ऋषीन्वेदैर
र्चयेत्तु यथाविधि । पितॄन्श्राद्धैर्नरानन्नैर्भूतानि बलिकर्मणा । पंचैतान्यो महायज्ञान्न हापयति शक्तितः ।
स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते । एवं पापक्षयकामस्याधिकार उक्तः । साग्निकनिरग्निकसाधारणः ।
गृहस्थमात्रविषयत्वात् । अग्निगुरुशुश्रूषास्वाध्याये रादितः सूनात्रयं ब्रह्मचारिणः स्यावयंति सूदयंति
घ्नंति । महापुराणे । ऋषीन्भूतानि देवांश्च पितॄन्नात्मानमन्वहं । स्ववृत्त्यागतवित्तेन यजेत पुरुषः पृथक् । एवं
पृथगंतर्यामि श्रीजनार्दनतयाप्येतत्कार्यम् । पुनस्तत्रैव । वेदाध्यायस्वधास्वाहाबल्यन्नाद्यैर्यथोचितं । देवर्षिपितृ
भूतानि मद्रूपाण्यन्वहं यजेत् । न च कं अन्यादिनिमित्तत्वश्रवणान्नैमित्तिकत्वं । पंचयज्ञानां तदकरणे पंच
यज्ञासिद्धिः प्रत्यवायः स्यात् । पंचयज्ञानां शंखेन नित्यत्वविधानात् । गृही नित्यं न हापयेदिति । पंच
यज्ञांस्तु यो मोहान्न करोति गृहाश्रमी । तस्य नायं न लोकोऽन्यो भवतीति विनिश्चयादिति निंदाश्रवणात् ।

पुरुषार्थताच्च । हारीतः । यद्देवेभ्यो जुहोति तेन देवलोकं यजति । यत्पितृभ्यः पितृलोकं । यत्स्वाध्यायम
धीयीत ऋषिलोकं तेन यजेत् । यद्भूतेभ्यो बलिं हरति भूतलोकं तेन मनुष्यलोकांश्च यशस्यमायुष्यं स्वर्ग्यं
चातिशून्नमिति काम्यताच्च । तत्र नित्यस्य प्रसंगतः सिद्धिः । छंदोगपरिशिष्टे । देवभूतपितृब्रह्ममनुष्या
णामनुक्रमात् । महासत्राणि जानीयात्त एव हि महामखाः । देवतोद्देशकद्रव्यत्यागस्यैव यागत्वाद्देवयज्ञत्वं
सिद्धं । तथा । अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणं । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनं । श्राद्धं वा
पितृयज्ञस्य पित्र्यो बलिरथापि वेति । पितृबलि श्राद्धतर्पणानांच पितृयज्ञत्वं सिद्धं । देवीपुराणे । देव
यज्ञः स्मृतः सर्वभूतयज्ञस्ततः परं । पितृयज्ञो ब्रह्मयज्ञो नृयज्ञश्च ततः परं । तर्पणेन पितृयज्ञत्वं जी
वत्पितृकविषयं । तस्य नान्यत्र पित्र्यधिकारात् । दिव्यपितृणामपि पितृत्वात् । यद्वा श्राद्धाद्यसमर्थस्यानु
कल्पतया तर्पणेनापि पितृयज्ञनिर्वाह इति । यदेव तर्पयेदद्भिः पितृन्स्नात्वा द्विजोत्तमः । तेनैव सर्वमाप्नोति
पितृयज्ञक्रियाफलमिति स्मृतेः । साग्निकत्वात्तस्य पित्र्यो बलिः । निरग्निकस्य श्राद्धमेवेति लक्ष्मीधरादयः ।
नित्यश्राद्धानंतरं मनुष्ययज्ञ इतीयं व्यवस्था नित्यश्राद्धाधिकारिविषया । यत्तु । कृत्वैतद्बलिकर्मैवमतिथिं
पूर्वमाशयेदिति । मनुवचनं । तद्बल्यधिकारिश्राद्धानधिकारिविभक्तजीवत्पितृकपरमतो न विरोधः ।

२०५
263

दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपाक्षिकं । न जीवत्पितृकः कुर्याद्वैश्वदेवं च तर्पणमिति । यज्जीवत्पितृकस्य वैश्व
देवनिषेधस्तदभिभक्तधनैकपाकपक्षे ज्ञेयं । जुहूनं च वितानाग्नीन् यजंते पंचभिर्मखैरिति विभक्तधन एव
वैयाकपक्षे विद्यमानवहुदेवेपि श्रीकृष्णाह्निके दर्शनात् । तत्र हि तत्साधनं द्रव्यमात्रविभागवतोधिकारः सामर्थ्या
त् । तर्पणदेवपूजाब्रह्मयज्ञभोजनांगवलिदानातिथिपूजनवत् इतरथा तदकरणप्रसंगात् । तत्र च श्राद्धादीना
मविभक्तधनानां संसृष्टैकपाकत्वे ज्येष्ठेनैवैतत्कार्यम् । एकपाकेन वसतां पितृदेवद्विजार्चनं । एकं भवेद्विभक्ता
नां तद्देवस्याद्गृहे गृहे इति मनुः । पितृपूजा श्राद्धं । देवपूजा पंचयज्ञादि । देवपूजा द्विजपूजा । अतिथ्याभ्या
गतपूजा । एकपाकोविभक्तद्रव्यस्य ज्येष्ठमुख्यतया पाकः वसतामिति । शतृप्रत्ययस्य वर्त्तमानकालनिय
मात् । समदेशकाल एवायं नियमः । अतो ग्रामांतरे स्वातंत्र्येणपाके सति तदभावात् पृथगपि स्यादिति देश
कालद्रव्याद्यैकत्रता तद्भेदे भेदः । बृहस्पतिः । अविभक्तेषु संसृष्टेष्वेकेनैव तु यत्कृतं । देवयज्ञादिकं सर्वं
सर्वैरेव कृतं भवेदिति । स्मृतिसारे । अमीषां विभक्तधनानामपि संसृष्टैकपाकेन वसतां गृहपतिनैतत्कार्यं ।
वसतामेकपाकेन विभक्तानामपि प्रभुः । एकस्तु चतुरो यज्ञान्कुर्याद्ब्रह्मयज्ञपूर्वकान् । वाग्यज्ञो ब्रह्मयज्ञः पूर्वो
येषां देवयज्ञादीनां ते तान् । अत्रातद्गुणसंविज्ञानो बहुव्रीहिः । तेन देवयज्ञादयश्चत्वारो गृह्यंते । पृथगप्येक

पाकानां ब्रह्मयज्ञो द्विजातिनां । अग्निहोत्रं हरार्चा च संध्या नित्यं भवेन्न त इति स्मृत्यंतरोक्तेः । पुनरमीषामे
कत्रवसतामविभक्तधनानां च भिन्नपाकत्वेपि मुख्यपाकादेव यद्येकस्मिन्काले बहुधान्नं पच्यते गृहपति
महानसादेवैतद्बलितंत्रं कुर्वीतेति गोभिलगृह्यात् । इत्येककाल एव सर्वेषां पाकसिद्धौ ज्ञेयं । अमीषां मध्ये
मुख्यस्यादौ पाकसिद्धौ तेन तूष्णीमेवाग्नौ किंचित्प्रक्षिप्य किंचिद्ब्राह्मणाय दत्वा भोक्तव्यं । यस्य त्वेषामग्रतो
न्नंसिद्धं स्यात्स निहुतमेवाग्नौ हुत्वाग्रं ब्राह्मणाय दत्वा भुंजीतेत्यपृथग्धनाधिकारे गोभिलगृह्यात् । यदि त्वेषा
मेव मुख्येन कृते वैश्वदेवे अमुख्यस्य पश्चादन्नसिद्धिस्तदा न किंचिदप्यमुख्येन कर्तव्यं मानाभावात् । किंतु
भोक्तव्यमेव । अमीषां विभक्तधनानामपि पृथग्गृहपाके सर्वैः पृथक्पृथक् कार्यं । अविभक्ता विभक्ताश्च
पृथक्पाका द्विजातयः । कुर्युः पृथक्पंचयज्ञान्भोजनार्थं दिने दिने । तथा । भ्रातॄणामविभक्तानां पृ
थक्पाको भवेद्यदि । वैश्वदेवादिकं श्राद्धं कुर्युस्ते वै पृथक्पृथक् । अत्र पृथक्पाकः पृथग्गृहपाक इत्यर्थः ।
आचारचिंतामणौ । पाकश्च पत्न्याः शुचिः । पत्न्यभावे स्वयं कार्यः । यदाह शंखः । तंडुलान्वा प्रातः पत्न्यै
दद्यादभावे स्वयं वाधिश्रयेत् । नात्र क्रमो विवक्षितः । शंखेन मुख्यत्वेन पत्न्या एव ग्रहणात् । यत्तु स्वयंपा
कलक्षणो स्मृतिः । स्वयं पचति वैश्यान्नं पत्नी वाप्यसुता स्नुषा । पच्यते पुत्रशिष्याभ्यां स्वयं पाकः स उच्यते ।

२०५ नदसत्त्वविषयं प्रतीयते । अनुकल्पत्वात् । छंदोगपरिशिष्टे । भूतप्रवाचने पत्नी यद्यसन्निहिता भवेत् । रजोयोगा
204 दिना तत्र कथं कुर्वंति याज्ञिकाः । महानसेऽन्नं या कुर्यात्सवर्णा तां प्रवाचयेत् । प्रणवाद्यपि वा कुर्यात्कात्यायनवचो
यथा । भूतप्रवाचनं सिद्धमन्नं स्वामिनो भूतमन्नमिति पत्न्या वाचनं कार्यं । तत्र रजोयोगादिना तदसन्निधाने न्याम
पि याचिकां सवर्णां वाचयेत् । यदि साभूतमिति नवक्तुं शक्नोति तदोंकाराद्यन्यदपि वाचयेदित्यर्थः । तथाच
गोविंदार्णवे । अनाश्रमी पाश्रमी स्यादपत्नीकोपि यत्नवान् । स्नुषादुहितृपकान्नं दद्यादद्यजुहोति चेति वा
पचेत् ६= कैकेकवाक्यतया पत्न्यभावे स्वयं स्नुषादुहितृभ्यां वा वाचयेत् । हवनमंत्रे लौकिकेऽग्नौ वैदिके पत्न्या एवोक्तेः । व्यासः ।
वैश्वदेवं तु कुर्वीत स्वशाखाविहितं तु यत् । संस्कृतेन्नैर्हविष्यैश्च हविष्यव्यंजनान्वितैः । तैरेवान्नैर्बलिं दद्याच्छेषमाप्रा
ख्य वारिणा । कृतापसव्यः स्वधया सर्वं दक्षिणतो हरेत् । आपस्तम्बः । न स्त्री जुहुयान्नानुपेतः । अनुपेतोऽनुप
नीतः । एतत्तु साग्निकस्य प्रवाहे । अग्न्यसंनिधाने अत्र होमस्य निषेधनं । तथा । नक्षारलवणहोमो वि
द्यते परान्नसंसृष्टस्य हविष्यस्य अहविष्यमाषादिक्षारलवणपरान्नसंसृष्टेनाह । विदेशगमनाग्निहोमे न
कार्यः । तथा । उद्धृत्य हविरग्निश्च हविष्येण घृतादिना । स्वशाखाविधिना तच्छेषेण बलिं हरेत् । उद्धृत्य पा
कान्न हविर्हविष्यं हविष्येण गव्येन घृतादिना । आदिपदेन दधिदुग्धग्रहणं । बृहत्पराशरे । हविष्यस्य द्विजा

लाभे यथालाभाश्रितं हविः । जुहुयाद्विधिवद्भक्त्या यथास्याच्चित्तनिर्म्मलता । यदग्नौ हूयते नैव यस्य चाग्रं न दी
यते । अभोज्यं तद्विजानीयाद्भुक्त्वा चान्द्रायणं चरेत् । हविष्याणि तु भविष्ये । हैमंतिकं सितास्विन्नं धान्यं मुद्गा
स्तिला यवाः । कलायकंगुनीवारा वास्तूकं हिलमोचिका । षष्टिका कालशाकं च मूलकं केमुकेतरं । लवणे सैं
धवसामुद्रे गव्ये च दधिसर्पिषी । पयोनुद्धृतसारं च पनसाम्रहरीतकी । पिप्पलीजीरकं धान्यं नागरंगं च तिंतिडी ।
ल= कदली कैवली धात्रीफलान्यगुडमैक्षवं । अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते । देवोदासे षष्टिकालक्षणम् ॥
कंडनेन विना शुक्लाः शालयो व्रीहयः पुनः । सर्वतिकंडिकाः शुक्ला गर्भपाकानु षष्टिका । जरामल्लप्रकाशे । पद्म
पुराणवाक्यं । मूलकं च पटोलं च त्रपुसं सूरणादि यत् । कोषकारमभेदाश्च विकारा गुडवर्जिताः । हविष्याणि
तु श्रंगान्यः शल्यकादिवसादि यत् । गोक्षीरं गोघृतं चैव धान्यं मुद्गास्तिला यवाः । अक्षाराः कथिता ह्येते क्षारा
श्चान्ये प्रकीर्त्तिताः । मूलकं निषिद्धेतरं । विकाराद्इक्षोरेव न सैव प्रकृतत्वात् । तथा । दंतकाष्ठं तथैवापत्रिक
टुत्रिफला तथा । भोज्येतत्र तथैवैतद क्षारं परिचक्षते । शूपामाकास्तंदुला मुद्गा गव्यं दधि घृतं पयः । अक्षाराः
कथिता ह्येते क्षाराश्चान्ये प्रकीर्त्तिताः । देवोदासे । अस्विन्नमन्नं गव्यं च तिलमुद्गाश्च माषाधी । यवाधान्यानि मु
न्यन्नमक्षारं परिकीर्त्तितं । अग्निपुराणे । क्षारं क्षौद्रं च लवणं मधुमांसानि वर्जयेत् । तिलमुद्गादृते शैब्यमाषनि

२०५ श्यावकोद्रवान् । चीणकं देवधान्यं च चणकस्तु तथैव च । स्विन्नधान्यं तथोषध्यमेव तारगणाः स्मृताः । एतत्सर्वं गुडं ।
204 पुनस्तत्रैव । व्रीहिः षष्टिका यामुद्गाः कलायाः सतिलायवाः । श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः । तथा ।
कूष्माण्डालाबुवार्त्ताकपालक्यो ज्योत्स्निकास्त्यजेत् । ज्योत्स्निका । कोशातकी । कल्पतरौ व्रतकांडे । चरुभैक्षं
सक्तुकालशाकं दधिघृतं पयः । श्यामाकाः शालिनीवारजीरकामुद्गतंडुलाः । हविष्यव्रतनक्तादौ अग्निका
र्यादिके हिताः । मात्स्ये । मुद्गचणककलायमिथुनानि हवींषि च । एतेभ्योऽन्यानि नाश्नीयान्मिथुनानामनापदि ।
मिथुनानां द्विपदान्नानां । विष्णुधर्मोत्तरे । श्यामाहिवं तथा सर्पिर्दधि क्षीरं तथापि वा । एतद्धितं मतं विप्रमिथु
नस्य विपर्यये । होमद्रव्याणि छंदोगपरिशिष्टे । हविष्येषु यवामुख्यास्तदनुव्रीहयो मताः । माषकोद्रवगौ
रादीन् सर्वालाभे विवर्जयेत् । व्रीहयः कुलमाषादयः । गौरोत्र सितसर्षपः । कोद्रवचीणकचणकमाषमसू
रकुलत्थोद्दालवर्ज्यं निर्वपनीयमिति शंखवचनात् । आदिपदग्राह्याणि चणकादीनि । मत्स्यपुराणे । यव
गोधूमधान्यानि तिलाः कंगुकुलत्थकाः । चणकाश्चीणकाश्चैव कोद्रवाः श्यामसर्षपाः । गवेधुकाश्च नीवारा
आढक्यश्च कलायकाः । माषमुद्गमसूराश्च धान्यमष्टादशैव तु । बोधायनः । पयोदधिघृतैः कुर्यात्तिलशाको
दकादिभिः । अलाभे येन केनापि पुष्पमूलफलादिना । जुहुयात्सर्पिषाभ्यक्तं तैलक्षारविवर्जितं । दध्यक्तं

पयसान्नं वा तदभावे भसापिवा । छन्दोगपरिशिष्टेपि । शाकं वा यदि वा पत्रं मूलं वा यदि वा फलं । संकल्पयेद्यदाहारं तदन्नो
जुहुयादिति । आपस्तंबः । गृहमेधिनो यदशनीयं तस्य होमो बलयश्च । स्वस्वपुष्टिसंयुक्ताः । पुष्टिकर्मफलं गृह्य
परिशिष्टे । अस्ते हायवगोधूमाः शालयो हवनीयकाः । हविष्षु रुचिराभ्यक्तं सहविस्तु हविर्यतः । हव्यार्थे गोघृतं
ग्राह्यं तदलाभे च माहिषं । आजं वा तदलाभे तु साक्षात्तैलं ग्रहीष्यते । तैलाभावे ग्रहीतव्यं तैलं यत्तिलसंभवं । वन्यतिलैः=
तदलाभेऽतसीस्नेहः कौसुंभः सर्षपोद्भवः । वृक्षस्नेहोथवा ग्राह्यः पूर्वालाभे परः परः । तदलाभे यवव्रीहिश्यामाका
न्यतरोद्भवं । पिष्टमालोड्य यत्नेन घृतार्थे योजयेत्सुधीः । वृक्षतैलं च पुन्नागनिंबैरंडोद्भवं त्यजेत् । येषां केषांचि
दन्येषां हविषामप्यसंभवे । सर्वत्राज्यमुपादेयं भरद्वाजमुनेर्मतात् । यत्तिला आरण्यतिलाः । चतुर्विंशतिमते ।
अलाभे येन केनापि फलशाकोदकादिभिः । पयोदधिघृतैः कुर्याद्वैश्वदेवं स्ववेन हि । हलेनान्नादिभिः कुर्याद्दरि
द्रं जलिना जले । स्ववत इत्यारण्याश्च वर्शतिपरिमाणाहुतिः । तथा च भविष्ये । पाण्याहुतिर्द्वादशपर्वपूरिका द्र
वान्नं चेत्स्यात्स्रुवमात्रपूरिका । दैवेन तीर्थेन च हूयते हविः स्वंगारिणि स्वर्चिषि तच्च पावके । क्षारादिहोमे दोष
माह यमः । शुष्कैः पर्युषितैः कुष्ठी उष्णेन द्विषतां वशी । रूक्षैर्दरिद्रतां याति क्षारं हुत्वा व्रजत्यधः । तथा । क्षारहो
मे भवेन्मूर्खो दग्धान्नेन दरिद्रता । अन्ने पर्युषिते कुष्ठी परान्नेनोपतिष्ठति । सर्वाभावे भस्सौ होममितरेषामुभयत्र स्यानीत
जले ।

रणमाह । शातातपः । लौकिके वैदिके वापि हुतोत्सृष्टे जले क्षितौ । आहुत्योत्सृज्य जुहुयात्संवत्सरनापनुत्तये । लौकि
के पाकसाधने । वैदिके स्मार्त्ताग्नौ । हुतोत्सृष्टे अन्ये हुत्वा त्यक्ते । क्षितौ संस्कृतायां लौकिकाग्नौ । पात्रानंतरकरणमाह ।
रणं स्मार्त्ताग्नेस्तु अन्नुद्बोधनमाहरणं । उन्मार्जनं भस्मापाकरणं । बृहत्पराशरः । लौकिके वैदिके चैव वैश्वदेवो
हि नित्यशः । लौकिके पापनाशाय वैदिके सुखमाप्नुयात् । वैदिक इति साग्निकपरं । यदाह हारीतः । यथा विहित
मावश्यविहितान्मुत्तमाक्रिया । सपत्नीकोग्निशरणं प्रविशेन्मलपादुकः । सपत्नीक इति साग्निकः । तत्र पत्नीप्रा
धान्यं । अग्निशरणमग्निशालां । अंगिराः । शालाग्नौ वा पचेदन्नं लौकिके वापि नित्यशः । यस्मिन्नग्नौ पचेदन्नं
तस्मिन्होमो विधीयते । विष्णुः । अभावादग्निहोत्रस्य आवसथ्यानुवाहृतः । यस्मिन्नग्नौ पचेदन्नं तस्मिन्होमो विधी
यते । पाकसाधनेंगारान् चुल्लीतो वहिर्हरेत् ततः कृत्वा वैश्वदेवहोमः कर्त्तव्यः । अंगारानपसमिद्धांस्तु निर्हृत्योत्तरतो
नलात् । जुहुयाद्वैश्वदेवं च यद्वलारादि मिश्रितमिति बौधायनोक्तेः । तथा । न चुल्ल्यां नायसे पात्रे न भूमौ न च खर्परे ।
वैश्वदेवं प्रकुर्वीत कुंडे वा स्थंडिलेपि वेति । विष्णुः । बहुधूम्रेंधने चाग्नौ हसमिद्धे हुताशने । विधूमे लेलिहाने च
होतव्यं कर्मसिद्धये । योनर्च्चिषि जुहोत्यग्नौ व्यंगारे चैव मानवः । मंदाग्निनामयावी च दरिद्रश्चोपजायते । तथा । यः क
रोति नरो मोहादसमिद्धे हुताशने । सोजीर्णो दुःखशोकार्त्तो मंदाग्निश्चोपजायते । इत्यग्निं मुखादिधमनेन प्रज्वलीकृत्य

जुहुयात्। तथोक्तं। न पाणिना न शूर्पेण पटेन व्यजनेन वा। मुखेनोपधमेदग्निं मुखादग्निरजायत। पटेन भवेत्व्या
धिः शूर्पेण धननाशनं। पाणिना मृत्युमाप्नोति कर्मसिद्धिं मुखेन तु। मुखेन धमनविधिः साग्नेः। साग्निर्मुखेनोप
धमेन्निरग्निर्व्यजनादिनेति व्यासोक्तेः। कात्यायनः। जुहुवंश्च हुते चैव पाणिस्रुक्स्फ्यदारुभिः। नकुर्यादग्निधम
नं कुर्याच्च व्यजनादिनेति। मुखेनैव धमेदग्निं मुखादग्निरजायत। नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियं। ना
मेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत् इति वचो यह्लौकिके योजयंति तत्र जुहुवन् हेतुमिच्छन्। मुखधमनं नालि
कादिव्यवधानेनैव। इदमनुष्ठातापि गृहस्थेन स्वगतत्वेनादोषपरिहाराय कर्तव्यं। तदुक्तं छंदोगपरिशिष्टे। सायं
प्रातर्वैश्वदेवः कर्तव्यो बलिकर्म च। अनश्नतापि सततमन्यथा किल्बिषी भवेत्। शूद्रस्याप्यत्राधिकारः। दानं दद्या
च्च शूद्रोपि पाकयज्ञैर्यजेत चेति विष्णुपुराणात्। नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेत्। इति याज्ञवल्क्योक्तेः। तद
करणे दोषमाह व्यासः। वैश्वदेवेन ये हीना आतिथ्येन विवर्जिताः। सर्वे ते वृषला ज्ञेयाः प्राप्तवेदा अपि क्वचित्। तथा
यमोपि। अकृत्वा वैश्वदेवं तु भुंजते ये द्विजातयः। वृथा तेनान्नपाकेन काकयोनिं व्रजंति ते। तथा। वैश्वदेवे त्वतिक्रां
ते अहोरात्रमभोजनं। प्रायश्चित्तमथो हुत्वा पुनः संततुपाहुतं। सायंप्रातरास्यके वैश्वदेवद्वयलोप उपवासः। एक
कालीनस्याकरणे द्वितीयकाले हुत्वा अंते वैश्वदेवहूपं चरेदित्यर्थः। सायमिति पुनः पाकपदे। यथोक्तं विष्णुपुराणे।

२०७ पुनः पाकमुपादाय सायमप्यनीयते। वैश्वदेवनिमित्तं तु पत्न्या सार्द्धं वलिं हरेत्। तत्रापि स्वपचादिभ्य स्तथैवान्नापव
र्जनमिति। न चानग्नितापीति वचनात्। रात्रौ पाकाभावेपीदं कार्यं। अनग्नितापि अतिथ्यागमानुरोधेन पाकसंभवात्।
207 न च दिवाप्येवं स्यात्। तत्र पत्रशाकेभ्य इति वचनात्। न च कालविधिपरत्वादिति वाच्यं। सति संभवे नुवादत्वासंभ
वात्। पाकस्यापि विधाने वाक्यभेदापत्तेः। तस्मात्पाकसत्व एव सायंतने वलिवैश्वदेवकर्मणि इति क्रतुपुरुषार्थो
भयार्थता प्रतीयते। केचित्तु अस्तु त संस्कारत्वे तु सप्रधानमन्यस्यानुगुणाभाव इत्युभयसंस्कार त्वे तु नरे
कस्यैव गुणत्वं। प्रधानत्वं च युगपद्विरुद्धेत। सिद्धस्य हविष्यस्येत्यत्र जुहुयादित्युत्पत्तिविधिः। सिद्धस्य हवि
षस्येतत्र गुणविधिरित्यनेनाविरोधः। तस्मादयमात्मसंस्कार एव। यथाग्लयपरिशिष्टे। प्रोषितो वात्म
संस्कारं कुर्यादेवाविचारयन्। अत्रात्मसंस्कारः शब्द एव। मदनपारिजाते। यदा सायं समंत्रककर्तृहरणा
मभावस्तदा पत्नी सायममंत्रकं वलिं हरेत्। मनुः। सायमन्नस्य सिद्धस्य पत्न्यमंत्रं वलिं हरेत्। वैश्वदेवं हि
नामैतत्सायं प्रातर्विधीयते। मदने। प्रवसेदाहिताग्निश्चेत्कदाचित्कालपर्ययात्। यस्मिन्नग्नौ भवेत्पाको
वैश्वदेवस्तु तत्र वै। अत्रिः। प्रवासं गच्छतो यस्य गृहे कर्त्ता न विद्यते। पंचानामहतामेषामयज्ञैस्सह ग
च्छति। प्रवासे कुरुते स्वे तान् यदन्नमुपपद्यते। न चेदुत्पद्यते ह्यन्नमद्भिरेतान्समा पयेत्। उक्तो भ्र

तापिता ऋत्विक् शिष्यः श्वशुर मातुलाः। पत्नी श्रोत्रिय पाल्याश्च दद्युश्च बलिकर्मणि। तथा। तस्य पत्न्यपि कुर्वीत
होमं भर्त्तरि प्रस्थिते। यदि दिवा बहुधान्नं पच्यते तदपि सकृदेव। सायंमेव वा बहुधान्नं पच्यते तदा सकृदेव वैश्वदेवादि
कं। यद्येकस्मिन्काले व्रीहियवौ प्रक्रियेतामन्यतमस्य कृत्वा कृतं मन्येत। यद्येकस्मिन्काले पुनः पुनरन्नं पच्यते सकृ
देव बलितंत्रं कुर्वीतेति। गोभिलस्मरणात्। व्रीहियवाविति नानाजातीयान्नोपलक्षणं। इति वाचस्पतिः। मिताक्ष
रायां तु। इह केचिद्वैश्वदेवा पुरुषकर्मणः पुरुषार्थत्वमन्नसंस्कारत्वं चेच्छंति। अथ सायं प्रातस्सिद्धस्य हविष्यस्य जुहुया
दित्यन्नसंस्कारकर्मता प्रतीयते। पंचयज्ञानहरहः कुर्वीतेति नित्यत्वाभिधानात्पुरुषार्थत्वं चाभिगम्यते। तदयुक्तं पुरु
षार्थत्वे संस्कारत्वानुपपत्तेः। तथाहि। द्रव्यसंस्कारकत्वे पक्षे अन्नार्थता वैश्वदेवकर्मणः पुरुषार्थत्वे वैश्वदेवकर्मा
र्थता द्रव्यस्येति परस्परविरोधात्। पुरुषार्थत्वमेव युक्तं। स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः। महायज्ञैश्च यज्ञै
श्च ब्राह्मीयं क्रियते तनुः। तथा। अनश्नतापि सततमन्यथा किल्बिषी भवेत्। तथा। वैश्वदेवे निवृत्ते तु यद्यन्योऽतिथि
राव्रजेत्। तस्मा अन्नं यथाशक्ति प्रदद्यान्न बलिं चरेदिति पुरुषार्थत्वे निवृत्ते वैश्वदेवाख्यकर्म प्रतिपाकं नानुवर्त्तनी
यं। तस्मात्सायं प्रातरित्यादिनोत्पत्तिप्रयोगौ दर्शितौ तांस्तान् यज्ञान् यथाकालमहरहः कुर्वीतेति अधिकारवि
धिरिति सर्वमनवद्यम्। अथ भगवतेऽन्नं निवेद्य वैश्वदेवं कुर्यात्। तदुक्तं। निवेद्य विष्णवे भक्त्या वैश्वदेवादिकं ततः।

कुर्यादितिशेषः। स्मृतिसारे। नैवेद्यं विष्णवे दत्त्वा वैश्वदेवादिकं बुधः। कुर्याच्च पितृदेवानां कर्म वैष्णवसम्मतं।
पाद्मे शौनकनारदसंवादे। कृत्वा च विधिवत्स्नानं ततो दामोदरार्चनं। नैवेद्यं पायसं विष्णोः श्रियं खंडघृतादिकं।
विभज्य तच्च भुंजानो यज्ञसाम्यं दिने दिने। विभज्य देवपितृभ्यो विभागीकृत्य। आचारादर्शे नरसिंहपुराणं। पुरुष
सूक्तेन विधिना ततो विष्णुं समर्चयेत्। वैश्वदेवं ततः कुर्याद्बलिकर्म यथाविधि। श्रीभागवतेऽपि विष्णुपूजनानंतरं
होमस्य विधानात्। तेन सर्वत्रैव विष्णुपूजानंतरं वैश्वदेवविधानात्। विष्णुनिवेदनानंतरं तत्करणं प्रतीयते।
अन्यथा बहुवाक्यविरोधः स्यात्। ननु वैश्वदेवार्थं साधितस्यान्नस्य दानमत्र विनियोगो युक्त इति चेत्। तन्न। स
र्गीकल्पितो देवैरग्रभुग्भगवान्स्वयं। यज्ञभागभुजो देवाः स्वतस्तेनानुकल्पिताः। तेनानिवेदितं विष्णोर्नैवाश्नंति
दिवौकसः। इत्यादिप्रमाणदर्शनात्। नन्वग्निं पर्युक्ष्य पाकाग्निमुद्धृत्य जुहुयादिति। विष्णुना पाकाग्रेण वैश्व
देवविधानात्। विष्णुनिवेदनानंतरं तदभावे वैश्वदेवासिद्धिः। कृते वैश्वदेवे विष्णुनिवेदनान्न हि तेत्युभयत्र
पाशरज्जुः। कथं विष्णुनिवेदनानंतरं तत्करणमिति चेत्सत्यं। विष्णोर्निवेदितान्नेन यष्टव्यं देवतांतरमित्या
दिवाक्योक्तेर्न दोषः। केचित्त्वत्रापि पाकाग्रस्याविवक्षितत्वान्न प्रथमकरणस्यावश्यकत्वं नहि वाचनिकमिति न्या
यात्। अतः पाकाग्रं पृथक्कृत्वान्नांतरं भगवते निवेद्य तेनैव पाकाग्रेण वैश्वदेवं कुर्यादित्याहुः। यथा। अकृते

वैश्वदेवेतु भिक्षुके गृहमागते। उद्धृत्य वैश्वदेवार्थं भिक्षां दत्वा विसर्जयेत्। इत्यत्र यत्यन्नदानानंतरं वैश्वदे
२० वकरणाभ्यनुज्ञा। तथा। भगवतो निवेद्य पूर्वमुद्धृत्य पाकाग्रेण वैश्वदेवं कुर्यात्। एकत्र निर्णीतः शास्त्रार्थो परत्रा
पि तथैव संबध्यते इति न्यायात्। नन्वत्र वाचनिके यं व्यवस्थेति चेत्सत्यं। तत्राप्यनेकप्रमाणोक्तेः। श्रीदत्तेनापि स
ये स्वजाप्रसंगेन पक्वान्नं वैश्वदेवायाग्रे उद्धृत्य तस्यैः पदद्यादित्याचारादर्शे लिखितं। ननु। नासंस्कृतं स्पृशेत् किं
चिद्दैवे पित्र्ये च कर्मणि। इत्यसंस्कृतान्नस्य दानानर्हत्वात्संस्कारस्य वैश्वदेवसाध्यत्वात्कथमादौ निवेदनं। सत्यं।
अत्रान्नसंस्कारस्तु प्रकारांतरेण न तु वैश्वदेवेनैव तेनाप्यस्तु मंत्रसंप्रोक्षणादिनान्नं संस्कृत्य निवेदयेत्। तदनु सर्वं कुर्यात्।
अन्यथा श्राद्धेतिव्याप्तेः। संस्कृतान्नेर्हविष्यैश्च हविष्यव्यंजनान्वितैः। वैश्वदेवं प्रकुर्वीतेति संस्कृतान्नेन वैश्वदेवस्या
पि विधानात् नान्नसंस्कारता वैश्वदेवकर्मण एवेति दिक्। एवं श्राद्धमपि विष्णुनिवेदितान्नेनैव कुर्यात्। यथोक्तं ब्रह्मा
डपुराणे। विष्णोर्निवेदितान्नेन यष्टव्यं देवतांतरं। पितृभ्यश्चापि तद्देयं तदानंत्याय कल्पते। भारतेपि। सात्वतं वि
धिमास्थाय प्राक्सूर्यमुखनिःसृतं। पूजयामास देवेशं तच्छेषेण पितामहान्। श्रीभागवतेपि। देशे काले च संप्राप्ते
मुन्यन्नं हरिदैवतं। श्रद्धया विधिवत्पात्रे न्यस्तं कामधुगक्षयं। हरिदैवतं हरये निवेदितं सत्पित्राद्युद्देशेन दत्तमक्षयं
भवतीत्यर्थः। वसिष्ठस्मृतौ। अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च। देवतायतने कृत्वा ततः श्राद्धं प्रवर्त्तयेत्।

यतो भारद्वाजः । पितॄणाममन्त्रमादाय बलिं यस्तु प्रयच्छति । स तेयेन ब्राह्मणस्तेन सर्वं तेषु कृद्धेरिति । व्यासः । वैश्वदेवं प्रकुर्वीत स्वशाखाविहितं तथा । संस्कृतान्नैर्हविष्यैश्च हवि
ष्यव्यंजनान्वितैः । तैरेवान्नैर्बलिं दद्यात् चैवमाज्ञानुसारिणा । कृतोपस्तृतः स्वधया सर्वं दत्त्वा ततो हरेत् । स्नपनं ततः कुर्यात् धूपमाल्यैः सुगंधिभिः । गुग्गुलुः अगरुर्धूपैः सगु
तैश्च विशेषतः । सुसंस्कृतान्नं भक्ष्यान्सं दधिक्षीरमधूनि च । फलमूलव्यंजनानि मोदकांश्च निवेदयेत् । नारायणं ततो ध्यायेद्देवाग्रे श्रद्धयान्वितः । तत इति प्रथमं वैश्वदेवति
धानान्तरं पिंडप्रदा

कृत्वा निवेद्य । दिवोदासे । यच्छ्राद्धकाले हरिभुक्तशेषं ददाति भक्त्या पितृदेवतानां । तेनैव पिंडांश्च तिलैर्विमिश्रानां
कल्पकोटिं पितरश्च तृप्ताः । विपक्षे दोषमाह । वस्वादयश्च पितरो भक्त्याइंद्रादयः सुराः । तेनानिवेदितं विष्णोर्न गृह्णं
ति दिवौकसः । विष्णुधर्मोत्तरे । भक्ष्यं भोज्यं च यत्किंचिदनिवेद्याग्रभोक्तरि । न देयं पितृदेवेभ्यः प्रायश्चित्ती ततो भवेत् ।
ब्राह्मे । पितृशेषं तु यो दद्याद्धरये परमात्मने । रेतोधः पितरस्तस्य भवंति क्लेशभागिनः । ननु । गृह्याग्निशिशुबाला
नां यतीनां ब्रह्मचारिणां । पितृपाकेन दातव्यो यावतिं जन्म निर्वपेत् इति पिंडदानात्प्राक् । पितृपाकस्यान्यत्र दान
निषेधात्कथमादौ भगवते निवेदनं । सत्यं । अत्र विष्णुपदाश्रवणान्न इतरेषु दानं निषिध्यते । यद्वात्र दानं निषि
ध्यते निवेदनं तु तन्न भवति । यथोक्तं । निवेदनं तु स्वोद्दिश्य द्रव्यस्याज्ञापनं मतं । दानं स्वकीयतात्यागः परतःपा
दनं विधिः । आज्ञापनं भगवते निवेद्य तदनुज्ञयात्वीकारः । तथा । देवान्पितॄन्समुद्दिश्य कृतं विष्णोर्निवेदनं ।
तानुद्दिश्य पुनः कुर्यात्तद्दानं तत्स्वचैव हीति । केचिदिदं भागवतपरमाहुः । इति प्रासंगिकं समाप्य प्रकृतमनुस
रामः । दानं प्रतिग्रहो होमो भोजनं बलिकर्म च । सांगुष्ठेन सदा कार्यमसुरेभ्योन्यथा भवेत् । गृह्यपरिशिष्टे । उत्ताने
न तु हस्तेन अंगुष्ठाग्रेणापीडितं । संहितांगुलिपाणिस्तु वाग्यतो जुहुयादिति । वैश्वदेवाहुतिर्द्वादशपर्वपूरिका ।
आर्द्रामलकमानेन न कुर्याद्धोमं वहिर्विलीन् । प्राणाहुतिं बलिं चैव मर्दं गात्रविशोधनीमिति । छंदोगपरीकालि

२.५
नानंतरं ध्यायेत् ।
अग्निमुखं च प्रथमो दे
वानामिति श्रुतिः ।
योग्निर्हि वै सर्वविष्णुरि
ति च । तथा चाश्वलायनः ।
अथाग्निं परिसमूह्य
पर्युक्ष्य परिषिंच्य सर्व
तः । पाकान्तस्यानुद्ध
त्य जुहुयात् । ॐ वा
सुदेवाय · ॐ अग्नये ·
सोमाय · मित्राय · व
रुणाय · इंद्राय · इंद्रा
ग्निभ्यां · विश्वेभ्यो दे
वेभ्यः · प्रजापतये ·
अनुमत्यै · धान्वंतर
ये · वास्तोष्पतये ·
अग्नये स्विष्टकृते च । ततो हुतान्नशेषेण बलिमुपहरेत् । तत्रायोपतत्रायेत्यमितः पूर्वेणाग्निमिति । वासुदेवाद्या अष्टावाहुतयः । सगृह्यानुक्तवैश्वदेवस्यान्यस्य वा
भगवत्प्रसादकामस्य । तदुक्तं । कल्पान्मार्थिनां ग्राह्यमंगळह्यानुरादपीति । तत्रायोपतत्रायेति । अत्राम्नानामासीत्यादिषु बलिषु नमस्काराः प्रयोज्याः । अत्र त्विकल्पश्चोगृह्य
श्रौतानामाग्नेयोपायविद्दूपतिः । एतैरेवाहुतयस्त्वन्न हुतं स्वयमेव तु । नैव कर्मा[illegible]वत्तिमात्सर्वविधिवालिशः । होतास्याग्निहोत्रस्य नाग्नौ नासंस्कृतं न यथेति ४८३

खितवचनात् । वलिप्रमाणमपि तत्रैव । नचावरार्ध्या वलयो भवंति । महामार्जारश्रवणप्रमाणादिति । एकत्रचेदिति
प्रकृष्टा भवंति नचेतरासंयुक्ताश्च । अवरार्ध्याः ऊनपरिमाणाः । एकत्रेति । नानास्थाने वलिदानासंभवे यद्येकत्रस्था
नेव वलयो दीयंते । तदा अविप्रकृष्टा अव्यवहिताः परस्परसंबंधाभ्यवाक्तया इति शेषः । असंभवे तु शुष्कामलकमाना
अपि कार्याः । आपस्तंवः । वलीनां तस्य देशस्य संस्कारो हस्तेनप्रमृज्य प्रोक्षणानु पश्चात्परिषेचनं वलेरुपरि सेचः ।
छंदोगपरिशिष्टे । अमुष्मै नमः इत्येव वलिदानं विधीयते । तथा च । पर्जन्यायनमः इत्यादिरूपेण वलिदानं ।
पितृवलौ तु तत्रैव स्वधाकारेण निर्वपेत् । पित्र्यं वलिमतः सदा । तदप्येके नमस्कारैः कुर्वते । न तु गौतमः । एके
वाजसनेयिन इत्यर्थः । तथा च स्वधानम इति पित्र्यं वलिदानं । न तु गौतम इति । छंदोगानभिप्रेत्य कात्यायनः ।
स्वाहाकारो वषट्कारो नमस्कारो दिवौकसां । स्वधाकारः पितॄणां तु हंतकारो नृणां तथा । छंदोगपरिशिष्टे ।
पिंडवच्च पश्चिमा प्रतिपत्तिः । तथा पिंडप्रतिपत्तिर्द्विजगवादिषु तथा वलीनामपि चरमा प्रतिपत्तिरित्यर्थः ।
पिंडास्तु गोजविप्रेभ्यो दद्यादग्नौ जलेपि वा । मध्यमं तु ततः पिंडमद्यात्पत्नी सुतार्थिनी । अत्र च होमात्प्राग्वलिः
इज्यः । इज्ययेच्च ततो वह्निं दद्याद्दानं तथः क्रमादिति । मार्कंडेयपुराणवचनात् । अथ वाजसनेयिगृह्ये पा
रस्करः । वैश्वदेवादन्नमुद्धृत्य परिसमूह्य पर्युक्ष्य परिषिच्य परिस्तीर्य स्वाहाकारैर्जुहुयात् । ॐ ब्रह्मणे स्वाहा ।

२१० ॐ प्रजापतये स्वाहा । ॐ गृह्याभ्यः स्वाहा । ॐ कश्यपाय स्वाहा । ॐ अनुमतये स्वाहा । ब्रह्मणे प्रजापतये गृह्याभ्यः कश्य
२८ पाय अनुमतये इति भूतगृह्येभ्यो मणिके त्रीन्पर्जन्यायाद्भ्यः पृथिव्यै मध्ये त्रीन्ब्रह्मणे अंतरिक्षाय च सूर्याय
च विश्वेभ्यो देवेभ्यो विश्वेभ्य भूतेभ्य स्तेषामुत्तर उषसे भूतानांपतये । पर पितृभ्यः स्वधा नमः इति दक्षिणतः
नि ४= पात्रं निर्णिज्योत्तरपरस्यां दिशि निनयेद्यक्ष्मैतत्ते इति । विश्वेदेवादि विश्वेदेवा देवताक होमबल्यर्थं साधितान्न
प्राधान्येनेत्वायं व्यपदेशस्तदन्नस्य बल्यन्तरे मन्त्रतोपि विनियोगात् । तथा । गृह्याग्नौ लौकिकाग्नौ यथाधिका
रं यदन्नं पच्यते यद्वैश्वदेवमन्नं तस्मात्स्वाहुत्य पात्रांतरे कृत्वा पर्युक्ष्य वारिधारया परिवेषण अग्निमिति शे
षः । तथाग्निं पर्युक्ष्य पाकाग्रमुद्धृत्य जुहुयादिति विष्णुवचनात् । यद्यपि पर्युक्षणस्वाहाकारौ होमसामान्य
धर्मतयैव प्राप्तौ तथापि तयोरुपादानं । होमेति कर्तव्यतान्तरस्य एवमेव विधिर्यत्र क्वचिद्धोम इत्यतिदेशागतस्य
निषेधाय विशेषविधिः । क्वचित्सामान्यप्राप्तं लुप्यति । यथा पर्युक्ष्य स्वाहाकारैर्जुहुयादित्यत्र सामान्यपरि
समूहनादिकं निषिध्य परिलुंपति । क्वचिदन्यथा कल्पयति । यथा शरमयं बर्हिषः । शरमयत्वोपादानादन्य
थावादः । क्वचिदशेषविशेषस्थाने तदेव विधत्ते । यथा आघारमाघारयतीत्यत्र सकलद्रव्यस्थाने घृतस्यै
वोपादानं । तेनार्थत्यागोपि निवर्त्तते । जलादौ तु होमपदे पर्युक्षणमपि नास्ति । एवमेवेतस्मानन्याप्रसक्तेः ।

अनुमतये इतीतिकारो होमसमाप्तिज्ञापकः । एवं चानुमत्यंताः पंचाहुतीर्गृह्याग्नौ तदभावे पाकाग्नौ जले
क्षितौ वा जुहुयात् । भूतगृहे ब्योमशाणिकेत्रीनिति । अस्यैव विवरणं यजेन्मायाद्भ्यः पृथिव्यै इति मणिके सामी
प्यलक्षणा । उदपात्रसन्निधाविस्यापलंवाकेः । इदं तु शाकलस्यमुदकं स्यस्य वा देयं । ततो द्वारस्य दक्षिणपार्श्वे धात्रे
नमः । वामपार्श्वे विधात्रे नमः । वाचस्पति हरि हर श्रीदत्तादयोप्येवं । प्रतिदिशं वायवे दिशं चकारात्प्रतिदि
शमिति संवध्यते । इदं च प्राच्यादितो ज्ञेयं । वायवे प्रतिदिग्भ्य एव दिग्भ्यः प्राच्यादितः क्रमादिति । मार्कंडेयपु
राणात् । मध्ये गृहस्यैव । ब्रह्मणेऽतरिक्षाय सूर्यायच वलित्रयं । शाकलस्य । तत एषामुत्तरतो विश्वेभ्यो देवेभ्यो
विश्वेभ्यो भूतेभ्य इति वलिद्वयं । शाकलस्यं ततो नयोरुत्तरतः शाकलस्य मुषसे भूतानां पतये च वलिद्वयमितिक
र्कहरिहरवासुदेवादयः । यद्युत्तरचतुष्कस्य ब्रह्मादित्रिकोत्तरत्वं विवक्षितं तदा सूर्यायेत्यनंतरमेवोत्तर इति विर
धीत । नतु भूतेभ्य इत्यनंतरमतो विश्वे यं ब्रह्मादित्युत्तरं द्वयोस्तदुत्तरं च शेषयोस्तेषामिति वादो ब्रह्मादिपरं तत
स्तयोरिति । विपरिणतं सद्विश्वेदेवादिद्वयपर मन्यथान्वयात् । ब्रह्मणेभ्यंतरिक्षाय सूर्याय च यथाक्रमं । विश्वे
भ्यश्चैव देवेभ्यो विश्वभूतेभ्य एव च । उषसे भूतपतये दद्याच्चोत्तर हलकः । इति मार्कंडेयपुराणाच्चतुर्णामविशे
षेण ब्रह्मादिवलित्रिकोत्तरत्वमिति । उक्तव्याख्यानेनाप्युत्तरत्वापत्तेः । अनास्थते प्रतिकार्यत्वादिति कर्काद्याशयः ।

२११ श्रीदत्ताह्निकादौ तु चतुर्थ्यमन्तरेणैवं विभक्तिपरिणामापेक्षया विवहितान्वयस्यैव लाघवेनाश्रयणादित्युक्तं । ततो
ब्रह्मवलेरग्नेश्च दक्षिणतः पितृनिति कर्त्तव्यतया पितृभ्यः एको वलिः । उत्तरापराचापवी तेनान्नपात्रप्रक्षाल
नजलमवशिष्टान्नसहितं ब्रह्मवलेर्वायव्यां दिशि यक्ष्मणे दद्यात् । अन्नावशेषमिश्रं वै तोयं दद्याद्यथाविधिरिति ।
मार्कण्डेयपुराणवचनात् । अत्र केचिदाहुरयं विधिः साग्नेरेव । अग्न्यादिर्गौतमेनोक्तो होमः शाकल एव च । अ
नाहिताग्नेरप्येव युज्यते वलिभिः सहेति । छंदोगपरिशिष्टवाक्येन निरग्नेः प्रकारान्तरविधानात् । न च छंदो
गपरिशिष्टमेव निरग्नि छंदोगपरमिदं । अनेकशाखाश्रयं कर्मेति न्यायेनास्य सर्वीयत्वात् । तथाहि । अग्न्यादिः
अग्निर्धन्वंतरिर्विश्वेदेवाः प्रजापतिः स्विष्टकृदिति । गौतमेनोक्तः होमः शाकलः । काष्ठ शाकलसाध्योज्योति
ष्टोमो होमः । देवकृतस्यैनसो वयजानमसीत्यादिमंत्रकः ; अनाहिताग्नेः श्रोतस्माग्निरहितस्य अयं विधिः
वलिसहितो युज्यते इति तत्र । निरग्निवाजसनेयिनो वैश्वदेवान्तराभावात् । वैश्वदेवं प्रकुर्वीत स्वशाखाविहितं
तु यदिति व्यासवचनेन स्वगृह्योक्तस्यैतस्याहर्तुमुचितत्वात् । अगत्या पारक्याचरणं । न च मणिकाधानविधा
धः । मणिकस्य लौकिकतदभावः स्यात् किंचित्करत्वात् । निरग्नेरपि तत्सन्निधानाभावात् । उदकुंभ एव
तत्स्थानीयोऽस्तु । अद्भिः उदकुंभ इति गौतमवचनेन पर्जन्यादिभिरुदकुंभविधानात् । मणिकपदं वा उदक

मात्रेण लेत्कमस्तु । उदपात्रसन्निधाविन्यापस्तंबवचनात् । नच वैश्वदेवस्य निरग्निवाजसनेये प्राप्त्यभावः । सामान्यवि
धिनैव प्रसंगत्वात् । तथा चोद्वाहनानंतरं संवर्त्तः । ततः पंचमहायज्ञान्कुर्यादहरहर्द्विजः । न हापयेत्तु तान्प्राज्ञः श्रूयते
ह्यस्कृतावपि । तथा । रक्षयित्वा विवाहाग्निं कृत्वा चैव चतुर्थिकां । ततोस्मिन्बलिकर्माणि कुर्याद्गृह्योक्तया वृतेति ।
सर्ववर्णसाधारण बाधकाभावात् । तेन गार्हस्थ्यात्प्राक् नाधिकार इति । श्रीदत्तः । यत्तु कर्म स्वशाखायां न विहितं स्वशा
खाविहिताविरुद्धं च तत्पारशाखीयमनुष्ठेयं । यदुक्तं छंदोगपरिशिष्टे । स्वशाखाश्रयमुत्सृज्य परशाखाश्रयं तु यः ।
कर्त्तुमिच्छति दुर्मेधा मोघं तत्तस्य तत्कृतं । शंखः । यन्नाम्नातं स्वशाखायां पारक्यमविरोधि यत् । विद्वद्भिस्तदनुष्ठेयम
ग्निहोत्रादिकर्म च । यदिति । अग्निहोत्रं यजुर्वेदशाखासु विहितं यथा । छंदोगादिभिरनुष्ठीयते । अयं गृह्योक्त इति
चेन्न । स्वशाखाश्रयमिति । स्वशाखानुगतमंत्रस्य विवक्षितत्वात् । बहूक्तं वा स्वगृह्योक्तमिति । गृह्यपरिशिष्टे । तत्रा
पि विशेषविधानाच्च तस्मान्न निरग्निवाजसनेयिनोपि स्वगृह्योक्त एव कल्प इति । तेन निरग्निवाजसनेयिनापि
स्वगृह्यानुसारेणैव वैश्वदेवकर्म कार्यं । पर्जन्यादिबलयस्तु उदपात्रसन्निधौ देयाः । यच्छाखिनां तु साग्निनिर
ग्निपरतया कल्पभेदस्तत्राविवाद एवेति सर्वमनवद्यमिति वाचस्पतिः । अन्ये तु । अनग्निकस्तु यो विप्रः सोन्नं व्याहृतिभिः
स्वयं १८ सैः । हुत्वा शाकलमंत्रैश्च शिष्टं भूतबलिं हरेदिति । वसिष्ठवचनेनोक्तो होमो नाहिताग्निसाधारण इत्याहुस्तच्चिंत्यम् ॥

अथ वैश्वदेवप्रयोगः ॥ अद्य पंचसूनाजनितदोषनिवृत्तिपूर्वक ब्रह्मलोकप्राप्तिकामः पंचयज्ञानहं करिष्ये इति संकल्प्य ।
देवता ध्यायन् आवसथ्ये तदभावे लौकिके समिद्धतमे संप्रजिते पर्युक्षितेऽग्नौ तदभावेऽप्सु वा क्षितौ वा पाकाग्रमुद्धृत्य हवि
ष्यान्नेन तदभावे आमान्नेन फलमूलादिना वा प्रोक्षितेन सांगुष्ठमवहिर्जानु द्वादशपर्वपूरिकाः पंचाहुतीर्जुहुयात् ।
ॐ ब्रह्मणे स्वाहा १ ॐ प्रजापतये स्वाहा २ इति मनसा प्रजापतिं ध्यात्वा तूष्णीं होमेषु सर्वत्रेत्याश्वलायनवचनात् ।
ॐ गृह्याभ्यः स्वाहा ३ ॐ कश्यपाय स्वाहा ४ ॐ अनुमतये स्वाहा ५ ततो हुतशेषेण सांगुष्ठमवहिर्जानु महाविल्व डा ५—
प्रमाणमात्रं । तदभावे आर्द्रामलकीमात्रं बलिदानं । तत्रोदपात्रसन्निधाने भूमौ । ॐ पर्जन्याय नमः । ॐ
अद्भ्यो नमः । ॐ पृथिव्यै नमः । ततः साग्निनाग्निहोत्रशालायां निरग्निनाग्नेः पश्चिमभागे तामालिख्य त
स्याः पूर्वद्वारि दक्षिणपार्श्वे ॐ धात्रे नमः । वामभागे ॐ विधात्रे नमः । पूर्वस्यां । ॐ वायवे नमः । एवं दक्षि
णस्यां पश्चिमायां उत्तरस्यां च दिशि दद्यात् । ततः प्रतिदिशं । ॐ प्राच्यै दिशे नमः । ॐ अवाच्यै दिशे नमः ।
ॐ प्रतीच्यै दिशे नमः । ॐ उदीच्यै दिशे नमः । ततो गृहमध्ये । ॐ ब्रह्मणे नमः । ॐ अंतरिक्षाय नमः । ॐ
सूर्याय नमः । इति यथापूर्वं । ततः एषामुत्तरतः ॐ विश्वेभ्यो देवेभ्यो नमः । ॐ विश्वेभ्यो देवेभ्यो भूतेभ्यो नमः ।
ॐ उषसे नमः । ॐ भूतानां पतये नमः । एतच्चतुष्टयं यथोत्तरं । ततः प्राचीनावीती दक्षिणाभिमुखः पातित

वामजानुः पितृतीर्थेन ब्रह्मादिबले[illegible] दक्षिणस्यां ॐ पितृभ्यः स्वधानमः इतिपितृभ्योबलिंदद्यात्।
ततोबलिशेषान्नलिप्तंपात्रंप्रक्षाल्यब्रह्मादिबलेर्वायव्यां ॐ यक्ष्मैतत्तेनिर्णेजनंनमः। इतिबलिशेषान्न
सहितंजलमुपवीतीदद्यात्। तदनंतरंविष्णुपुराणे। ततोन्यदन्नमादायभूमिभागेशुचौपुनः। दद्यादशेष
भूतेभ्यः स्वेच्छयातत्समाहितः॥ ॐ देवामनुष्याः पशवोवयांसिसिद्धाः सयक्षोरगदैत्यसंघाः। प्रेताः पिशा
चास्तरवः समस्तायेचान्नमिच्छंतिमयाप्रदत्तं १ पिपीलिकाः कीटपतंगकाद्याबुभुक्षिताः कर्मनिबंधबद्धाः।
प्रयांतितेतृप्तिमिदंमयान्नंतेभ्योविसृष्टंसुखिनोभवंतु। २ येषांनमातानपितानबंधुर्नैवान्नसिद्धिर्नतथान्नमस्ति।
तत्तृप्तयेन्नंभुविदत्तमेतत्तेयांतुतृप्तिंमुदिताभवंतु ३ भूतानिसर्वाणितथान्नमेतदहंचविष्णुर्नयतोन्यदस्ति
तस्मादहंभूतनिकायभूतमन्नंप्रयच्छामिभवायतेषां ४ चतुर्दशोभूतगणोयएषतत्रस्थितायेखिलभूतसं
घाः। तृप्त्यर्थमन्नंहिमयाविसृष्टंतेषामिदंतेमुदिताभवंतु ५ इत्युच्चार्यनरोदद्यादन्नंश्रद्धासमन्वितः।
भुविभूतोपकारायगृहीसर्वाश्रयोयतः। श्वचांडालविहंगानांभुविदद्यात्ततोनरः। इदंचकाम्यंस्वेच्छयेतिश्रव
णात्। सर्वशाखिसाधारणंच संकोचेमानाभावात्। अन्नंदद्यादितिविधानंतरमित्युच्चार्यनरोदद्यादितिगुण
विधिनापंचश्लोकपाठानंतरंबलिदानस्यस्फुटमुपस्थानात्। तस्मात्स्वचापिश्लोकान्पठित्वाएकएवबलिर्देयः।

२९५

213

विधेयगतत्वेनैकत्वसंख्याया अविवक्षितत्वात्। इत्येवमेव वाचस्पतिमिश्रीदत्तप्रदीपादयोपि। मनुः। शुनांच प
तितानांच श्वपचांपापरोगिणां। वायसानांकृमीणांच शनकैर्निक्षिपेद्भुवि। व्यासः। ऐंद्रवारुणवायव्यायाम्यावै
नैर्ऋतास्तथा। वायसाः प्रतिगृह्णंतु भूमौपिंडंमयार्पितं। श्वानौद्वौश्यामशबलौ वैवस्वतकुलोद्भवौ। ताभ्यांपिं
डंप्रयच्छामिस्यातामेतावहिंसकौ। दत्वान्नेन विधानेन बलिंपश्चादुपस्पृशेत्। बृहद्व्यासः। श्वकाकश्वपचेभ्य
श्चक्षिपेन्नासत्रयंभुवि। उपस्पृश्य पश्चाद्द्वारि तिष्ठेद्यावन्मुहूर्तकः। उपस्पर्शोत्राचमनं। तदयंक्रमः। वत्स
बल्यनंतरं देवामनुष्या इत्यादि पंचश्लोकान्पठित्वा एकोबलिर्देयः। ततः ओंश्वभ्योनमः। ओंचांडालेभ्योनमः।
ओंविहंगेभ्योनमः। ओंपतितेभ्योनमः। ओंश्वपच्भ्योनमः। ओंपापरोगिभ्योनमः। ओंवायसेभ्योनमः। ओंकृमि
भ्योनमः। तत ऐंद्रवारुणेत्यादिश्लोकेनैकं। शुनामित्यादिना परंचबलिंदद्यात्। शुनामित्यादिनाबलिदानं।
अग्निशालातोबहिस्तद्योग्यभूभागेज्ञेयं। ततःसर्वान्बलीनुपस्पृशेत्। जलादेक्षिपेत्। ततोन्यथाविधानं
शाखांतरविषयं। तत आचमनं। श्वपाकश्चांडालेभ्योभिन्नः क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान्।
क्षत्रश्शूद्रवपुर्जंतुरुग्रोनामप्रजायते। स्नतुर्जातस्तयोगत्यांतु श्वपाक इतिकीर्त्यते। श्वपाकःश्वपचःश्वपक्
एकस्यैवनामन एषपर्यायोमनुनाकृतः। त्रयाणांमेदानभिधानात्। पितृबलिदानानंतरं वसिष्ठः। श्रोत्रि

याग्रं दत्वा ब्रह्मचारिणे चानंतरं पितृभ्यो दद्यात्। इदानीमनयोरुपस्थितावेव। अनुपस्थितौ बल्यनन्तरमेवश्रा
द्धकार्यमित्यर्थः। अत्र चाहुतयो देवयज्ञो बलयो भूतयज्ञः पितृबलिः। श्राद्धं वा पितृयज्ञः। श्राद्धं वा पितृयज्ञः
स्यात्पित्र्यो बलिरथापि वेति। कात्यायनवचनात्। श्रुतिपाठो ब्रह्मयज्ञः। आतिथ्यं सनकाद्यन्नं वा मनुष्ययज्ञः।
अथ मनुष्ययज्ञः। तत्र यज्ञबल्यनंतरं पारस्करः। उद्धृत्यान्नं ब्राह्मणायावनिज्य दद्याद्धंतेति इति। अग्रशब्दो
त्र परिमाणशेषवाची। आद्यस्य देवाद्यर्थत्वेनोपयोगाद्धाधीतत्वात्। तच्चावनेज्य पादौ प्रक्षाल्य ब्राह्मणाय दद्यात्।
हंतैतदन्नमिति। अवनिज्य प्रोक्ष्य। इदं तु यज्ञबल्यनंतरं श्रुतमपि काम्यबलिदानानंतरं ज्ञेयं। नैकस्मिन्कर्मणि
उत्कर्मणं प्रजायते इति छंदोगपरिशिष्टात्। पंचानामपि यज्ञानां भेदात्। इदानीमपि यदेतत्करणं तच्छ्राद्धा
नधिकारिवैश्वदेवाधिकारिपरं। श्राद्धाधिकारिणां तु श्राद्धानंतरं मनुष्ययज्ञः कार्यः। पितृभ्योऽपि मनुष्येभ्यः
इत्येतद्वचनात्। हंतकारस्त्वतिथेरेवावश्यकतया ब्राह्मणं तरायापि देयः। तथा च बौधायनः। अहरहर्ब्राह्म
णेभ्योऽन्नं दद्यादामूलफलशाकेभ्यो येनं मनुष्ययज्ञं समाप्नोतीति। कूर्मपुराणे। उद्धृत्य वा यथाशक्ति किंचिद
न्नं समाहितः। वेदतत्त्वार्थविदुषे द्विजायैवोपपादयेत्। मार्कंडेयपुराणे। ग्रासप्रमाणा भिक्षा स्यादग्रं
ग्रासचतुष्टयं। अग्रं चतुर्गुणं प्राहुर्हंतकारं द्विजोत्तमाः। भोजनं हंतकारं वा अग्रं भिक्षामथापि वा। अदत्वा तु न

२१४ भोक्तव्यं यथाविभवमात्मनः ।अग्रं पुष्कलसंज्ञकमपि ।तथा ।नियुञ्ज्यादेकमनेकं वा श्रोत्रियं प्राङ्मुखः सदा ।निवी
तीतद्गतमना ऋषीन्ध्यायेत्समाहितः ।आसनं चार्घ्यदानं च प्रदद्याद्भोजनं ततः। अशक्तोऽन्नं समुद्धृत्य ततो हन्तं प्र
214 कल्पयेत् ।तत्प्रयोगः ।निवीत्युदङ्मुखः सनकादीन्ध्यायन् कुशाग्रयतिलजलैरिदमन्नं मनुष्येभ्यो हन्त इति
प्रजापतितीर्थेन भोजनं हन्तकारमग्रं भिक्षां वा यथाविभवं दद्यात् ।अथ यतिने ब्रह्मचारिणे वान्नार्थमुप
स्थिताय स्वस्तीति वाचयित्वा उदकपूर्वं निरामिषं यथासंभवं व्यंजनसहितां ग्रासमात्रामपि भिक्षां दद्यात् ।
दद्याच्च भिक्षात्रितयं परिव्राड्ब्रह्मचारिणः ।स्वेच्छया पितुधो दद्याद्विभवे सत्यवारितामिति विष्णुपुराणात् ।
स्वस्ति वाच्य च भिक्षादानमिति गौतमवचनात् ।यमः ।सत्कृत्य भिक्षवे भिक्षां यः प्रयच्छति मानवः ।गोप्र
दानसमं पुण्यं तस्याह भगवान्यमः ।पात्रपूरणोफलाधिक्यं ।यः पात्रपूरणीं भिक्षां यतिभ्यः संप्रयच्छति ।
विमुक्तः सर्वपापेभ्यो नासौ दुर्गतिमाप्नुयात् इति ब्रह्मपुराणोक्तेः ।तथा । यतिहस्ते जलं दद्याद्भैक्ष्यं दद्या
त्पुनर्जलं ।तद्भैक्ष्यं मेरुणा तुल्यं तज्जलं सागरोपमं ।इदं च भिक्षादानमन्त्रोद्दिष्टे यदैव यतिब्रह्मचारिणो
रुपस्थितिस्तदैव कार्यं ।न तत्र कालनियमः ।वैश्वदेवात्प्राक्तयोरुपस्थितयोर्वैश्वदेवार्थमग्रभागमुद्धृत्य
भागांतरेण भिक्षां दद्यादिति विशेषः ।अकृते वैश्वदेवे तु भिक्षुके गृहमागते ।उद्धृत्य वैश्वदेवार्थं भि

द्वां दत्त्वा विसर्जयेत् इति नृसिंहपुराणे । इत्यनामंत्रितयोरनवतिष्ठमानयोरनन्यगतिकत्वेन ज्ञेयं । आमंत्रितयोरव
तिष्ठमानयोर्वैश्वदेवानंतरं दद्यात् । भिक्षुकश्च परिभाषितः । ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः । अध्वगः
क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः इत्याचारप्रदीपे । भिक्षुकाभावे चाग्रं गोभ्यो दद्यादग्नौ वा क्षिपेदिति । भुक्ते
प्यन्ने विद्यमाने भिक्षुकं न प्रत्याचक्षीतेति विष्णुः । मनुः । शक्तितोऽपचमानेभ्यो दातव्यं गृहमेधिना । संविभागश्च
भूतानां कर्त्तव्योऽनुपरोधतः । अपचमाना यतिब्रह्मचारिणः । अनुपरोधतो भृत्यानां तेभ्योपि दद्यात् । शक्तित
इति हंतकारं भिक्षाणामन्यतमं । यमोपि । अपचंतमतिक्रम्य पचंतं यस्तु भोजयेत् । शौंडिकानां व्रजेद्घोनिंवर्षा
णामधिकं शतं । अत्रिः । पक्षे मासे यदा भिक्षुर्यस्य नाश्नाति वै द्विजः । भुक्त्वा दुरात्मनस्तस्य द्विजश्चांद्रायणं चरेदि
ति । सिद्धान्नेन तदुपस्थितावदाने दोषमाह । यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ । तयोरन्नमदत्त्वा च भुक्त्वा
चांद्रायणं चरेदिति । हस्ते भिक्षादाननिषेधमाहाचारप्रदीपे । हस्तदत्ताश्च या भिक्षा व्यंजनं सलिलानि च । भुक्त्वा
त्वशुचितां याति दाता स्वर्गं न गच्छति । देवलः । सायं प्रातर्गृहद्वारं भिक्षार्थं नावघट्टयेत् । अवघंटयेदवंहध्यात् ।
पाषंडादीनामपि दयावशाद्भिक्षा देया । तेभ्यो देयं गृहाद्बहिरिति ब्रह्मपुराणे । शूद्र इत्यनुवृत्तौ । याज्ञवल्क्यः । भार्या
रतिः शुचिर्भृत्यभर्ता श्राद्धक्रियान्वितः । नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेत् । भार्यारतिः स्वभार्यारतः । अयं

मत्स्यः। नित्येतावत्प्रवक्ष्यामि अर्घ्यावाहनवर्जितं। अदैवं तद्विजानीयात्पार्वणं पर्वसु स्मृतं। कात्यायनः। अप्येकमाशयेद्विप्रं पितृयज्ञार्थसिद्धये। अदैवं
[illegible] नास्तिचेदन्य इत्यायपरं। अवेताः। नावाहनाग्नौकरणं न पिंडान विसर्जनं। अनुव्रज्यादक्षिणा च त्रिःप्रश्नातिथिकल्पनं। त्रिःप्रश्नापि गतस्य विप्र स्यातिथित्वप्रकल्प
२२५ चनमोमंत्रेणचतुर्थ्यंतदेवतानामान्वि तेन वैश्वदेवादिकं कुर्यात्। न तर्पयेदिति तिलाज्ञाब्राह्मणद्वारापि निर्वाहो ता २५
225 पितः। तथा स्वाहास्वधास्थाने प्यनेन नमस्कारएव प्रयोज्य इति गरुडपुराणे। अन्नादिनमोंत च चतुर्थ्यंतं च सत्त
माः। देवताया स्वकं नाम मूलमंत्रः प्रकीर्त्तितः॥ अथ नित्यश्राद्धं। तत्र मनुः। दद्यादहरहः श्राद्धं मन्नाद्येनो
दकेन वा। पयोमूलफलैर्वापि पि त्र्यः प्रीतिमावहन्। एकेन वाप्यन्नेनापि नित्यं कुर्यात्सुतः पितुः। यदन्नः
पुरुषो लोके तदन्नास्तस्य देवताः। मा र्कंडेयपुराणे। कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा। पितॄनुद्दिश्य विप्रां
श्च भोजयेद्विप्रमेव वा। अन्नस्याग्रं तथोद्धृत्य ब्राह्मणायोपपादयेत्। छंदोगपरिशिष्टे। अप्येकमाशयेद्विप्रं [illegible]
पितृयज्ञार्थसिद्धये। अदैवं ना स्तिचेदन्यो भोक्ताभोज्यमथापि वा। अप्युद्धृत्य यथाशक्ति किंचिदन्नं समाहि [illegible]
तः। वेदतत्वार्थविदुषे तद्द्विजायोपपादयेत्। यदन्यो ब्राह्मणो भोक्ता न लभ्येत तदा तत्पर्याप्तमन्नं तदशक्तो किंचिद
पि चोद्धृत्योत्सृज्य द्विजाय दद्यात्। मनुः। यथाशक्त्यान्नमुद्धृत्यापि श्रेणविधिनाथतत्। श्राद्धयज्ञब्राह्मणान्द्या
त्कुले वापि समर्पयेत्। न तत्र पात्रपरीक्षा पिंडादिवत् प्रतिपत्तिरूपत्वात्। विष्णुधर्मोत्तरे पि। अपि स्यात्सकले
स्मा कं यो नित्यं श्राद्धमाचरेत्। पयोमूलफलैर्वापि तिलतोयेन वा पुनः। यमः। नित्यं शाकैः फलैर्वापि येन वा
वर्त्ततेस्वयं। तेनैव भोजयेद्विप्रं नित्यश्राद्धं तु कारयेत्। पितरो यत्र पूज्यंते तत्र मातामहा अपि। अविशेषेण कर्त्त

यं विशेषान्नरकं व्रजेत्। अन्येतरविकल्पा अशक्तविषयाः। मदनपारिजाते। एतच्च नित्यश्राद्धं श्राद्धांतरे कृते अनियतं। तथा च मार्कंडेयः। नित्यक्रियापितॄणां तथैवान्येषां। शेषं पूर्ववदाचरेदिति। नित्यक्रिया नित्यश्राद्धं शेषं वैश्वदेवादिकं। अत्रैवं व्यवस्था। अत्रामावास्यादिश्राद्धादिषु नित्यश्राद्धदेवता इह भवंति। न तत्र नित्यश्राद्धं। यत्र च सांवत्सरिकादिषु नेष्टास्तत्र कर्तव्यमिति। नित्यंश्राद्धं न कुर्वीत प्रसंगाद्यत्र सिद्ध्यति। श्राद्धान्तरे कृतेन्यत्र नित्यत्वात्तन्न हापयेदिति काशीखंडे। एतच्च नित्यश्राद्धं अविभक्तेन कनीयसा रात्रौ च न कार्यं। श्राद्धांतरसमप्रयोगत्वेमत्वात्। मार्कंडेयः। उपवेश्यासनं दत्त्वा संपूज्य कुसुमादिभिः। निवेश्य भोजयित्वा तु किंचिद्दत्त्वा विसर्जयेत्। किंचिदिति यथोक्तदक्षिणानियमो नास्तीत्यर्थः। किंचित्पदोपादानं निषेधाविरोधमुपपादयति। विहितप्रतिषिद्धत्वादनियम एव। यत्तु दक्षिणावर्जितमित्यत्र यथोक्तदक्षिणावर्जितमित्यर्थः। भविष्ये। नित्यश्राद्धमदैवं स्याद्दक्षिणापिंडवर्जितं। पिंडनिषेधाद्देवाग्नौकरणादिनिवृत्तिरपि। यथोक्तं स्मृत्यंतरे। पिंडा यत्र न दीयंते कर्म चत्वारि वर्जयेत्। आवाहनमर्घ्यं होमो चतुर्थो विकरस्तथा। काशीखंडे। नित्यंश्राद्धमदैवं स्यादर्घ्यपिंडविवर्जितं। दक्षिणावर्जितमपि दातृभोक्तृव्रतोज्झितं। व्रतान्याह बृहस्पतिः। पुनर्भोजनमध्वानं भाराध्यापनमैथुनं। दानं प्रतिग्रहं होमं श्राद्धभुगष्ट वर्जयेत्। पुनर्भोजनतांबूलहिंसापत्नानमभोजनं। रत्यौषधपरान्नं च श्राद्धकृत्सप्त वर्जयेत्। श्राद्ध

पल्लवे। नित्यश्राद्धं कृत्वा देवपूजादिनकार्यं। श्राद्धान्नानीति कर्माणीति स्ववनात्। एवं काम्यं कार्यमेवेति। मत्स्यपुराणे। नि
त्यं तावत्प्रवक्ष्यामि अर्घावाहनवर्जितं। लघुहारीतोपि। नित्यश्राद्धमदैवं स्यादर्घ्यपिंडविवर्जितं। याज्ञवल्क्यः। नामंत्र
णं न होमश्च नावाहनविसर्जने। विश्वेदेवान पिंडाश्च नित्यश्राद्धविधौ द्विजाः। व्यासः। आवाहनं चार्घपात्रं पिंडाग्नौक
रणादिकं। ब्रह्मचर्यादिनियमो विश्वेदेवास्तथैव च। नित्यश्राद्धे त्यजेदेतान्भोज्यमन्नं प्रकल्पयेत्। सर्वस्य दक्षिणां ज्ञेयं
नित्यश्राद्धमदक्षिणं। गृह्यपरिशिष्टे। अथैकमाशयेद्विप्रं पितृयज्ञार्थसिद्धये। पितृभ्य इदमित्युक्त्वा स्वधाकारमु
दीरयेत्। उद्धृत्य वाथ यथाशक्ति किंचिदन्नं समाहितः। वेदतत्त्वार्थविदुषे द्विजायैवोपपादयेत्। सर्वेषामप्यलाभे तु दत्तं
गोभ्यो निवेदयेत्। मार्कंडेयोपि। एकं तु भोजयेद्विप्रं पित्रर्थं पांचयाज्ञिकं। नत्त्वावहूपौरुषं स्तेयं पितृपात्रविवर्जितं।
अप्युद्धृत्य यथाशक्ति किंचिदन्नं यथाविधि। पितृभ्योथ मनुष्येभ्यो दद्यादहरहर्द्विजः। यथाविधिरिति व्याचष्टे। पि
तृभ्य इदमित्युक्त्वा स्वधाकारमुदीरयेत्। हंतकारं मनुष्येभ्यस्तदन्नं निनयेदपः। पात्रासंभवे एतावानेव प्रयोगः।
अतो दक्षिणायाः अनित्यार्थत्वान्निवृत्तिः। आसनादीनां द्वारबाधनात्। प्रतिज्ञापात्रपूरणसंकल्पानामेवोक्तेः। अत्र
च षड्ब्राह्मणार्पणकान्नदानदानं मुख्यः कल्पः। तदशक्तौ एकब्राह्मणतर्पणकान्नदानं। तदशक्तौ किंचिदन्न
दानं। अत्र च सेकसंकल्पजपासनं तिलदीपान्नोत्सर्गा आवश्यकाः। उपमर्दनादिदानं काम्यं। अन्यत्रात्स्येव। एवं

वाचस्पत्यादयोपि ॥ अथनित्यश्राद्धप्रयोगः ॥ ॐ पुंडरीकाक्षं स्मृत्वा । कुशोदकेन आत्मीयद्रव्यप्रोक्षणं । कुशतिल
जलान्यादाय । ॐ अद्यामुकमासीयामुकपक्षीयामुकतिथौ अमुकगोत्राणां पितृपितामहप्रपितामहानाममु
कामुकशर्मणां तथा अमुकगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकशर्मणां नित्यश्राद्धमहं
करिष्ये । ततो गायत्री देवताभ्यो जपः । तत ॐ अद्यामुकगोत्रपितरमुकशर्मन्निदमासनं ते स्वधा नमः । एवं प्रपिताम
हादीनां पंचानामपि दद्यात् । तत ॐ अपहता असुरा रक्षांसि वेदिषद इति मामावर्तेन तिलान्विकिरेत् । तत ॐ आयं
तुन इति जपेत् । ततो मोटकादीन्यादाय । ॐ अद्यामुकगोत्रपितरमुकशर्मन्नेतानि गंधपुष्पधूपदीपतांबूलयज्ञोप
वीतवासांसि ते स्वधा नमः । एवं पितामहादिभ्यः पंचभ्यो दद्यात् । इदं कांस्यं जलादिना मंडलं कृत्वा ताम्रपादिना
न्नमादाय भास्वरान् त्रीन्पिंडान्स्थापयन् परिवेषणं कुर्यात् । मधुसंभवे मधुदानं । ॐ मधुवातेत्यादिभिः प्रत्येकमभि
मंत्रणं । मधुं विनापि मधुवातेत्यादि पाठः । ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वा
हा इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे कृष्ण हव्यमिदं रक्षस्व मदीयं ॐ इदमन्नं । ॐ इमा आपः ।
ॐ इदं हविः । इति तत्र अंगुष्ठं नियोजयेत् । ॐ अपहता असुरा रक्षांसि वेदिषद इत्यन्नोपरि तिलान्विकीर्य । ॐ अद्या
मुकगोत्रपितरमुकशर्मन्निदमन्नं सोपकरणं ते स्वधा नमः । इत्युत्सृज्य । एवमेव पितामहादिभ्यः पंचभ्य उत्सृजेत् ।

२१७

217

अथ वाक्यं पठेत्। ॐ अद्यामुकगोत्र पितरमुकशर्मन् पितामहामुकगोत्रामुकशर्मन् प्रपितामहामुकगोत्रामुकशर्मन्
इदमन्नं सोपकरणं वः स्वधा नमः। एवमेव मातामहादिभ्यो दद्यात्। आसनादावप्येवमेव प्रयोगः। ततो गायत्रीं मधु
मतीं मधुमधुमधु इति जपेत्। तत अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् तत्सर्वमच्छिद्रमस्तु इति जपेत्। ततः पूर्ववद्गाय
त्रीं त्रिर्जपेत्। कुशेषूपविश्य मधुमती मधुमधुमधु इति जपेत्। ततः पुरुषसूक्तादिजपः। ॐ नमस्त्वस्य विरूपाक्ष नमस्ते
नेकचक्षुषे। नमः पिनाकहस्ताय वज्रहस्ताय वै नमः। ततः सर्वं कृत्वा त्रिदेवताभ्यो जपः। तत ॐ विष्णुस्मरणम्।
ब्राह्मणाय जले वा प्रतिपत्तिः। ततः कण्ठीकृत्य सनकादिभ्योऽन्नदानं। ततः सर्वं कृत्वा गोग्रासदानं। शतपथश्रुतिः।
वाचं धेनुमुपासीत तस्याश्चत्वारः स्तनाः। स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारश्चेति। तस्यै द्वौ स्तनौ देवा उपजी   श्रा ६
वंति स्वाहाकारं वषट्कारं च। हन्तकारं मनुष्याः। स्वधाकारं पितरः। तस्याः प्राण ऋषभो वत्स इति। मार्कंडेयपुरा
णेपि। सर्वस्याधारभूतेयं वत्स धेनुस्त्रयीमयी। यस्यां प्रतिष्ठितं विश्वं विश्वहेतुश्च या मता। स्वाहाकार स्वधाकारौ
वषट्कारश्च पुत्रक। हन्तकारस्तथैवान्यस्तस्याः स्तनचतुष्टयं। स्वाहाकारं स्तनं देवाः पितरश्च स्वधामयं। मुनयश्च व
षट्कारं देवभूतं सुरेतराः। हन्तकारं मनुष्याश्च पिबंति सततं स्तनं। एवमप्याययत्येषा देवादीनखिलांस्त्रयी। तेषामुच्छे
दकर्त्ता यः पुरुषोत्यन्तपापकृत्। स तमस्यन्धतामिस्रे तामिस्रे च निमज्जति। यस्त्वेतां मानवो धेनुं स्वैर्वत्सैरमरादिभिः।

प्रापयत्सुचिते काले सस्वर्गायोपपद्यते । तस्मात्तत्रमनुष्येण दद्याद्वृत्तिं पितृमानवाः । भूतानिचानुदिवसंपोष्याणिस्वतनुर्य
या ॥ अथ गोग्रासः ॥ तत्रमहाभारते । ग्रासमुष्टिंपरगवे दद्यात्संवत्सरं तु यः सदा । अकृत्वा स्वयमाहारं स्वर्गलोकंस
गच्छति । नंदिपुराणे । योगवां हृद्रदत्तानां किंचिद्दद्यात्त्वाह्निकं । सगच्छेद्रुद्रभवनं कुलदयसमन्वितः । योन्यासाम
पिगवां दद्यान्मर्त्यो गवाह्निकं । सोपिगच्छेन्नरः स्वर्गं दिव्यमेव न संशयः । अन्यासां हृद्रदत्तातिरिक्तानां । आह्निकं दि
वसाहारं । भविष्ये । तृणोदकेन संमिश्रं यः प्रदद्याद्गवाह्निकं । कपिलाशतदानस्य फलं विद्यान्न संशयः । दानमंत्र
स्तु ब्रह्मपुराणे । सौरभेयाः सर्वहिताः पवित्राः पुण्यराशयः । प्रतिगृह्णंतु मे ग्रासं गावस्त्रैलोक्यमातरः । दद्याद
नेन मंत्रेण गवां ग्रासं स देवहि । अत्र सदा श्रवणात्फलश्रवणाच्च नित्यं काम्यमिति छंदोगाह्निकादयः । अन्ये तु ।
मंत्रविधिरेवायं न तु कालविधिरन्यथा वाक्यभेदापत्तेः । स देत्यनुवादमात्रमित्याहुः । गोग्रासानंतरं विष्णुपुराणे ।
ततो गोदोहमात्रं वै कालं तिष्ठेद्गृहांगणे । अतिथिग्रहणार्थाय तदूर्ध्वं वा यथेच्छया । अतिथिं तत्र संप्राप्तं पूजयेत
स्वागतादिना । हिरण्यगर्भबुद्ध्यातं मन्येताभ्यागतं गृही । एवं च वैश्वदेवोत्तरं संप्राप्तोतिथिस्तेन पुण्याधिकार्यं
तथैव पूज्यः । अन्यदोपस्थितस्तु नित्यश्राद्धानंतरमिति विवेकः । अथातिथिपूजा भारते । संप्राप्तायत्वतिथ
ये प्रदद्यादासनोदके । अन्नं चैव यथाशक्ति सत्कृत्य विधिपूर्वकं । अग्निं हुत्वा विधानेन यत्पुण्यफलमाप्यते ।

२१८ 218

तेन तुल्यं विशिष्टं वा ब्राह्मणेन तर्पिते फलं । शिलानप्युंछतो नित्यं पंचाग्नीनपि जुह्वतः । सर्वं सुकृतमादत्ते ब्राह्मणो
नर्चितो वसन् । तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता । एतान्यपि सतां गेहे नोच्छिद्यंते कदाचन । शिलान्
लूनसस्यशेषान् । उंछतः विचिनुतः । तेनातिदरिद्रेणापि अतिथिपूजनं कार्यं । सूनृता प्रिया सत्या वाक् ।
विष्णुपुराणे । धाता प्रजापतिः शक्रो वह्निर्वसुगणोऽर्यमा । प्रविश्यातिथिमेवैते भुंजतेऽन्नं नरेश्वर । तस्मादति
थिपूजायां यतेत सततं नरः । स केवलमघं भुंक्ते यो भुंक्ते त्वतिथिं विना । शातातपः । प्रियो वा यदि वा द्वेष्यो मूर्
खः पंडित एव वा । वैश्वदेवांतरे प्राप्तः सोऽतिथिः स्वर्गसंक्रमः । वृहत्पराशरः । क्लीबो वा यदि वा काणः कुष्ठी वा
व्याधितोऽपि वा । आगतो वैश्वदेवान्ते पूज्यः सर्वेऽपि देववत् । विष्णुः । स्वाध्यायेनाग्निहोत्रेण यज्ञेन तपसा तथा ।
नैवाप्नोति गृही लोकान्यथा त्वतिथिपूजनात् । यमः । न पृच्छेद्गोत्रचरणं देशं नाम श्रुतं कुलं । अधनो भाग
ते विप्रं भोजनार्थमुपस्थितं । देशं नाम कुलं विद्यां पृष्ट्वा योऽन्नं प्रयच्छति । न स तत्फलमाप्नोति दत्वा स्वर्गं न
गच्छति । अतिथिं पूजयेद्यस्तु श्रांतं चादृष्टपूर्वकं । सहस्रं गोशतं तेन दत्तं स्यादिति मे मतिः । वृहस्पतिः । आग
तस्यासनं दद्याच्छ्रांतस्य शयनं तथा । तृषितस्य तु पानीयं क्षुधितस्य तु भोजनं । चक्षुर्दद्यान्मनो दद्याद्वाचं द
द्याच्च सूनृतां । एवं साधारणो धर्मश्चातुर्वर्ण्येऽब्रवीन्मनुः । क्रीयते स्वागतेनाग्निरासनेन शतक्रतुः । पितरः पा

दशौचेन भोजनेन प्रजापतिः। विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी। तावत्पुष्करपात्रेण पिबंति पितरो जलं।
विष्णुः। प्रतिश्रयं तथा शय्यां पादाभ्यंगं सदीपकं। प्रत्येकदानेनाप्नोति गोप्रदानसमं फलं। प्रतिश्रयो वासः। यमः।
येषामनश्नन्नतिथिर्विप्राणां प्रव्रजेद्गृहात्। ते वै खरत्वमुष्ट्रत्वमश्वत्वमुपपेदिरे। यस्यैवं वसेद्विप्रो गृहे
कश्चिदभोजितः। न तस्य देवाः पितरो हव्यं कव्यं च भुंजते। भारते। अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्त्तते। स तस्मै
दुःकृतं दत्वा पुण्यमादाय गच्छति। अतिथिर्यस्य वै ग्रामे भिन्नमाराः प्रयत्नतः। ... ते निरशनस्तत्र ब्रह्महत्या विधीयते। स्थितो ५८
अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्त्तते। न तस्य पितरोऽश्नंति दशवर्षाणि पंच च। विष्णुपुराणे। दिवातिथौ च विमुखे
गते यत्पातकं नृणां। तदेवाष्टगुणं पुंसां सूर्योढे विमुखे गते। याज्ञवल्क्यः। अध्वनीनोऽतिथिर्ज्ञेयः श्रोत्रियो वेदपा
रगः। मान्यावेतौ गृहस्थस्य स्वर्गलोकमभीप्सतः। अध्वनीनः सततमध्वगामी। श्रोत्रियः एकशाखाध्यायी।
एकशाखामधीत्य श्रोत्रियो भवतीति बोधायनः। अचिंतितमनाहूतं वैश्वदेव उपस्थितं। अतिथिं तं विजानीया
न्नैकग्रामनिवासिनं। मनुः। एकरात्रिं च निवसन्नतिथिर्ब्राह्मणः स्मृतः। अनित्यं हि स्थितो यस्मात्तस्मादतिथिरु
च्यते। अधिकदिननिवासे फलाधिक्यमाहापस्तंबः। एकां रात्रिं चेदतिथिं निवासयेत् पार्थिवान् लोकान् जयति। द्वि
तीयांतरिक्षान्। तृतीया दिव्यान्। चतुर्थी परतो लोकान्। अपरिमिताभिरपरिमितान् जयतीति सर्वत्रान्वीयते।
५६/८

२१९ बृहत्पराशरः । यतीव्रत्याग्निहोत्री च तथापि मखकृद्द्विजः । सर्वे ते तिथयः प्रोक्ता अश्नुवीरन्दिने दिने । देवलः । अदत्तं भो
219 जयेद्विप्रं स्वगृहे सति सर्पिषि । पच्यते निरये घोरे गृहस्थः प्रतिपद्यते । मिष्टमन्नं स्वयं भुक्त्वा पश्चात्कदशनं लघु । ब्राह्म
णं भोजयेन्मूर्खो निरये चिरमावसेत् । मनुः । न वै स्वयं तदश्नीयादतिथिं यन्न भोजयेत् । श्रीभागवते । तस्माद्धि मुख
तोयं वै भगवान्सर्वयज्ञभुक् । इज्यते हविषा राजन्यथा विप्रमुखे हुतैः । इत्यतिथ्यभावे ब्राह्मणमात्रमपि भोजयेत् । मूर्खं
वा पंडितं वापि ब्राह्मणं यस्तु भोजयेत् । तेनाहं पूजितो नूनं नित्यमेव प्रियासह । पद्मे । योभोजयेद्गृहे नित्यं ब्राह्मणांश्च
नरोत्तमः । तत्र भुंजाम्यहं नित्यं सत्यं सत्यं धनंजय । सर्वात्मना तु वै देवा ब्राह्मणेषु व्यवस्थिताः । अग्निवच्च द्विजं प्राहु
स्तस्माद्द्विजोधिदैवतं । यथाग्नौ संस्थिता देवास्तद्वद्विप्रेषु संस्थिताः । शातातपः । देवता इव भूतेषु कचित्कचित्प्र
तिष्ठिता । ब्राह्मणो देवताः सर्वा अतस्तं पूजयेत्सदा । अन्योन्यं गुरवो विप्रा अन्योन्यातिथयः स्मृताः । अन्योन्यमुप
कुर्वंति स्नारयंति तरंति च । मनुः । ब्राह्मणस्य न त्वतिथिर्गृहे राजन्य उच्यते । वैश्यः शूद्रः सखा चैव ज्ञातयो गुरुरेव
च । यदि त्वतिथिधर्मेण क्षत्रियो गृहमाव्रजेत् । भुक्तवत्सु च विप्रेषु कामं तमपि भोजयेत् । वैश्यशूद्रावपि प्राप्तौ कु
टुंबे तिथिधर्मिणौ । भोजयेत्सह भृत्यैस्तावानृशंस्यं प्रयोजयेत् । इतरानपि सख्यादीन्संप्रीत्या गृहमागतान् ।
कुटुंबेगृहे । ब्राह्मणस्यागतौ वैश्यशूद्रौ करुणया भोजयितव्यावित्यर्थः । न केवलं गृहे ष्वतिथिः । किंतुमयादिना

ऽोषितस्य ग्रामांतरे वने वा भार्या अग्नयश्च यत्र संति तत्राप्युपस्थितमतिथिं विजानीयात्तेन तस्य पूजनापूजनयोः पुण्य
पापोदयः इत्याह मनुः। नैकग्रामीणमतिथिं विप्रं सांगतिकं तथा। उपस्थितं गृहे विद्याद्भार्या यत्राग्नयोपि वा। शं
खलिखितौ। वर्णविद्यातपःसंपन्नाय पाद्यमर्घमाचमनीयमन्नविशेषांश्च तस्मै शक्तितो दद्यात्। सहासीत। प्रदोषे
नुज्ञाप्य शयीत। पूर्वं प्रतिबुध्येत। प्रस्थितमनुव्रजेत्। समेत्याग्रतो निवर्तेत। वेद्यादीनामारामंतभाप्रपातडागदेव
गृहमहाद्रुमनदीनामन्यतमेस्मिन्प्रदक्षिणीकुर्यात्। वाच्च मुखस्य पुनर्दर्शनायेति। अनेकातिथ्यासूपस्थितो बौधा
यनः। सायंप्रातर्यदन्नं स्यात्तेन वैश्वदेवबलिमुपाहृत्य ब्राह्मणादीन्पूजयेत्। अशक्तौ प्रथममागतं विप्रं पूजयेदिति ।
अथ यतिसन्मानमाह दक्षः। आश्रमे तु यतिर्यस्य विश्राम्यति मुहूर्तकं। किं तस्यान्येन धर्मेण कृतकृत्यो हि सस्मृतः। जन्मप्रभृ
ति यत्पापं गृहस्थेन कृतं बहु। निर्मार्जयति तत्सर्वमेकरात्रोषितो यतिः। बृहत्पराशरः। निविसेदेकरात्रं हि भिक्षुर्यस्य च
वेश्मनि। संतारयति पूर्वान्वै विंशति पितृमातृतः। भिक्षुर्यस्यान्नभुग्ब्रह्मयोगाभ्यासरतो भवेत्। परिमाणं च योगेन कृ
तकृत्यो भवेत्तु सः। स्कांदे। यतिर्यस्य गृहे नित्यं भुंजते भक्तिसंयुतः। तद्गृहे भुंजते विष्णुः स्वयमेव श्रिया सह। पाद्मे दे
वद्भूतविकुंडलसंवादे। यतिपादोदकं वेश्म हंति पापं पुराकृतं। सप्तजन्मार्जितं सद्यः श्रद्धया शिरसा धृतं। ब्रह्मचारीय
तिनवासितव्यः। तदाह दक्षः। वसन्नावसथे भिक्षुर्मैथुनं यदि सेवते। तस्यावसथनाथस्य मूलान्यपि निकृंतति। मनुः।

पाषंडिनो विकर्मस्थान्वैडालव्रतिकान् शठान्। हैतुकान्वकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्। अतिथ्येनन पूजयेदिति। द
यावशात्किंचिद्दत्वाऽश्रु विसर्जयेदित्यर्थः। चौरो वा यदि चांडाल अथवा पितृघातकः। वैश्वदेवे च संप्राप्तः सोतिथिः स्वर्ग
संक्रमः। इति पुराणोक्तेः॥ विष्णुधर्मोत्तरे। चांडालोप्यथ पापो वा शत्रुर्वापितृघातकः। देशेकालेभ्युपगतो भरणीयो म
तो मम। भरणीय इत्यनेन अन्नेतिथिधर्मो अनुत्यानादयो न कार्या। इत्यर्थः। जातः शूद्रात्तु ब्राह्मण्यां चांडाल इति की
र्तितः। यो जातः शूद्रात्तु शायाम योगवः स उच्यते। सर्वाभ्यश्चैव जातिभ्यश्चांडालश्चाधमो नृणां। वैश्यराजन्यविप्रा
सु जायंते वर्णसंकराः। इति मनूक्तेः। चांडालादीनां भोजनोत्तरं देयमिति शिष्टाः॥ अथ गृहस्थप्रशंसा॥ तत्र दक्षः।
देवैश्चैव मनुष्यैश्च तिर्यग्भिश्चोपजीव्यते। गृहस्थः प्रत्यहं यस्मात्तस्माज्ज्येष्ठो गृहाश्रमी। तथा। आश्रमाणां समुत्पत्तिर्वृद्धि
र्नपालनं तथा। गृहस्थाज्जायते सम्यक्तेन चाप्यधिकः स्मृतः। मनुः। यथा नदीनदाः सर्वे सागरं यांति संस्थितिं। ए
वं गृहस्थमाश्रित्य वर्त्तंत इतराश्रमाः। गृहस्थोपि क्रियायुक्तो न गृहेण गृही भवेत्। न चैव पुत्रदारैश्च स्वकर्म परिवर्जयेत्।
तथा। वंदे गृहस्थाश्रममाश्रमाणां विश्राम हेतुं धरणीतलेषु। यद्द्वारि देवाः पितरो मनुष्या मध्यंदिने याचकवद्भ्रमंति।
तथा मार्कंडेयपुराणे मदालसावाक्यम्। पितरो मुनयो देवा भूतानि मनुजास्तथा। कृमिकीटपतंगाश्च वायसाः पशवो
नराः। गृहस्थमनुजीवंति ततस्तृप्तिं प्रयांति यत्। मुखं च विनिरीक्षंते अपि नो दास्यतीति वा। मनुः। स्नानहोमजपा

तिष्ठानाचरेच्छक्तिमान्नरः। कृमिविण्मूत्ररेतांसि अन्नन्नपि न विंदति। तथा। स्नात्वा जप्त्वा च हुत्वा च दत्वा
चैवन्वयोऽश्नुते। अमृतं सोऽश्नुयान्नित्यं तस्य स्थानमनामयं। विपद्यते दोषमाह स्मृतिः। अस्नात्वा चाप्यहुत्वा च
अदत्वा ये च भुंजते। देवादीनामृणीभूत्वा निरयं ते व्रजंत्यधः। विष्णुपुराणेपि। अस्नात्वाशी मलं भुंक्ते अज
पी पूयशोणितं। अदत्वा च कृमीन्भुंक्ते अहुत्वा विषमश्नुते। पंचयज्ञकरणाशक्तौ स्नानतर्पणब्रह्मयज्ञमात्रम
पि कार्यं। देवमनुष्यभूतयज्ञक इति पंचयज्ञानुक्त्वा पुनराह गौतमः। नित्यं स्वाध्यायः पितृभ्यश्चोदकदानं।
यथोत्साहमन्यदिति। इतराणि शक्त्यपेक्षया कर्तव्यानीत्यर्थः। याज्ञवल्क्यः। भोजयेत्स्वागतान्काले सखिसंबंधि
बांधवान्। अहः शेषं सहासीत शिष्टैरिष्टैश्च बंधुभिः। बालस्ववासिनीवृद्धगुर्विण्यातुरकन्यकाः। संभोज्यातिथि
भृत्यांश्च दंपत्योः शेषभोजनं। स्ववासिनी यानूढा पितृगेहस्था इत्यर्थः। भृत्याहमानोत्कृष्टजातीयाः स्त्री
स्त्रीशूद्रं तर्पयेत्त्य शूद्रभृत्यान्पश्चात्तर्पयेदिति स्मृतेः। अत्र च यद्बालादेः पूर्वभोजनं तद्ग्रासमर्थ्येति यमनुपस्थितो वा। तत्साम
स्था ४ र्थ्ये तत्संप्राप्तेश्चोत्तरमेव। यदाह बोधायनः। भोजयेदतिथीन्पूर्वमंतर्वत्नीरनंतरं। बालान्वृद्धांस्तथा दीनान्व्या
धितांश्च विशेषतः। अंतर्वत्नीर्गर्भिणीः। तत्सामर्थ्ये तत्प्राप्तेश्च मनुः। स्ववासिनीकुमारीश्च रोगिणीगर्भि
णीस्तथा। अतिथिभ्योऽग्र एवैता भोजयेदविचारयन्। दक्षः। संविभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत्। संविभा

२२१ 221 गोर्देवपित्रादिभ्यो विभज्य दानं। तदाह मनुः। देवानृषीन्मनुष्यांश्च पितॄन्गृह्याश्च देवताः। पूजयित्वा ततः पश्चा
द्गृहस्थः शेषभुग्भवेत्। अत्र क्रमो न विवक्षितः। गृहपतेरेव पूर्वभोजनस्यैव विवक्षितत्वात्। दंपत्योः शेषभोज
नमित्युपसंहारात्। अदत्वा तु य एतेभ्यः पूर्वं भुंक्ते विचक्षणः इति तत्रैव दोषोपादानात्। अत एतेषां पूर्वभोजनं
विहितं। तच्च पाकान्तरेणापि भवतीति यथासंभवं विधेयं। भुक्तवत्सु च विप्रेषु भुक्तेष्वन्येषु चैव हि। भुंजीयातां
ततः पश्चादवशिष्टमन्नं तु दंपती। व्यासः। दिवाशी च भवेन्नित्यं नित्यं वाभ्यागतभोजनः। दिवं सद्भुक्तशेषं च यस्तु
शेषं तथामृतं। तथा। पूजयित्वातिथीन्शिष्टान्ज्ञातिबंधूंस्तथात्मनः। विकलान्बालवृद्धांश्च भोजयेच्चातुरांस्तथा।
देशकालाद्यनुरोधेन यौगपद्यमपि। न शास्त्रविरोधिपरिवेषणापि विशेषभोजनस्याप्यनुपपत्तेः। श्रीमंतं
ज्ञातिमासाद्य यो ज्ञातिरवसीदति। सीदता यत्कृतं तेन तत्पापं समश्नुते। वांछते दत्तपरीतात्मा पश्चान्यो न्नम
किंचिन। कुटुंबिनो भोजनीयः स्वसमं विभवे सति॥ अथ भोजनम्॥ तत्र देवलः। उपलिप्ते शुचौ देशे पादौ
प्रक्षाल्य वाग्यतः। प्राङ्मुखोऽन्नानि भुंजीत शुचिपीठमवस्थितः। बौधायनः। प्रक्षालितपाणिपादः अप
आचम्य शुचौ संवृते देशेऽन्नमुपहृतमुपसंगृह्य कामक्रोधलोभमोहानुपसंहृत्य सर्वांगुलीभिः शब्दमकुर्व
न् पञ्चांभोजनस्याल्पमपि अशेषं अर्धजग्धग्रासशेषं न दिपेदित्यर्थः। उपहृतमुपनीतं। उपसंगृह्य श्रा

दरेणस्वीकृत्य शद्वं सीत्कारादिकं पिंडशेषं कवलशेषं । मनुः । उपस्पृश्य द्विजो नित्यमन्नमद्यात्समाहितः ।
भुक्त्वा चोपस्पृशेत्सम्यगद्भिः खानि च संस्पृशेत् । ब्रह्मपुराणे । आसनस्थस्तु यो दर्पात्पंक्तिमध्य उपस्पृशेत् ।
विशेद्भोजनभूमिं च अप्रक्षालितपाणिपात् । स सर्वे षां तु यत्पापं तद्भुङ्क्ते नराधमः । तस्माद्बहिरुपस्पृश्य आ
चांतः प्रविशेद्गृहं । गृहं पाकशालां । तथा । अन्नं दृष्ट्वा प्रणम्यादौ प्रांजलिः प्रार्थयेन्नरः । अस्माकं नित्यम
स्त्वेतदिति भक्त्याच वंदयेत् । तथा । पात्रेष्वन्नानुरूपेषु पुत्रभृत्यानुजैः सह । भूम्यां पात्रं प्रतिष्ठाप्य मौनेनान्नं तु भक्ष
येत् । पवित्रपाणिः पुण्यं च लभेतात्राघमर्षणं । कुशपवित्रपाणेर्मौनिनो भोजनेनाघमर्षणजन्यपुण्यं भवतीत्
यर्थः । अत्र मौनं नित्यं । स्नास्यतो वरुणस्तेजो जुह्वतोग्निः श्रियं हरेत् । भुंजानस्य यमस्त्वायुस्तस्मान्न व्याहरेत्त्रि
षु । इति तदकरणे निष्टश्रवणात् । तथा च पारस्करः । एकं संवत्सरं ये तु अन्नं मौनेन भुंजते । युगकोटिसह
स्रं तु स्वर्गलोकनिवासिनः । यदीच्छेत्सर्वपापानि हंतुं निरवशेषतः । मौनेनान्नं समश्नीयाद्व्रतात्पाशिरसाश्रये
दित्यादि फलश्रवणात्काम्यमपि । भविष्ये । न मुक्तकेशो भोक्तव्यं न नग्नः स्नानमाचरेत् । स्रष्टव्यं नैव नग्नेन
न चोच्छिष्टस्तु संविशेत् । धर्मप्रदीपे । अस्पृश्यस्पर्शने स्नायाद्यदा भुंक्ते गृहाश्रमी । अकामतस्त्रिरात्रं स्यात्
द्वात्रं कामतश्चरेदिति । अस्नात्वेति शेषः । तथा हारीतः । आहारं च रहः कुर्यान्निहारं चैव सर्वतः । संदृश्यते

२२२ स्त्रियागुप्तैः प्रकाशेर्भुज्यते स्त्रिया । आचारचिंतामणौ । भाजनेषु पवित्रेषु कांस्यरूप्यमयेषु च । शंखपत्रपुटे चैव सप्र १८
222 न मृत्ताम्रायसेषु च । सप्तपत्राण्याह शातातपः । कदलीमधूकाम्रपलाशपिप्पलजंबूप्रभृतिपत्रपुटानि शस्तानि ।
दिवोदासे । कदलीगर्भेषु नाश्नीयात् । तथा । करंजपिप्पलवटस्थलकुंभार्कतिंदुकाः । एषां पत्रेषु नाश्नीयात्को
विदारकदंबयोः । नृसिंहाह्निके । विपर्यस्तेषु पत्रेषु तिर्यग्दत्तेषु वा सृजे । शूद्रोपि त्रसपत्रेषु शूद्रस्पृष्टे तदश्नुते ।
कंटकैः सेविते पत्रे तथा वेणुदलेन च । न भुंजीतेति शेषः । पैठीनसिः । सौवर्णे राजते ताम्रे पद्मपत्रपलाश
योः । भोजने भोजने चैव त्रिरात्रफलमश्नुते । ताम्रे भोजनं यतिविषयं । यथाह वृद्धमनुः । ताम्रपात्रे न भुंजीत
भिन्नकांस्ये मलाविले । पलाशपद्मपत्रेषु गृही भुक्त्वैंदवं चरेत् । ब्रह्मचारी यतिश्चैव भुक्त्वा चांद्रायणं लभेत् ।
पलाशोत्र वल्लीपलाशः स्तत्र गृहि भोजननिषेधः । स्मृतिसारोक्तः । वल्लीपलाशपत्रेषु स्थलजे पौष्करे तथा । गृ
हस्थस्तु न चाश्नीयाद्भुक्त्वा चांद्रायणं चरेत् । इति स्मृतिरत्नावली । स्थलज इति विशेषनिर्देशाज्जलजे भोजन
मदुष्टं । हारीतः । न कार्ष्णायसे न मृत्पात्रे न भिन्ने नावकीर्णे । भुंजीतेति शेषः । कार्ष्णायसे लोहपात्रे । भिन्ने स्फु
टिते । अवकीर्णे शूद्रादिभोजनेनापवित्रीकृते । पैठीनसिः । ताम्ररजतसुवर्णानुकाश्मस्फाटिकानां न भिन्न
दोषः । स्मृतिसारे । करे च कर्परे भूर्जे आयसे ताम्रभाजने । पद्मपत्रे न भुंजीत गृहीएवधन

त्यात् । मृण्मये पर्णपृष्ठे वा आयसे कार्पासे तथा । नाश्नीयान्न पिके चैव न करेण तथासने । तथा । मृण्म
ये पर्णपृष्ठे वा कार्पासे ताम्रभाजने । नाश्नीयात्कंचुकी विप्रो नो ह्यभीवेष्टनपि संवृतः । तथा । करे च कर्पटे चैव
आयसे ताम्रभाजने । यतयो हि न लिप्यंति लिप्यंति गृहमेधिनः । लिप्यंते पापेनेति शेषः । एक एव तु यो भुंक्ते विम
ले कांस्यभाजने । चत्वारस्तस्य वर्धन्ते आयुः प्रज्ञा यशो बलं । तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनं । यतिश्च
ब्रह्मचारी च विधवा च विवर्जयेत् । अत्रिः । सौवर्णायसताम्रेषु कांस्यरूप्यमयेषु च । भुंजान्नि तु न लिप्येत दुष्ये
ताप्य परिग्रहात् । स्कांदे । ऐश्वरं वर्जयेत्पत्रं ब्रह्मविष्णोरनुत्तमं । सर्वं पुण्यमवाप्नोति शेषपत्रेषु भोजने । ऐश्वरपत्रभो ये दंतरं । तापा
जननिषेधः शूद्रविषयः । पाद्मे कार्तिकमाहात्म्ये नारदशौनकसंवादे । मध्यमं मैश्वरं पत्रं वर्जयेद्ब्राह्मणोत्तरः ।
कपिलायाः पयः पीत्वा भुक्त्वा पत्रे तथैश्वरे । ब्राह्मण्यं च पदा स्पृष्ट्वा शूद्रो नरकमृच्छति । स्कांदे । ब्रह्मा एषः स्मृतः
साक्षात्पालाशः सर्वकामदः । मध्यमं वर्जितं पत्रं शूद्रस्य मुनिसत्तम । भुंजन्नरकमाप्नोति यावदिंद्राश्चतुर्दश । अ
त्र विशेषनिषेधः शिष्टाभ्यनुज्ञाफल इति न्यायेन शूद्रनिषेधो द्विजाते मध्यपत्रभोजने विधिरिति प्रतीयते ।
तथा याज्ञवल्क्यः । पलाशे मध्यमे पत्रे स्वर्णारोप्ये तथैव च । यः करोत्यशनं तस्य प्राजापत्यं दिने दिने । इति द्वि
जातिपरं । पारिजाते । आसने पादमारोप्य यो भुंक्ते ब्राह्मणः क्वचित् । मुखेन चान्नमश्नाति तुल्यं गोमांसभक्षणं ।

मुखेन गवामिवेत्यर्थः। बौधायनः। भोजनं हवनं दानमुपहारः प्रतिग्रहः। बहिर्जानु न कार्याणि तद्वदाचमनं स्मृ-
तं। हारीतः। मार्जनार्चनबलिकर्मभोजनानि देवतीर्थेन कुर्यात्। तत्रापि दक्षिणकरेण। यथाह मनुः।
न पिबेन्न च भुंजीत द्विजः सव्येन पाणिना। नैकहस्तेन च जलं शूद्रेणावर्जितं पिबेत्। एकहस्तेन सव्यहस्तेन।
शूद्रेणावर्जितं हस्ते दीयमानं। तथा। अप्येकपंक्त्यां नाश्नीयात्संवृतः स्वजनैरपि। को हि जानाति किं कस्य
प्रच्छन्नं पातकं महत्। भस्मस्तंभजलद्वारमार्गैः पंक्तिं च भेदयेत्। अंगिराः। अग्निना भस्मना वापि स्तंभेनापि
जलेन वा। द्वारेणैव तु मार्गेण पंक्तिभेदो विधीयते। विष्णुपुराणे। नासंदीसंस्थिते पात्रे भुंजीतेति शेषः। आ-
संदी मंचिका। प्रथमावश्यके निषेधः प्राणाहुतिमात्रपरः। पंचग्रासांतभुक्त्वादौ क्वचिद्देशमनिसंकटे।
पात्रमुद्धृत्य भोक्तव्यं भोजनं संकराद्भयादिति। व्यासोक्तेः। एकपंक्त्युपविष्टानां दुष्कृतं यद्दुरात्मनां। स-
र्वेषां तत्समं तावद्यावत्पंक्तिर्न भिद्यते। धर्मप्रदीपे अंगिराः। उच्छिष्टोच्छिष्टेन यः स्पृष्टः शुना शूद्रेण वा
द्विजः। उपोष्य रजनीमेकां पंचगव्येन शुध्यति। उच्छिष्टेन शूद्रेण उच्छिष्टः स्पृष्टः। बृहस्पतिः। उ-
च्छिष्टोच्छिष्टसंस्पर्शः कदाचिदुपजायते। वर्णानां तु सजातीनामुपस्पृश्य ततः शुचिः। उच्छि-
ष्टस्य उच्छिष्टेन संस्पर्शः इत्यर्थः। उपस्पृश्य आचम्य इदं चाकामतः स्पर्शविषयं कदाचिदिति

अवगात् । कामतः स्पर्शे आपस्तंबः । विप्रो विप्रेण संस्पृष्ट उच्छिष्टेन कदाचन । स्नात्वा तेन विशुद्धिः स्यादापस्तंबोऽब्र
वीदिदं । क्षत्रियेण यदा स्पृष्ट उच्छिष्टस्तु कथंचन । स्नानं जपस्तु त्रैकाल्यं दिनस्यांते पयः पिबेत् । अत्र सर्वत्र द्वयो
रुच्छिष्टत्वं ज्ञेयं । ब्रह्मपुराणे । चतुरस्रं त्रिकोणं च वर्तुलं चार्द्धचंद्रकं । कर्त्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलं ।
शंखः । चतुष्कोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य च । मंडलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतं । तथा । अकृ
त्वा मंडलं ये तु भुंजते पर्ययोनयः । तेषां तु यक्षरक्षांसि हरंत्यन्नस्य तद्बलं । ब्रह्मेंद्ररुद्रचंद्रार्कवसवो मंडलांतरे । नि
वेदितं नरैरन्नं प्रतिगृह्णंति नान्यथेति । ब्रह्मादिवचनानुरोधेनापि मंडलमावश्यकं । अर्द्धचंद्राभ्युक्षणयोः शूद्रस्य
विकल्पः । पक्षांतरमाह । तत्र स्कंदपुराणे । प्रदद्याद्भुवः पतये भुवनस्य पतये नमः । भूतानां पतये स्वाहेत्युक्त्वा भू
मौ बलित्रयं । सकृच्चाप उपस्पृश्य प्राणाद्याहुतिपंचकं । दद्याज्जठरकुंडादौ दर्भपाणिः प्रसन्नधीः । जठरमेव कुं
डं तस्मिन् जठरकुंडादौ इत्यत्र अग्र्यादेशं कृत्वा यलोपे च पुनः संधिरार्षः । पादहरणेवा लोप इतिवत् । कुंडादौ दर्भ
पाणिः प्रसन्नधीः । जठरकुंडे आदावित्यन्वयः । व्यासः । भाजनात्किंचिदन्नाग्रं धर्मराजाय वै बलिं । ततो दत्वाय
चित्राय चित्रगुप्ताय चक्रमात् । दत्वा तु चित्रगुप्ताय हस्तं प्रक्षालयेद्द्विजः । अप्रक्षालितकरो भुंक्ते द्विजश्चांद्रायणं च
रेत् । इति प्राणांतरविषयं प्रतीयते । मनुः । पूजयेदशनं नित्यमद्याच्चैवमकुत्सयेत् । दृष्ट्वा हृष्येत्प्रसीदेच्च प्रणमे

२२४ 224

च्चैव सर्वदा । दर्शनमन्नस्य । ब्रह्मपुराणे । वामेन पाणिना पात्रं गृहीत्वा भुवि संस्थितं । तेजोसीति जपन्नान्नं प्रणामे
दमृतं च तत् । विष्णुपुराणे । अन्नं प्रशस्तं पथ्यं च प्रोक्षितं प्रोक्षणोदकैः । प्रशस्तरत्नपाणिस्तु भुंजीत प्रयतो गृही ।
प्रशस्तरत्नं गारुडादिमणिः । गोभिलः । ऋतं त्वा सत्येन परिषिंचामीति सायं । सत्यं त्वर्तेन परिषिंचामीति अ॰तं॰ पा॰ २
प्रातः एतौ प्रोक्षणमंत्रौ लिंगात् । वृद्धशातातपः । परिधानमपोशानं पूर्वमाच्छादनं परं । भवत्यन्नमनग्नं हि
सोत्तरीयं तथामृतं । पूर्वमपोशानं परिधानं तेनान्नमनग्नं परमपोशानमाच्छादनं तेन सोत्तरीयं उभाभ्याममृतं
भवतीत्यर्थः । ब्रह्मपुराणे । अपोशानं च गृह्णीयात्सर्वतीर्थमयं च तत् । अमृतोपस्तरणमसीति विष्णोरन्नमयस्य
च । अपोपस्तरणार्थं तु प्राश्य तोयामृतं सकृत् । अमृतोपस्तरणमसि स्वाहेत्यंते न तद्ददिति । सन्न्यासपद्धतौ ।
तत्र सशब्दपाननिषेधात्तूष्णीमेव पेयं । शब्देनापोशानं पीत्वा शब्देन घृतपायसं । शब्देन यः पयः पीत्वा सुरापा
नसमं स्मृतं । पुलस्त्यः । अम्बु हस्तेन चादाय कुर्यान्नैवं प्रदक्षिणं । हिंसितं तत्पिशाचैस्तु अभोज्यं मनुरब्रवीत् ।
हृतं चान्यमनस्त्वं तस्य याति दुरात्मनः । तथा । अन्नं ब्रह्मा रसो विष्णुर्भोक्ता देवो महेश्वरः । एवं ध्यात्वा तु यो
भुंक्ते अन्नदोषैर्न लिप्यते । वसिष्ठः । प्राङ्मुखोन्नानि भुंजीत पंचार्द्रो वाग्यतः शुचिः । आर्द्रपादस्तु भुंजीत श
तं वर्षाणि जीवति । पुनः स एव । प्राङ्मुखोन्नानि भुंजीत तूष्णीं साङ्गुष्ठं ग्रासं ग्रसेन्न मुखशब्दं कुर्यात् । स्वन्ना

ऊर्यो १

नीति विशेषाभिधानान्नत्वं कृत्वादौ दिग्नियमः। तथा च। पञ्चार्द्रो भोजनं प्राङ्मुखो मौनमास्थितः। वाङ्म
नःकायजैर्दोषैर्मुच्यते नात्र संशयः। द्वौ हस्तौ द्वौ च पादौ च मुखं चैव तु पंचमं। भोजनं च तथा स्मृतिः पञ्चार्द्रो भोज
नं चरेत्। पंचार्द्रत्वे हस्तपादयोरेकैकत्वमिति। मनुः। आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः। श्रियं प्र
त्यङ्मुखो भुंक्ते ऋतं भुंक्ते उदङ्मुखः। इच्छन्निति शेषः। ऋतं सत्यं। दक्षिणाभिमुखभोजनं मृतमातृविषयं।
दक्षिणाभिमुखो भुंजीतानायुष्यं त्वेवं मुखभोजनं मातुरित्युपदिशंतीत्यापस्तंबवचनात्। मनुना यशःकाम
(८) स्य तद्विधानात्। यत्तु। यद्वेष्टितशिरा भुंक्ते यो भुंक्ते दक्षिणामुखः। वामपादे करं न्यस्य तद्वै रक्षांसि भुंजते। इति
दक्षिणमुखनिषेधो जीवन्मातृविषयः। अन्यथा मनुवाक्येन विरोधः स्यात्। तथा। पुत्रवान् स्वगृहे नित्यं नाश्नी
यादुत्तरामुखः। सोमवारे तथाभ्यंगं वर्जनीयं सदा बुधैः। वृद्धपराशरः। प्राङ्मुखादिक्रमेणान्नं आयुःकी
र्त्तिः श्रियं यशः। विदिङ्मुखो न चाश्नीयात्तद्रक्षंति राक्षसाः। कमंडलुर्दक्षिणे निधातव्यः। यथोक्तं रामा
र्चनचंद्रिकायां। दक्षिणे यः परित्यज्य वामे नीरं निधापयेत्। अभोज्यं तद्भवेदन्नं पानीयं च सुरासमं। [illegible] ग्यो
पनिषदि सायं प्रथममाहुतिमिति आहुतिर्धर्मप्रज्ञप्तिलोकगृहीमेरिति। लौकिकं त्वं चानामिकांगुष्ठादि
गृहीतं योग्यमिति तद्भाष्यकारः। पराशरः। वामहस्ते धृते पात्रे दक्षिणे वामसंस्थिते। स्वाहांते प्राणा

२२५ दैवश्च स्वनाम्ना वा मुनिः पुमान् । जितात्मा यो जितषट् यज्ञाहुत्या हुतं चरेत् । जिह्वाद्दन्तान्प्रसेदन्नं दन्तैश्चैवन संस्पृशेत् ।
225 दशनैः स्पृष्टमात्रेण पुनराचमनं चरेत् । प्राणेभ्य स्वाहा पंचभ्यः स्वाहा प्रणवसंयुताः । पंचाहुतीश्च जुहुयात्त्वलया — प्राणाग्नि
ग्नि समेषु च । प्राणेभ्यः प्राणादिभ्यः । तदुक्तं तेनैव । प्राणेन तृप्ते हि तृप्यति नित्यं भूतादि चक्षुषः । व्यानेन तृप्ते च
तृप्यति श्रोत्रं द्रक ककुभस्तथा । अपानेन तृप्ते तृप्यति वह्निर्वास्म समयस्तथा । समानेन तृप्ते तृप्यति मनः पर्जन्य विद्युतः ।
उदानेन तृप्ते तृप्येते वाय्वाकाशौ च सर्वदा । तृप्तेष्वेतेषु तृप्तं स्यात् जगत्सदसदात्मकं । गोभिलः । प्राणाय स्वाहे
ति गार्हपत्यमेवानेन जुहोति । अपानाय स्वाहेत्यन्वाहार्यम् । पवनमेवानेन जुहोति । व्यानाय स्वाहेत्यावस
थ्यमेवानेन जुहोति । उदानाय स्वाहेति मध्यमेवानेन जुहोति । समानाय स्वाहेत्याहवनीयमेवानेन जुहोति
आहुतित्वाहृत्त च्छेदमंतरेण भक्ष्यः । आहुतिव[illegible]नदन्तेन छेद्याः । समलानि तिरेदिति हारीतवचनात् । तथा ।
अन्नं दन्तैर्न गृह्णीयाद्यावत्तोयं न संपिबेत् । अपित्वा मर्दितं चान्नं मभक्षणात्समं स्मृतं । आश्वमेधिके । यथार
सं न जानाति जिह्वा प्राणाहुतौ नृप । तथा समाहितं कुर्यात्प्राणाहुतिमतंद्रितः । अंगुलिनियममाह वृद्धपराशरः ।
तर्जनीमध्यमांगुष्ठलग्ना प्राणस्य चाहुतिः । मध्यमानामिकांगुष्ठेरपानायाहुतिः स्मृता । कनिष्ठानामिकां
गुष्ठैर्व्यानाय परिकीर्तिता । तर्जनीं तु वहिः कृत्वा उदाने जुहुयाद्बुधः । सर्वैः समाने हृद्यत्र आहुतिः सर्वमानतः ।

जलं पीत्वा चतुष्पंक्ति रेचयेच्च शनैः शनैः। ततोन्यदन्नमश्नीयात्पूरणाय्योदरस्य च। वाग्यतोन्यस्तपात्रोपि ग्रासान्
श्चवपिद्द्विजः। विष्णुपुराणे। पंचग्रासान्महामौनी प्राणाद्याप्यायनाय तु। महामौनमितिसर्वपाशादनिवृत्तिः।
तथोक्तं। मौनव्रतं महाकष्टं हुंकारेण विनश्यति। तथा सति महादोषस्तस्मात्तत्परिवर्जयेत्। तथा। मौनेन यस्तु
भुंजीत हुं हुं वदति मोहतः। सुरापानेन तत्तुल्यमित्येवं मनुरब्रवीत्। इति सामान्यतो मौनभोजने हुंकारनिषेधो
पीति। सर्वपाप्राणाहुतिमात्रके प्रतिभाति। कथं मौनेन चाश्नीयात्प्राणादिग्रासपंचकं। अन्नाद्यं भक्षयेन्नित्यं
वाग्यतोन्नमकुत्सयन्निति पुराणोक्तेः। अत्र विशेषमाह स्मृतिः। यवीयान्स पिता चैव भुक्त्वा श्राद्धिकभोजनं।
प्राणाग्निहोत्रादन्यत्र नासौ मौनं समाचरेत्। सर्वत्रैव तु यो भुंक्ते मौनेनैव तु भोजनं। स पापो भ्रातरं हंति संततिं
च चिरं भुवि। पराशरः। विधिं प्राणाग्निहोत्रस्य ये द्विजा नैव जानते। अपानेन तु भुंजंते तेषां मुखमपानवत्।
यो ज्ञात्वा तु विधिं भुंक्ते यथोक्तमिदमाचरन्। इहामुत्र च तस्यास्त्वं ब्रह्मभूयाय कल्पते। ग्रासनियममाहापस्तंबः।
अष्टौ ग्रासान्मुनेर्भैक्ष्यं षोडशारण्यवासिनः। द्वाविंशतिं गृहस्थस्यास्त्वमितं ब्रह्मचारिणः। इत्ययं नियमो दृष्टा
र्थः। दृष्टार्थस्यानिर्यंतुमशक्यत्वात्। अनड्वान्ब्रह्मचारी च आहिताग्निश्च यो द्विजः। अश्नंत एव सिद्ध्यंति
नैषां सिद्धिरनश्नतां। इति तेषां उपवासरूपव्रतनिषेधं बोधयति। उपवासव्रते प्राणाहुतिमात्रम्।

गृहस्थो ब्रह्मचारी वा यो नश्नंस्तु तपश्चरेत्। प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः। इति देवलोक्तेः। निरग्निना तु प्रा
णाहुतीर्विहाय व्रतादिकं कर्तव्यं। यदुक्तं। अनन्नमश्नन्ति ये विप्रास्तेषां श्रेयो विधीयते। व्रतोपवासनियमैर्गुतादानैस्तथैव
च। अत्र साग्नेरपि प्राणाहुतावन्नाभावेन दोषाय। तथा स एवमाह। अहरहः सायं प्रातर्जुहुयात्। अद्भिर्वा सायं जुहुया
दिति। सायं पुनर्भोजनसामग्र्यभावेऽद्भिरेव प्राणाग्निहोत्रं संपाद्यं जुहुयादिति पदोपादानात् ब्राह्मणबलिकर्मादी
नां निवृत्तिः। अपोशानस्याप्यन्नानग्नीनग्नीकरणार्थत्वान्निवृत्तिः। तदेतत्साग्निनिरग्निसाधारणं। प्राणाग्नि
होत्रं नित्यमिति सिद्धं सामान्ये बाधकाभावात्। प्राणाग्निहोत्रमंत्रांस्तु निरुद्धे भोजने जपेत्। त्रेताग्निहोममंत्रांश्च द्र
व्यालाभे तथा जपेत्। इति पाठः। अत एवैकादश्यां व्रतादावन्नभोजनस्यापि निषेधत्वादाहिताग्नेश्च प्राणाहुतेराव
श्यकत्वाज्जलादिना तन्निवृत्तिः कार्या। आसेचनान्नस्य निक्षेपो मंत्रैः प्राणादिपंचकं। भोजनं तद्द्विविज्ञेयं तत्रैव नियमः
स्मृतः। इति हारीतोक्तेः। प्राणाहुतो घृताभावे पश्चाद्भुंजीत नो घृतं। धर्मप्रदीपे। घृतहीनं तु यो भुंक्ते न रस्त्वा
हुति पंचकं। पश्चाद्घृतेन यो भुंक्ते द्विजश्चान्द्रायणं चरेत्। बृहत्पराशरः। न स्पृशेद्वामहस्तेन भुंजानोऽन्नं कदाचन।
न पादौ न शिरो वस्तिं न पद्भ्यां भाजनं स्पृशेत्। विष्णुः। नाश्नीयाद्भार्यया सार्धं नाकाशे न तथोत्थितः। आकाशे मंचि
कादौ। अस्यापवादमाह मार्कंडेयः। न्यस्तपात्रो न भुंजीत पंचग्रासान्महामुने। शेषमुद्धृत्य भोक्तव्यमिति। उद्धृत

यंत्रावपि निषिद्धमित्यर्थः। गृहस्थस्य भोजनद्वयमाह मनुः। सायंप्रातर्गृहस्थानामशनं देवनिर्मितं। नांतरा
भोजनं कुर्यादग्निहोत्रसमो विधिः। द्वौ रात्रौ द्विर्दिवा भोजननिषेधः। न तु काम्यता नन्तु तीयमथाश्नीयादिति। म
नुनैवाशनांतरनिषेधात्। अग्निहोत्रसाम्यकथनात्। एतत्कालद्वयेऽपि पंचाहुतयो न निवर्त्तंते बाधकाभावात्। अभ्य
वहरणालंभनापोशानोच्छिष्टप्रतिपत्तीनां चानर्थक्यत्वादनिवृत्तिः। क्रियामुख्यत्वे प्रतिनिधिना भवितव्यं। तस्माद्द्रव्याप्या
द्द्रव्यान्वये न निवर्त्तंते इति। अंतराभोजननिषेधोऽयं फलमूलादन्यत्र। तथाचापस्तंबः। दिवा च न भुंजीयादन्यत्र फ
लमूलेभ्यः। चकारः पुनरर्थे। छंदोगपरिशिष्टे। मुनिभिर्द्विरशनं प्रोक्तं विप्राणां मर्त्यवासिनां। अहनि च तमस्वि
न्यां सार्धप्रथमयामतः। रात्रौ सार्धप्रथमयामाभ्यंतरे द्वितीयमशनमित्यर्थः। तथा तत्रैव। नाश्नीयादजीर्णे नार्ध
रात्रेण मध्याह्ने न संध्ययोः। नार्द्रवासा नैकवासा न नग्नो नोत्कटो न भिन्नासनगतो न शयनगतो न भिन्नभाजने नोत्सं
गे न भुवि न पाणौ पाणिना लवणं यद्द्यान्न तदश्नीयात्। निवारयन्निर्भर्त्सयन्। नैकोऽपि नोद्धृतस्नेहं। न दिवा धा
ना न रात्रौ तिलसंबद्धं न दधि शक्तून्न कोविदारवटपिप्पलशणशाकं नाहुत्वा नादत्वा नानार्द्रकरमुखो नो
धृ. २८ च्छिष्टो घृतमादद्यान्न चंद्रतारकाः निरीक्षेत न मूर्धानं संस्पृशेत्। न ब्रह्म कीर्त्तयेत्। अर्धरात्रे महानिशा
यां। तल्लक्षणं प्रागुक्तं। पूर्वापरार्धयामाभ्यां दिनवत्कार्यमाचरेत्। महानिशा तु विज्ञेया मध्यमं प्रहरद्वयं। मह

२२५ निशार्द्धं प्रथमप्रहरानंतरं मुहूर्त्तचतुष्टयमिति कल्पतरुः। संध्ययो रुदयास्तमनसंधिकालमात्रयोः। अर्धास्तम
227 याद्गूर्ध्वकालो व्यक्तग्रहणावधिः। संध्याचाव्यक्तनक्षत्रा यावदभ्युदयो रवेः। जपः कालः परो ज्ञेयो भोजनं संगवे त्यजेदिति।
पुराणसमुच्चयोक्तेः। उत्कटः उत्कटासनः। उत्संगो उत्संगाधृतभाजने। अद्भुतले हे तिलखलादि। दधिशक्तूनित्यत्रा
यो ४= पि रात्राविति अन्वयः। विष्णुपुराणे। अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसं। लवणाम्लौ तथा मध्ये कटुतिक्तादिकं ततः।
प्राग्द्रवं पुरुषोऽश्नीयान्मध्ये च कठिनाशनं। अंते पुनर्द्रवाशी च बलारोग्ये न मुंचति। दिवोदासे। माक्षिकं फाणितं शाकं
गोरसं लवणं घृतं। हस्तदत्तानि भुक्त्वा च दिनमेकमभोजनं। तस्माद्दंतरिते नैव पर्णेन च तृणेन वा। प्रदद्यान्न तु हस्तेन
नायसेन कथंचन। काशीखंडे। दिवाकपित्थच्छायासु रात्रौ च दधिसक्तुषु। धात्रीफलेषु सप्तम्यामलक्ष्मीर्वसते सदा।
ब्रह्मपुराणे। अपि प्राणसमये न रात्रौ भक्षयेद्दधि। मधुपर्कप्रदानं च वर्जयित्वा तु कामतः। दिवाधानासु वसति रात्रौ
च दधिसक्तुषु। अलक्ष्मीः कोविदारे च नित्यमेव कृतालया। मनुः। सर्वं च तिलसंबद्धं नाद्यादस्तमिते रवौ। न च नग्नः श
यीतेह न चोच्छिष्टः क्वचिद्व्रजेत्। भारते। पिप्पलं च वटं चैव शणशाकं तथैव च। उदुम्बरं च नाश्नीयाद्भूत्यर्थी पुरुषः स
दा। अत्रिः। घृतं वा यदि वा तैलं ब्राह्मणो नखनिःसृतं। न भुंजीत अभोज्यत्वात् भुक्त्वा पादं समाचरेत्। पादं पादकृच्छ्रं।
मनुः। दर्शादियं अष्टकान्नं च समलं अंजनानि च। अपक्वं तैलपक्वं च यो दद्यादातुमिच्छति। सन्नूणाम्...

नोगुरुतल्पगः। भविष्ये पि। अभोज्यं ब्राह्मणस्यान्नं वृषलेन निमंत्रितं। तथैव वृषलस्यान्नं ब्राह्मणेन निमंत्रितं।
तथा। अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंचितं। अस्नेहा अपि गोधूमयवगोरसविक्रियाः। मनुः। यत्किंचित्स्नेहसंयु
क्तं भक्ष्यं भोज्यमगर्हितं। तत्पर्युषितमप्याद्यं हविः शेषं च यद्भवेत्। चिरस्थितमपि त्वाद्यं स्नेहाक्तं तु द्विजातिभिः। यव
गोधूमजं सर्वं पयसश्चैव विक्रिया। यदपि पर्युषितत्वे नाभोज्यमोदनादि स्नेहाक्तं सत्तदपि आपदि भोज्यमेवेति। वा
चस्पतिः। वसिष्ठः। भार्यया सह नाश्नीयाद वीर्यवदपत्यो भवतीति। अंगिराः। ब्राह्मणो यः सह स्त्रीया दुच्छिष्टं वा क
थंचन। कथंचनेति वचनात्। अज्ञानादुच्छिष्टाशने आपदि वा न दोष इति ज्ञेयं। न तस्य दोषं मन्यंते नित्यमेव मनीषि
णः। उच्छिष्टमितरस्त्रीणां योश्नीयाद्ब्राह्मणः क्वचित्। प्रायश्चित्ती स विज्ञेयः संकीर्णो मूढचेतनः। ब्राह्मणीह प
तिसवर्णा। इतरा पत्यसवर्णा। तथा। कदाचित्सवर्णया पत्न्या सह भोजने च न दोषः। ब्रह्मपुराणे। ब्राह्मणो भा
र्यया सार्धं क्वचिद्भुंजीत वर्त्मनि। असवर्णस्त्रिया सार्धं भुक्त्वा पततितत्क्षणात्। सहभोजनमत्रैकदा भोजनं। एक
पात्रभोजनमिति केचित्। पर्वणीति पाठे। पर्वणि विवाहादिमंगले। तत्र पत्न्या सहैकत्र भोजनेपि न दोषः। स
माचारेपि तथैव। ब्राह्मणीपरं सवर्णोपलक्षकं। असवर्णेतु षसंहारात्। मनुः। न भार्यादर्शनेश्नीयान्नैनामी
क्षेत चाश्नतीं। उच्छिष्टं तु गुरुर्व्यतिरिक्तं स्वस्य परस्य च वर्जयेत्। तथा मदनपारिजाते वसिष्ठः। उच्छिष्टं तु

२२८ गुरोरभोज्यं स्वमुच्छिष्टमुच्छिष्टोपहतं [illegible] कं चेति पित्राद्युच्छिष्टभोजने पि न दोषः। पि
220 तुर्मातुश्च ज्येष्ठस्य भ्रातुरुच्छिष्टं भोज्यमित्यापस्तंबवचनात्। वृद्धव्यासः। ब्राह्मणस्य यदुच्छिष्टमश्नात्यज्ञा
नतो द्विजः। अहोरात्रेण गायत्र्या जपं कृत्वा विशुध्यति। क्षत्रियाणां यदोच्छिष्टमश्नात्यज्ञानतो द्विजः। त्रिरात्रेण
भवेच्छुद्धिर्यथा क्षत्रे तथा विशि। देवलः। न भुंजीत घृतं नित्यं गृहस्थो भोजनं स्वयं। पवित्रमथ हृद्यं च सर्पिः
राहुरघापहं। स्वयमिति वचनात् वैद्यादिप्रतिषिद्धे आपदि वा न दोषः। ब्रह्मपुराणे। यस्तु पाणितले भुंक्ते य
स्तु फूत्कारसंयुतः। प्रसृतांगुलिभिर्यस्तु तस्य गोमांसवच्च तत्। पृथक्कृतांगुलिभिरिति लौकिकभोजने निषे
धः। प्राणाहुतौ तु तद्विधानात्। आचारचिंतामणौ। करेण तु पिबेत्तोयं यावन्मांसं न भक्षयेत्। मांसलिप्तकरे
तोयं तुल्यं गोमांसवच्च तत्। तथा। पीतोच्छिष्टं तु यत्तोयं ब्राह्मणस्तु पिबेद्यदि। अदत्वा भुवि तत्तोयं पीत्वा चांद्राय
णं चरेत्। यदि पिबेत्तदा किंचिद्भूमावास्राव्य पिबेदित्यर्थः। तोयग्रहणं दुग्धादौ न दोषः। आश्वमेधिके। पानी
यानि पिबेद्येन तत्पात्रं द्विजसत्तम। अनुच्छिष्टं भवेत्तावद्यावद्भूमौ न निक्षिपेत्। शंखः। पीतावशेषितं पीत्वा पानीयं
ब्राह्मणः क्वचित्। त्रिरात्रं तु व्रतं कुर्याद्वामहस्तेन वा पुनः। एतच्च ब्राह्मणस्य ब्राह्मणपीतावशेषितजलपाने। शूद्रा
द्युच्छिष्टपाने चांद्रायणादिना शुद्धिः। मदनपारिजाते। भुक्त्वा च सह विप्रेण प्राजापत्येन शुध्यति। शूद्रभुजा सह

भुक्त्वान्नं तप्तकृच्छ्रेण शुद्ध्यति । वैश्येन सह भुक्त्वान्नमतिकृच्छ्रेण शुद्ध्यति । शूद्रेण सह भुक्त्वान्नं चांद्रायण
मथाचरेत् । सहभोजनमेकपात्रभोजनं । तथा । सर्पिर्भुक्त्वा च यो विप्रस्ताम्रपात्रे पिबेज्जलं । जलपात्रे च यो भुं
क्ते आसुरं तत्प्रकीर्त्तितं । दक्षः । वामहस्तस्थिते दर्भे दक्षिणेनोदकं पिबेत् । रक्तपानं भवेत्तस्य पीत्वा चांद्रायणं
चरेत् । तथा । नाजीर्णे भोजनं कुर्यात्स्याच्च नातिबुभुक्षितः । हस्त्यश्वरथयानोष्ट्रप्रासादस्थो न भक्षयेत् ।
यानं नौकादि । प्रासादो दारुगृहं । तथा च श्रीदत्ताचारादर्शे आपस्तंबः । न नावि भुंजीत तथा प्रासादे कृतभूमौ
तु भुंजीत । प्रासादो दारुमयं तत्र इत्यर्थः । कृतभूमौ मृदादिप्रक्षेपेण संपादितभूमौ । नाविप्रासादे च भुंजी
तेत्यर्थः । आचारचिंतामणौ । न श्मशानांतरगतो देवालयगतोपि वा । शयनस्थो न भुंजीत न पाणिस्थं
न चासने । तथा । संध्ययोर्न च मध्याह्ने नार्द्धरात्रे कदाचन । नार्द्रवासा नार्द्रशिरा न चायज्ञोपवीतवान् । न प्र
सारितपादस्तु पादारोपितपाणिपात् । नावसक्थिकसंस्थस्तु न च पर्यंकिकास्थितः । न वेष्टितशिरश्चा
पि नोत्संगेकृतभाजनः । नैकवस्त्रो दुष्टमध्ये सोपानत्कः सपादुकः । न चर्मोपरि संस्थश्च चर्मवेष्टितपार्श्व
वान् । अन्नस्य जन्म कालुष्यं दुर्वाक्यं च न कुत्सयेत् । ग्रासशेषं तु नाश्नीयात्पीतशेषं पिबेन्न तु । शाकमूल
फलेक्ष्वादि दंतच्छेदैर्न भक्षयेत् । तिलकल्कं जलं क्षीरं दधिक्षौद्रघृतानि च । न त्यजेदर्द्धजग्धानि सक्तुंश्चा

२२९ थकदाचन। चर्मवेष्टितपार्श्ववान्। सन्नाहादिवेष्टितगात्रः। जन्मनिंदितदेशोत्पन्नः। कालुष्यंमलसंबंधः।
229 दुष्टपक्तिः दुष्टपाकः। पीतशेषं यत्पानपात्रे सान्नात्पीतावशिष्टं नधारापीतशेषमपि। धारुष्णसंततधारेत्यु
क्तेः। दन्तच्छेदः वहिर्दन्तः। मुखाभ्यंतरे तद्विधानात्। भल्लपाशक्नो वसिष्ठः। पानीयंपायसंसक्तून्दधि
सर्पिर्मधून्यपि। निरस्यशेषमेतेषांनप्रदेयंचकस्यचित्। पायसं आमिक्षा। मनुः। ननिःशेषभुक्स्याद
न्यत्र दधिमधुसर्पिःपयःशाकेभ्यः। पुलस्त्योपि। भोजनेतु ननिःशेषं कुर्यात्प्राज्ञः कथंचन। अन्यत्र द
धिदुग्धाज्यपललक्षीरमध्वपः। भार्याभृतकदासीभ्य उच्छिष्टं शेषयेत्ततः। लघुहारीतः। पयःपाने
पुनर्दानं मांसेनपयसानिशि। दंतच्छेदनमुष्णत्वं सप्तसक्तुषु वर्जयेत्। मांसेन पयसा सहाशनमित्यर्थः।
पराशरः। दुग्धं सलवणं सक्तून्स दुग्धान्निशि सामिषान्। दंतच्छिन्नान्सक्तूञ्जग्ध्वा एकपीतजलान्यपि।
एकैकशो विशुद्ध्यर्थं विप्रश्चांद्रव्रतं चरेत्। वृहन्मनुः। चत्वारीमानि कर्माणि संध्यायां परिवर्जयेत्। आ
हारं मैथुनं निद्रां स्वाध्यायं च तथैव च। आहाराज्जायते रोगो गर्भो रौद्रश्च मैथुनात्। निद्रातो जायते ल
क्ष्मीः स्वाध्यायादायुषः क्षयः। यमः। अश्नाति यो भृत्यजनस्य मध्ये मिष्टान्नमेको रसगंधगृध्नुः।
दीनैः कटाक्षैरभिवीक्ष्यमाणो व्यक्तं विषं हालहलं स भुंक्ते। विष्णुः। नगोब्राह्मणोपरोधेश्नीयान्नराज

व्यसनैः। मनुः। नभुंजीतोद्धृतस्नेहं नातिसौहित्यमाचरेत्। नातिप्रगे नातिसायं नसायं प्रातराशितः।
उद्धृतस्नेहं तिलखल्वादि। अतिप्रगे अतिप्रातः। अतिसायं सायंसमीपेद्विष्काले। तथा। नाहारमुपभुं
जीत तिष्ठन्नाचक्रन्हसन्नपि। अग्रामतोग्रामतो वा सन्निकृष्टेम्ब्नेसति। सन्निकृष्टे संवधतो नामतश्चाकृतो
दक इत्यर्थः। बृहस्पतिः। नस्पृशेद्वामहस्तेन भुंजानोन्नं कदाचन। नपादेन शिरोवस्तिं न पदा भाजनं
स्पृशेत्। वस्तिर्नाभ्यधोदेशः। शिरोवस्तीति समाहारः। ब्रह्मपुराणे। कुर्यात्क्षीरांतमाहारं नचपश्चात्पि
वेद्दधि। पिबेद्दधि इतिपाठे। अधिअधिकं। तेनाल्पक्षीरमाहारांते पेयं। पृजाहि दकारपाठस्तत्रपश्चाद्द
धिनपिबेत् इत्यर्थः। जठरं पूरयेदर्द्धमन्नैर्भागंजलेनच। वायोः संचारणार्थं च चतुर्थमवशेषयेत्। विद्य
मानेन हस्तेन ब्राह्मणो ज्ञानदुर्वलः। तोयं पिबति वक्त्रेण श्वासो जायेत नान्यथा। वक्त्रेणेति हस्तेनानुत्तोल्येत्य
र्थः। तथा। उद्धृत्य वामहस्तेन यत्तोयं पिबति द्विजः। सुरापानेन तत्तुल्यं मनुराह प्रजापतिः। इति वामहस्त
निषेधाद्दक्षिणेन चोद्धृत्य उत्तोल्य पिबेदित्यर्थः। नवामहस्तेनैकेन पिबेद्वक्त्रेण वा जलमिति नारदीयोक्तेः।
वक्त्रेण गवामिवेत्यर्थः। वामकरस्थपात्रेणापि निषेधयति पुलस्त्यः। पीतावशिष्टं करकांस्य यच्चान्यत्पान
भाजनं। दक्षिणेनैव तत्कुर्यान्न वामेन कदाचन। करंकः करकः काचपात्रं वा। स्कांदे। पिबतो यत्पतेत्तो

यं भाजनेमुखनिःसृतं । अभोज्यं तद्भवेदन्नं भोक्ता भुंक्ते च किल्बिषं । शातातपः । अग्रासनोपविष्टस्तु यो भुंक्ते
प्रथमं द्विजः । बहूनां पश्यतां सोज्ञः पंक्त्या हरति किल्बिषं । बौधायनः । भुंजानेषु च विप्रेषु यस्तु पात्रं परित्यजे
त् । भोजने विघ्नकर्त्ता च ब्रह्महा च तथोच्यते । स्मृतिसारे । एकपंक्त्युपविष्टानां द्विजानां सहभोजने । यद्येको
पि त्यजेत्पात्रं नाश्नीयुरितरे जनाः । पात्रत्यागो देशांतरगमनं । अमृतापिधानमसीत्याद्युत्थायाचमनं च । आ
दित्यपुराणे । एकपंक्तेरनुत्थाने मध्ये चेदाचमेत्परः । तदा शेषं विसृज्यैव विप्रः सम्यगुपस्पृशेत् । एकपंक्ति
स्थितानां सर्वेषां भोजने अपरिसमाप्ते इत्यर्थः । तदर्थं मस्मादिभिः पंक्तिभेदः कार्यः । नन्वेतद्बलाद्भोजन
कालेपि पात्रधारणाक्षेपः । अथ वा न यजिहीतैव मापस्तंबेन पात्रे धारणाधारण विकल्पविधानात् ।
इति । यदा पात्रधारणाधारणपूर्वकभोजनमारब्धं तद्विषयं वेदितव्यमिति । कुत्सितं तमवज्ञातमन्नं सं
स्कारवर्जितं । गुरोरपि न भोक्तव्यं भुक्त्वा चांद्रायणं चरेत् । अन्नसंस्कारस्तु तेजोसीत्यादिमंत्रेण भुजनं ।
भारते । विप्राणां भुंजतां चैव यदि दीपो विनश्यति । पाणिभ्यां पात्रमादाय गायत्रीं मनसा जपेत् । पुनर्दीपं
सदृष्ट्वा वै शेषं भुंजीत वै द्विजः । पुनरन्नं न भोक्तव्यं भुक्त्वा कृच्छ्रं समाचरेत् । विप्रपदं त्रिवर्णोपलक्षकं । द्वि
ज इत्युपसंहारात् । शेषं गृहीताशिष्टं पुनर्गृहीतं पुनर्गृहीतमन्नं । तथा । विना दीपेन यो भुंक्ते ब्राह्मणो ज्ञा

नदुर्वलः।भोजनेभोजनेचैवशाजापत्यंसमाचरेत्।भोजनंनाम गुलकं कवलसंयोगः।तेनभोजनेभो
जनेग्रासेग्रासे इत्यर्थः।व्यासः।भुक्तोच्छिष्टात्समादायसर्वस्मात्किंचिदादरात्।उच्छिष्टभागधेयस्य
मोदकंनिर्वपेद्भुवि।किंचित्पात्रेपित्याज्यं।यथा।भुक्त्वापीत्वाचयःकश्चिच्छून्यंपात्रंसमुत्सृजेत्।स
नरःक्षुत्पिपासार्त्तोभवेज्जन्मनिजन्मनि।ब्रह्मपुराणे।भुक्त्वामृतापिधानार्थंपिबेत्तोयंसकृत्सकृत्।ये
नानग्नंभवेदन्नंजीवभुक्तंजगत्त्रये।अत्रैकंसकृत्पदमल्पवाचकं।द्वितीयंएकवारवाचकं।तेनसकृदल्पं
तोयंसकृद्वारमेकंपिबेदित्यर्थः।पराशरः।अर्द्धंपीत्वाचगंडूषमर्धंत्याज्यंमहीतले।रसातलगतानांना
स्तेनक्षीणंतिजंतवः।पीतेनपितरस्तृप्ताभूमौतृप्तेनदेवताः।इतिचपाठः।इतित्यागमंत्रः।रौरवेपुण्य
निलयेपद्मार्बुदनिवासिनां।उच्छिष्टंयाच्यमानानामक्षय्यमुपतिष्ठतु।अत्रचमंत्रपाठोमानसः।तथा।
हस्तंप्रक्षाल्यगंडूषंयःपिबेदविचक्षणः।सदेवांश्चपितॄंश्चैव आत्मानंचैवघातयेत्।तेनहस्तमप्रक्षाल्ये
वप्रत्यपोशानंग्राह्यमित्यर्थः।अत्रिरपि।हस्तंप्रक्षाल्ययस्त्वापःपिबेद्भुक्त्वाद्विजोत्तमः।तदन्नमसुरैर्भु
क्तंनिराशाःपितरोगताः।वृहत्पराशरः।पिबेद्द्वितीयंगंडूषंब्राह्मणोज्ञानदुर्वलः।सहत्वापितृदैवत्य
मात्मानंनरकंनयेत्।व्यासः।तस्मिन्नाचमनंकुर्याद्यत्रभांडेयभुक्तवान्।यद्युच्छिष्टस्यनाचांतोभुक्तवाना

२३१
231

समान्नतः। स्नानं सद्यः प्रकुर्वीत सोऽन्यथाप्रयतो भवेत्। मनुः। नोच्छिष्टं कस्यचिद्दद्यान्नाद्याच्चैव तथांत
रा। नचैवाचमनं कुर्यान्नचोच्छिष्टः क्वचिद्व्रजेत्। क्वचिदिति द्विजातीयस्थाने। पाकस्थानमतिक्रम्य गं
डूषं क्रियते बुधैः। गंडूषं स्पृशते यत्र पुनः स्नानेन शुद्ध्यतीति स्मृत्यंतरोक्तेः। वृद्धव्यासः। ततस्तु प्राशः स
न्नम्लतापिधानमसीत्यपः प्राश्य तस्माद्देशान्मनागपसृत्य विधिवदाचमेत्। वृद्धशातातपः। दधिक्षीर
घृतं भुक्त्वा प्रभूतं भोजनं तथा। उष्णोदके धान्यचूर्णैः करौ श्मश्रूणि शोधयेत्। देवलः। भुक्त्वा चान्नं यथो
क्तेन विधानेन समाहितः। शोधयेन्मुखहस्तौ च मृदद्भिर्घर्षणेन च। यत्तु। ओष्ठाधरं श्मश्रुकरं सस्नेहं भोज
नादनु। नदुष्येच्छुद्धिजः प्राह वालक्ष्यद्वहिर्यांमुखमित्याशंकानिर्णेजनपरं। अशक्तविषयं वा। गंडूषपा
दशौचं च कांस्ये ताम्रेण न निःक्षिपेत्। तांबूलोज्झिरणं चैव गंडूषोज्झिरणं तथा। कांस्यपात्रे तथा ताम्रे न कुर्वीत क
दाचनेति। पुराणोक्तेः। गंडूषं पादशौचं च यः कुर्यात्कांस्यभाजने। भूमौ निक्षिप्य षण्मासान्भाकरेण ततः
शुचिः। मरीचिः। आचम्य च ततः कार्यं दंतकाष्ठस्य भक्षणं। भोजने दंतलग्नानि निर्हृत्याचमनं चरेत्।
दंतलग्नमसंहार्य्यं लेपं मन्येत दंतवत्। न तत्र बहुशः कुर्याद्यत्नमुद्धरणे पुनः। भवेदशौचमत्यंतं तत्त्वणावेधा
द्व्रणे कृते। अत्यंतं तदूर्ध्वं तद्दिने संध्यावंदनादिकं न कुर्यादित्यर्थः। यथा। जानूर्ध्वं क्षतजे जाते नित्यं

कर्म न चाचरेत् । नैमित्तिकं तु तदधः स्ववद्भक्षो विवर्जयेदिति । अत्र दंतशोधने काष्ठविशेषनियमो ना
स्तिदृष्टार्थत्वात् । व्यासः । आचम्य च पुनः पश्चात्समाचारात्तृणादिना । दंतलग्नविशुद्ध्यर्थं कर्तव्यं
दंतशोधनमिति । गंडूषाचमनमाह स्मृतिः । अर्द्धं पंच ततः सप्त त्रीणि त्रीणि तथैव च । एतदाचमनं प्रो
क्तं सार्धमष्टादशं तथा । अत्रायं क्रमः । प्रथमतो गंडूषार्द्धं पेयं । ततः पंच त्यजेत् । ततस्तृणादिना शो
धनं विधाय सप्त त्यजेत् । ततः षडाचमेत् । चतुरष्टद्वादशस्वतुः षड्गंडूषान्समाचरेत् । मध्ये पुरीषे भो
ज्ये च सप्तैरेतस्यनुक्रमात् । एवं द्वादशगंडूषैर्मुखशुद्धिं कृत्वा द्विराचमेदित्यर्थः । विष्णुपुराणे । भुक्त्वा
चैव यथाशक्ति प्राङ्मुखोदङ्मुखोपि वा । आचांतः पुनराचामेत्पाणी प्रक्षाल्य मूलतः । ततोऽन्यत्रोपवि
श्य पादौ हस्तौ प्रक्षाल्य द्विराचमेदिति समाचारः । शुद्धिदीपिकायां । मुखं द्वादशगंडूषैर्दंतान्संशोध्य
काष्ठतः । भुक्त्वा चापि द्विराचामेत्पादक्षालनपूर्वकं । शब्दक्रमादर्थक्रमो बलीयानिति न्यायात् ।
भुक्त्वा मुखदंतशोधनानंतरं द्विराचमनं । यथाग्निहोत्रं जुहोति यवागूं पचतीत्यत्र यवागूपाकानं
तरमग्निहवनं । बौधायनः । पुनराचम्य दक्षिणपादांगुष्ठे जलं स्रावयति । अंगुष्ठमात्रः पुरुषोऽं
गुष्ठं च समाश्रितः । ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वभुगिति मंत्रेण मांसमत्स्यमधुतिल

संसृष्टं प्राश्य पञ्च पसृष्ट्याग्निमुपस्पृशेत् । ब्रह्मपुराणे । आचांतोप्यशुचिस्तावद्यावत्पात्रमनुद्धृतं । उद्धृतेप्यशु
चिस्तावद्यावन्नोन्मृज्यते मही । भूमावपि विलिप्तायां तावत्स्यादशुचिः पुमान् । आसनादुत्थितस्तस्माद्यावन्न स्पृश
ते महीं । आपस्तंबः । यत्र भुज्यते तत्परिसमूह्य निर्हृत्याविद्य तं देशं गोमयोदकेनोपलिप्य अमत्राणि पात्राणि स्था
ल्यादीनि तेभ्यः पांशुप्रभृतिना लेपानपनीय अद्भिः संस्कृत्य कांस्यादि क्षारादिवारिणा प्रक्षाल्य उत्तरतो
रुद्राय निनयेत् । पूर्वोपनीतमेवोच्छिष्टं शुचौ देशे रुद्रमुद्दिश्य त्यजेत् । एवं कृते गृहं कल्याणहेतुर्भवतीत्यर्थः ।
इत्याचाररत्नाकरे पंचमभागकृत्यम् ॥ ॥ अथ षष्ठसप्तमभागकृत्यरत्नं ॥ भुक्त्वा तु सुखमास्थाय तदन्नं
परिणामयेत् । इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेदिति यद्यपि सामान्येनोभयविधानमुभयत्र तथापि षष्ठे
न्न परिणामोपयोगिकर्म सप्तमे त्वितिहासादिश्रवणमिति प्रतीयते । यदाह मार्कंडेयः । भूयोप्याचम्य कर्तव्यं
तांबूलस्य च भक्षणं । श्रवणं चेतिहासस्य ततः कुर्यात्समाहितः । ततस्तदनंतरं सप्तमे भागे इत्यर्थः । तांबूलभ
क्षणे व्यासः । पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः । पर्णचूर्णं हरेदायुः सिरा बुद्धिविनाशिनी । तस्मादग्रं
च मूलं च सिरां चैव विवर्जयेत् । चूर्णपर्णं वर्जयित्वा तांबूलं भक्षयेद्बुधः । तर्जन्या चूर्णमादाय तांबूलं तु न खा
दयेत् । अनिधाय मुखे पर्णं पूगं खादति यो नरः । सप्तजन्म दरिद्रत्वं मंते विष्णुं च न स्मरेत् । अंगुष्ठं चूर्णसंयुक्तं

पर्णैः श्रेष्ठैस्तु लेपितं । तत्पर्णं खादयेत्तेन सोमपानं दिने दिने । विभज्य ब्राह्मणादिभ्यस्ताम्बूलादि च भक्षयेत् । ।
विष्णुपराणो । स्वस्थः प्रशान्तचित्तस्तु कृतासनपरिग्रहः । अभीष्टदेवतानां च कुर्वीत स्मरणं ततः । अग्निराप्याय
तां धातून् पार्थिवान् पवनेरितः । दत्तावकाशो नभसा जरयत्वस्तु मे सुखं । प्राणापानसमानानामुदानव्यानयोस्तथा ।
अन्नं प्रीतिकरं चास्तु ममाप्यव्याहतं सुखं । अगस्तिरग्निर्वडवानलश्च भुक्तं मयान्नं जरयन्त्वशेषं । सुखं च मे तत्परि
णामसम्भवं यच्छन्त्वरोगो मम चास्तु देहः । विष्णुः समस्तेन्द्रियदेहदेही प्रधानभूतो भगवान्यथैकः । सत्येन तेना
न्नमशेषमेतदारोग्यदं मे परिणाममेतु । विष्णुरन्ता तथैवान्नं परिणामश्च वै यथा । सत्येन तेन मद्भुक्तं जीर्यत्वन्नमिदं
तथा । इत्युच्चार्य स्वहस्तेन परिमृज्यात्तथोदरं । अनायासप्रदायीनि कुर्यात्कर्माण्यतन्द्रितः । आपुर्वेदे मांसभोज
नान्ते उक्तं । भुक्त्वा वह्निमुपस्पृश्य शनैः शतपदं व्रजेत् । शयीत वामभागेन ततो रोगैर्न पीड्यते । तथा तत्रैव । भुक्तो
पविशतः स्थौल्यं बलमुत्तानशायिनः । आरोग्यं वामकुक्षौ च मृत्युर्धावति धावतः । तथा । भुक्त्वा सदम्बस्य क
रद्वयेन विमृज्य वार्यङ्गुलिपल्लवेभ्यः । परिच्युतैरम्बुभिरक्षिसिञ्चेन्न नेत्ररोगैः परिभूयते सः । शर्यातिश्च सु
कन्या च शक्रश्च च्यवनाश्विनौ । वडवाग्निर्गारुडी दृष्टिं मह्यं ददतु सर्वदा । इत्यनेन मन्त्रेण स्वनेत्रद्वयं स्पृशेत् । ततः
करादिकं संस्पृश्य जानुनी स्पृशेत् । मा करेणाकरं स्नाती मीजंघे माध्य च तुषी । जानुनी स्पृशन् जैं भक्तं वा

२३३ वहवोयवेति । व्यासोक्तेः । अथव्यवहितेन चाहिताग्निना यदाग्निहवनं पुत्राग्निष्टीयते । तदुत्तरं भोक्तव्यम् ।
233 यथोक्तं विष्णुना । प्रवसितस्याग्निहोत्री यदाग्निहोमं मन्येत तदाश्नीयादिति । एवं पतिव्रताया पतिव्यवधाने
तद्भोजनकालमवधार्य तदुत्तरं भोक्तव्यं । अतएव भारते । नलव्यवधाने तथैव दमयंत्या भोजनमुक्तं । वृह
त्पराशरेपि । भार्या भोजनवेलायां मिष्टान्नसप्राय पंचवा । दत्वाशेषं समश्नीयात्सा पत्याभृत्यकैः सह । निर्वर्त्य
साग्निं सकलं किंचित्स्थित्वा सुखेन च । स्वकीयकृत्यकार्येषु सापि स्यात्तत्परा पुनः । यद्यपि पंचमभागे दिनेभो
जनमुक्तं तथापि तददृष्टार्थं तेनानिषिद्धकाले वैधर्मकर्मकृत्वा शर्वाह्नादावपि तत्कार्यमिति । अथप्रसंगा
त्परिश्राद्धं किंचिद्विधीयते । तत्रादौ भोज्यान्नानाह यमः । अमृतं ब्राह्मणस्यान्नं क्षत्रियस्य पयः स्मृतं ।
वैश्यस्य त्वन्नमेवान्नं शूद्रस्य रुधिरं स्मृतं । मनुः । नाद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिकं द्विजः । आद
दीतामभेवास्माद वृत्तावेकरात्रिकं । अस्माच्छूद्राद वृत्तावन्नांतरालाभे एकरात्रिकं एकाहभोज्यं । देवदा
से । आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते । तस्मादामं च पक्वं च शूद्रस्य न समाचरेत् । आमं शूद्रस्य
च्चान्नं श्राद्धार्हमुपकल्पितं । तत्सर्वं भोजनायालं नित्यनैमित्तिके हनि । इति सच्छूद्रविषयं । वृहत्पराशरः ।
तस्माच्छूद्रं न भिक्षेत ब्राह्मणो वृत्तिकर्षितः । सच्छूद्राणां गृहे कुर्वन्न तत्पापेन लिप्यते । तत्रलक्षणम् ।

विशुद्धान्वयसंजातो निवृत्तो मद्यमांसयोः। द्विजभक्तिर्वणिग्वृत्तिः सच्छूद्रः परिकीर्तितः। धर्मप्रदीपे।
शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि। निवृत्तेन न भोक्तव्यं शूद्रान्नं तदपि स्मृतं। निवृत्तेन शूद्रान्नभोज
नादित्यर्थः। तथा। शूद्रवेश्मनि यो भुंक्ते पानीयं वा पिबेत्कचित्। अहोरात्रोषितो भूत्वा पंचगव्येन शुद्ध्य
ति। शूद्रस्यान्नं स्मृतं चान्नं शूद्रहस्तेन यत्कृतं। शूद्रहस्तात्तु यन्नीतं तत्तु छिष्टं विधीयते। शूद्राहृतं वि
प्रगृहे प्रविष्टं भोज्यमाह। यथापनस्ततो ह्यापः शुद्धिं यांति नदीगताः। शूद्रादि प्रगृहेष्वन्नं प्रविष्टं तु सदा शुचिः।
शूद्राद्विप्रेणानीतमन्नं तु शूद्रगृहे प्रविष्टं शूद्रादानीतमपि तेन विप्रेण दीयमानमन्नं स्पर्शवीत्याहुः। पराशरः।
तावद्भवति शूद्रान्नं यावन्न स्पृशति द्विजः। द्विजान्नकरसंस्पृष्टं सर्वं तद्धविरुच्यते। शूद्रस्यापि कानिचित्पक्का
न्नानि भक्ष्याण्याहांगिराः। गोरसं चैव सक्तूंश्च तैलं पिण्याकमेव च। अपूपान्भक्षयेच्छूद्राद्यच्चान्यत्पयसा कृतं।
पिण्याकं तिलकल्क इति प्रसिद्धिः। पयसा दुग्धेन। आपणान्ने विशेषमाह शंखः। अपूपाः सक्तवो धानास्तक्रं
दधि घृतं मधु। एतत्पण्येषु भोक्तव्यं भांडलेपो न चेद्भवेत्। तथा। कंदुपक्वं तैलपक्वं पायसं दधि सक्तवः। एतान्य
शूद्रान्नभुजो भोज्यानि मनुरब्रवीत्। शुद्धिविवेके। कंदुपक्वानि तैलेन पायसं दधि सक्तवः। द्विजैरेतानि भो
ज्यानि शूद्रगेहाहृतान्यपि। शूद्रगोरसाद्यपि तद्गृहतो नीत्वान्यत्र भोक्तव्यं। घृतं तैलं तथा क्षीरं गुडं तैलेन पाचि

ते। नीत्वानदीतटेविप्रोभुंजीयाच्छूद्रभोजनमिति पराशरोक्तेः। उदरस्थब्राह्मणोतरान्नमरणोऽनिष्टमाह यमः।
ब्राह्मणान्नंक्षत्रियान्नंवैश्यान्नंशूद्रमेवच। यांयांयोनिंव्रजेद्विप्रोभुक्तान्नंयस्यवैमृतः। वाराहपुराणे। शूद्रान्ने
नतुभुक्तेनब्राह्मणोम्रियतेयदि। तेनैवोतूदरस्थेनसवेतोजायतेध्रुवं। संवेखरत्वमुष्ट्रत्वंशूद्रत्वंचोपगच्छति।
शूद्रामंत्रितद्विजान्नभोजनेप्यनिष्टमाह नारदः। यःशूद्रेणसमाहूतोभोजनंकुरुतेद्विजः। सुरापीसतुवि
ज्ञेयः सर्वधर्मबहिष्कृतः। शूद्रेषुकानिचिद्भोज्यान्नानि मनुराह। शूद्रेषुदासगोपालकुलमित्रार्द्धसीरिणः।
भोज्यान्नानापितश्चापि यश्चात्मानंनिवेदयेत्। दासोगर्भदासः। चकारान्त्योब्धिकः कुंभकारश्च। गोपनापित
कुंभकारकुलमित्रार्द्धकानिवेदितात्मनोभोज्यान्ना इति। तेप्यात्मीयाएवेति कुलकम्। तल्लक्षणं पराशरे।
शूद्रकन्यासमुत्पन्नोब्राह्मणेननतुसंस्कृतः। संस्कारेभवेद्दासो ह्यसंस्कारस्तुनापितः। वैश्यकन्यासमुत्पन्नो
ब्राह्मणेनतुसंस्कृतः। तदर्द्धिकस्सविज्ञेयोभोज्योविप्रैर्नसंशयः। क्षत्रियाच्छूद्रकन्यायांसुतोजातस्तुनामतः।
गोपालकः सविज्ञेयोभोज्योविप्रैर्नसंशयः। गोपालस्यक्षत्रियोजनकः। अन्येषांचब्राह्मणः। अपब्रा
ह्मणोप्यभोज्यान्नानाह याज्ञवल्क्यः। कंदर्यबद्धचौराणांक्लीवरंगावतारिणां। वैणाभिशस्तवार्द्धुष्य
गणिकागणदीक्षिणां। चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषां। क्रूरोग्रपतितव्रात्यदांभिकोच्छिष्टजीविनां।

अवीरस्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनां। शस्त्रविक्रयकर्मारतंतुवायश्ववृत्तिनां। नृशंसराजरजककृ
तघ्नवधजीविनां। चैलधावीसुराजीवीसहोपपतिवेश्मनां। पिशुनोऽनृतिनश्चैव तथा चाक्रिकवंदिनां। एषा
मन्नं न भोक्तव्यं सोमविक्रयिणां तथा। मनुः। गणान्नं गणिकान्नं च विदुषां च जुगुप्सितं। स्तेनगायन
योश्चान्नं तक्ष्णो वार्द्धुषिकस्य च। कदर्यः पारिभाषिकः। आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयेत्। लोभा
द्यः पितरौ भृत्यान्स कदर्य इति स्मृतः। वद्धो वंदिगतः। चोरः चौर्यजीवी। क्लीवः षंढः। रंगावतारी
वेषांतरग्रहणवेतनः नर्तकः। नटचारणमल्लादिः। वैणो वीणावादनोपयोगी। अभिशस्तः पतनीयापवा
दयुक्तः। वार्द्धुषिको निषिद्धवृत्त्युपजीवी। विसृक्लीवा। यस्तु निंदेत्परं नित्यं प्रशंसत्यात्मनो गुणान्। स वै वार्द्धुषिको नाम
ब्रह्मवादिषु गर्हितः। गणिका वेश्या। गणको गणवृत्तिर्दैवज्ञः। गणयाजको बहुयाजकः। चिकित्सको वैद्यः। आर्त
रः पारिभाषिकः। कर्त्यान्नस्मरते वह्निं करे न स्मरते जलं। पक्षेपन्नं च दृष्ट्वा लोकानार्त्तरः स विधीयते। क्रुद्धः कोप
शीलः। पुंश्चली कुलटा। मत्तो विद्यादिगर्वितः। क्रूरः कर्कशः। वाक्कायव्यापारेणोद्वेजकः उग्रः। पतितः स्वधर्मत्या
गी। महापातकी वा। व्रात्यः अतीतोपनयनकालः। दांभिकः धर्मध्वजी। उच्छिष्टभोजी भुक्तोच्छिष्टाशी। अवी
रा पतिपुत्रविहीना। स्वर्णकारः स्वर्णादिघटनः। अष्टमहारोगान्वितो व्याधिमान्। स्त्रीजितो भार्यावशतया। गुरु

२३५
235

निंदकः । ग्रामयाजी एक एव ग्रामाचार्यः । शस्त्रविक्रयी शरादिविक्रेता । कर्मारो लोहकारः । तार्क्षादि तत्कारः ।
तंतुवायः सूचीशिल्पोपजीवी । श्ववृत्तिः श्वपोषकः । नृशंसः निर्दयः । राजादुःकुलः क्षत्रवंधुः । रजकः वस्त्र
रंजकः । कृतघ्नः परोपकारहंता । स्वोक्तनाशकोवा । वधजीवी व्याधः । चैलधावः वस्त्रनिर्णेजकः । सुराजीवी
मद्यविक्रयी । सहोपपतिवेश्मा सहोपपतिगृहवासी । चाक्रिकः तैलयंत्रिकः । वंदिनः वंदीगीताः । सोमवि प्रभातगायनाः मद्दाः ४=
क्रयिणः । गायनोऽत्र वेतनगायनः । ग्राम्यगीतगायनो वा । यथोक्तमुपनयने ब्रह्मचारिशिक्षायां कामादिपरन्
त्यगीतवादित्राणि न कुर्यान्न गच्छेत् । पाद्मे देवदूतविकुंडलसंवादे । देवविप्रयतीनां च मठे लोभविमोहितः । मा
ठाधिपत्यं यः कुर्यात्स वै धर्मबहिष्कृतः । पत्रं पुष्पं फलं तोयं द्रव्यमन्नं मठस्य च । योऽश्नाति स पतेद्घोरान्नरकानेकविंश
तिं । यमिच्छेन्नरके नेतुं सपुत्रपशुबांधवं । तं देवेष्वधिपं कुर्यात् गोषु च ब्राह्मणेषु च । अभोज्यं च मठस्यान्नं भुक्त्वा चां
द्रायणं चरेत् । स्पृष्ट्वा मठपतिं वैश्पसवासा जलमाविशेत् । मद्यपोऽत्र शिवस्वत्वोपजीवी । मक्षिकापादमात्रं तु शि
वस्वमुपजीवति । मोहाल्लोभात्स पच्येत कल्पान्तं नरके नरः इत्युक्तेः । नारदपंचरात्रे । शाङ्गमायतनाद्विप्रः शि
रसा प्रणतो वहेत् । निक्षिपेदं भक्षितं तो न पतेदवनौ यथा । यत्पत्रं यतिपात्रस्थं यत्स्यनुमतान्वदीयते । तत्सर्वं वर्ज
येद्यत्नाद्भुक्त्वा कृच्छ्रेण शुद्ध्यति । आपस्तंबः । द्वावेवाश्रमिणो भोज्यौ ब्रह्मचारी गृहीतया । मुनेरन्नमभोज्यं च सर्वे

षांलिंगिनां तथा ॥ अर्घ्यभक्ष्याणि ॥ तत्रापरार्के भविष्यपुराणवाक्यम् ॥ जातिदुष्टं क्रियादुष्टं कालाश्रयविदूषि
तं । संसर्गाश्रयदुष्टं च सहृल्लेखं स्वभावतः । लशुनं गृंजनं चैव पलाण्डुकवकानि च । वार्त्ताकोमूलिकालाबुरू
पो याज्यादिदूषितः । नभक्षयेत्क्रियादुष्टं यद्दुष्टं पतितैः पृथक् । कालदुष्टं च विज्ञेयं यदन्नं चिरसंस्थितं । दधिभक्ष्य
आ॰ध॰प्र॰ विकारेषु मधुवर्ज्यं तदिष्यते । सुरालशुनसंस्पृष्टं पीयूषादिसमन्वितं । संसर्गदुष्टमेतद्धि शूद्रोच्छिष्टवदाचरेत् ।
विचिकित्सा सहृदये यस्मिन्नन्ने प्रजायते । सहृल्लेखं तु विज्ञेयं पुरीषं तु विशेषतः । वार्त्ताकः श्वेतवार्त्ताकः । मू
लिका रक्तमूलिका । अलाबु वर्तुलाकारः । मनुः । लशुनं गृंजनं चैव पलाण्डुकवकानि च । अभक्ष्याणि द्विजाती
नाममेध्यप्रभवानि च । कवकं वर्षाङ्कुरं छत्राकं खुंब इति पश्चिमे प्रसिद्धं । अमेध्यप्रभवाणि सालादिष्ठाजातानि ।
तंडुलीयकादीनि विड्जानि परिवर्जयेदिति याज्ञवल्क्यवचनात् । बौधायनः । अमेध्यभूस्यायेद्रानुप्ताः पुष्पफ
लोपगाः । तेषां नैव प्रदुष्यंति पुष्पाणि च फलानि चेति । रक्ता इति विशेषोपादानान्नदितराणि निषिद्धानीत्यर्थः ।
काशीखंडे । पलांडुं विड्वराहं च ससेलुं लशुनं गृंजनं । गोपीयूषं तंडुलीयं वर्ज्यं च कवकं तथा । धर्मप्रदीपे । छत्राकं वि
ड्वराहं च लशुनं ग्रामकुक्कुटं । पलांडुं गृंजनं चैव मत्या जग्ध्वा पतेद्द्विजः । अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सांतपनं चरेत् ।
५४६ पलांडुस्तु दशाधा । रसनो दीर्घपत्रश्च इति गंधो महौषधं । हिरण्यश्च पलांडुश्च नवतका वराधिका । गृंजनं यवने

२२६ 236 श्च पलांडोर्दशजातयः इति स्मृतिमंजर्यां । स्मृत्यंतरे । भूमिजं वृक्षजं चैव छत्राकं नैव भक्षयेत् । ब्रह्मघ्नां
स्तान्विजानीयाद्ब्रह्मवादिषु गर्हितान् । तन्नामानि मदननिर्णये शाकवर्गे । भूछत्रं पृथिवीकंदः शिलिंध्रं कव
कं स्मृतं । छत्राकस्तु पलाशेत्तु करीषादिति ते त्रयः । तदुत्पत्तिर्ब्रह्मपुराणे । मधुकैटभवृत्रानां त्रिशीर्षस्या
सुरस्य च । विष्णुना हन्यमानानां यन्मेदः पतितं भुवि । पिंडोपमं कुकुंदाउ कवकं चैत्यसन्निभं । छत्राकं छत्रस
दृशं दैत्यदेहसमुद्भवं । ज्येष्ठाविष्टकलंजं च कलिंगं शिग्रुकं जने । छत्राकं विड्वराहं च बिल्वकोशातकीफलं । अला
बुं श्रीफलं देवि ये खादंति नराधमाः । तेषां गेहे तव स्थानं देवि दारिद्र्यदे सदा । ज्येष्ठा दरिद्रदेवता । अलक्ष्मीम
वतः सृष्टा पश्चात्पद्मान्जनार्दनः । ज्येष्ठेति न समाख्याता ह्यलक्ष्मीर्द्विजसत्तमा इति लिंगोक्तेः । सस्तजेति
शेषः । मनुः । लोहितान्वृक्षनिर्यासान्वृश्चनप्रभवांस्तथा । शेलुं गव्यं च पीयूषं यत्नतः परिवर्जयेत् । निर्यासो वृ
लोहितो ४ क्षरसः । स च स्वयं वृक्षाद्बहिर्भूतो निषिद्धो वृक्षच्छेदने न तु बहिः कारितोऽन्यवल्लोपि वृश्चनेति पुनरुपादानात् ।
लोहितग्रहणेन कर्पूरादेर्न निषेधः । शेलुः श्लेष्मातकः । पीयूषं नवप्रसूतायाः क्षीरं यदग्निसंयोगात्कठिनं
भवति । तच्चेह गव्यं न तदानि निषिद्धं । महिष्यास्तु निर्दशायाः खाद्यमेव स्कांदे । वृश्चनप्रभवं सर्वं हिंगुद्रव्यं विनैव
तु । भूस्तृणं शिग्रुकं चैव ब्राह्मणो नैव भक्षयेत् । देवलः । श्लेष्मातकः पलांडुश्च कौसुंभं नालमस्तकान् ।

गृंजनं चेति शाकानामभक्ष्याणि प्रचक्षते । पलांडुं लशुनं स्नुक्तं निर्यासश्चेति सर्वशः । कुंभांडं श्वेतवृंताकं
कर्कंधुं च न भक्षयेत् । कौहलं कुहलं शाकं । नालकं लंबिका । मस्तकं वर्तुलं अलाबु । अलाबुं वर्तुलाकार
मिति वचनात् । निर्यासो लोहितः स्नावो इति यावत् । कुंभांडं कुंभालं इति प्रसिद्धं फलं । वृहद्व्यासः । अलाबु
क ४= शिग्रुकवकवृंताकलशुनानि च । पलांडुः श्वेतवृंताकरक्तमूलकविद्रुवं । गृंजनारुणवृक्षास्त्रक् जंतु
गर्भफलानि च । अकालकुसुमादीनि भुक्त्वा चांद्रायणं चरेत् । अत्र छत्राकं अहिछत्राकं । कवकस्य पृथक्
कथनादिति । तथा गौतमः । विलयं स्नुमुखं तथा । विलयो घृतमलः । स्नुमुखः सर्पविशेषः । तदुक्तं विश्वको
शे । स्नुमुखं तार्क्ष्यतनये फणिभेदे च पंडिते । एतौ वर्जयेदित्यर्थः । अपरार्के । गुडादिद्रव्यसंयुक्तं वर्ज्यं पर्यु
षितं दधि । तच्चैव पानकादीनि मधाज्यरचितानि चेति । गुडादियुक्तस्यैव पर्युषितदध्नो निषेधोन्यथा पर्यु
षितस्यैव भक्ष्यार्हत्वात् । ब्रह्मपुराणे । घृताक्तेनेच्छुतान्नं च पीयूषमपयं द्रुमाः । सगुडं मरिचाक्तं च तथा
पर्युषितं दधि । दीर्णतक्रमपेयं च नष्टस्वादं च फेणवत् । प्रमादाद्भक्षितेरेभिर्व्वनेपदव्रतं चरेत् । पीयूषं नव
प्रसूतायाः गोः क्षीरं । क्षीरं विस्फुरितं । अभोज्यमित्यनुवृत्तौ । गौतमः । किसलयः क्रियालः । किसलयो
नवपल्लवः । क्रियालः अहिछत्राकं । तथा । वृंताकाश्च कलिंगाश्च दग्धमन्नं मसूरिकाः । उदरेयस

२३५ तिष्ठंति तस्य दूरतरो हरिः । अस्यापवादमाह । वृन्ताकाः श्वेतवृन्ताकाः । मसूरान्नं सवल्कलं । कलिंगाः
237 श्वेतबीजाश्च धान्यान्नं क्षेत्रसंस्थितं । हलायुधे । अलाबुं वर्तुलाकारं मसूरान्नं सवल्कलं । तालं शुष्कं च
वार्त्ताकं न खादेद्वैष्णवः क्वचित् । गोविंदार्णवे । कंदूरं श्वेतवृन्ताकं कुंभांडं च विवर्जयेत् । अभोज्यप्रकर
णे आपस्तंबः । कीलालौषधीनां च कलंजपलांडुपराधिका । एतच्चान्यत्परिचक्षते । कीलालं रुधिरं ।
तदर्थं स्थापिता ओषधयो व्रीह्यादयः । तासां विकार इति शेषः । कलंजो लशुनविशेषः । पराधिका पलां
डुविशेषः । यच्चान्यदपि कोविदारादि अभक्ष्यं परिचक्षते शिष्टास्तदपि वर्जयेदिति शेषः । तथा । नक्तो
स्य दुंबर दधित्थ नीप मातुलुंगानि भक्षयेत् । दधित्थः कपित्थः । नीपः कदंबः । मातुलुंगो बीजपूरविशेषः ।
मरुकडीति प्रसिद्धा । मनुः । भक्षयेद्यदि नीलीं तु प्रमादाद्ब्राह्मणः क्वचित् । चांद्रायणेन शुद्धिः स्यादाप
स्तंबोऽब्रवीन्मुनिः । व्यासः । राजमाषाः स्थूलमुद्गास्तथा वृषजवासकौ । मसूराः शतपुष्पाश्च कुसुंभं श्री
निकेतनं । अन्नान्येतान्यभक्ष्याणि न चदेयानि कस्यचित् । वर्जयेदित्यनुवृत्तौ । आपस्तंबः । कृष्णधान्यं
च शूद्रान्नं ये चान्ये नाश्यसंमिताः । कृष्णधान्यं करहलादिः । अनाश्यसंमिता अभक्ष्यतया स्फुरिताः ।
भावदुष्टं न भक्षयेदिति विश्वामित्रः । यमः । मसूरमांससंयुक्तं तथा पर्युषितं च यत् । तत्तु प्रक्षालितं कृत्वा

भुंजीत ह्यभिघारितं । उदक्या स्पृष्टं संघुष्टं पर्यायान्नं च वर्जयेत् । संघुष्टं उद्घोष्य दत्तं । पर्यायान्नं च पद
न्यसंबंधि अन्यव्यपदेशेन दीयते । तथा । ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत् । उभावेतावभो
ज्यान्नौ भुक्त्वा चांद्रायणं चरेत् । मत्तक्रुद्धातुराणां च न भुंजीत कदाचन । केशकीटावपन्नं च पदा स्पृष्टं च
कामतः । भ्रूणहावेक्षितं चैव संस्पृष्टं वाप्युदक्यया । पतत्रिणावलीढं च शुना संस्पृष्टमेव च । कामत इ
त्यभिधानात् । प्रमादात्स्पृष्टमदुष्टं उदक्या रजस्वला । यमः । अशष्पष्कुकरंभधानावटकसक्तवः ।
शाकं मांसं च सूपं च स्नेहं कृशरमेव च । यवाग्रं पायसं चैव यच्चान्यत्स्नेहसंयुतं । सर्वं पर्युषितं भोज्यं शुक्तं चेत्परि
वर्जयेत् । तिलतंडुलमुद्गजं कृसरं । तिलतंडुलसंयुक्तः कृसरः संविधीयते । इति छंदोगपरिशिष्टे । शुक्तं
यत्स्वयमम्लीभूतं सूपादि । केवलकालपरिवासेन । न तु द्रव्यांतरसंसर्गेण । कालपरिवासाभ्यां वाम्लीभ
वति न चुक्रं । तच्च दध्यादिव्यतिरेकेण पातव्यं । न पर्युषितं अन्यद्रागखंडवचुक्रदधिगुडगोधूम
यवपिष्टविकारेभ्यः इति शंखः । रागा मधुरास्वादाः । लेह्याः भवाः अम्लास्वादाः रसालादयः ।
चुक्रं शुक्तं । अत्यम्लं शुक्तमाख्यातं निंदितं ब्रह्मवादिभिरिति । शुक्तमपि यन्नमं तत्तावाल्लुकं । तत्केवलं
द्रव्यांतरसंस्पृष्टं मद्यमेव । शुक्तं तु केवलमिति गौतमवचनात् । द्रव्याणि कालयोगाभ्यां यानि दुष्टा

नितानितु। द्रव्यांतरविमिश्राणि न दुष्यंति कदाचनेति व्यासोक्तेः। कालयोगाभ्यां कालेन योगेन वा। यथा कांस्ये निषिद्धमपि मधु मधुपर्कप्रसंगे कांस्यपात्रेणादीयमानं न दुष्यति। यथा रात्रौ निषिद्धमपि दधि भक्तं जललयोगेन तक्रतां विधाय पीयमानं न दुष्यतीत्यर्थः। दध्यादि तु केवलमपि भक्ष्यमाह बृहस्पतिः। दधि भक्ष्यं च शुक्तेषु यच्चैव दधिसंभवं। यत्तु मदकारि तत्संसृष्टमप्यभक्ष्यमित्याह स एव। कंदमूलफलैः पुष्पैः शस्तैः शुक्तामं वं तु यत्। अविकारे भवेद्भक्ष्यमभक्ष्यं तद्विकारकृत्। विकरो मत्तता पुरुषाणां शुक्ताविल्यमरः। शंखः। केवलानि तु शुक्तानि तथा पर्युषितानि च। गुडपक्कं तथा भुक्त्वा त्रिरात्रं व्रतमाचरेत्। शाकं पर्युषितं भक्ष्यं स्नेहहमांसमधूनि च। गुडपक्कं गुडपायसं। मनुः। यत्किंचित्स्नेहसंयुक्तं भक्ष्यभोज्यमगर्हितं। तत्पर्युषितमप्याद्यं हविःशेषं च यद्भवेत्। एतदुक्तं द्विजातीनां भक्ष्याभक्ष्यमशेषतः। भक्ष्यं मोदकादि। भोज्यं पायसादि। देवलः। न वीजान्युपभुंजीत रोगतोऽपन्निमग्नेत कचित्। फलान्येषामनंतानि वीजानां तु विनाशयेत्। नाश्नीयात्पयसा भुक्तं भुक्तं चेन्न स्वपेन्निशि। न क्षीरमुत्सृजेत्प्राज्ञं पवित्रं हि पयः स्मृतं। अत्र वीजान्यंकुरजननयोग्यकूष्मांडवीजानि। भक्षयित्वा तज्जन्यानि बहूनि फलानि नाशयेदिति हेतुकथनात्। पयसा दुग्धेन। आचारचिंतामणौ। कृशाः शाकं पयो मत्स्या गंधपुष्पं दधि क्षितिः। मांसं शय्यासनं धानाः प्र

त्वाख्वीयंनवास्विच।स्तितिंस्मरं।एतदुपस्थापकायनेतिनब्रूयात्।योगी।उपस्थितंस्वयंग्राह्यमपि
दुःकृतकर्मणः।अन्यत्रकुलटाषंढपतितेभ्यस्तथाद्विषः।तथा।भिन्नभांडेनभुंजीतनरात्रौदधिसक्तुकं
।काककुक्कुटसंस्पृष्टंभुक्तंवाक्रिमिसंयुतं।अभोज्यंतद्विजानीयाद्धर्मराजवचोयथा।हारीतः।नरजस्व
लयादत्तंनपुंश्चल्यानक्रुद्धया।नमलवद्वाससानपरयाद्वारा।आपन्नेनद्विःपक्वंनशुक्तंनपर्युषितमन्यत्रगु
डपिंडसक्तुस्नेहगोरसतैलादिभ्यःपक्वान्नं।नतैलंदध्यनुपानंनावप्लुतंनजुगुप्सितं।मलवद्वाससाश्लेष्मा
दिलिप्तवाससानपरयाद्वारारजस्वलयादत्तंदास्यमानंवानभोज्यमित्यर्थः।पर्युषितमिति।पक्वान्नमि
त्यनेनसंबध्नोति।अत्रचतैलादिष्विति।हस्तान्म्याअलुक्छांदसत्वात्।आदिपदाद्घृतपरिग्रहः।नतैलंद
ध्यनुपानं।आहारशेषेदुग्धपानस्यशेषेतैलंदधिवानपिवेदित्यर्थः।अवप्लुतंउपरिकृतछिक्कं।जुगुप्सि
तंनिंदितं।एतच्चद्वयमभोज्यमित्यर्थः।हारीतः।मत्स्यकंटकशंबूकशंखशुक्तिकपर्दिकान्।पीत्वा
नवोदकंचैवपंचगव्येनशुध्यति।यमः।भुक्त्वातुक्षीरलवणंत्रिरात्रंतुपयःपिबेत्।क्षीरलवणंक्षीर
मिश्रंलवणंक्षीरमिश्रंलवणं।ब्रह्मपुराणे।एकेनपाणिनादत्तंक्वचिन्नुभक्षयेत्।घृततैलंचलवणं
१५५ पानीयंपायसंतथा।भिक्षातुहस्तदत्तायानसाग्राह्याकदाचित्।शूद्रभुक्तावसिष्टंचनाद्याद्वाअस्थितंत्वपि।

२२५ तथा। चांडालपतितोदक्यावाक्यं श्रुत्वा द्विजोत्तमः। भुंजीतस्त्वापिवेद्धर्वीदिनमेकमभोजनं। मार्कंडेयपुराणे।
235 मुखवातोपधमितं न भक्ष्यमित्यर्थः। भविष्यत्पुराणे। आयसेन तु पात्रेण यदन्नमुपनीयते। भोक्ता विष्टासमं भुं
क्ते दाता च नरकं व्रजेत्। उपनीयते परिवेष्यते। तथा। अंगुल्या दंतकाष्ठं च प्रत्यक्षं लवणं च यत्। मृत्तिका
भक्षणं चैव तुल्यं गोमांसभक्षणं। अवतारणानंतरं प्रदिष्टं लवणं च यत्। तत्प्रत्यक्षलवणं। तादृशं सामु
द्रं सैंधवं नचिह्नं। सैंधवं लवणं तद्वत् यामानससंभवं। पवित्रे परमे ह्येते प्रत्यक्षे अपि नित्यशः। मानसं सामु
द्रमित्यर्थः। तथा। क्षीरमध्ये च लवणमुच्छिष्टे घृतभोजनं। केवलं लवणाशनं तुल्यं गोमांसभक्षणं। पात्र
मध्ये यथा पात्रं करमध्ये यथा घृतं। तर्जनी दंतकाष्ठं च तुल्यं गोमांसभक्षणं। उच्छिष्टे घृतभोजनं उच्छि
ष्टानंतरं गृहीतकेवलघृतभोजनं। तत्रान्नप्राधान्येन दोषः। तच्च घृतपात्रे न दुष्टं। यथोक्तं स्मृतिसारे।
शेषाज्ये पुनराज्यं तु भुक्त्वा नैव प्रदुष्यति। रिक्ताज्यपात्रे त्वाज्यं तु दत्वा भुक्त्वा च दोषभाक्। तथा। लवणं
दुग्धमध्ये तु घृतमुच्छिष्टभोजने। जलं तु रजकस्थाने ताम्रेण व्यमुरासमं। तथा। ताम्रपात्रे च यद्गव्यं
कांस्यपात्रे तु यन्मधु। आर्द्रकं गुडसंमिश्रं सद्योमद्यं घृतं विना। गव्यमत्र पयो दधिनी घृतं विनेत्युक्तेः।
यद्वा घृतं विना घृतसंयोगं विना। अयं निषेधो भोजन एव। यथा स्मृतिसारे। होमकार्ये तथा दोहे पाके

च परिवेषणे। भोजनं वर्जयित्वा तु तामेनं स्पृष्ट्वा न दुष्यति। तथा। भुंक्ते शय्यासनस्थो यः पिवेद्वापि द्विजोत्तमः। अमत्स्येण हितं तुल्यं चरेच्चांद्रायणं व्रतं। भारते। संयावकृसरं मांसं शष्कुलीपायसं तथा। आत्मार्थं न प्रकर्तव्यं देवतार्थं प्रकल्पयेत्। देवीपुराणे। कृसराणि च यूपानि पायसं मधुसर्पिषी। वृथा मांसं च नाश्नीयात् नित्यं देवविवर्जितं। अपेयदुग्धानि। तत्र शंखः। माहिषं गव्यमाजं च भक्ष्यं क्षीरेषु निर्दिशेत्। निर्धारणे सप्तमी बलादन्यान्यभक्ष्याणीत्याहुः। अभक्ष्यदुग्धानां दधितक्राद्यप्यभक्ष्यं। क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः। सप्तरात्रं व्रतं कुर्यादेभ्यस्त्वरि कीर्तितमिति भवदेवलिखितवचनात्। भक्ष्येऽपि विशेषमाह गौतमः। गोः क्षीरं निर्दशायाः सूतके जामहिष्योश्च सूतकं च दशाहकं। तदुक्तं। अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका। दशरात्रेण शुद्ध्यंति भूमिस्थं च नवोदकं। दशाहानंतरमपि कासांचिद्दुग्धवारणं वर्ज्यमाह। स एव। स्यंदनीयमसूस्यंदनीनां। स्यंदिनी वत्सं विना प्रस्रवणशीला। यमसूः यमलप्रसवित्री। संधिनी वृषभोपगता। गर्हितानीति भवदेवः। वृहद्वसिष्ठः। स्यंदिनी संधिनी विवत्सा क्षीरमभोज्यममेध्यभुजश्च। अमेध्यभुजः विण्मूत्रादिभुजः। अत्रिः। न्यूनाधिकस्तनी या तु याचान्याभक्ष्यहारिणी। तयोर्दुग्धं न पातव्यं नु होतव्यं कदाचन। वृहत्पराशरः। गर्भिण्यवत्सस्तूति काः गवादेर्वर्जयेत्पयः। क्षीराणामेकशफोष्ट्रीणां

संध ४८ =

२४० तथारण्यकमाविकं। बौधायनः। विवत्सान्यवत्सया मृतवत्सायाश्च तथा अन्यवत्सेनप्रस्रवंत्या दुग्धमपेय
240 मित्यर्थः। पराशरः। दुर्बला व्याधिसंयुक्ता पुष्पिता या द्विवत्ससूः। सा साधुभिर्न दोग्धव्या वारिणीभिः सुखमी
प्सुभिः। आपस्तंबः। द्वौमासौ पाययेद्वत्सं तृतीये द्विस्तनं दुहेत्। चतुर्थे त्रिस्तनं दुह्याद्यथान्यायं यथाबलं। म
नुः। अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा। आविकी संधिनी क्षीरं विवत्सायाश्च गोः पयः। आर
ण्यानां च सर्वेषां मृगाणां माहिषीं विना। स्त्रीक्षीरं चैव वर्ज्यानि सर्वशुक्तानि चैव हि। उष्ट्रीक्षीरमवीक्षीरम
ज्ञानात्पिबते द्विजः। त्रिरात्रमुपवासः स्यात्पंचगव्येन शुध्यति। नंदिपुराणे। कपिलायस्य गोस्तु स्याद्दन
न्ने ब्राह्मणस्य च। स याति दुस्तरं घोरं नरकं तु तमोमयं। भविष्यपुराणे। कापिलं यः पिबेच्छूद्रो नरके स वि
पच्यते। हुतशेषं पिबेद्विप्रो विप्रः स्यादन्यथा पशुः। आपस्तंबः। क्षत्रियश्चैव हंतस्या वैश्यः शूद्रोथवा पुनः।
यः पिबेत्कापिलं क्षीरं ततो नान्योस्त्यपुण्यकृत्। भविष्ये। गृहीत्वा कापिलं वैश्यः कामतस्तु स्वयं पिबेत्।
पतितस्तु भवेन्नित्यं चांडालसदृशः पुमान्। तस्या घृतं च क्षीरं च नवनीतं तथा दधि। उपजीवंति ये शूद्रास्ते
यांति नरके ध्रुवं। कपिलाक्षीरपानेन ब्राह्मणीगमनेन च। वेदाक्षरविचारेण शूद्रो नरकमृच्छति। दिवो
दासे। क्षीरं च तद्दहरुक्तं दधिपूर्वकृतं निशि। तथाम्लविकारं च घृतं ग्राह्यं सुगंधिकृत्। अप्राप्तविकारं

अनाघ्रातं। वस्त्रगलितं यत्र मुखं नोद्धृतं तदाज्यं प्रशस्तं॥ अथ तिथिपुरस्कारेणाभक्ष्याण्याह स्मृतिसारः। प्रतिपत्सु न चाभ्यंगं द्वितीयायां फलं द्विरिं। लवणं च तृतीयायां चतुर्थ्यां न तु रांपिवेत्। न मंथे

दधि पंचम्यां षष्ठ्यां तैलं न भक्षयेत्। धात्रीफलं तु सप्तम्यामष्टम्यां पिशितं त्यजेत्। नवम्यामर्द्रतकाष्टं च दशम्यां नालिकेरकं। एकादश्यामन्नमपि निष्पावान्द्वादशीषु च। त्रयोदश्यां न वृंताकान्नमूलायां दुरंस्पृतं। स्मरोत् ४=

नमे घुर्नं चैव दुनाशेनरवकामिस्तु पीडनं। इति षोडशकं प्राहुः पापस्थानं मनीषिणः। हलायुधे। कूष्मांडं

लामर + बृहतीं चैव पटोलं मूलकं तथा। श्रीफलं निंबपत्रं च तालं चापि तथा शिरः। अलाबुं नाडिकां चैव शिविकां पोतिकां तथा। तिलान्माषं चमांसं च वर्जयेत्प्रतिपदादिषु। शिरो नारिकेलं। नालिका कलंबी। गोभिलः।

शिरः कपालमंत्राणि नखचर्मतिलानि च। यदीकेदू धुर्गमनं मष्टम्यादिषु वर्जयेत्। कपालं तुंबी। अंत्रं नालीशाकं। नखः शिविः शाणपुष्पाणि वा। चर्म बिल्वफलं। तिलं वार्ताकः। पराशरः। वनस्पतिगते सोमे परान्नं ये तु भुंजते। तेषां मासकृतं पुण्यं यस्यान्नं तस्य तद्भवेत्। तथा। बहुजप्यपरान्नं च सायं भोजनमैथुने। मांसं तैलं तिलं पिष्टममावास्यां विवर्जयेत्। दिवोदासे। व्रतयज्ञादिके कार्ये व्रतस्यापतनकर्मणि। नाश्नीयादन्नमन्यस्य यस्यान्नं तस्य तद्भवेत्। पाद्मे। परान्नं परपाकं च नित्यं धर्मरतस्त्यजेत्।

सर्वतः प्रतिगृह्णीयाद्भोजनं तु न समाचरेत् । नरकं दारुणं गत्वा परान्नेच्छमतिं त्यजेत् । यो यस्यान्नं समश्ना
ति स तस्याश्नाति किल्बिषं । परान्नं परवस्त्रं च परशय्यां परयोषितः । परवेश्मनिवासश्च हरंत्येतानि संपदः ।
याज्ञवल्क्यः । परपाकरुचिर्न स्यादनिंद्यामंत्रणादृते । जमदग्निपैठीनसी । ब्राह्मणस्य सदाश्नीयात्क्षत्रि
यस्य च पर्वसु । प्रकृतेषु च वैश्यस्य शूद्रस्य न कदाचन । प्रकृतेषु गोमंगलाद्युत्सवेषु । पाद्मे । भुंजीयाद्वैष्ण
वस्यान्नं प्रयत्नेन विचक्षणः । शरीरस्य विशुद्ध्यर्थं तदभावे जलं पिबेत् । भविष्ये । विप्रं जामातरं मन्येत
स्य कोपं न कारयेत् । अप्रजायां तु कन्यायां नाश्नीयात्तस्य वै गृहे । अथ भुंक्ते स वै मोहात्पूयं तु नरकं व्रजेत् ।
आग्नेये । अप्रसूता च या कन्या नाश्नीयात्तद्गृहे पिता । प्रसूतायां तु भुंजीत पुत्रवद्दुहिता मता । उपास
ते ये गृहस्थाः परपाकमबुद्धयः । तेन ते पशुतां प्रेत्य प्राप्नुवंत्यन्नदायिनां । यमः । स्वपाके विद्यमाने यः
परपाकं निषेवते । सोंधत्वं शूकरत्वं च गर्दभत्वं च गच्छति । परपाकान्नपुष्टस्य द्विजस्य गृहमेधिनः ।
इष्टं दत्तं तपोधीतं यस्यान्नं तस्य तद्भवेत् । हारीतजमदग्नी । ब्राह्मणान्नेन दारिद्र्यं क्षत्रियान्नेन प्रेष्यता ।
वैश्यान्नेन च शूद्रत्वं शूद्रान्नेन नरकं व्रजेत् । मनुयमवसिष्ठाः । अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्याप
चारिणी । आचार्ये स्वकृतं शिष्यः स्तेनो राजनि किल्बिषं । भ्रूणहेति परं पातकिमात्रोपलक्षकं । मार्ष्टि

स्वकीयं पापं अन्नभोक्तरि नियोजयतीत्यर्थः। भारते उद्योगपर्वणि दुर्योधनं प्रति श्रीभगवद्वाक्यम्।
आपद्भोज्यानि चान्नानि प्रीतिभोज्यानि वा पुनः। न च त्वं प्रीयसे राजन् न वा आपद्गता वयं। धर्मप्रदीपे।
पितुः पुत्रस्य यच्चान्नं भ्रातुर्गुर्वोस्तथैव च। श्वशुरान्नं मातुलान्नं न परान्नं प्रचक्षते। तथा। भूताष्टम्यो
र्दिवा भुक्त्वा रात्रौ भुक्त्वा च पर्वणि। एकादश्यां दिवा रात्रौ हन्ति पुण्यं पुराकृतं। तथा। दशमीद्वादशीश्रा
द्धे अमाशर्वरीकसंक्रमे। तत्र नक्तं न भुंजीत भुक्त्वा चांद्रायणं चरे दिति॥ अथ मांसानि॥ ॥
तत्र याज्ञवल्क्यविश्वामित्रौ। प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया। देवान्पितॄंश्चार्चयित्वा
खादन्मांसं न दोषभाक्। भक्षयंश्चापि मांसानि शेषभोजी न लिप्यते। औषधार्थमशक्तो वा नियोगाद्यज्ञकर्मणि।
प्राणात्यये यत्र मांसभक्षणं विना प्राणनाशः संभाव्यते। श्राद्धे त्वाविधिविधाय दैवे नियुक्तः श्राद्धे चेति यमवच
नात्। नियुक्तस्त्वेव यः श्राद्धे दैवे वा मांसमुत्सृजेत्। यावंति पशुरोमाणि तावन्नरकमृच्छति। प्रोक्षितं यज्ञा
र्थे मंत्रैः संस्कृतं। द्विजकाम्यया अप्रशस्तमपि यं ब्राह्मणानुरोधेन। इदमपि सकृदेव। सकृद्ब्राह्मणकाम्ययेति
यमवचनात्। तथा। सर्वभूतमयं व्याधिः अमारोगप्रशासनं। अव्रतघ्नानि कीर्त्यंते सकृदेतानि शास्त्रतः।
५२५ देवान्पितॄन्मांसेन संतर्प्य तच्छेषभोज्यौषधार्थं यत्रानन्यगतिकत्वेन मांसं विनौषधासिद्धिः। अशक्तो मांसभ

२४२

242

दाणं। विनाजीवास्तामर्च्येन सर्वथा शरीराणि विग्रहे इदमप्यकृतसंकल्पस्य कृतसंकल्पेन तु तत्र भक्ष्यं। रोगा
र्त्तो व्याधितो वापि यो मांसं नात्त्यलोलुपः। फलमाप्नोत्ययत्नेन सोश्वमेधशतस्य चेति बृहस्पतिवाक्यात्।
तदाह देवलः। भक्षयेत्प्रोक्षितं मांसं सकृद्ब्राह्मणकाम्यया। दैवे नियुक्तः श्राद्धे वा नियमे तु विवर्जयेत्।
नियमे मांसत्यागनियमे सति। यदि त्यक्तमांसेनान्यचिकित्स्यव्याधु[illegible]प्रशमनार्थं मांसभक्षणं कृतं
तदा तेन प्रायश्चित्तं कर्त्तव्यं। यदुक्तं ब्रह्मपुराणे। ब्राह्मणानुज्ञया भक्ष्यं त्यक्तं मांसं च रोगिभिः। मातापितृ
भ्यां संभुक्तं शेषं वा ब्रह्मचारिणः। पुनः प्रशान्तरोगेण कर्त्तव्यमधिकं व्रतं। व्रतमत्र चान्द्रायणं। अनादिष्टे
षु पापेषु शुद्धिश्चान्द्रायणेन त्विति स्मृतेः। अनादिष्टेषु अनादिष्टव्रतविशेषेषु। तथा। पूर्वं व्रतं गृहीत्वा
यो नाचरेत्काममोहितः। जीवन्भवति चाण्डालो मृतः श्वा चैव जायते। अविधिभक्षणे दोषमाह मनुः।
नाद्यादविधिना मांसं विधिज्ञोऽनापदि द्विजः। जग्ध्वा त्वविधिना मांसं प्रेत्य तैरद्यतेऽवशः। न तादृशं भ
वत्येनो मृगहन्तुर्धनार्थिनः। यादृशं प्रेत्य भवति वृथामांसानि खादितुः। स्वमांसं परमांसेन यो वर्द्धयितु सनिषिवणात् १=
मिच्छति। यत्र तत्राभिजायेत स भवेद्व्याधिपीडितः। भुक्त्वा तु मोहान्मांसानि नरः पुष्ट्यर्थमात्मनः। अकृत्वा
ह्यात्मनः शुद्धिं तिर्यग्योनिषु जायते। शुद्धिः प्रायश्चित्तं। भारते। मांसभक्षयिता मत्र यस्य मांसमिहाद्म्यहं।

एतन्मांसस्य मांसत्वं प्रवदंति मनीषिणः । मनुः । विना श्राद्धं तु यो मांसं स्वार्थमपि भक्षयेत् । न तस्य पितरो गेहे श्रा
यांति वधकस्य चेति । शुष्काणि भुक्त्वा मांसानि भौमानि कवकानि च । भुक्त्वा तत्रैव हत्वा नास्य मेत देवव्रतं चरेत् । भक्षानंचैव॰ वा॰पा॰ २=
हत्वा नाहिंसास्थानं । एतदेव व्रतं चांद्रं । तथा । यस्तु खादति मांसानि ब्राह्मणो वेदवित्तथा । स पच्यते निरालंबे नरके
तेन कर्मणा । नन्वेवं ब्राह्मणस्य मांसभक्षणानि षिधेति द्धे द्विजपुरस्कारेणापि यस्तु विधिमांसभक्षणं तदपि
क्षत्रियादिपरमेव सामान्यविशेषन्यायादिति वाच्यं । असंस्कृतान्पशून्मंत्रैर्नाद्याद्विप्रः कथंचन । मंत्रैस्तु संस्कृ
तानद्याच्छाश्वतं विधिमास्थितः । इत्यादिमनुवचनेन ब्राह्मणस्यापि सविधि मांसभक्षणविधानात् । तस्मात्प्र
तिषेधवचनान्यविधिमांसभक्षणविषयाणीति बोद्धव्यं । तथा चातुर्वर्ण्यस्यैव मांसभक्षणे प्रवृत्ते निवृत्तावपि च
तुर्णामधिकारः । प्रवृत्तिमतो निवृत्तिधर्मेधिकार इति न्यायात् । यद्वा सविधिमांसभक्षणमपि प्रवृत्तिमार्गापन्ना
नां निवृत्तानां तु निषेधश्रुतेः । यदुक्तं भारते । प्रवृत्तिलक्षणो धर्मः प्रजार्थिभिरुदाहृतः । यथोक्तं राजशार्दू
ल न तु तन्मोक्षकांक्षिणां । महापुराणेपि । न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित् । मुन्यन्नैः स्यात्परा प्री
त॰ तिर्न तथा पशुहिंसयेत्यादि बहुशः प्रमाणानि । मनुः । यो यस्य मांसमश्नाति स तन्मांसाद उच्यते । मत्स्यादः स
र्वमांसादस्तस्मान्मत्स्यान्विवर्जयेत् । बृहत्पराशरः । रहस्यापि हि यो नाद्यात्पिशितं च कदाचन । स साक्षा

२४५ मुनिभिः प्रोक्तो योगी व ब्रह्मलोकगः । एकोद् शतमश्वेन यजेत पशुना द्विजः । अन्यो न मांसमश्नाति स्वर्गप्रा
प्तिस्तयोः समा । भारते । हिरण्यदानैर्गोदानैर्भूमिदानैश्च सर्वशः । मांसस्याभक्षणे धर्मो विशिष्ट इति नः श्रुतं ।
243 भक्षयित्वा च यो मांसं पश्चादपि निवर्तते । तस्यापि स्यान्महाधर्मो यः पापाद्विनिवर्तते । मधुमांसं च ये नित्यं वर्जयंती
ह धार्मिकाः । जन्मप्रभृति सर्वं तु सर्वे ते मुनयः स्मृताः । नंदिपुराणे । यदि वा न समर्थः स्यात्तदा मांसविवर्जने ।
वर्जयेदयने मुख्ये कृत स्वर्गमतिर्नरः । आचारचिंतामणौ । चतुर्थी चाष्टमी चैव द्वादशी च चतुर्दशी । पंचप
र्वाणि वर्ज्यानि षडशीतिमुखानि च । संक्रमश्चापि सूर्यस्य विषुवौ चापि वार्षिकौ । पर्वसंक्रमग्रहणादेव चतुर्द
श्यादिलाभे पुनरयनादिग्रहणं दोषातिशयार्थं । अथ पशुहिंसाविधिः । तत्र मनुः । यज्ञार्थं पशवः सृष्टाः
स्वयमेव स्वयंभुवा । यज्ञश्च भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः । [illegible] भूत्यै मरणाय । सवस्यदेवारेः ।
मधुपर्के च होमे च पितृदैवतकर्मणि । एष्वेव च पशून्हिंसेद्वेदतत्त्वार्थविद्द्विजः । आत्मानं च पशुं चैव गमय
त्युत्तमां गतिं । तथा । ओषध्यः पशवो वृक्षास्तिर्यंचः पक्षिणः तथा । यज्ञार्थं निधनं प्राप्ताः प्राप्नुवंत्युत्सृ
तीः पुनः । उत्सृतीर्जीवोत्कर्षान् । काशीखंडे । मखार्थं पशवः सृष्टाः पशुरूपास्तथौषधीः । निघ्नन्नहिंस
को विज्ञानामपि अभागतिः ॥ बृहत्पराशरः । पितृदेवक्रतुहोमे मधुपर्के तथैव च । अत्र हिंसाप्यहिंसा स्या

मुखे

हिंसाप्यत्रप्रदुःसहा। मनुः। गृहेगुरावरण्येवानिवसन्नात्मवान्द्विजः।नावेदविहितांहिंसामापद्यपिसमाचरेत्।
तथा।यावंतिपशुरोमाणितावत्कृत्वेवमारणं।वृथापशुघ्नःप्राप्नोतिप्रेत्यजन्मनिजन्मनि।प्रेत्यमृत्वा स्वमारि
तपशुरोमसम्मितमारणं वृथापशुघ्नःप्राप्नोति।तस्मान्नवृथापशुहन्यादित्यर्थः। यत्तुहारीतः। मात्सका
त्सित्सकाश्चैवकिल्बिषाज्ञानसंभवः।योयस्यभक्षयेन्मांसंसतस्याश्नातिकिल्बिषं।भक्षयित्वातुयोमांसमद्भिः
शौचंसमाचरेत्।हसंतिदेवतास्तस्य अशुचेःशुचिदर्शिनः।किल्बिषमत्रशुक्रशोणिते।तस्यकिल्बिषंतन्मां
सं तन्मयत्वात्तच्चिंत्यं। यत्तु एतन्निषिद्धं।प्राणिहिंसापूर्वकमांसभक्षणविषयं।नतुक्रयादिप्राप्तमांसभ
क्षणविषयमपि प्राणिवधनिंदापूर्वकमेवमांसनिषेधस्मरणात्।इति।तन्न।हत्वैवक्रीत्वापिभक्षणेदोषस्म
रणात्।तेनकथमपिलब्धमांसभक्षणमेवपापहेतुर्नतुहिंसादिप्रयोज्यत्वेनैव। पुनःसएव।आहर्त्ताचानुमं
ताचविशस्ताक्रयविक्रयी।संस्कर्त्ताचोपहर्त्ताचषडेतेघातकाःस्मृताः।निदेशेनानुमंताचविशस्ताशासना
त्तथा।हननेनतथाहंताधनेनक्रयिकस्तथा।विक्रयीचपणादानात्संस्कर्त्तातुप्रवर्त्तनात्।घातकाःषडस्स
माख्याताःखादकस्तत्रसप्तमः।क्रेतारंव्रजतेपादःपादोभोक्तारमेवच।घातकंव्रजतेपादःपादस्वचंत्य
तत्त्रयः।खादकोघातकःक्रेतात्रयस्तुल्यानसंशयः।विशसिताअस्थिमांसविभागकर्त्ता।उपकर्त्तापरिवेषकः।

२४८ 244

मनुः। क्रीतं स्वयं वापि हृतं परोपहृतमेव वा। देवान् पितॄंश्चार्चयित्वा खादन् मांसं न दुष्यति। बृहत्पराशरः। न स्वयं तु पशुं हन्यात् क्षुत्क्षामादिक उपस्थिते। क्रव्यादैः सारमेयाद्यैर्हतं मृगादि नाहरेत्। एतच्छाकवदिच्छंति पवित्रं द्विजसत्तमाः। इदमपि प्रवृत्तिमार्गापन्नानां प्रतीयते। युगांतरविषयं वा। अनृतागोवधश्चैव श्राद्धे मांसं तथा मधु। देवराच्च सुतोत्पत्तिः कलौ पंच विवर्जयेदिति गालवोक्तेः। आत्मरोगनरविषयं वा। यथा योगी। मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः। मधुप्रधानं शूद्रस्य सर्वेषामविरोधि यत्। अविरोधि यत्कालशाकादि। तत्तद्वैषां देशाचारतो वाच्यं। व्यवस्थापनीयं। अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न हीति स्मृत्युक्तेः। अन्नासंभवे वा। संभवत्यन्नपानादौ यो मांसैस्तर्पयेत् पितॄन्। सोविद्वांश्चंदनं दग्ध्वा कुर्यादंगारविक्रयमिति बृहत्पराशरः। पुनः स एव। सिक्ता कूपे यथा किंचिद्दलेनादातुमिच्छति। पश्चात्पतति सोज्ञानान्मांसेन श्राद्धकृत्तथा। मनुरपि। नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित्। न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत्। श्रीभागवतेपि। तीर्थेषु श्रुतिदृष्टेषु राजा मेध्यान् पशून् वने। यावदर्थमलं लुब्धो हन्यादिति नियम्यते। अयं भावः। न हि हिंसा विधीयते रागप्राप्तत्वात्। किंतु नियमेन प्रवृत्तिः संकोच्यते। नियममेव षड्भिर्दर्शयति। यद्यलमत्यर्थं लुब्धो रागी सन् हन्यात्तर्हि तीर्थेषु श्राद्धादिष्वेव तत्रापि श्रुतिदृष्टेषु प्रख्यातेष्वेव। न नित्यश्राद्धादिषु।

तत्रापि राज्ञैव मेध्यानेव पुनरेव यावदुपयोगमेवेति दिक् ॥ शसंगात्पक्वान्नशुद्धिमाह । तत्र ब्रह्मपुराणं ।
पक्वमन्नं गवाघ्रातं मक्षिकाकेशदूषितं । छागघ्रातं च तत्कृत्वा शोध्यं रत्नौबुभिः सह । श्वसूकरखरोष्ट्रैश्च
यदालीढं च जंतुकैः । अन्नं विहाय तत्पश्चात्संस्पृष्टं व्यमयाग्निना । छागघ्रातं तथा शुद्धं स्याद्धा हेमजलेर्युतं ।
इति अभ्यूतान्नविषयं । तथा । भुंजतश्चापि यच्चान्नं मक्षिकाकेशदूषितं । रजः पिपीलिकायुक्तं यच्च स्पृष्ट
मवक्षुतैः । तदन्नं तु विहायैव शेषं त्वात्तं बुभिः शुचिः । यमः । अशुचीनि द्विजोन्नानि न भुंजीत कदाचन ।
प्रक्षालयित्वा निर्दोषाण्यपद्धर्मो यदा भवेत् । तत्र भुंजीत तत्पनुषज्यते । तथा । मसूरं माषसंयुक्तं तथा पर्युषि
तं च यत् । तत्तु प्रक्षालितं कृत्वा भुंजीताज्याभिघारितं । माषोत्र राजमाषः । अथ द्रोमसूरसाह चर्पातं ।
तथा । मक्षिकाकेशमन्नेषु पतितं यदि दृश्यते । मूषकस्य पुरीषं वा द्रुतं यच्चावधूनितं । भस्मना स्पृश्य चा
श्नीयादंभुद्यस्य सलिलेन तु । तथा । अवक्षुतं केशपतंगकीटैर्हृदक्ययायत्पतितेऽप्यदृष्टं । प्रक्षालनं संबु
हिरप्पतोयैः संस्पृष्टमन्नं मनुराह भोज्यं । केशपतंगकीटैर्दूषितमिति शेषः । तथा । मक्षिका दंशमशकाः
घुणाः सूक्ष्माः पिपीलिकाः । आमिषामेध्यसौवीरं नैते कीटविपत्तये । आमिषामेध्यसौवीरीसरितमांसोद्भवः
कीटः । विपत्तये दोषाय न भवेयुरिति शेषः । वाक्प्रश[illegible]स्तानि भुंजीत वाग्दुष्टानि च वर्जयेत् । अशुचीनि ह्यन्नपानानि

२४५ 245

वाक्पूतानि न संशयः । मनुः । पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतं । दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति ।
श्वपक्षिशव्दोमहस्तदिपरः । याज्ञवल्क्यः । त्वक्केशरोमनखास्थिपुरीषाणि दृष्ट्वा तन्तदेशपिण्डमुद्धृत्याद्भिरभ्यु
क्ष्य भस्मन्यवकीर्य्याभिद्यार्य पुनरपि भक्ष्यं वाचा प्रशस्तमुपभुंजीत । शातातपः । केशकीटगवाघ्रातं वायसो
पहतं च यत् । क्षीवाभिशस्तपतितैः सूतकोदक्यनास्तिकैः । दृष्टं वास्वाद्य दत्तं तु तस्य निष्कृतिरुच्यते । अभ्यु
क्ष्य किंचिदुद्धृत्य भुंजीतैवाप्यशंकितः । भस्मना चापि संस्पृश्य संस्पृशेदुदकेन च । हवर्णरजताभ्यां वा भोज्यं घ्रा
तमजेन वा । तथा । घृतं च पायसं क्षीरं तथैवेक्षुरसो गुडः । शूद्रभांडगतं तक्रं तथा मधु न दुष्यति । पायसं
श्रामित्ता । उशना । अजाघ्रापलेनाल्नानां स्नेहघृततैलवणमधुगुडानां पाकेन शुद्धिरिति शेषः । लोगाक्षिः ।
पयोदधिविकारादि शुचि पात्रांतरस्थितं । प्लावनोत्पवनाभ्यां वा पर्यग्निकरणेन च । उत्पवनं वस्त्रादिना गालनं ।
देवलः । चांडालभाषणेनापि दुष्टं हविरयाज्ञिकं । विडालादिभिरुच्छिष्टं दुष्टमन्नं विवर्जयेत् । विष्णुः । द्रो
णादभ्यधिकं सिद्धं न दुष्यति कदाचन । तस्योपहतमपास्य गायत्र्याभिमंत्रसुवर्णांभः क्षिपेत् । वलस्यदर्श
ये दग्नो काकैःश्वभिश्च यद्दुष्टं तदन्नं नैव दुष्यति । तावन्मात्रं समुद्धृत्य शेषं संस्कारमर्हति ।
द्रोणः षट्पंचाशदधिकं पलशतद्वयं । वसिष्ठः । देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च । काकैःश्वभिश्च

एतः

संसृष्टमन्नंतन्नविवर्जयेत्। देवद्रोणी देवयात्रा। एतद्ग्रहणं बहून्नकार्यप्रदर्शनार्थं। अङ्कोनेषु अश्लेषु
अवश्यंभाविसर्वोत्सवेषु ॥ ॥इत्याचाररत्नाकरे षष्ठभागकृत्यपरिच्छेदः॥ ॥अथ सप्तमभागकृत्यं।
तत्र दक्षः॥ इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेत्। षष्ठसप्तमकावर्धप्रहरात्मकौ कालौ दक्षेणाष्टधादि
नविभजनात्। इतिहासो महाभारतादिः। पुराणं पंचलक्षणं ब्राह्मादि। आदिपदादाख्योपाख्यानकाव्यधर्मशा
स्त्राणि गृह्यन्ते। तन्माहात्म्यसूचकानि कतिचिद्वचनानि लिख्यन्ते। तत्र भविष्यपुराणे। इतिहासपुराणानि
भक्त्या श्रुत्वा विशांपते। मुच्यते सर्वपापेभ्यो ब्रह्महत्यादिभिस्तथा। सायंप्रातस्तथा रात्रौ शुचिर्भूत्वा शृणोति यः।
अश्वमेधमवाप्नोति सर्वकामानवाप्नुयात्। पुराणाधिकारे भविष्ये। अध्येतव्यं न चान्येन ब्राह्मणं क्षत्रियं वि
शं। श्रोतव्यमिह शूद्रेण नाध्येतव्यं कदाचिन। शतानीकः। ब्राह्मणं वाचकं विद्यान्नान्यवर्णजमादरात्।
श्रुत्वान्यवर्णजाद्राजन्वाचकान्नरकं व्रजेत्। तच्छ्रवणप्रकारोपरार्के। शूद्राणां पुरतो वैश्यो वैश्यानां क्ष
त्रियास्तथा। क्षत्रियाणां तथा विप्राः श्रावयेत कायतः स्थिताः। तथा। भारतं नयते स्वर्गं मुक्तिं भागवतं नयेत्।
अष्टादशपुराणानि पुनर्जन्म न विद्यते। श्रुत्वेति शेषः। भारते। द्वैपायनोष्ठपुटनिःसृतमप्रमेयं पुण्यं पवित्रमथ
पापहरं शिवं च। यो भारतं समधिगच्छति वाच्यमानं किं तस्य पुष्करजलैरभिषेचनेन। यो गोशतं कनकशृंगमयं ददाति

२४६ विश्राम्य वेदविदुषे स्वबहुश्रुताय । पुराणं पंचमस्तं कथां शृणुयात्समग्रां तुल्यं फलं भवति तस्य च तस्य चैव । भाति सर्वेषु
248 वेदेषु रतिः सर्वेषु जंतुषु । भारतं सर्वपापानां तेन भारतमुच्यते । ब्रह्मपुराणे अंबरीषं प्रति गौतमस्य वचनं । अंबरीष
शुकप्रोक्तं नित्यं भागवतं शृणु । पठस्व स्वमुखेनापि यदीच्छसि भवक्षयं । राजंते तावदन्यानि पुराणानि सतां मते ।
यावन्न दृश्यते साक्षाच्छ्रीमद्भागवतं परं । सर्ववेदांतसारं हि श्रीभागवतमिष्यते । तद्रसामृततृप्तस्य नान्यत्र स्या
द्रतिः क्वचित् । निम्नगानां यथा गंगा देवानामच्युतो यथा । वैष्णवानां यथा शंभुः पुराणानामिदं तथा । स्कांदे ।
यच्छंति वैष्णवे भक्त्या शास्त्रं भागवतं हि ये । कल्पकोटिसहस्राणि विष्णुलोकं वसंति ते । वैष्णवानि तु शास्त्राणि ये
र्चयंति गृहे सदा । सर्वपापविनिर्मुक्ता भवंति सुरवंदिताः । रामायणे । चरितं रघुनाथस्य शतकोटिप्रविस्तरं ।
एकैकमक्षरं प्रोक्तं महापातकनाशनं । वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः । शृण्वन्रामकथानादं
को न याति परां गतिं । श्रोतव्यं विष्णुचरितं यशोधर्मजयार्थिना । पापक्षयार्थं देवर्षे स्वर्गार्थं धर्मबुद्धिना । वैष्ण
वं चरितं पुण्यमायुरारोग्यवृद्धिदं । पठतः शृण्वतो वापि सर्वपापं व्यपोहति । मत्कथावाचकं नित्यं मत्कथाश्रवणे
रतं । मत्कथाप्रीतमनसं नाहं त्यक्ष्यामि तं नरमिति भगवद्वाक्यं । वेदे रामायणे पुण्ये भारते भरतर्षभ । आदौ
मध्ये तथा चांते च विष्णुः सर्वत्र गीयते । तथा । वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि । वक्तारं पृच्छकं श्रोतॄंस्तत्पा

दसलिलंयथा। महापुराणेभगवद्वाक्यं। यथायथात्मा परिमृज्यते सौ मत्पुण्यगाथाश्रवणाभिधानैः। त
था तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवांजनसंप्रयुक्तं। शृण्वतः श्रद्धया नित्यं गृणतः स्वविचेष्टितं। कालेन
नातिदीर्घेण भगवान्विशते हृदि। तस्माद्गोविंदमाहात्म्यमानंदरससुंदरं। शृणुयात्कीर्तयेन्नित्यं स कृतार्थो
न संशयः। व्यतिरेके निंदा सत्कारे। न शृण्वंति न हृष्यंति वैष्णवीं प्राप्य सत्कथां। सत्यं सत्यं मुनिश्रेष्ठ तेषां स्वा
मी सदा यमः। न गच्छंति सदा मर्त्याः श्रोतुं विष्णुकथां मुने। एकादश्यां विशेषेण नान्ये पापरतास्तथा। मार्कंडे
यः। ये कथां वासुदेवस्य न शृण्वंति विमोहिताः। अग्निवर्षी क्षिपेच्छौरिः कीलान्कर्णेषु वायसान्। श्रीभागवते।
आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ। तस्यर्ते यः क्षणो नीत उत्तमश्लोकवार्तयेति। बृहन्नारदीये। वेदवे
दांगशास्त्राणां सारभूतं मुनीश्वराः। जगद्धिताय तत्सर्वं पुराणेषूक्तवान्मुनिः। पुराणेष्वर्थवादत्वं ये वदंति
नराधमाः। तैरर्जितानि पुण्यानि तद्वदेव भवंति हि। स बाह्यः श्रोतियो मूढो दंभाद्भक्तिविवर्जितः। सोपि तद्व
न्महाघोरे नरके पच्यते क्षये॥ ॥इत्याचाररत्नाकरे सप्तमभागकृत्यपरिच्छेदः॥ ॥अथाष्टमभा
गकृत्यं॥ दक्षः। अष्टमे लोकयात्रा तु वहिः संध्या ततः परं। तथा। शौचं कृत्वा यथान्यायमर्धास्तमिते
भास्करे। वहिः संध्यामुपासीत आसीनस्त्वथवा गृहे। ततो ध्रुवदर्शनं। तत्र ब्रह्मपुराणं। शिशुमारस्तु यः

प्रोक्तः सध्रुवो यत्र तिष्ठति। सन्निवेशं च तस्या सुभ्रु शृणुष्व मुनिसत्तम। उत्तानपादस्तस्याथ विज्ञेयो ह्युत्तरो हनुः। यज्ञो ध
रश्च विज्ञेयो धर्मो मूर्धानमास्थितः। हृदि नारायणश्चास्ते अश्विनौ पूर्वपादयोः। वरुणश्चार्यमा चैव पश्चिमे तस्य सक्थिनी।
शिश्नः संवत्सरस्तस्य मित्रोऽपानं समाश्रितः। पुच्छेऽग्निश्च महेन्द्रश्च कश्यपोऽथ ततो ध्रुवः। एतद्दर्शनफलं तत्रैव। यद
ह्ना कुरुते पापं दृष्ट्वा तं निशि मुच्यते। यावत्यश्चेह ताराश्च शिशुमाराश्रिता दिवि। तावन्त्येव तु वर्षाणि जीवत्यभ्यधि
कानि च। अधिका निशान्तं वर्षाणीत्यर्थः॥ अथ साग्नेः सायं होमः॥ तत्र संकल्पाहुतिममुकद्रव्येणाहं यक्ष्ये।
ततः ॐ अग्नये स्वाहा इदमग्नये। ॐ प्रजापतये स्वाहा इदं प्रजापतये। ॐ समास्त्वा इत्यनुवाकस्य जराम इत्यनु
वाकं जपेत्। इत्युपस्थानं॥ अथ योगिनो योगाभ्यासः। यदाह मनुः। प्रदोषपश्चिमौ यामौ योगाभ्यासेन तौ
नयेत्। दक्षः। अतः परं प्रवक्ष्यामि योगस्य तु विनिर्णयं। यं ज्ञात्वा सर्वपापेभ्यो मुच्यते नात्र संशयः। वृत्तिहीनं म
नः कृत्वा क्षेत्रज्ञं परमात्मनि। एकीकृत्य विमुच्येत मुख्योऽयं योग उच्यते। नारदीये। सलिले कर्कश्चैव दीपो
ग्नाविव तन्मयः। जीवस्सौख्यात्स्वयम्भूतो युक्तो ब्रह्मणि लीयते। अयं च जीवपरयोरुक्तो योगो मया द्विजः। सर्वो
पनिषदामर्थो मुनियोग्यः परात्परः॥ अथ प्रसंगातः प्राप्तं रात्रिकृत्यं निरूप्यते। तत्र शयनविधौ याज्ञवल्क्यः।
उपास्य पश्चिमां संध्यां हुत्वाग्नीस्तानुपास्य च। भृत्यैः समावृतो भूत्वा नातितृप्तोऽथ संविशेत्। अग्निहवनं साग्नेः।

नातितन्त्रश्च संविशेदितिचाकारे वैश्वदेवादिसमुच्चयार्थः

संविशेत् शयीत । तथा । शुचिदेशं विविक्तं तु गोमयेनोपलेपयेत् । प्रागुदक्प्लवने चैव संविशेत्तु सदा बुधः ॥ विष्णुपुराणे । पुनः पाकमुपादाय सायमप्यवनीपते । वैश्वदेवनिमित्तं तु पत्न्या सार्धं बलिं हरेत् । इति व्यासः । तथा । मांगल्यं पूर्णकुंभं तु शिरःस्थाने निधाय च । वैदिकैर्गारुडैर्मंत्रै रक्षां कृत्वा स्वपेत्ततः । विष्णुपुराणे । कृतपादादिशौचस्तु भुक्त्वा सायं ततो गृही । गच्छेच्छय्यामस्फुटितामपि दारुमयीं नृप । न विशालां न वा भुग्नां नसमां मलिनां न च । न तु जंतुमयीं शय्यामधितिष्ठेत्समाहितः । तथा तत्रैव । प्राच्यां दिशि शिरः शस्तं वा पश्चाममथवा नृप । सदैव स्वपतः पुंसो विपरीतं तु रोगदं । मार्कंडेयः । शून्यालये श्मशाने च एकवृक्षे चतुष्पथे । महादेवगृहे वापि मातृवेश्मनि न स्वपेत् । ब्रह्मपुराणे । नोदक्शिराः शयीतापि न च प्रत्यक्शिरा नरः । शिरस्यगस्त्यमास्थाय शयीताथ पुरंदरं । प्राक्शिरः शयने विद्याद्धनमायुश्च दक्षिणे । पश्चिमे प्रबलां चिंतां हानिं मृत्युरथोत्तरे । हारीतः । न तिर्यक् प्रत्यगुदक्शिराः कोणशिरा उत्तरशिराः । प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः । पूर्वे शिरो गृहस्थस्य दक्षिणे तु तपस्विनः । पश्चिमोत्तरशय्या च शक्रस्यापि श्रियं हरेत् । दीक्षितस्य तु प्रत्यक्शिरश्शयनं श्रतिविहितं । तस्माद्गृहे न प्रतीचीनशिराः शयीत । न देवानभिप्रसार्य शयीतेति । विष्णुः । नार्द्रपादः स्वप्यान्नोत्तरशिराः । न नग्नो नानुवंशं नाकाशे न पलाशशयने नचपंचदारुकृते । न च गजभग्नकृते । न विद्युद्दग्धकृते न भिन्ने नाग्निदग्ध

एतादृशीं शय्यामधिष्ठाय प्रक्षालितचरणः सर्वतोरक्षां कृत्वा सुत्रामाणमिति पठेद्‌ शय्यामधिष्ठाय रात्रिसूक्तं जप्त्वा विष्णुं नमस्कृत्य यज्जाग्रत इति शिवसंकल्पेन रुद्रं स्मृत्वा सर्पापसर्पभद्रं ते इत्यादिश्लोकद्वयं जप्त्वा इष्टदेवतास्मरणं कृत्वा समाधिमास्थाय आर्थ्याश्चवैदिकान्मंत्रान्सावित्रीं च जप्त्वा मंगलश्रुतिशब्दं च श्रुत्वैवं दक्षिणाशिराः स्वपेत् । दक्षिणाशिराः इति प्रदर्शनार्थं २३·पं·५

२७६

२५४

ऐ न च चत्वरे सिक्ते द्रुमजे न श्मशानशून्यालयदेवतायतनेषु । न गोगुरुहुताशनसुराणामुपरि नोच्छिष्टो न दिवा न
संध्यायां न भस्मनि नाशुचौ देशे न चार्द्रे न च पर्वतमस्तके । वंशोऽर्कद्रुमहेन्द्रपदीर्घकाष्ठे । अनुवंशं तद्देशदैर्घ्या
नुगतं । आकाशे अनावृतदेशे । न पलाशनिर्मिते । आसनं शयनं । यानं पादुके । दंतधावनं । वर्जयेद्भू
तिकामस्तु पलाशं नित्यमेव हि । न पंचजातीयकाष्ठकृते । तदुक्तं वाराहाचार्येण । एकद्रुमेण धन्यं । द्वि
द्रुमनिर्मितं तु धन्यतरं । त्रिभिरात्मजवृद्धिकरं चतुर्भिरर्थो जयश्चाग्र्यं । पंचवनस्पतिरचितं पंचत्वं याति तत्र यः शेते ।
षट्सप्ताष्टतरूणां काष्ठैर्घटिते कुलं हंति । न च पलमध्ये चपला उपहसितारः । हारीतः । नान्यशय्ये नाश्मपीठोप
धाने । नासनेन यशे अश्मनापीठि नवानोपधानं कार्यं । उशनाः । न तैलाभक्तशिराः शयीत अस्नात इति शेषः ।
शंखः । न शीर्णायां खट्वायां नान्यवर्णोपसेवितायां न नग्नः स्व । तथा । न पर्वणि न रभसोत्सवे प्रतिपत्पंचदश्योः
संधिः पर्व । रभसोत्सवे हर्षोत्पादकपुत्राद्युत्पत्तिसमये उभयत्र न शयीतेत्यर्थः । पैठीनसिः । मार्कंडेयः । न
यज्ञयागायतने रुक्षे देवभवने तथा । शून्यच्छायासु च तथा शर्करालोष्टपांशुले । विना दर्भैर्न स्वपेत विना दीक्षां
कथंचन । धान्यगोविप्रदेवानां गुरूणां चैव तथोपरि । दीक्षां यज्ञोपवीतं । अंगिराः । न चापि भिन्नशयने नाशुचि
नाशुचौ तथा । नार्द्रपादो न नग्नश्च नोत्तरापरमस्तकः । नाकाशे न वटे शून्ये न चाचैत्यद्रुमे तथा । एतत्प्रयत्नात्क

तैथं आयुरारोग्यवर्धनं। करोत्यकालेमरणं नैवकस्यभविष्यति। पैठीनसिः। नदीदितः कुलचर्मणिलुप्यात्।
नंदीपुराणे। नमोनंदीश्वरायेतियःशोच्यस्वपतेनरः। तस्यकूष्मांडराजेभ्योनभविष्यतिवैभयं। गोभिलः। अगस्त्यो
माधवश्चैवमुचकुंदोमहामुनिः। कपिलोमुनिरास्तीकः पंचैतान्शयनेस्मरेत्। विष्णुपुराणे। नर्मदायैनमःप्रात
र्नर्मदायैनमोनिशि। नमोस्तुनर्मदेतुभ्यंपाहिमांविषसर्पतः। मदनपारिजाते। निद्रासमयमासाद्यतांबूलंचंदना
न्यजेत्। पर्यंकात्प्रमदांत्यागात्पुष्पाणिमल्लिकात्। गदमप्रददत्वाहिभयदाःसर्वदाइमे। प्रज्ञांहरतितांबूलंआयु
र्हरतिपुंड्रकं। भोगस्पर्शंहरंमाल्यंप्रमदाबलहारिणी॥ अथदारोपगमनविधिः॥ तत्रापस्तंबः। सदानिशायांदारा
न्प्रत्यलंकुर्यात्। पैठीनसिः। संवृतेदेशेमैथुनमाहूयेत्। गौतमः। नमिथुनीभूयशौचंप्रतिविलंबेत्। विष्णुपुराणे।
स्नातःस्रग्गंधधृक्प्रीतोनाध्मातःक्षुधितोपिवा। सकामःसानुरागश्चव्यवायंपुरुषोव्रजेत्। व्यवायंमैथुनं। मैथु
नेप्युपवीतंतुविधेयंकंठलंबितं। निवीतंग्राम्यधर्मेष्वितिविष्णुवचनात्। विष्णुपुराणे। नास्नातांतुस्त्रियंगच्छेन्ना
तुरांनरजस्वलां। नानिष्टांनप्रकुपितांनाप्रशस्तांनगर्भिणीं। नादक्षिणांनान्यकामांनाकामांनान्ययोषितं। नक्षुत्क्षा
मामतिभुक्तांवास्वयंचैभिर्गुणैर्युतः। नान्ययोनावयोनौवानोपभुक्तौषधस्तथा। देवद्विजगुरूणांचव्यवायीनाश्रमेभ
वेत्। चैत्यचत्वरतीर्थेषुनचैवगोचतुष्पथे। नैवश्मशानोपवनेसलिलेषुमहीपते। प्रोक्तपर्वस्वशेषेषुनैवभूपालसं

२४५

२४८

ध्ययोः। गच्छेद्यावायं मतिमान्नमूत्रोच्चार पीडितः। प्रोक्तपर्वाण्यतश्चैव। चतुर्दश्यष्टमी चैव अमावास्याथ पूर्णिमा।
पर्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च। तैलस्त्री मांससंभोगी पर्वस्वेतेषु यः पुमान्। विण्मूत्रभोजनं नाम निरयं प्रति
पद्यते। विष्णुपुराणे। नाष्टमीचतुर्दशीष्वपि स्त्रियमुपेयात्न श्राद्धं दत्वा भुक्त्वा नामंत्रितः श्राद्धे नव्रती न दीक्षितो
न देवतायतने न श्मशाने शून्यालयेषु न वृक्षमूलेषु न दिवा न संध्ययोः। नाभ्यक्तो नाभ्यक्तां न रोगार्त्तो न रोगार्त्तां।
न हीनांगीं नाधिकांगीं। तथैव च वयोधिकां नोपेयाद्धर्मिणीं दीर्घमायुर्जिजीविषुः। वयोधिकात्र निवृत्तरजस्का
नादीक्षितः शीलसंस्कारवानवमन्यं यावत् स्त्रियं नोपेयादिति। अष्टमीचतुर्दशीपर्वसु रात्रावपि। अन्यत्र
दिवा। यथोक्तं मदनपारिजाते। अष्टम्यां च चतुर्दश्यां दिवा पर्वणि मैथुनं। कृत्वा सचैलं स्नात्वा तु वारुणीभि
श्च मार्जयेत्। अत्र पर्वशब्दो गोबलिवर्दन्यायेन अष्टमीचतुर्दश्यतिरिक्तामावस्यादिविषयो वेदितव्यः। धर्मप्र
दीपे। दिवाभिगमने विप्रः स्नात्वा तु पवसेद्दिनं। अहोरात्रं तु वस्यादौ प्राजापत्यं तु पर्वणि। रोगिणो रोगिण्य
वायोभिगमननिषेधः सरोगास्याभिगमवर्द्धनीयत्वे इति कल्पतरुः। एवं गच्छेत् स्त्रियं क्षामां मघां मूलं च वर्ज
येत्। सुस्थे इन्दौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान्। एवं निंदितरात्रिवर्जनेन सकृत्। एकस्यां रात्रौ एकवारं क्षामां
अल्पबलां गच्छन्पुत्रं जनयेदित्यर्थः। मघां मूलं च चाभिगमसमये वर्जयेत्। सुस्थे इन्दाविति चंद्रग्रहणं। शुभग्रह

मात्रोपलक्षकं। बलवत्त्वं स्वगृहादिस्थत्वं उच्चत्वं च। तद्यथा। रवेर्मेषतुले प्रोक्ते चंद्रस्य वृषवृश्चिकौ। भौमस्य
मृगकर्कौ च कन्यामीने बुधस्य च। जीवस्य कर्किमकरौ मीनकन्ये सितस्य च। तुलामेषौ च मंदस्य उच्चनीचा
उदाहृताः। वाराहपुराणे वैस्वतं प्रति। अष्टम्यां च चतुर्दश्यां षष्ठ्यां च द्वादशी तिथौ। अमावास्यां चतुर्थ्यां च मैथु
नं योधिगच्छति। तिर्यग्योनिं स गच्छेत् तमसं लोकं न गच्छति। याज्ञवल्क्यः। षोडशर्तुनिशाः स्त्रीणां तस्मि
न्युग्मासु संविशेत्। पर्वाणि ब्रह्मचर्याद्याश्चतस्रश्च विवर्जयेत्। निशाग्रहणाद्दिवसप्रतिषेधः। एवं गच्छन् ब्रह्म
चारी भवति। अतो यत्र ब्रह्मचर्यं श्राद्धादिषु विहितं तत्र चरमां रात्रिं गच्छतोपि न ब्रह्मचर्यस्खलनदोषोस्ति।
यद्वा। सगृह्य विपर्वणाद्याश्चतस्रश्च विवर्जयेत्। स ब्रह्मचारी भवति। ऋतुकालाभिगामित्वं स्वदारेषु न्वान्यतः।
पर्ववर्ज्यं गृहस्थस्य ब्रह्मचर्यमुदाहृतमिति कूर्मपुराणोक्तेः। इत्यनन्ताहृतेनोच समाधारणं। तथा मुक्ताफले। स्त्रीणां
तु प्रेक्षणात् स्पर्शात् तासां संगात् भाषणात्। प्रस्कंदते ब्रह्मचर्यं न दारेष्वृतुसेवनात्। रागेणाकृतानि प्रेक्षणादीनि नि
षिद्धानि यतिविषयानि च। तथाह मनुः। अमावस्यामष्टमीं चैव पौर्णमासीं चतुर्दशीं। ब्रह्मचारी भवेन्नित्यमप्यृतौ
स्नातको द्विजः। इत्यमावास्यादीनि रजोदर्शनादारभ्य चतस्रो रात्रीश्च विवर्जयेत्। तथा। ऋतुकालाभिगामी स्यात्स्व
दारनिरतः सदा। पर्ववर्जं व्रजेदेनां तद्व्रतो रतिकाम्यया। अयमर्थः। सदा ऋतुकालाभिगामी स्यात्। तत्रापि स्वदार

निरतः। न परस्त्रीषु रतः। रतिकाम्यया स्त्रीच्छयानुव्रतः सन् तद्व्रतकः सन् अनृतावपि पर्ववर्ज्यं एनां व्रजेदिति। ऋ
तुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः। चतुर्भिरितरैः सार्द्धमहोभिः सद्विगर्हितैः। तासामाद्याश्चतस्रस्तु निंदि
तैकादशी तथा। त्रयोदशी च शेषाः स्युः प्रशस्ता दश रात्रयः। युग्मासु पुत्रा जायंते स्त्रियोऽयुग्मासु रात्रिषु। तस्माद्यु
ग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रियं। पुमान्पुंसोऽधिके शुक्रे स्त्री भवेदधिके स्त्रियः। समे पुमान्स्त्रीपुंसौ वा क्षीणेऽल्पे च
विपर्ययः। निंद्यासु तासु चान्यासु स्त्रियो रात्रिषु वर्जयेत्। ब्रह्मचार्येव भवति यत्र तत्राश्रमे वसन्। ऋतुर्गर्भाधान
योग्यावस्थोपलक्षितः कालः। समे परिमाणेन सारेण वा स्त्रीपुंसोः शुक्रे पुमान्नपुंसकः स्त्रीपुंसौ वेति। इदं
द्विधाभूते समे शुक्रे बोद्धव्यं। विषमे तु द्विधाभूते स्त्रीद्वयं पुंद्वयं वा। स्त्रीपुंसावित्यत्रापि समस्यानुषंगः। यमः।
यदि संयोगकाले तु पुरुषो रागमोहितः। द्विधा समुत्सृजेच्छुक्रं यमकं तत्र जायते। क्षीणे निःसारे अल्पे
अल्पपरिमाणे विपर्यये गर्भानुत्पत्तिः। बृहस्पतिः। तस्माच्छुक्रविवृद्ध्यर्थं वृष्याणि गंधं च भक्षयेत्। लब्धाहारां
स्त्रियं कुर्यादेवं संजनयेत्सुतं। वृषं शुक्रं तस्य वृद्धिकरं वृष्यं। यदा युग्मायामपि रात्र्यां शोणिताधिक्यं तदा स्त्री
एव भवति परं पुरुषाकृतिः। अयुग्मायामपि रात्र्यां शुक्राधिक्ये पुमान्भवति परं स्त्र्याकृतिः। कालस्य निमित्तत्वा
त्। तासु षट्सु अन्यास्वष्टास्वपि वर्जयन् द्वे रात्री अवशिष्टे पर्ववर्जिते स्त्रियं व्रजन् अखंडितब्रह्मचर्यो भवति।

यत्रतत्राश्रमेवसन्निति वानप्रस्थापेक्षया नस्यहि भार्यया सहगमनपक्षे ऋतुगमनप्रसक्तेः । उत्पन्नविशिष्ट
पुत्रस्याश्रमान्तरस्यस्यापीच्छया पुत्रार्थं रात्रिद्वयगमनेऽपि दोषप्रतिपादनार्थमेतत् । यत्रतत्राश्रमेवसन्नि
तिवचनात् । पुत्रार्थीसंविशेदितिच प्रस्तुतत्वात् । पुत्रस्यच महोपकारकत्वात् इतिगोविंदराजः । अनृ
तोगमनं स्त्रियाः सकामत्वे तत्संरक्षणार्थं । तदुक्तं बृहस्पतिना । सदैववापर्ववर्जं स्त्रीणामभिमतं ततद्
इति । बृहत्पराशरः । तदान्तौ स्त्रियं गच्छेत् स्त्रीच्छयावावरं स्मरन् । स्वदारनिरतश्चैव स्त्रियोरक्ष्या यतः स्मृताः ।
भार्यया इच्छया अनतिक्रमेण प्रकृतिरस्यास्तीति । यथाकामी गर्भिण्यपानिषेधस्तु तस्या अकामत्वे सकामत्वे
तद्गमनमदुष्टं । अथयश्चोवाविजनिष्यमाणाः पतिभिः सहशयीरंस्तासामिन्द्रदत्तोवरः इति वसिष्ठः । विजनि
ष्यमाणाः प्रसोष्यन्त्यः शयीत शयीरन्नित्यर्थः । यथेन्द्रदत्तोवरः । यथावा । अब्रुवन्वरं वृणामहा ऋति
जः प्रजां विंदामहै कामंसोविजनितोः संभवामेति । तस्माद् ऋत्विजः स्त्रियः प्रजां विंदंति । कामंगा विजनितोः संभ
वति वरंह्यासामिति बृहत्पराशरः । भर्तारोवोभविष्यंति युष्माकंचित्तानुवर्तिनः । यथेच्छाकामभिः सर्वता
सामिंद्रोवरंददौ । तस्मात्तदिच्छयाकामी उभाभ्यामनुयथास्त्रियः । रक्षणीयायतस्तासु सर्वभावेन योषितः ।
अत्रिः आचारतिलके । षण्मासं भावयेन्नारीं गुर्विणी याच जायते । इदमपि स्त्रीच्छया । दंपत्योराहारविशेषा

२५१ रपत्यविशेषोदयः। तदुक्तं शतपथे पुत्रेष्टिप्रकरणे। य इच्छेत्पुत्रो मे गौरो जायेत वेदमनुब्रुवीत। सर्वमायुरिया
दिति। क्षीरौदनं पाचयित्वा सर्पिष्मंतमश्नीयातामीश्वरौ जनयितवान्। अथ य इच्छेत्पुत्रो मे कपिलः पिंगलो
251 जायेत द्वौ वेदावनुब्रुवीत सर्वमायुरियादिति दध्योदनं पाचयित्वा सर्पिष्मंतमश्नीयातामीश्वरौ जनयितवान्।
अथ य इच्छेत्पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन्वेदाननुब्रुवीत सर्वमायुरियादिति दध्योदनं पाचयित्वा
सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवान्। अथ य इच्छेद्दुहिता मे पंडिता जायेत सर्वमायुरियादिति ति
लौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवान्। अथ य इच्छेत्पुत्रो मे पंडितो विजिगीषुः समि
तिंजयः शुश्रूषिता वाचं भाषिता जायेत सर्वान्वेदाननुब्रुवीत सर्वमायुरियादिति माषौदनं पाचयित्वा सर्पिष्मं
तमश्नीयातामीश्वरौ जनयितवान्। यमः। शुक्रशोणितवैकल्याज्जायते कृष्णपिंगलः। एवमुत्पादिताः पुत्रा
म्रियंते नाशतायुषः। कृष्णपिंगल इत्यनेकवर्णोपलक्षणं। एवमुत्पादिता अनिंदितसमयगर्भाधानजनि
ताः जाताः। अशतायुषः संतो न म्रियंते इत्यर्थः। देवलः। अशुद्धदिवसे यस्तां मैथुनार्थं यदि व्रजेत्।
आयुः प्रजाश्च धर्माश्च तस्य पुंसः प्रहीयते। तस्मात्त्रिरात्रं चांडालीं पुष्पितां परिवर्जयेत्। चांडाली चांडालसदृशी।
पुनः स एव। ब्राह्मण्या द्वादशाहं स्यात्तद्दोषं त्वनुधारणं। दशाष्टौ षट्च शेषाणां विधीयंते नु पूर्वशः। एते चापि

अहं पूर्वं वर्जयित्वा रजस्वलां । अशुद्धस्नातां ततो भार्यां समीयुः पुत्रकारणादिति । तदेतदस्नाताभिप्रायेणाशु
द्धस्नातामिति अशुद्धा सतिस्नाता । गयादाशीये शातातपः । रात्रौ च तुर्थ्यां पुत्रः स्यादल्पायुर्धनवर्जितः ।
पंचम्यां सुसुता नारी षष्ठ्यां पुत्रस्तु मध्यमः । सप्तम्यामप्रजा योषिद् अष्टम्यामीश्वरः सुतः । नवम्यां सुभगा कन्या द
दशम्यां प्रभगः सुतः । एकादश्यां मध्यमा स्त्री द्वादश्यां पुरुषोत्तमः । त्रयोदश्यां सुता तस्य वर्णसंकरकारिणी ।
धर्मध्वजश्चतुर्दश्यां पंचदश्यां पतिव्रता । विद्यादिगुणसंपूर्णः सत्यवादी जितेंद्रियः । आश्रयः सर्वभूतानां षो
डश्यां जायते पुमान् । अंगिराः । रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला । साध्वाचारा न तावत्स्यात्स्नातापि
स्त्री रजस्वला । यावत्प्रवर्तमानं तु रजो नैव प्रवर्त्तते । देवलः । अतीर्थगमनात्पुंसस्तीर्थसंग्रहणात्स्त्रियाः ।
उभयोर्धर्मलोपः स्याद्द्वेषेण तु विशेषतः । यौगपद्ये तु तीर्थानां विवाहक्रमशो व्रजेत् । रक्षणार्थमपुत्रां वा ग्र
हणक्रमशोपि वा । तीर्थं भृगुः । संगृहनं संगोपनं । अपुत्रां वेति अपुत्रामादौ व्रजेदित्यर्थः । ग्रहणेति । अ
पुत्राणामेवानेकासां स्त्रीणां मध्ये तु ग्रहणक्रमेण प्रवृत्तिः कार्येत्यर्थः । वाराहः । न नखदशनविक्षतानि कुर्यादृ
तुसमये पुरुषः स्त्रियाः कथंचित् । यमः । यदा तु दक्षिणे पार्श्वे देहे वहति मारुतः । तदा रात्रौ भजेत्कांतां पर्ववर्जं व
र्जं सकृद्बुधः । तथा । नोपगच्छेत्प्रमत्तोपि स्त्रियमार्तवदर्शने । समाने शयने चैव न शयीत तया सह । रजसाभिप्लु

२५२ 252 तां नारीं रजस्वलामुपगच्छतः। प्रज्ञा तेजो यशश्चक्षुरायुश्चैव प्रहीयते। तां विवर्जयतस्तस्य रजसा समभिप्लुतां। प्रज्ञा
लक्ष्मीर्यशश्चक्षुरायुश्चैव प्रवर्द्धते। रजसेति यावद्रजोनिवृत्तिर्न भवति तावद्गमनार्हकालेपि दोषः। पुनः स एवाह।
ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति। भ्रूणहत्यामवाप्नोति गर्भं प्राप्य विनाशकः। बौधायनः। ऋतौ
नोपैति यो भार्यामनृतौ यो नु गच्छति। तुल्यमव्रतयोर्दोषमयोनौ यश्च सिंचति। रेत इति शेषः। मनुः। संवत्स
रं प्रतीक्षेत द्विषन्तीं योषितं पतिः। ऊर्ध्वं संवत्सरात्त्वेनां दायं हृत्वा न संविशेत्। अतिक्रामेत्प्रमत्तां या मत्तं रोगा
र्त्तमेव वा। सा त्रीन्मासान्परित्याज्या विभूषणपरिच्छदा। पतिविषयसंजातद्वेषां स्त्रियं संवत्सरं यावत्प्रतीक्षेत।
तत ऊर्ध्वमपि द्विषन्तीं स्वदत्तमलंकारादि धनं हृत्वा नोपगच्छेत्। अन्नाच्छादनमात्रमेव देयं। उन्मत्तं पतितं
क्लीबमबीजं पापरोगिणं। न त्यागोस्ति द्विषन्त्याश्च न च दायापवर्जनं। अयं तु ऋतुकालनियमः अजातपुत्र
स्यैव मनुना ज्येष्ठस्य प्राशस्त्याभिधानात्। इतरेषां कामत्वनिर्देशाच्च। यथा। ज्येष्ठेन जातमात्रेण पुत्री
भवति मानवः। यस्मिन्नृणं संनयति येन चानन्त्यमश्नुते। स एव धर्मजः पुत्रः कामजानितरान्विदुरिति
केचित्। ऋतुकालाभिगामी स्यादिति। किमयं विधिर्नियमः परिसंख्या वा। नाद्यः रागप्राप्तत्वात्। नान्त्यः
दोषत्रयग्रस्तत्वात्। अतो नियमं प्रपेदिरे न्यायविदः। कः पुनरेषां भेदः। विधिरत्यन्तमप्राप्तौ नियमः

पाक्षिके सति। तत्र चान्यत्र च प्राप्तौ परिसंख्या विधीयते। अस्यार्थः। केनापि प्रमाणेन यत्र प्राप्तिस्तत्र विधा
नं विधिः। यथा अष्टकाः कर्त्तव्या इति स्मार्त्तमुदाहरणं। दर्शपौर्णमासाभ्यां यजेतेति श्रौतं। नियमस्तु य
त्र सामान्यतो मानान्तरेण प्राप्तावन्यतरस्य पक्षस्यानुवादेन विधिशब्दः स नियमः। यथा। याजनाध्यापन
प्रतिग्रहैर्ब्राह्मणो धनमर्जयेदिति। धनार्जनस्य रागतः प्राप्तौ पक्षप्राप्तप्रतिग्रहादिना धनार्जनमनूद्य विधिः।
एकत्र धनार्जने कृष्यादीनां साधनत्वात् प्राप्तौ पक्षप्राप्तानुवादेन समे यजेतेति श्रौतमुदाहरणं। तत्र देश
स्य सामान्यतो र्थापत्त्या प्राप्तौ समविषमयोर्द्वयोरपि देशयोरेकस्या यजिक्रियायाः संबंधासंभवात्। समस्य पा
क्षिकप्राप्तौ अनुवादेन समत्वेनाप्राप्तौ विषमव्यवच्छेदेन विधिरिति नियमः। पंच पंचनखा भक्ष्या अत्र
सर्वेषां पंचनखानां रागप्राप्ते भक्षणे एकस्यां भुजिक्रियायां शशवानरमांसयोरुभयोरपि मांससंबंधसंभवा
त्। तत्र च रागत एव प्रवृत्तिर्न तु विधिरिति। वानरमांसभक्षणनिवृत्तिरेव वाक्यार्थः। शास्त्रं हि प्राप्तं निषेध
यति। श्रौतोदाहरणं तु। इमामगृभ्णन्रशनामृतस्येत्यादिमंत्रेण रशनाग्रहणं मंत्रलिंगात्। सामान्यतः प्रा
प्ते मेकया ग्रहणक्रियया रशनाद्वयग्रहणासंबंधसंभवे अश्वाभिधान्यनुवादो गर्दभाभिधानीनिवृत्तिं बोधयति
रशनाग्रहणेनैवाश्वाभिधानीयग्रहणस्य प्राप्तत्वात्। तस्मात् गर्दभाभिधानीं नादत्ते इति वाक्यार्थः। अतो दोष

२५३ द्वयवान्नियमः। दोषजयवतीपरिसंख्येति। उभयोरप्येकत्रसंभवेल्लाघवान्नियमः कल्प्यते। नचनियमेदृष्टा
र्थताकल्पनागौरवं। तस्यफलमुख्यत्वेनादोषत्वादिति। अतोभार्यामुपेयादितिनियम एव। अऋत्वनृतुसा
253 धारण्येनप्राप्तौ ऋतुगमनत्वेन पक्षप्राप्तत्वस्यगमनस्यविधिः समयेयतेतिवत्। अत्रकेचित्। अनुत्पन्न
पुत्रस्यचायंनियमः। ब्राह्मणोहवै त्रिभिर्ऋणवान्जायते। यज्ञेनदेवेभ्यः। प्रजयापितृभ्यः। स्वाध्या
येन ऋषिभ्यः। इत्येतत्त्वत्यश्रुतिमूलत्वेस्यसंभवति। मूलांतरकल्पनायामस्यापुक्तत्वात्। तस्मा
दृतुगमास्तुपुत्रार्थीसंविशेदार्तवेस्त्रियमितिच। ततोप्येतच्छ्रुतिमूलकत्वमवगम्यते। पुत्रोत्पादनशा
स्त्रस्यैकपुत्रोत्पादनेनैवचरितार्थत्वात्। कामजानितरान्विदुरितिचदर्शनादजातपुत्रस्यैवनियमः। दशा
स्यांपुत्रानाधेहीतिमंत्रस्तुबहुपुत्रप्रशंसापरः। जातपुत्रस्यापिऋतुकालगमननियमोनदशस्वेवावतिष्ठति
स्वदारनिरतःसदेति। नित्यंस्वदारतुष्टःस्यान्नान्यभार्यामुपगच्छेदितिविधानात्। परिसंख्यैववाक्यान
र्थकत्वात्। स्वदारगमनस्यैवप्राप्तत्वात्। ऋतावगमनेदोषश्रवणान्ननियमविधिः। तत्र ऋतुस्नातांतु
योभार्यांसन्निधौनोपगच्छति। घोरायांभ्रूणहत्यायांपच्यतेनात्रसंशयः। इत्यगमनेविशेषंविनाभ्रूणह
त्यादोषश्रवणात्। यदुक्तंकामजानितरान्विदुरितिमनुवचनंतज्ज्येष्ठपुत्रप्रशंसापरमितिभाति। किंच

ऋतौ भार्यामुपेयादित्येकमेव वाक्यं । अजातपुत्रापेक्षया नियमविधिर्जातपुत्रापेक्षया परिसंख्येति विप्रति
षिद्धमेतत् । न तु सर्वत्र परिसंख्यैव पुत्रोत्पादनविधेरगमननिंदार्थवादस्य च निर्विषयापत्तेः । तथाह गौतमः ।
ऋतावुपेयादनृतौ वा प्रतिषिद्धवर्ज्जं । याज्ञवल्क्योप्याह । यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन् । पर्व
वर्ज्जं व्रजेच्चैनां तद्व्रतो रतिकाम्यया । पर्ववर्जमिति तदा ऋतावनृतौ वोभयत्र संबध्यते । ऋतुः स्वाभाविकः
स्त्रीणां रात्रयः षोडश स्मृताः । व्याध्यादिना तु न्यूनाधिककालेपि भवतीति दिक् ॥ ॥ अथ रजस्वलाविधिः ॥
तत्र हारीतः । रजः प्राप्ता चेदधः शयीत न देवकार्यं कुर्यात् । भूमौ कार्ष्णायसे पाणौ मृण्मये वाश्नीयात् । अथ
इति खट्वानिवृत्तिः । कार्ष्णायसं लोहपात्रं । एवं तैजसपात्रे रजस्वलाभोजनं निषिद्धं । मृण्मयादिपात्रविशेष
विधिबलादिति । शातपथश्रुतिश्च । अथ यस्य जाया मार्त्त्वं विंदेत त्र्यहं कांस्येन पिबेदहतवासा नैनां वृषलो न
रवान्यपहन्यादिति । कंसे कांस्येन पिबेन्नाचरेत् । अहतवासा रजोतिरिक्तमलशून्यवस्त्रा । नोपहन्यात् । शूद्र
जातीयो नैनां स्पृशेत् । त्र्यहमिति सर्वत्रान्वेति । न नखान्निकृंतेन्नोपमार्जयेत् । वसिष्ठः । त्रिरात्रं रजस्वला
अशुचिर्भवति । सा नाञ्ज्यात् । नाप्सु स्नायात् । अधः शयीत । न दिवा स्वप्यात् । नाग्निं स्पृशेत् । न रज्जुं सृजेत् ।
न दंतान्धावयेत् । न मांसमश्नीयात् । न ग्रहान्निरीक्षेत । न हसेत् न किंचिदाचरेत् । न खर्वेण पिबेत् । नांजलिना

कंसे ५८

२५४ पिबेल्लोहितायसेनवा। नरज्जुं सृजेत् नरज्जुं कुर्यादित्यर्थः। खर्वेणवामपाणिना। लोहितायसेन ताम्रपा
त्रेण। याखर्वेणपिबति तस्यैखर्वोजायते। याऽङ्क्ते तस्यै काणोजायते। अभ्यक्ते तस्यै दुश्चर्मा। याकेशान्प्रति
लिखति तस्यैखलतिः। यादंतान्धावते तस्यै श्यावदंतः। यानखानिनिकृंतति तस्यै कुनखी। याकृणत्ति
तस्यैक्लीवः। यारज्जुं सृजति तस्यैदंतुरः। याखर्वेणपिबति तस्या उन्मादकोजायते। तत्र लैलैस्तुरी
यको यामलवद्वाहाः। स्कांदे। स्त्रीधर्मिणी त्रिरात्रं तु स्वमुखं नैव दर्शयेत्। स्ववाक्यं श्रावयेन्नापि यावत्स्ना
तान शुद्ध्यति। सुस्नाता भर्तृवदनमीक्षेतान्यस्य कस्यचित्। अथ मनसि ध्यात्वा पतिं भानुं विलोकयेत्॥
शौचमुक्तं च वरेणुना। स्त्रीणां स्नानदिने शौचं मृद्भिः षष्टिभिरेव च। ततो दश दशन्यूनं द्वित्रियाद्यनुपूर्वशः।
स्नानानंतरं पुनारजोदर्शने हारीतः। रजस्वला यदि स्नाता पुनरेव रजस्वला। अष्टादशदिनादर्वागशुचि
त्वं न जायते। एकोनविंशतेरर्वागेकाहं स्यात्ततो द्व्यहं। विंशत्प्रभृत्युत्तरेषु त्रिरात्रमशुचिर्भवेत्॥ अष्टादश
दिनादर्वाक् सप्तदशदिनाभ्यंतर इति। एवमुत्तरत्रापि। यत्तु। चतुर्दशदिनादर्वागशुचित्वं न विद्यते। इति
स्मृतिस्मृतिवचनात्। तत्तु स्नानदिनप्रभृतित्वमभिप्रेतमतो न विरोधः। अयं च विंशतित्वनिषेधो यस्या
विंशतिदिनोत्तरकालमेव प्रायशो रजोदर्शनं तद्विषयं। तस्याः पुनः प्रौढयौवनायाः प्रागेवाष्टादशदिनात्

प्राचुर्येण रजोनिर्गमस्तस्यास्त्रिरात्रमेवाशौचं । त्रयोदशादिनादूर्ध्वं रजो दृष्टवती यदा । अष्टादशाहात्प्रागेवापि
त्रिरात्रमिति निश्चयः । एकादशाहे त्वेकाहं द्व्यहं तु द्वादशेऽहनि । ऊर्ध्वं त्रिरात्रं विज्ञेयमिति कुण्डकेनोदितं । त्रयोद
शाहादूर्ध्वं तु युवती पुष्पिणी भवेत् । वयोगुणविशेषेण त्रिरात्राच्छुचिरिष्यते । ऋतुस्नाता तु या प्रोक्ता पुनरे
व रजस्वला । स्नानात्सप्तदशाहे तु शौचं नैव शुचिर्भवेत् । अविस्नाते मले सा च मलवद्दूसना यदि । कृतं गेहेषु
जुष्टं स्या च्छुचिस्तस्यास्त्रिरात्रतः । निःसंदेहे परिस्नात मात्रं वं शुद्धिकारणं । संदेहमात्रे स्नानं स्यादित्युवाच
प्रजापतिः । पराशरः । स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला । पात्रांतरेण तोयेन स्नानं कृत्वा व्रतं चरेत् । व्रतं
रजस्वलानियमं । तथा । सिक्तगात्रा भवेदद्भिः सांगोपांगा कथंचन । न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धार
येत् । उशनाः । ज्वराभिभूता या नारी रजसा च परिप्लुता । कथं तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्मणा । च
तुर्थेऽहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियं । सा सचैलावगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत् । दश द्वादश कृत्वो
वा आचामेच्च पुनः पुनः । अंते च वाससां त्यागस्ततः शुद्धा भवेत्तु सा । दद्याच्छक्त्या ततो दानं पुण्याहेन विशु
ध्यति ॥ अथ गर्भवतीधर्मः ॥ तत्र पाद्मे दितिं प्रति कश्यपवचनं । न चत्वरे ह्युपविशेन्मुसलोलूखला
दिषु । जलं न चावगाहेत शून्यागारं विवर्जयेत् । वल्मीकं नाधितिष्ठेत न चोद्विग्नमना भवेत् । न शयी

२५५ नोन्नर शिरा नत्वप्रत्यक्शिरा क्वचित्। नवस्त्रहीना नोद्विग्ना न चार्द्रचरणा सती। नोच्छिष्टोच्छिष्टमलिना संध्यायां मुक्तमूर्द्ध
जा। धौतवासाः शुचिर्नित्यं सर्वमंगलसंयुता। पूजयेत्प्रातरशनात्प्राक् गोविप्रान् श्रियमच्युतं। स्त्रियो वीरवतीश्चार्च्येत्स्र
255 गंधबलिमंडनैः। पतिव्रताचौपतिष्ठेत ध्यायेत्कोष्ठगतं च तं। अथैतत्पतिधर्माः। तत्र याज्ञवल्क्यः। दोहदस्या
प्रदानेन गर्भो दोषमवाप्नुयात्। वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः। गोपालानुग्रहे। तीर्थयात्रां न च
श्मश्रुवपनोदधिदर्शनं। पर्वतारोहणं चैव न कुर्याद्गर्भिणीपतिः। स्मृत्यंतरे। सिंधुस्नानं द्रुमच्छेदं वपनं प्रेतवाह
नं। विदेशगमनं चैव न कुर्याद्गर्भिणीपतिः। पित्रोः प्रेतविधानं च वर्जयित्वा तदिष्यते। अत्रापवादमाह स्मृतिः।
वपनं मैथुनं चैव श्राद्धभोजनमेव च। मासात्तु सप्तमादूर्ध्वं न कुर्याद्गर्भिणीपतिः। वपनं तीर्थस्यापि श्राद्धके तथा।
राजा योगी गुरुं धीश्च माता पित्रोस्तु जीवतोः। मुंडनं सर्वत्र तीर्थेषु न कुर्याद्गर्भिणीपतिरिति। तदाहृत्य पितीर्थेमननः
प्राशस्त्यादिना प्राप्तं क्षौरं निषेधयति। न नैमित्तिकमिति। क्षौरं नैमित्तिकं कुर्यान्निषेधे सत्यपि ध्रुवमित्युक्तेः। अत्रा
पि विशेषो गोविंदार्णवे। मुंडनस्य निषेधे तु कर्तनं वा विधीयते। छेदनं दृषदा वापि न क्षुरेण कदाचनेति। अत्र
राज २ केचित्सर्वपदं तीर्थविपरत्वेन संकोचयंतः। प्रयाग एव वपनमिच्छंति। प्रयागे वपनं कुर्याद्गयायां पिंडपातनं। दाराणां स्यात्तनुं त्यजेत्।
दानं दद्यात्कुरुक्षेत्रे गयायां पिंडपातनमिति। वाक्यपर्यालोचनया वपनस्य प्रयागमात्रकर्तव्यत्वस्थितेः। सर्व

तीर्थपदमपि सर्वाणितीर्थान्यस्मिन्निति व्युत्पत्त्याप्रयागमात्रपर मन्यथातिप्रसंगादिति वदंतिच । तन्न ।
वहुव्रीह्यादितः कर्मधारयस्यैवोपस्थितिलाघवेन निषादस्थपतिन्यायेनाश्रयितुमुचितत्वात् । प्रयागमात्रपरत्वे
च वहुवचनानुपपत्तेः । नचास्य ग्रहैकत्ववदविवक्षाशंका । तत्र प्राजापत्यान् पशूनालभेत इति वाक्यांतरेण संख्याभेदे
वगते तेनैकत्ववाधात् । नैवमिहश्रुतवहुत्ववाधकं पश्यामः । प्रयागे वपनं कुर्यादिति वचनावधृत
प्रयागमात्रपरत्वमेव वाधकमिति चेत् । तस्यां किं गयापिंडदानेन काश्यां वा मरणेन किं । किं कुरुक्षेत्रदानेन
प्रयागे वपनं यदि स्यादिति तत्प्रयाग वपनस्यसातिशयफलजनकबोधनपरत्वात् । अन्यथा त्रिदोषापरिहरणापद्ये
त । अथाश्रयेणापि सा तथापि कथमसौ त्यजेत किं वाक्यानि विरुद्धेरन् । तथाहि प्रभासखंडे । आदौ तु वपनं कु
र्यात्सोमेश्वरसमीपतः । शंकरं मनसाध्यायन्केशांस्तत्रपरित्यजेत् । काशीखंडेपि । तीर्थोपवासः कर्त्तव्यः शिर
सो मुंडनं तथेत्युक्तं । तथा । मुंडनं चोपवासश्च गौतम्यां सिंहगे रवौ । कन्यागते तु कृष्णायां न तु तत्तीरवासिनां । तथा ।
गंगां प्राप्य सरित्श्रेष्ठां कल्पन्ते पापसंचयाः । केशानाश्रित्य तिष्ठंति तस्मात्तान्परिवापयेत् । स्त्रीणां त्वेतत्स्थाने
५१६ ग्लिद्वयं केशाग्रच्छेदनं सर्वकेशावपनं । विधवानां सदा स्त्रीणां न शस्तं केशधारणं । गर्हां च लभते केशैर्विशेष
णाच्युतेपतौ । गंगां संप्राप्य यो धीमान्मुंडनं नैव कारयेत् । क्रियास्तस्याक्रियाः सर्वास्तीर्थद्रोही भवेन्नर इति गंगायां

२५६ वपनं नित्यं तीर्थमात्रे तु काम्यं। यत्रान्यत्रापि नित्यत्वं वाचनिकं। तत्रापि स्यादेव बाधकाभावात्। तथा। गंगायां भा
स्करे क्षेत्रे मुंडनं यो न कारयेत्। स कोटिकुलसंयुक्त आकल्पं रौरवं वसेदिति। भास्करक्षेत्रं च न प्रयागक्षेत्रमेव।
तस्य प्रजापतिक्षेत्रतया प्रसिद्धेः। कौर्मादित्यमाहात्म्ये च। तत्र यः सवितुः क्षेत्रे प्राणांस्त्यजति मानवः। स सूर्य
लोकमास्थाय सूर्यवन्मोदते दिवीति। तस्यापि भास्करक्षेत्रत्वावगतेः। एवं गंगायां भास्करक्षेत्रे इति विशि
ष्टविधिमाश्रित्य प्रयागावच्छिन्नगंगायामेव मुंडनविधिः। केवलगंगायां तन्निषेधादिति निरस्तं। निषेध
स्यानाकरत्वात्। गंगायां भास्करक्षेत्रे मातापित्रोर्गुरौ मृते। आधाने सोमपाने च वपनं सप्तसु स्मृतमिति।
मधुमत्यां च शांडिल्ये इति क्वचिदपि पाठः। केवलगंगायामपि मुंडनविधानाच्च। तत्रापि भास्करक्षेत्रे गंगाया
मिति विशिष्टविध्याश्रयणे सप्तस्विति संख्याविरोधात्। किंच। सर्वतीर्थपदस्य प्रयागमात्रपरत्वे। व
र्जयित्वा कुरुक्षेत्रमित्यादिनिषेधोऽनर्थकः स्यात्। न चायज्ञिया वै माषा मौद्गश्चरुः अपशवो वा। अ
न्यो गोऽश्वेभ्य इति मुद्गगवादिप्रशंसार्थो निषेधवत्। तीर्थांतरस्य प्रतिनिधितयापि प्राप्तेः। न च प्रमाणां
तरविरोधोपीति न किंचिदेतत्। अपि च माहात्म्ये सर्वतीर्थानां वक्ष्ये यद्भुक्तिमुक्तिदमित्युपक्रम्य बहूनि
तीर्थान्युक्त्वोक्तं ते सर्वशेषतया मुंडनं चोपवासश्च सर्वतीर्थेष्वयं विधिरित्युक्तं न च सर्वपदस्य सकलतीर्थपर
वर्जयित्वा कुरुक्षेत्रं पुष्करं नैमिषं गयां। माहेमातेग्रहस्यस्य क्षेपदेत्वयज्जनः। यतीनां तु कृतो प्रोक्तं यथेष्टं ब्रह्मचारिणां ४१

त्वे सातिशयजलस्थानादेरपि तीर्थत्वाभिधानात् । स्वदेशं ततः प्रस्रवणादौ तुलसीक्षेत्रादावपि मुंडनोपवास
प्रसंग इति वाच्यं । सर्वपदस्य च योगरूढत्वाविशेषवाक्योपात्तमुंडनोपवासकाधिकरणक महातीर्थपरत्वात् ।
सर्वत्वमधिकारिकमिति न्यायात् । तथाहि । पूर्णाहुत्या सर्वान्कामानवाप्नोतीत्यत्राश्वमेधादिजन्यकामावाप्तेः ।
पूर्णाहुतिमात्रेणाशक्यत्वात् । यत्र योधिकृतस्तज्जन्यकामावाप्तिपरः सर्वशब्द इति । यद्वा तीर्थश्राद्धं समाचरे
दिति । योयः कश्चित्तीर्थयात्रां च गच्छेत् । ससंयुतः स च पूर्वं गृहे स्वेकृतोपवासः शुचिरप्रमत्तः । संपूजयेद्भ
क्तिनम्रो गणेशं । देवान्पितॄन्ब्राह्मणांश्चैव साधून्धीमान्विप्रो वित्तशाठ्याश्रयत्वात् प्रत्यागतश्चापि पुनस्तथैव
देवान्पितॄन्ब्राह्मणान्पूजयेच्चेत्यादौ तीर्थश्राद्धादिप्रयोजकतया तुलसीक्षेत्रादिव्यावृत्तं तीर्थपदाभिधेयं त
थापि किं चिह्नं वाच्यं । तदेवं मुंडनादिविधिषु सर्वतीर्थपदेनावेक्षता । श्राद्धमुंडनोपवासानामेकाधिकरणकत्वा
भ्युपगमात् । तेन यत्र तीर्थयात्रादिविधानेन तीर्थं विहितं तत्रैव मुंडनमुपवासश्चेति । गोविंदार्णवे । स्नानादि
कं विधायादौ तीर्थं मुंडनमाचरेत् । तीर्थोपवासनियमं कृत्वा श्राद्धं समाचरेत् । अत्रैवमादिवाक्यबलात्तीर्थ
प्राप्तिदिन एवोपवासः । तद्यथा । तीर्थमासाद्य कुर्वीत नरः श्राद्धे ह्युपोषणं । उपवासविशुद्धात्मा कर्त्तव्यं कर्त्तु
मर्हतीति । यत्तु तीर्थप्राप्तेः परमुपवासः । श्रूयते सम्प्रदायो यः काम्यः । न तु तीर्थनिमित्तकः मानाभावात् । वपनं

२५७ तु मुख्यतीर्थ एव न तत्प्रासंगिकतीर्थेष्वपि । यथा प्रयागे ऋणमोचनपापमोचनादीनि प्रासंगिकतीर्थानि त
त्र सर्वत्र स्नानतर्पणश्राद्धान्येव भवंति । संवत्सरे द्विमासोने पुनस्तीर्थं व्रजेद्यदि । मुंडनं चोपवासश्च ततो यत्नेन का
257 रयेत् । प्रयागे प्रतियात्रं तु योजनत्रितयादपीत्यत्र यत्र मुंडननिषेधस्तत्रोपवासोपि निषिध्यते । सहयोगिनि
र्दिष्टानां सहैव प्रवृत्तिः सहैव निवृत्तिरिति न्यायात् । अथात्रायं क्रमः । आदौ तीर्थसीमानं गत्वा यानं परित्यजेत्
चनिकरं तीर्थं समीपं कृत्वा साष्टांगं प्रणमेद्भुवि । दंडवदित्यपि पाठः । अत्याल्पपादावाचम्य हृद्यपो द्दोकनिकां ददेत् ।
दत्वोद्धृतजले नैव आदौ स्नायाद्यथाविधि । पश्चात्तीर्थे यथान्यायं स्नानं कुर्यात्सुभक्तितः । यानानि तु परित्यज्य भा
व्यपादचरैर्नरैः । भुवि त्वालोठनं तस्मिन्नत्र कृत्वा कार्पटिको हृतिं । प्रथमं चालये तीर्थं प्रणवेन जलं शुचिः । अ
वगाह्य ततः स्नायाद्यथावन्मंत्रयोगतः । मंत्र उक्तः प्रभासखंडे । ॐ नमो वामदेवाय शितिकंठाय दंडिने । रुद्रा
य चापहस्ताय चक्रिणे वेधसे नमः । सरस्वती च सावित्री वेदमाता गरीयसी । सन्निधात्री भवत्वत्र तीर्थे पापप्रणा
शिनी । सर्वेषामेव तीर्थानां मंत्र एष उदाहृतः । इत्युच्चार्य नमस्कृत्य स्नानं कुर्याद्यथाविधि । उपवासं ततः कुर्या
त्तस्मिन्नहनि सुव्रते । तीर्थोपवासाद्देवेशि अधिकं नास्ति किंचन । पापानां पापशमनं सतामीप्सितकारकं । उप
वासो विनिर्दिष्टो विशेषाद्देवताश्रमे । तीर्थोपवासं कुर्वीत तस्मात्तव वरानने । एवं स्नात्वा नित्यकर्म देवतार्चनानंतरं

यद्य इति ६४ कृत्वा वपनं कारयेत्। तत्प्रकारश्चोक्तोऽपरार्के। प्राङ्मुखोदङ्मुखो वापि वपनं कारयेत्सुधीः। केशश्मश्रुलो
मनखान्युदकसंस्थानि धावयेत्। दक्षिणं कर्णमारभ्य धर्मार्थं पापसंक्षये। हित्वाद्यं तत्र संस्कारे शिखाद्यं
तं शिरो वपेत्। अत्र श्मश्रुक्रमानुरोधाद्दक्षिणकर्णमूलादारभ्य शिरो वापयित्वा श्मश्रुवापनं। ततो नखनि
कृंतनं च कारयितव्यं। ब्राह्मणादित्रयस्य वपनं शिखां विहाय। सदोपवीतिना भाव्यं सदा बद्धशिखेन चेत्यु
क्तेः। वपनमंत्रश्च। यानि कानि च पापानि ब्रह्महत्यासमानि च। केशानाश्रित्य तिष्ठंति तस्मात्केशान्वपाम्यहं।
तथा। आत्मनः शुद्धिकामो वा पितॄणां तृप्तिहेतवे। वपनं कारयिष्यामि तीरेऽहं तव जाह्नवि। संकल्पवाक्यं तु।
ॐ अद्य गंगापतिष्यन् यावच्छेदनीयलोमसमसंख्यवर्षसहस्रावच्छिन्नस्वर्गलोकमहितत्वकामो गंगायां
वपनमहं करिष्ये इति॥ ननु वपनं करिष्ये इति। वपनस्य नापितकर्तृकत्वात्कथं साधु। सत्यं। अत एव क्वाध्वे
पि कर्मणि यजमानस्यैव संकल्पवदुपपत्तेः। तस्मात्केशान्वपाम्यहमिति मंत्रेऽप्यंतर्भावितणिजर्थोऽपि द्रष्टव्यः।
द्वितीयमंत्रे २ = तथा मंत्रे द्वितीये वपनं कारयिष्यामीति प्रयुज्यते सम्यक्। स्थलोपविष्टस्तथा वापयेद्यथा केशनखादीनि स्व
यमेव गंगायां पतंतीति। गंगाभक्तिप्रपन्नस्यास्य लोमानि न निक्षिपेदित्युक्तेः। ततो मृज्जलमये शरीरमनुलिप्य स
द्यः स्नानं कृत्वा तीर्थोपवासं च संकल्प्य श्राद्धमारभेत। तत्र सति संभवे रात्रौ न कार्यं। दैवात्प्राप्ते तु तीर्थे रात्रावपि का

कार्यमेव । प्राप्तैरेवसदाकार्यमिति प्राप्तमात्राधिकारिकत्वादितिदिक् ॥ इतिप्रासंगिकंपरिसमाप्यप्रकृतिरभि
धीयते ॥ अथशास्त्राधिकारिणः ॥ तत्रमनुः । निषेकादिश्मशानांतोमंत्रैर्यस्योदिताःक्रियाः । तस्यशास्त्रेऽधि
कारोस्मिन्ज्ञेयोनान्यस्यकस्यचित् । विदुषाब्राह्मणेनेदमध्येतव्यंप्रयत्नतः । शिष्येभ्यश्चप्रवक्तव्यंसम्यङ्नान्ये
नकेनचित् । अन्यस्यशूद्रस्यामंत्रसंस्कृतत्वात् । यथाहयमः । शूद्रोप्येवंविधःकार्योविनामंत्रेणसंस्कृतः ।
नकेनचित्समसृजच्छंदसातंप्रजापतिः । तेनश्रुतिस्मृत्यध्यापनंशूद्राणांनिषिद्धं । अधिकारोध्ययनश्रवणा
दिविषयः । अत्रक्षत्रियवैश्ययोरप्यध्ययनएवाधिकारोनतुप्रवचने । ब्राह्मणस्यैवतूभयत्राधिकारः ।
यदुक्तंविदुषेति । ब्राह्मणेनेत्येतत्प्रवचनमभिप्रेत्योक्तं । अध्ययनेतुतदविवक्षितं । तेनक्षत्रियवैश्ययो
रपितत्सिध्यति । तथादशमाध्याये मनुः । अधीयीरंस्त्रयोवर्णाःस्वकर्मस्थाद्विजातयः । प्रब्रूयाद्ब्रा
ह्मणस्त्वेषांनेतराविितिनिश्चयः । सर्वेषांब्राह्मणोविद्वान्वृत्त्युपायान्यथाविधि । प्रब्रूयादितरेभ्यश्चस्व
यंचैवतथाभवेत् । वैशेष्यात्प्रकृतेःश्रैष्ठ्यान्नियमस्यचधारणात् । संस्कारस्यविशेषाच्चवर्णानांब्राह्मणः
प्रभुः । एवंचस्त्रीणामपिशूद्रसाम्यकथनात् । निषेधेसिद्धेपिभर्त्रासहभावेनाधिकारःसाध्यते नस्वातं
त्र्येण । यत्रचमंत्रपाठादौविशेषविधिस्तत्रस्वातंत्र्येणापि । एवंचवेदाध्ययनमात्रस्यैवाभावेननतुतदर्थज्ञान

साध्याग्निहोत्राद्यभावेपि पुराणेतिहासादिश्रवणानिषेधात्तन्मूलकानांधर्माणांशूद्रेष्वनिषेधः। तथा
श्रीमद्भागवते। स्त्रीशूद्रद्विजबंधूनांत्रयीनश्रुतिगोचरा। इतिभारतमाख्यानंकृपयामुनिनाकृतं। तथा।
श्रावयेच्चतुरोवर्णानिति शूद्राणामपिपुराणश्रवणानिषेधात्। तन्मूलकानांधर्माणांशूद्रेष्वविरोधः।
तथास्मार्त्ताअपिकेचिद्धर्मा विप्रमुखात्कृता अनुष्ठेयाः। नमस्कारेणमंत्रेणपंचयज्ञान्नहापयेदितिदर्श
नात्। अथैतदाचरणाचरणफलं कोर्म्मे। इत्येवमखिलंप्रोक्तमहन्यहनिवैमया। ब्राह्मणानांकृतत्वानाम
पवर्गफलप्रदं। नास्तिक्यादथवालस्याद्ब्राह्मणोनकरोतियः। सयातिनरकान्घोरान्काकयोनौचजायते।
नान्योविमुक्तयेपंथामुक्त्वाश्रमविधिंस्वकं। तस्मात्कर्माणिकुर्वीततुष्टयेपरमेष्ठिनः। श्रीभागवतेपि। यद
त्रक्रियतेकर्मभगवत्परितोषणं। ज्ञानंयत्तदधीनंहिभक्तियोगसमन्वितं। नारदीये। भक्त्यासिद्ध्यंतिकर्मा
णिकर्मभिस्तुष्यतेहरिः। तस्मिंस्तुष्टेभवेज्ज्ञानंज्ञानान्मोक्षमवाप्नुयात्। भक्तिर्भक्त्यैवकर्त्तव्यातथाकर्माणि
भक्तितः। तथाहीनानिकर्माणिनसिध्यंतिकदाचन। कायेनवाचामनसेंद्रियैर्वाबुद्ध्यात्मनावाप्रकृतेःस्व
भावात्करोतियद्यत्सकलंपरस्मैनारायणायेतिसमर्पयेत्तत्॥ इतिश्रीजम्बूकश्मीरतिब्बताद्यनेकदेशा
धीश रघुवंशमुक्तामणि श्रीरणवीरसिंह महाराज कारितः रणवीरसदाचाररत्नाकरः समाप्तः